Digitized by Arya Samaj Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

131026

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय

131026

131026

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

12

C

Vol. 57
2002

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
उतम् मे गोपाय

५७ वर्षे
१-२ अङ्कौ

ज्येष्ठ-भाद्रपदपूर्णिमे
जून-सितम्बर, २००२ ई.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय
श्रुतम् मे गोपाय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

131026

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

131026

सम्पादकौ

डॉ. राजारामशुक्लः
निदेशकः, अनुसन्धानसंस्थानस्य

डॉ. हरिश्चन्द्रमणित्रिपाठी
निदेशकः, प्रकाशनसंस्थानस्य

५७ वर्षे

१-२ अङ्कौ

वार्षिकं मूल्यम् - १०० रूप्यकाणि

जून-सितम्बर, २००२ ई.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परामर्शदातृसम्पादकमण्डलम्

प्रो. राजेन्द्रमिश्रः, कुलपतिः, अध्यक्षः

१. **प्रो.राममनोहरमिश्रः**, वेदवेदाङ्गसङ्कायाध्यक्षः

२. **प्रो. रामपूजनपाण्डेयः**, दर्शनसङ्कायाध्यक्षः

३. **प्रो. नरेन्द्रनाथपाण्डेयः**, साहित्य-संस्कृति-सङ्कायाध्यक्षः

४. **प्रो. ब्रह्मदेवनारायणशर्मा**, श्रमणविद्या-सङ्कायाध्यक्षः

५. **प्रो. सुभाषचन्द्रतिवारी**, आधुनिक-ज्ञान-विज्ञान-सङ्कायाध्यक्षः

६. **डॉ. राजारामशुक्लः**, संयोजकः

❖ ❖ ❖

प्रकाशकः —

डॉ. हरिश्चन्द्रमणित्रिपाठी

निदेशकः, प्रकाशनसंस्थानस्य

सम्पूर्णानन्द्रसंस्कृतविश्वविद्यालये

वाराणसी - २२१००२

मुद्रकः —

श्रीजी प्रिण्टर्स

नाटी इमली

वाराणसी - २२१००२

प्राप्तिस्थानम्—

विक्रय-विभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी-२२१००२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिशिष्टम्-क

ग्रन्थे समुद्धृताः केचन सिद्धान्ताः कार्यकारणभावाश्च

		पृष्ठसंख्या
१.	समवायसम्बन्धेन कार्यत्वावच्छिन्नं प्रति विषयतासम्बन्धेन प्रत्यासत्त्यैव कृत्यादेर्हेतुता।	१६
२.	कार्यसामान्यं प्रति ईश्वरकृतिः कारणम्।	१७
३.	साक्षाद् विषयितात्वस्य ज्ञानत्वव्याप्यत्वात्।	१८
४.	अन्वयव्यतिरेकाभ्यां कार्यत्वावच्छिन्नं प्रति कृतित्वेनैव हेतुत्वम्।	१८
५.	निरुपादानककार्योत्पत्तिप्रसङ्गात्।	१९
६.	गुरुधर्मस्य व्याप्यतावच्छेदकत्वाभावेन साध्यसम्बन्धितावच्छेदकत्वव्याप्तेः।	२०
७.	कार्यत्वं सकर्तृकत्वव्याप्यम्।	२०
८.	अदृश्यस्यापि सावयवतया मूर्त्ततया च।	२१
९.	प्रयत्नवदात्मसंयोगासमवायिकारकक्रियाश्रयान्त्यावयवित्वरूपशरीरलक्षणम्।	२१
१०.	शरीरिप्रयत्नवदात्मसंयोगाव्यवहितोत्तरोत्पन्नतत्पदार्थक्रियां प्रति शरीरसंयुक्ततत्तत्पदार्थवृत्तिप्रयत्नवदात्मसंयोगस्य हेतुता।	२२
११.	घटादिवृत्तिविषयतासम्बन्धेन प्रत्यक्षत्वावच्छिन्नं प्रति घटदिवृत्तिविषयतासम्बन्धेन ज्ञानत्वेन हेतुत्वम्।	२२
१२.	स्पर्शवृत्तिविषयतासम्बन्धेन स्पार्शनं प्रति स्पर्शत्वेन हेतुता।	२३
१३.	पटत्वान्यवृत्तिविषयतासम्बन्धेन ज्ञानं प्रति पटत्वाभावोपहितहेतुता।	२३
१४.	पटत्वादिवृत्तिविषयतासम्बन्धेन ज्ञानं प्रति पटत्वावृत्तिविषयतासम्बन्धेन हेतुता।	२३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिशिष्टम्-ख

प्रकीर्णानि

(क) ग्रन्थे समुद्धृतानां दोषाणां सूची

१. व्यभिचारः।

२. स्वरूपासिद्धिः।

३. भागासिद्धिः।

४. व्याप्यत्वासिद्धिः।

५. सत्प्रतिपक्षः।

(ख) ग्रन्थे समुद्धृतानि वेदवाक्यानि

१. यः सर्वज्ञः स सर्वविद्। पृ. १५।

२. यस्य ज्ञानमयं तपः तस्मादेतद् ब्रह्मनामरूपमन्नं च जायते। पृ. १५।

३. सोऽकामयत बहु स्यां प्रजायेय। पृ. १८।

(ग) ग्रन्थे चर्चिता केचन ग्रन्थकाराः, विचारका वा, तेषां वाक्यानि

१. 'एकामसिद्धिं परिहरतो द्वितीयापत्तेः' पृ. १९।

आत्मतत्त्वविवेकः, पृष्ठसंख्या ३८८;

सम्पादकः—डॉ. केदारनाथत्रिपाठी, वाराणसी, १९८३।

२. 'न च दविष्ठ एव सूर्यादिस्तत्कुर्यादिति साम्प्रतम्, कारकानधिष्ठानात्'।

आत्मतत्त्वविवेकः, पृ. ४२६;

सम्पादकः—डॉ. केदारनाथत्रिपाठी, वाराणसी, १९८३।

३. यत्तु, पृ. १७, १९।

४. भवन्मतेऽपि, पृ. १९।

५. आचार्याः, पृ. १९, २१।

६. उदयनाचार्याः, पृ. २२।

७. नवीनाः, पृ. २२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

१. एषा देशे विदेशे च लब्धप्रसरा त्रैमासिकी संस्कृतपत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं ज्येष्ठ-भाद्रपद-मार्गशीर्ष-फाल्गुनपूर्णिमासु भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेः समालोचना-प्रवृत्तेश्चोद्बोधनं प्रोत्साहनं चास्ति।

४. अस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां स्वोपज्ञ-विचारपूर्णा अनुसन्धानप्रधाना निबन्धाः प्रकाश्यन्ते।

५. प्रकाशितनिबन्धस्य प्रतिमुद्रणानां पञ्चविंशतिः, पत्रिकायाश्च सोऽङ्को दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।

६. अस्यां पत्रिकायां विशिष्टानां हिन्दीसंस्कृताङ्ग्लग्रन्थानां समालोचनाः प्रकाश्यन्ते। तदर्थं ग्रन्थकृद्भिर्ग्रन्थस्य द्वे प्रतिकृती प्रेषयितव्ये।

७. **''वित्त अधिकारी, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी-२२१००२** (उ.प्र.)'' इति सङ्केतेन ('बैङ्कड्राफ्ट' अथवा 'पोस्टल-आर्डर' इत्येतेनैव) मूल्यं प्रेषणीयम्।

८. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः **''सम्पादक, सारस्वती सुषमा, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी-**२२१००२ (उ.प्र.)'' इति सङ्केतेन विधेयः।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणी

१. **पण्डितराजजगन्नाथकाव्ये राष्ट्रियभावना**
प्रो. 'अभिराज'-राजेन्द्रमिश्रः — ११५-१३०

२. **वेदानां व्याख्याने भाषावैज्ञानिकमुन्मीलनम्**
डॉ. कपिलदेवपाण्डेयः — १३१-१३४

३. **ब्राह्मणग्रन्थानां लोकदृष्टिः**
डॉ. हरीश्वरदीक्षितः — १३५-१४०

४. **गोशब्दस्य यास्कीयनिर्वचनम्**
डॉ. महेन्द्रपाण्डेयः — १४१-१४६

५. **आत्मनि प्रमाणम्** (न्यायवैशेषिकदर्शनानुसारेण)
डॉ. सर्वेश्वरराजहंसः — १४७-१५६

६. **जगदीशगदाधरयोर्मतभेदसमीक्षा**
डॉ. रामलालशर्मा — १५७-१६०

७. **योगदर्शने ईश्वरस्य महत्त्वम्**
डॉ. वीना श्रीवास्तवा — १६१-१६६

८. **सविकल्पकप्रत्यक्षमयाः प्राणाः**
डॉ. कमलेशमिश्रः — १६७-१७२

९. **अवधिः पञ्चम्यर्थः**
डॉ. राममनोहरमिश्रः — १७३-१८४

१०. **क्रियाविशेषणविमर्शः**
डॉ. हरिवंशकुमारपाण्डेयः — १८५-२०२

११. **वैदिकबौद्धयोः समानः पन्थाः**
डॉ. हरिप्रसाद-अधिकारी — २०३-२०८

१२. **विष्णुबलिसंस्कारः**
डॉ. वेदान्तं श्रीविष्णुभट्टाचार्यः — २०९-२१२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१३. **श्रीमद्भागवतदर्शने कार्यकारणभावविमर्शः**
डॉ. विन्ध्येश्वरीप्रसादमिश्रो 'विनयः' २१३-२२८

१४. **किं तावत् काव्यतत्त्वम्**
प्रो. रेवाप्रसादो द्विवेदी २२९-२३२

१५. **अभिराजस्याभिराजता** (मधुपर्णीमत्ता-मत्तवारणी-सन्दर्भे)
डॉ. मनुलताशर्मा २३३-२६२

१६. **संस्कृतभाषाशिक्षणम्**
डॉ. श्रीमती लतापन्ततैलङ्ग २६३-२६६

लघु-ग्रन्थमाला

१. **भेदरत्नम्**
महामहोपाध्यायशङ्करमिश्रविरचितं १-३२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

अथेदं प्रकाशमानीयमानं सारस्वत्याः सुषमायाः सप्तपञ्चाशवर्षस्यादिमाङ्क-युगलं विदुषां समीक्षकाणां करकमलेषूपायनीकुर्वन् अमन्दमानन्दमनुभवामि। सारस्वती सुषमा हि स्थापनायाप्रभृत्येव विश्वविद्यालयस्य, एतद्विश्वविद्यालयीयानामन्येषाञ्च विदुषां महत्त्वपूर्णैः शोधालेखैर्बहूपयोगिभिः संस्कृतवाङ्मयमहोदधे रत्नभूतै-र्विशेषतो विश्वविद्यालयीयसरस्वतीभवनस्थपाण्डुलिपिमाश्रित्य सम्पादितै-र्लघुग्रन्थैश्च समध्युषिता विश्वविद्यालयस्यास्य सारस्वतीं सुषमां वर्धयन्ती विराजत इति नास्ति तिरोहितं कस्यापि। इदमस्या अङ्कयुगलं दशशोधनिबन्धैर्लघुग्रन्थरत्नेन चैकेनालङ्कृतं शोभते। तत्र प्रथमतो विश्वविद्यालंयस्यास्य कुलपतिवर्याणां कविमूर्धन्यानाम् **आचार्यश्रीराजेन्द्रमिश्र**महाभागानां कृतिः **'उत्तरबाणभट्टकथा'** इति समलङ्करोत्येनाम्। महाकवेर्बाणभट्टस्य कान्यकुब्जपरित्यागं निमित्तीकृत्य तद्बीजत्वेन महाराजश्रीहर्षस्य सौगतमते श्रद्धातिशय एव प्रतिपादितो मनीषिणा लेखकेन, तत्प्रसङ्ग एवान्यदत्तोदनेनोदरम्भराणामत एव तुन्दिलानां बौद्धभिक्षूणां कर्मपराङ्मुखतैव भर्त्सिता महाकविमुखाल्लेखकेन। वस्तुतः स्वकपोलकल्पितामेतां कथां व्याजीकृत्य सौगतादिसिद्धान्तगतश्रेयःसाधकतत्त्वानां श्रौतमतप्रसूतत्वमेव प्रतितिष्ठापयिषुर्दृश्यते मनीषिमूर्धन्यो लेखकः, न पुनस्तत्सिद्धान्तान् न्यक्चिकीर्षति, येनाशङ्क्येताप्यश्रद्धा तत्र तत्रभवतः।

यद्यपि अनुसन्धानपत्रिकायामस्यां काव्यकथानाटकादि प्रायशो नानुमन्यामहे, तथाप्युत्तरबाणभट्टकथा ह्येषा विशिष्टशोधदृष्टिप्रसूतेति स्वयमेवावगंस्यते समीक्षकैः।

ततस्त्रयाणां विश्वविद्यालयस्यास्य व्याकरणविभागे उपाचार्याणां **डॉ. गिरिजेशकुमारदीक्षित - डॉ. श्रीकान्तपाण्डेय - डॉ. रामचन्द्रद्विवेदि**महाभागानां व्याकरणशास्त्रसम्बन्धिनो विशिष्टास्त्रयो निबन्धाः क्रमशः **'क्ङिति चेति सूत्रार्थविचारः'**, **'पातञ्जलमहाभाष्ये पर्यायवर्णविज्ञानम्'**, **'पाणिन्युपज्ञं**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारकार्थविश्लेषणम्' चेति प्राकाश्यमानीता:। व्याकरणशास्त्रं न केवलं शब्दस्य साधुत्वासाधुत्वयोर्निकषायतेऽपि तु वैज्ञानिकानपि विषयान् परामृशतीति साधु प्रतिपादितं डॉ. श्रीकान्तपाण्डेयमहाभागै: स्वीये 'पातञ्जलमहाभाष्ये पर्यावरण-विज्ञानम्' इति निबन्धे।

वैयाकरणनिबन्धानामेव क्रमे **डॉ. वृजकिशोरत्रिपाठिमहाभागानां बाधबीजानुशीलनमपि** वैशिष्ट्यमावहति। शास्त्रयोर्द्वयो: परस्परविरोधे एकेनापरस्य बाधे नैकविधानि मुख्यतया चतुर्विधानि बीजानि शास्त्रेषु प्राप्यन्ते, तान्येव सोदाहरणं सविमर्शञ्च विवेचितानि विदुषा लेखकेनात्र।

नैकविधै: प्रमाणैर्ज्योतिषसिद्धान्तेष्वन्यतमस्य रोमकसिद्धान्तस्यास्तित्वं महत्त्वञ्च परिशीलयतां **डॉ. नागेन्द्रपाण्डेय**महाभागानां निबन्धोऽपि विशिष्टं स्थानमातिष्ठति। अत्र हि विषयगतं किञ्चिद्विवेचनं न कृतं नापि चिकीर्षितं विदुषा, यतो मन्ये तत्सिद्धान्तविशेषविषये ये हि सन्देहा आक्षेपा वा उपस्थाप्यन्ते, तेषामेव यथासम्भवं निराकरणे तदीयास्तित्वस्य च सप्रमाणं व्यवस्थापन एव लेखकोऽस्मिन् निबन्धे स्वव्यापारस्येतिकर्तव्यतां मन्यते। सर्वथा श्लाघ्य: प्रयासोऽयम्।

अयमत्रास्माकमनुरोधमङ्गीकृत्य विद्वद्भि: **डॉ. कमलाकान्तत्रिपाठि**महाभागै: **'वेदान्तमीमांसाशास्त्रारम्भणं युक्तम्'** इति शीर्षकाङ्कितो निबन्धो विशेषतो विदुषां ध्यानमावर्जयति। स चायं विमर्श: पूर्वं प्रकाशितस्य लेखविशेषस्य। अत्रापि विमर्शार्थं ममीक्षका निवेद्यन्ते।

डॉ.धर्मेन्द्रकुमारसिंहदेवमहाभागै**भारतीयदर्शनेषु पुनर्जन्मसिद्धान्त**विवेचनपरै: अत्यन्तं शोधपूर्ण: प्रबन्ध: संरचितोऽत्रास्माभि: प्राकाश्यमानीत: सुधियां गवेषकाणां नितान्तमुपयोगार्हो भविष्यतीति मन्यामहे। एवमेव **डॉ. जनार्दनप्रसादपाण्डेय**-महाभागानां **संस्कृतसाहित्ये सैन्यविज्ञानमिति** निबन्धोऽप्यनुसन्धित्सून् महदुपकरिष्यतीति द्रढीयान् न: प्रत्यय:। महाकविकालिदासकृतमेघदूतकाव्य-सरणिमनुसृत्य तदुत्तरवर्तिभि: सूरिभिरप्यनेकानि तथाभूतानि दूतकाव्यानि रचितानि। तामेव दूतकाव्यपरम्परामाधृत्य **डॉ. कमलेशझा**महाभागै रचितो निबन्धोऽपि विशेषत: प्रशंसार्हस्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्ते **लघुग्रन्थमालायां डॉ.हरेरामत्रिपाठि**महाभागैः सम्पादितः **श्रीरघुनाथभट्टाचार्यविरचितः 'ईश्वरवादः'** इत्याख्यो लघुग्रन्थः प्रकाश्यते। विदुषा सम्पादकेन न केवलमस्य ग्रन्थस्य रचयितुर्वा वैशिष्ट्यं समुद्भावितम्, अपि तु ग्रन्थान्तरेण विशेषतो महादेवविरचितदिनकर्या सह तौल्यमपि प्रतिपाद्य समीक्षितं स्थलविशेषेषु।

इत्थमेभी रत्नैः सङ्ग्रथितेयं सारस्वती माला विदुषां पुरस्ताद् उपायनीकृता समेषाम्मुदमुद्वहत्विति परमेश्वरः प्रार्थ्यत इति।

वाराणस्याम्,
गुरुपूर्णिमायाम्,
२०६१ तमे वैक्रमाब्दे

राजारामशुक्लः
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणी

१. **उत्तरबाणभट्टकथा**
मिश्रोऽभिराजराजेन्द्रः १-१६

२. **क्ङिति चेति सूत्रार्थविचारः**
डॉ॰ गिरिजेशकुमारदीक्षितः १७-२४

३. **पातञ्जलमहाभाष्ये पर्यावरणविज्ञानम्**
डॉ. श्रीकान्तपाण्डेयः २५-३२

४. **पाणिन्युपज्ञं कारकार्थविश्लेषणम्**
डॉ. रामचन्द्रद्विवेदी ३३-३८

५. **बाधबीजानुशीलनम्**
डॉ॰ वृजकिशोरत्रिपाठी ३९-५२

६. **रोमकसिद्धान्तानुशीलनम्**
डॉ॰ नागेन्द्रपाण्डेयः ५३-५६

७. **वेदान्तमीमांसाशास्त्रारम्भणं युक्तम् [विमर्शः]**
डॉ॰ कमलाकान्तत्रिपाठी ५७-७०

८. **भारतीयदर्शनेषु पुनर्जन्मसिद्धान्तः**
डॉ॰ धर्मेन्द्रकुमारसिंहदेवः ७१-९८

९. **संस्कृतवाङ्मये सैन्यविज्ञानम्**
डॉ॰ जनार्दनप्रसादपाण्डेयः ९९-१०८

१०. **दूतकाव्यविमर्शः**
डॉ॰ कमलेशझाः १०९-११४

लघु-ग्रन्थमाला

१. **ईश्वरवादः**
श्रीहरेरामत्रिपाठी १-२६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

५७ वर्षे	ज्येष्ठ-भाद्रपद-पूर्णिमे, वि.सं. २०५९	१-२ अङ्कौ

उत्तरबाणभट्टकथा

मिश्रोऽभिराजराजेन्द्रः

कुलपतिः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयः

वाराणसी (उ.प्र.)

***

प्रीतिकूटमासाद्य चित्तं मे वासन्तकाननमिवाऽऽमोदभारभङ्गुरं जातम्। धावद्भुजङ्गविलसितोपमा ग्रामटिकासरणिर्न क्वचिदवसिता पर्यलक्ष्यत। पलालनिर्मितवर्तुललघुकुटीरे विश्रामन्त्यः पामरयुवतयो मां नगराभिजनं विलोकयन्त्यः कूणिताक्षिवलनैर्विस्मयमिव प्रकटयन्त्यः कञ्चुलिकानिर्गत-बाहुप्रचारैर्मदविषयिणीं कथङ्कथिकतामिव नाट्यन्त्यो मुहूर्तमिव चित्रलिखितास्तस्थुः। नग्नार्भकाणां सभ्याभिनयपराणां कुमाराणामातिथ्यपद्धतिपरिचितानां यूनाञ्च कश्चित् सम्भिन्नसमुदायः, मह्यं प्राघुणोचितसम्भावनां प्रयच्छन् मामनुगच्छन्नासीद् ग्रामप्रवेशक्षणादेव।

शनैश्शनैरुपदिष्टमार्गोऽहं, समतिक्रम्य घोषान्, सनासारन्ध्ररोधं समुल्लङ्घ्य शौण्डिकापणान्—अगुरुगुग्गुलघृतशर्करादिहविष्यजातसमुत्थगन्धमेदुरा मृडानी-मन्दिरपर्यन्तभूमिं यावदागतवान्। मन्दिरस्य वामभाग एवासीन् महाकवेर्बाणभट्टस्य प्रासादकल्पं भूतिनिचितं गृहम्। दूरत एव समवलोक्य गृहप्रदेशद्वारं स्मृतिपथमधिरूढं कादम्बरीभूमिकापद्यमिदम्—

जगुर्गृहेऽभ्यस्तसमस्तवाङ्मयैः ससारिकैः पञ्जरवर्तिभिः शुकैः।
निगृह्यमाणा बटवः पदे पदे यजूंषि सामानि च यस्य शङ्किताः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रत्नशलाकाखचितविलम्बिपञ्जरेषु सत्यमेव प्रवेशद्वारमभितो विविधवाचिकाङ्क्ष्काभिनयवन्तः शुकाः सारिकाश्च विराजन्ते स्म। तच्चञ्चूपुटाग्रविलूननिपतितफलशाकादिशकलानश्नन्त्यो गृहवर्तिकाः कलघण्ट्यश्च मधुरकलरवैः परिवेशं मुखरयन्ति स्म। हम्भारवं विदधती कृष्णा धेनुरपि नातिदूरे शङ्कुबद्धाऽतिष्ठत्; परन्त्वेतत्सर्वं गृहवैभवमक्षिलक्ष्यीकुर्वदपि मम नयनयुगलं यदन्वेषणे कातरमासीत् स आसीत् कादम्बरीकथाकारो महाकविर्बाणभट्टः।

ततोऽकस्मादेव दीप्तातारुण्यसमृद्धं कमपि चन्द्रमुखमवलोक्याऽनुमितिगर्वोद्धुरस्सन्नहं निर्विशङ्कमपृच्छम्—आयुष्मन्! त्वमेवासि भूषणभट्टः? कादम्बरीकथाकारस्य महाकवेर्वंशदीपस्त्वमेवासि किम्?

—अथ किम्! तरुणोऽवदत्। कुतस्त्यो भवान्? कथञ्च मां प्रत्यभिजानाति? मयाऽदृष्टपूर्वो भवान्?

—वत्स! मत्परिचयं पश्चाच्छ्रोष्यसि। भवत्तातपाददिदृक्षुं मां सर्वप्रथमं तदन्तिकमेवोपनय। अहमवदम्।

—एष नयाम्यचिरादेव। तातपादस्तु भगवन्तं पशुपतिं मृडानीं च समर्च्य सम्प्रत्येव देवगृहादुपावृत्तो नेदीयसि गृहोद्याने पर्यटति। मामनुसरतु भवान्! भूषणभट्टोऽवदत्।

द्वित्रैरेव निमेषैर्गृहवाटिकामासाद्य महाकवीश्वरं तं विश्रुतयशसमपश्यम्। हिमावदातसितभूतिभासितभालपट्टः सितोत्तरीयसंवृतपूर्वकायो धीरप्रशान्तसंहननसम्पदतिशयो महाकविर्बाणभट्टो दूरत एव सन्दृश्य मां प्रत्यभिज्ञातवान् द्रुतपदैश्च पुरस्सृत्य मां सप्रणयं भुजपञ्जर आश्लिष्टवान्। क्षणं यावन्मूर्तीभूतावावाम्। नाऽसौ प्रगाढालिङ्गनदार्ढ्यं शिथिलीकर्तुमैच्छन्नाहं चाप्यात्मानं विमोचयितुं प्रयतितवान्। ब्रह्मानन्दसदोहरं रसमिवास्वादयन्तावावां मिथः सम्पृक्तावतिष्ठाव। अपृष्टा एवावयोः प्रश्नाः सर्वे समाहिताः। नाऽवशिष्टा काऽप्युत्कण्ठा पिपृच्छिषा वा।

ततश्चासौ महाकविरात्मारामप्रकृतिः स्वयं तृप्तस्सन् मां सवात्सल्यं गाढोपगाढात्पृथक्कृत्य पार्श्वस्थकाष्ठचतुष्किकायामुपवेश्य प्रोवाच—भद्र! कथं नु खलु कान्यकुब्जाद् विरतिः? भवन्तमिह दृष्ट्वाऽहं साऽऽशङ्कं विस्मितोऽस्मि। तदचिरेण सान्त्वय मम कौतूहलम्।

वागारम्भात्प्रागेव नयने मे नीहारकणसन्ततिनिचितप्रभातकुवलयपत्रतामुपमयतु। तथाऽप्यन्तर्व्यथा वाचयमदद्धा कथमपि नियम्य साभ्यर्थनं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निवेदितवान्—वन्द्यचरण! तत्सर्वं पश्चादहं कथयिष्याम्येव; परन्तु सर्वप्रथमं कान्यकुब्जवास्तव्यानां भवद्वशंवदानां पक्षतोऽहमेव ज्ञातुमिच्छामि किञ्चित्। अनाख्याय कस्मैचित्, अनिवेद्य किञ्चिद् अनवगमय्य कमपि यथा भवद्भिः परित्यक्तं कान्यकुब्जं, तेन निखिलमेव नगरं विविधनतोन्नतवृत्तपर्याकुलं परिलक्ष्यते। तीर्थयात्रां प्रस्थितो भवानित्येके। धर्मचर्चासंसदि भर्त्सितो वेदनिन्दको हर्षदेवो भवतेत्यपरे। जन्मभूमिदर्शनकातरतया प्रीतिकूटं गत इत्यन्ये। यावन्मुखाद्भवतो न किञ्चिच्छृणोमि न तावन्ममापि विचिकित्सानिवृत्तिः। भवद्भृत्यप्रामाण्यात् प्रीतिकूटागमनव्यतिकरं निशम्यैव समागतोऽस्मि।

मत्प्रश्नौघशाकुनिकैः परिगतस्सन् महाकविर्निरातङ्कोऽरण्यस्तम्बेरम इव क्षणं यावत्स्तम्भं नाटयन् प्रोवाच—भद्र! कान्यकुब्जस्थैर्मदन्तरङ्गप्रियजनैर्यन्मध्ये विकल्पितं त्रयाणां तदेव सत्यम्। धर्मचर्चासंसद्येव कान्यकुब्जेश्वरो हर्षो मयाऽधिक्षिप्तः। परधर्माऽसहिष्णुरसौ सगुणोपासनां देवविग्रहनमस्यां शास्त्रविहितकर्मकाण्डञ्च नृपत्वाभिमानजनितनिर्भयत्वगर्वितस्सन् खलीकुर्वन् परिलक्षितो मया। सर्वेऽपि त्रयीश्रद्धालवस्सभास्तारश्चित्रतुरगीभूतास्तितिक्षामनुमोदनञ्च नाटयन्तस्तूष्णीमुपगताः; परन्तु हर्षदेवस्य विपन्नां वाचोयुक्तिं निपीयैव स्मृतप्रथमपरिचयक्षणावमानस्य मे यकृत्प्रजज्वाल।

मध्येव्याख्यानमेव तं साटोपं संस्थगय्य निर्भयोऽहमकथयम्—राजन्! अलमनर्गलप्रलापेन! नाऽहं तव करदसामन्तः। नाऽहं त्वदनुग्रहोपस्कृतजीवितः। न चाऽप्यहं भवत्सारस्वतवैदग्ध्याऽधमर्णः। प्रथमपरिचयाऽवसरेऽपि 'महानयं भुजङ्ग' इति दुर्मर्षणीयवचनोपक्रमैर्भवताऽधरीकृतोऽस्मि। तन्मया सोढम्। मिथ्याप्रचारितं मद्विषयकं कौलीनं भवता सहस्रकर्णतया निपीतं बहुजनसंविभक्तञ्च। तदपि मया सोढम्। अस्मान् वेदमतनिष्ठान् विजानताऽपि भवता यथाकथञ्चित्सन्दर्भमुत्पाद्य वयमुपहसिताश्चेष्टेङ्गिताकारादिभिः। तदपि मया सोढम्।

परन्तु कान्यकुब्जेश्वर! न सहिष्ये सम्प्रति सर्वेश्वरावमानम्। न सहिष्ये त्वत्कृतां वेदनिन्दाम्। न सहिष्ये त्वदुत्थापितं नित्यं नैमित्तिकञ्च ब्राह्मणधर्मविद्वेषम्। स एव ब्राह्मणधर्मोऽयं यस्य शाखामात्रमस्ति तव सौगतमतम्। स एव ब्राह्मणधर्मोऽयं यमपूपुजत्ततातपादस्ते तातपादः प्रभाकरवर्धनः। स एव ब्राह्मणधर्मोऽयं यस्मिन्नात्मश्रद्धां निष्ठां च प्रकाशयितुकामेन तेन भूतभावनो भगवान् स्थाण्वीश्वरोऽत्र प्रतिष्ठापितः। पृच्छ राजन्! दिवङ्गतं महामाहेश्वरं स्वतातपादं यत्किमर्थमसावाजीवनं सम्यगानर्च स्थाण्वीश्वरं शम्भुम्? किमर्थमश्रौषीत्प्रतिसन्ध्यं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदत्रयीम्? किमर्थं ललाटपट्टे न्यस्तवान् ब्राह्मणचरणपङ्कजरेणुनिकरम्? किमर्थं वा पालयाञ्चकारं श्रुतिस्मृतिपरिरक्षितां सनातनधर्मदेशनाम्?

गर्वितोऽसि राजन्! तेन तथागतेन यो गृहदायित्वमपि सम्पादयितुं न शशाक। तत्याज कान्दिशीक इव प्रसुप्तं दुग्धमुखं दारकम्। नाऽपश्यत् यौवनभारभङ्गुरां स्मरनाट्यमञ्चभूतां भार्यां यशोधराम्? न चाऽप्यालुलोके सकृदपि तनयवियोगकातरमशक्तं वृद्धजनकं शुद्धोदनम्। क्लीब इवोद्विज्य संसारात् प्राद्रवत् यस्संसाररक्षार्थम्।

राजन्! एष भवन्तमेव परमार्थतः पृच्छामि। किं कानने निलीयैव संसारो रक्षितुं शक्यते, नोषित्वा गृहे? हन्त, कियदुपहासास्पदमिदं तथ्यम्। यस्य संसारस्य रक्षा काम्यते, तत एव पलायनं क्रियते? संसारं परित्यज्य संसारस्य रक्षा? समरं विहाय समरविजयः? समित्वं विहाय दायित्वपूर्तिः?

तत्संसारं विहायापि किमवाप्तं तव सिद्धार्थेन? किमवाप्तं राजन्! यदिदानीं यावदनवाप्तमासीत्। आर्यसत्यानि चत्वारि? चत्वारि आर्यसत्यानि प्रागपि को न ज्ञातवान् भारते? आपामरेभ्यो विपश्चिन्मण्डलं यावत्को न परिचिनोति संसृतिसत्यचतुष्टयमेतत्। किमेतानि पूर्वं नोपदिष्टानि वेदेषु पुराणेषु काव्येषु वा? तापत्रयनिवारणं किं न प्रतिज्ञायते सांख्यदर्शनेन? अज्ञाननिवृत्तिः किं नोपदिश्यतेऽद्वैतवेदान्तदर्शनेन? दुःखमुक्त्युपायाः किं नोपवार्णितास्तपस्विभिः प्राक्तनैः? तत्किमभिनवं प्रोक्तं सिद्धार्थेन? किमिदम्प्रथमतयाऽन्विष्टं सिद्धार्थेन? राजन्! क्व तिष्ठति सिद्धार्थता तव सिद्धार्थस्य? एष बाणभट्टोऽहं मध्येसभमुद्घोषयामि यन्नासौ कथमपि सुगतः परिलक्ष्यते। वस्तुतो लोकपरलोकोभयदृष्ट्या दुर्गत एवासौ।

कान्यकुब्जेश्वर! शृणु सम्प्रति स्वसिद्धार्थस्य लोकोपकारपद्धतिम्। युवानोऽपि पञ्चविंशतिवर्षदेशीयाः कर्तव्यपथं विहाय श्रमणाः स्युर्निर्वाणधिया। किमयमेवोपकारस्सुगतस्य? नगरस्थघण्टापथेष्वशीतिसहस्रमिताः परोपजीविनो मुण्डितशिरस्का भिक्षवो नित्यं पर्यटेयुः। किमयमेव लोकोपकारस्तव सुगतस्य? क्षणं यावच्चिन्तय राजन्, कस्तेभ्यो लम्बोदरेभ्यो भुवि भारभूतेभ्यो भिक्षां दास्यति? किमर्थं वा दास्यति? न ते कृषकाः। न लौहकाराः। न स्वर्णकाराः। न धानुष्काः। न कुम्भकाराः। न याष्टिकाः। न शिल्पिनः। न कारवः। न व्यवसायिनः। न कलाजीविनः। न शैलूषा जाङ्गलिका मार्कटिका ऐन्द्रजालिका वा। सर्वथा निष्क्रिया एते सर्वे। काममात्मानमुपकुर्वन्तु भवदुपायनीकृतगार्हस्थ्यातिशयितसुख-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साधनोपायैः; परन्तु लोकं नैते क्षपणकाः कथमप्युपकुर्वन्ति। तदेवं, कस्तान् मयूरव्यंसकान् भोजयिष्यति?

हन्त! वृद्धाः स्वेदाञ्चितवपुषोऽहोरात्रं सश्रमं कृषिकर्म सम्पादयन्तु। निर्वाणकामाः पुनरेते चत्वरवृषभा अकृत्वैव किञ्चित् सायं प्रातरुदरम्भरि भक्षयन्तु घृतापूपमिश्रितपक्वान्नम्। राजन्! कुतस्त्योऽयं न्यायः? अहो, यस्मिन् कर्मयोगपक्षधरे राष्ट्रे समुद्घोषयन्त्युपनिषदः कुर्वन्नेवेह कर्माणि जिजीविषेच्छत समा इति। योगेश्वरो भगवान्मधुसूदनोऽपि नियतं कुरु कर्म त्वमित्यादि यत्र समुपदिशति, तस्मिन्नेव भारतराष्ट्रे कर्मणोऽयमधरीभावः? पौरुषस्येदृशी गर्हणा? निष्क्रियताया एतादृगभिनन्दनम्?

राजन्! हर्षदेव! धिक् तं धर्मं, धिग्धिक् तं सम्प्रदायं यस्समाजं क्लीबं विदधाति, यो लोकं कर्मपराङ्मुखं कुरुते, यो लोकं पराश्रयितं परोपजीविनं परमुखापेक्षिणञ्च विधत्ते। राजन्! निर्वाणं न तिष्ठति दायित्वनिवृत्तौ। निर्वाणं विलसति दायित्वसम्पादने यदर्थं पञ्चयज्ञाः समुपदिष्टाः। कर्ममयीयं सृष्टिः। देवा अपि नितरां कर्मरताः। सूर्यस्तपति प्रतिक्षणं, चन्द्र आह्लादयति प्रतिक्षपम्। अग्निर्ज्वलत्यहोराष्ट्रम्। प्रवहति वातस्सततमेव। सर्वात्मा त्रिगुणात्मा सर्वदेवमयो हरिरपि न तिष्ठत्यकर्मकृत् क्षणमपि। इदमेव सृष्टिरहस्यम्। इदमेव यज्ञरहस्यम्। राजन्। इदमेव वेदरहस्यं यदजानन्निव विद्वेक्षि।

परन्तप! किं तव गौतमस्य काऽप्यन्या सृष्टिर्यत्रेतरे सृष्टिनियमाः प्रवर्तन्ते? किं तव सिद्धार्थस्य कश्चिदन्यस्संसारो यत्र सर्वेऽपि श्रमणा एव निवसन्ति, न श्रमणेतराः? सर्वेऽपि यत्र परिव्राजका एव, न गृहस्थाः?

त्वन्निर्मितेषु वियच्चुम्बिविहारभवनेषु बहुभूमिकेषु सर्वसुखानन्दनिचितेषु स्वैरं विहरन्ति मुण्डितशिरस्का एते मल्लास्त्वदधीनयोगक्षेमाः। अद्य पृच्छति बाणभट्टोऽयं प्रजाप्रतिनिधिर्भवन्तं यत्कस्यान्नं त्वमेतान् भोजयसि? कस्य वस्त्राणि त्वमेतान् परिधापयसि। केषां श्रमोपार्जितसौख्यभरैस्त्वमेतानकारणं सुखयसि? एतत्सर्वं न तवापि वैयक्तिकशेवधिः, राजन्! सर्वमिदं लोकस्य, समाजस्य, जनताया वा। भवानपि लोकप्रतिनिधित्वेनैव प्रजासंरक्षकत्वेनैव समृद्धिमिमां भुनक्ति।

राजन्! विद्वेक्षि तं शाश्वतं सनातनं वेदधर्मं यो विनिर्ममे विश्ववारां संस्कृतिम्। विद्वेक्षि तं जगदीश्वरं यः प्रजानां जन्मनि रजोजुट् परिपालने सत्त्ववृत्तिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रलये च तमःस्पृक् परिलक्ष्यते। विद्वेक्षि तं परमेश्वरं यतोऽयं निसर्गः, यस्मिन्नयं निसर्गः, यदवध्ययं निसर्गः?

सामान्यमनुष्यमेकमैश्वर्यविरहितं शौद्धोदनिमीश्वरपदेन प्ररूढप्रयत्नैः प्रख्यापयन् न लज्जसे राजन्? सर्वतन्त्रस्वतन्त्रञ्चेश्वरं कुतर्कैः प्रत्याख्यातुमुपक्रमसे? परं साहसिकोऽसि कान्यकुब्जेश्वर! प्रशस्ता ते सद्धर्माऽसहिष्णुता। बन्धनशृङ्खलेव कटु क्वणन् निरन्तरं तुदसि राजन्! परन्त्वसह्यं ते वचो महाहेर्दुर्विषमिव। धावकादीन् परितोष्योत्कोचैः कामं कामं नाट्यकारोऽसि जातः; परन्तु जानाम्यहं परमार्थम्। न भवान्निपुणः कविर्न परिषदप्येषा त्वद्गुणग्राहिणी। खड्गभीतैषा परिषद् विहाय मामेकम्। वात्स्यायनोऽहम्। अस्मत्पूर्वजैः संरक्षकत्वेनाङ्गीकृता मौखरिणो न भवादृशा ऋतवर्त्मविरोधिनः।

नेदं लक्षणं सत्कवेः। सत्कविर्भवत्येव हैयङ्गवीनमसृणतरलहृदयः। सत्कविर्भवत्येव गगनाभोगविस्तृतहृदयः। नाऽसौ विद्वेष्टि, तुदति, ईर्ष्यत्यसूयति, प्रतिस्पर्धते वा। राजन्! यदि कविहृदयमेव नोऽवाप्तं तर्हि व्यर्थमेवात्मप्रचारितं ते कवियशः। जीवति बाणभट्टे मयि क्व ते कविराजिराजनिपुणता? जीवन्नपि न जीवसि कान्यकुब्जेश्वर! धर्मान्तरविद्वेषभावनया। प्राकृतपदवीमुपगतोऽसि परगुणोत्कर्षाऽसहिष्णुतया। महाजनपरिच्युतोऽसि नूनमात्मसुभगम्मन्यतया। न भवानर्हति नलरामयुधिष्ठिरोचितं चरितानुशंसनम्। तदेष वात्स्यायनो बाणभट्टस्सशपथं सङ्कल्पते यत्र तेऽर्धोट्टङ्कितं चरितं पूर्तिमेष्यति। प्रजापते! त्वदुपायनीकृतोऽयं रत्नजटितोष्णीषो राजकविप्रतीकभूतस्तवैवाधिकारे तिष्ठतु। एष गच्छामि। प्रीत्याह्वयतेतरां मां मम वंशाग्रहारः प्रीतिकूटो नाम।

इत्युक्त्वैव प्रणम्य सर्वान् द्राक्परावृत्त्यास्थानमण्डपाद् बहिर्निष्क्रान्तोऽहम्। सर्वेऽपि नृपलालाटिका बौद्धा हतप्रभा इवातस्थिरे। यावन्ममोद्गारं न कोऽपि किञ्चिदपि बभाषे। भगवतः कपर्दिन आवेश इव मयि सञ्जातस्तस्मिन्नवसरे। अत एव राजसभासमुदाचारोऽपि विस्मृतो मया। निर्व्यूढकरकापात इवाऽकालजलदः सर्वमभिप्रेतं प्रकटय्य तस्मिन्नेव प्रदोषे परित्यक्ता मया राजधानी। यद्यहं तत्रावत्स्यं निश्चप्रचं कान्यकुब्जेश्वरो मामनुनेतुममात्यान् प्रेषयिष्यत। तत्सर्वं पश्चाद्भावि व्यतिकरान्तरमनभिलषतैव मयैवमनुष्ठितम्। अत्र स्वकीये पितृपितामहादि-सुचरितमण्डिते जन्मगृहे सुखं तिष्ठामि। विश्वसिहि भद्र! कान्यकुब्जमप्यतिशेते प्रीतिकूटोऽयम्। यतो ह्यत्रैव वर्तते कादम्बरीकथायाः निमित्तोपादानभूमिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेघवृष्टिपरिस्नात इव निदाघरजःप्रसरधूसरपादपो निर्मलोऽहं सञ्जातः। कान्यकुब्जवास्तव्यैरश्रुतचरोऽयमुदन्तो मयैव कर्णपथातिथीकृतः। वस्तुतस्सार्थवती जाता मम प्रीतिकूटयात्रा। अद्याऽनुभूतो मया कस्यचित् सारस्वतसाधकस्य वंशाभिमानः। प्रत्यक्षीकृतं खलु तस्य निरङ्कुशत्वम्। सबहुमानं सप्रमाणञ्चाङ्गीकृतं मया तस्याऽपरविरञ्चित्वम्। वशीकृतचेतन इवाऽहं झटित्येव महाकविचरणेन्दीवरयोर्निपत्य तद्धूलिकणिकाभिश्चात्मायतभालपट्टं पवित्रीकृत्य भावशाबल्यप्रह्वीभूत इवाकथयम्—

वन्द्यचरण! अद्भुतमाचरितवान् भवान्। अविश्वसनीयोऽयं प्रसङ्गः। तथाऽप्यहं प्रत्येमि भवत्प्रामाण्यात्। अहो! यद्भ्रूभङ्गबालवक्रतामात्रेण निशीथिनीजागरैः क्षपयन्ति कालं प्रतिवेशिभूपतयस्तस्याप्युत्तरापथचक्रवर्तिनः कान्यकुब्जेश्वरस्य भवत्समक्षमीदृशो न्यक्कारः? मन्ये, भवद्विग्रहेण दम्भोलिनैव गगनोच्छ्रायो महीधरो विदीर्णः। भवत्स्वाभिमानझञ्झानिलेनैवाऽम्बरप्रसारितशतशाखो न्यग्रोधो धराशायीकृतः। अगस्त्यप्रतिमेन भवद्गौरवेणैव विन्ध्यप्रतिमा हर्षदेवाऽहम्मन्यता वानीरतामानीता। नूनमद्य जितं कविगरिम्णा। प्रतिफलितं सारस्वतसाधनया। दण्डितं भवताऽदाक्षिण्यं हर्षदेवस्य। निपातोऽयं राज्ञः पक्षपातस्य।

तावता कालेनैव गृहसेविकाऽऽगत्य सूचितवती—स्वामिन्! भोजनं निर्वर्तयितुं प्राघुणेन सहैव भवन्तमामन्त्रयते पुत्रवधूः। तदलं विलम्बेन। एतदानीतं मया पाद्यजलम्।

तदाकर्ण्यैव महाकविर्मामवदत्—भद्र! एषा मे गृहसेविका सुनन्दा। मम पत्न्या सार्धमेव श्वसुरालयादिहागता। दिवङ्गतायाञ्चापि देव्यां कुटुम्बमिमं विहाय न क्वचिदन्यत्र गतवती भूषणं प्रति समधिकवत्सलतया। दौष्यन्तिरिव भूषणभट्टोऽपि शैशवेऽतिशयचपल आसीत्। तस्यानिरुद्धत्वं चापल्यञ्चाभिलक्ष्य सुनन्दैव तं पुलिन्दनाम्ना सम्बोधितवती। अधुनाऽपि ग्रामवासिनस्तं पुलिन्दनाम्नैव प्रत्यभिजानन्ति। मम पुत्रवधूः सुनन्दायामतितरां श्रद्दधते। न तां गृहसेविकादृष्ट्या जातु पश्यति। उभेऽपि मिथः प्रगाढां प्रीतिं निर्वहतः।

तत्प्रस्थातव्यमावाभ्यां मध्याह्नभोजनार्थम्। प्रीतिकूटमागतो भवान् कतिपयदिनानि यावन्मया सहैव तिष्ठति, न चेत्कार्यान्तरातिपातः। बहु द्रष्टव्यमत्र शोणोपकूलवर्तिनि सघनकान्तारे। तत्सर्वं शनैः शनैः पर्यायेण दर्शयिष्यामि। एहि, गृहाभ्यन्तरं प्रविशावः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवंवादिनं महाकविमनुसरतैव मया प्रोक्तम्—आर्य! नाहं सत्वरः कान्यकुब्जं प्रति। किञ्च, भवद्भिरिदानीमेव विज्ञापितोऽस्मि यदत्रैव प्रीतिकूटे विलसति कादम्बरीकथाया निमित्तोपादानभूमिः। निमित्तमुपादानञ्च सुष्ठु वेद्म्यहम्, तथापि सूत्रभूतमिदं वाक्यं मच्चेतसि जनयति दुर्वारां जिज्ञासाम्। तत्सर्वमविज्ञाय समवलोक्य वा नाहं शममुपैष्यामि।

मम वाच्यार्थस्य गूढसङ्केतं परिगृह्णन् महाकविर्बाणभट्टः सस्मितमभणत्—सम्यगुक्तं भवता। उभावेव सम्प्रत्यारण्यकौ सगन्धौ च। त्वरायां सम्भ्रमे समुद्वेगे वा पौरा जीवन्ति, न पुनर्ग्रामीणाः। भोजनं निर्वर्त्य मुहूर्तं यावद् विश्रम्य चाध्वखेदमतिवाह्य अधिसन्ध्यं पशुपतिसमर्चनार्थं देवालयं गमिष्यावः। श्वस्तने प्रभाते च भवन्तं पुराणशाल्मलीतरुमण्डितां विन्ध्याटवीं ततश्चाद्यापि भूतभावनमाशुतोषमाराधयन्तीं महाश्वेतां दर्शयिष्यामि।

भोजनं निर्वर्त्याऽतिथिशालायामधिशय्यं शयानेन मया परितोऽपि दृष्टिनिक्षेपः कृतः। औदीच्यभित्तिफलके नागदन्तावलम्बितमासीद् भगवत्या मल्लिकाक्षवाहिन्या दृष्टिबन्धक्षमं चित्रम्। ततश्चालेख्यं दक्षिणेन क्रमेण महाकविपूर्वज़ानां कुबेराऽच्युतहरेशानपशुपत्यर्थपतिचित्रभानुप्रभृतीनां चित्राणि वर्णादिप्रयोगदक्षचित्रकृद्घटितानि भित्तिन्यस्तान्यासन्। तत्सर्वं विस्फारितविलोचनाभ्यां निपिबन्निवाहं कश्चिदन्य एव संवृत्तः। निखिलोऽपि सारस्वतो वात्स्यायनवंशो महाकवेर्ममालोके प्रत्यक्षमिवाभासत। स्फुरिताधर इव, किञ्चिदामन्त्रयमाण इव, रहस्यमुपदिशन्निवाऽनामयकुशलप्रश्नं पृच्छन्निव प्रत्येकं वंशचित्राणां जनः पर्यलक्ष्यत। तत्सर्वमनाख्येयं विलक्षणञ्चानुभूय प्रगाढहर्षातिरेकसम्भारसञ्जातपुलकोऽहं क्षणमप्यक्षिणी निमीलितुं नाऽशकम्। उन्निद्र एव होरावधिककालमनयम्।

तावदेव भूषणभट्टस्समागत्य प्रोवाच—पितृव्यचरण! बिल्वपानकं भवत्स्नुषया निर्मितं सुनन्दया चानीतम्। बहिरलिन्दे स्थितस्तातपादो भवन्तं प्रतीक्षते सपीत्यै। तदुत्तिष्ठतु भवान्। मयाऽऽनीतेन जलेन हस्तमुखादिकं प्रक्षाल्य स्फूर्तिञ्चानुभूय पानकं गृह्णातु।

चिरञ्जीव वत्स! एष आगच्छामि। इत्येवमभिदधानोऽहं शय्यातस्समुत्थाय कक्षद्वारभूमिमागतवान्। तत्रैव च भूषणप्रदत्तेन मल्लकजलेनाऽर्धनिद्राभारभुग्नं नेत्रयुगलं मुखं हस्तौ च प्रक्षाल्य, लोमशप्रोञ्छन्या सर्वमप्यङ्गजातं श्यानं विधाय, सहैव भूषणेन, महाकविसन्निधिमागतवान्। एलालवङ्गमरिचादिमिश्रितं बिल्वपानकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निपीय विचित्रैव कापि संस्फूर्तिर्मयाऽनुभूता। महाकविर्बाणो मध्येरसपानमेव मामवदत्—'अयं बिल्ववृक्षोऽस्मत्तातपादैर्गृहवाटिकायां मूलितः। अत एव एत्फलनिर्मितं रसं पिबन्नहं तद्वात्सल्यरसमप्यास्वदे'।

तदाकर्ण्य झटित्येव स्मृतमहाकविविपन्नशैशवस्य नवीकृततत्प्रतिबिम्ब-कल्पवैशम्पायनकरुणकथस्य मे नेत्रे सहसैवाऽश्रुसन्ततिनिचिते सञ्जाते। वैशम्पायनस्येव कादम्बरीकारस्यापि मातृसौख्यं नाऽऽसीत्। शुकशावक इव सोऽपि वार्धक्यविकलेन तातपादेन तैस्तैरुपायैः संवर्धित आसीत्। महाकवेर्वाक्यं निशम्यासीन्मच्चेतसि—हन्त! अननुभूतजननीपरिचर्यासुखो जनः पितृवात्सल्यं यदि पदे पदेऽनुभवति, किमत्र चित्रम्? अयं बिल्ववृक्षोऽपि पितृवासल्यविग्रहभूत एव महाकवेः कृते। अहमपि धन्यस्सञ्जातस्तत्फलपानकं निपीय।

मन्मानसी स्थितिर्महाकविनाऽपि तर्किततेत्यहं मन्ये। तत एव प्रसङ्गान्तरव्याजेन मामन्यविधीकर्तुं सस्नेहमवददसौ—भद्र! स्मर्यते न वा? इदानीमेव प्रस्थातव्यमस्माभिरर्धनारीश्वरसान्ध्यनीराजनविधिसम्पादनार्थम्। भूषणा-दयस्सर्वेऽपि नित्यगामिनः। अद्यापि सहचरिष्यन्त्येव।

अर्धहोरानन्तरमेव प्रस्थिता वयम्। देवालयो नातिदूरे स्थित आसीत्। दूरादेवाऽभ्रंल्लिहाग्रशिखरोऽसौ मयाऽवेक्षितस्सप्रणामम्। सान्ध्यनीराजनवेलामिवो-त्प्रेक्ष्य गगनमपि नक्षत्रनिचयावदातमल्लिकाकुसुमप्रकरकरम्बितमिव सञ्जातम्। त्रियामागमनशङ्कोपचितकलरवाः पत्ररथाः शिवताण्डवस्तोत्रमिव गातुमारेभिरे। प्रदोषदोहाशयाऽसकृत्प्रकटितहम्भारवा धेनुश्शङ्खनादमिव मध्ये-मध्ये समाचरत्। आदिवसं वनेष्वाहिण्डमाना भक्ष्यपूरितोदराश्छाग्यः कण्ठनिबद्धच्छुद्रघण्टिकानादै-र्गृहोपावर्तनवृत्तं सूचयन्त्यो नीराजनविधावपि घण्टानादमिवातेनिरे। एवं हि, प्रकृतिरपि पशुपतिपूजनमनस्का समजायत।

देवालयोऽयं मौखरिभूपतिभिर्निर्मापित आसीत्। अत्रैव यावज्जीवनं निवसन् त्रिपुरध्वंसिनं भगवन्तं विरूपाक्षं सेवमानो वात्स्यायनवंशदीक्षागुरुर्वन्द्यचरणो भर्वुर्दुर्धर्षं तपस्तप्तवान्। महाकवेर्बाणभट्टस्यापि शैशवकालं यावदसौ धृततनुरलभ्यं लोकयशो बहुमानञ्च भेजे। मौखरिणो नृपतयोऽपि भर्वुपरिचर्ययाऽऽत्मानं सुभगम्मन्यीकृतवन्तः। सर्वमिदमितिहासवृत्तं महाकविमुखोद्गीर्णं मया तत्रैव श्रुतम्। नमामि भर्वोश्चरणाम्बुजद्वयमिति कादम्बरीभूमिकापद्यांशस्य रहस्यमपि सम्प्रत्येव स्फुटीभूतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधोऽधो देवालयं प्रावहच्छोणनदो रेवावियोगजन्यघर्घरारावनिचितमन्युमिव समुद्गिरन्। क्वचिदुत्पतन्तीभिश्शफरकन्यकाभिर्घनागमस्तनयित्नुरिव विद्युल्लताभि-रुन्मेषलीलां वितन्वन्, क्वचिज्जलमध्योद्गतद्वीपभूमिषु सूर्यातपसौख्यमाप्नुवद्भि-र्मकरैर्मकरालयभ्रान्तिमिवोपजनयन्, क्वचिदवकीर्णशतसहस्रबृहल्लघुपाषाण-शकलैर्दृषद्वतीसहोदरत्वमिव प्रकटयन्, क्वचिच्चानुतटरुहां वानीराणां कदम्बकैः कालिन्दीतटान्तविरूढनिकुञ्जानां विच्छित्तिमिव विरचयञ्छोणो मामतितरां प्रभावितवान्।

सान्ध्योऽन्धकारस्तावता कालेन खलदम्भ इव प्रगाढो जातः। भूषणभट्टस्तु पूजनानन्तरमेव सकुटुम्बं प्रस्थित आसीत्। आवामेव तास्ताः कथाः कुर्वाणौ शोणतटवर्तिनि दृषत्स्थण्डिले स्थितावास्व। तावदेवासन्नप्रायोपरागजनितसाध्व-साडम्बरमन्दप्रभः कृष्णपक्षत्रयोदशतिथ्यतिथीभूत ईषद्वर्तुलमण्डलश्चन्द्रः पुरन्दरदिशायामुदियाय। निखिलाऽपि सान्द्रकान्तारराजिरन्तर्निविष्टचन्द्रिका-शकलैर्वानचित्रितपटच्छविमिवादधे। सुगमो जातः पन्थाः। महाकविना सार्धमेवाऽहं गृहमागत्य सायन्तनोचितसन्ध्यावन्दनादिकं निर्वर्त्य रात्रिभोजनं यथेष्टं गृहीतवान्। किञ्चित्कालं यावल्लोकवार्ताः श्रुत्वा श्रावयित्वा च महाकविना सप्रणयमभ्यनुज्ञातः पल्यङ्कतल्पमगच्छम्।

ततश्चापरेद्युः प्रातराशानन्तरं महाकविमपृच्छम्—आर्य! महाश्वेतां दर्शयितुं दत्तवचनो भवान्। तस्मिन् विषये महत्कौतूहलं मे। का सा? कुत्र निवसति? जीवति, स्मृतिशेषा वा? केन गुणेनासौ भवत्कथापात्रीभूयाऽमर्त्यताङ्गता? तत्सर्वमामूलाच्छ्रोतुं दोलायते मच्चित्तम्।

एहि, वाटिकायामेव सर्वं श्रावयिष्यामि। निर्मक्षिकं तत् स्थानमित्यभिदधानो महाकविर्मामादाय प्रस्थितवान्। उपविष्टावावाम्। ततश्चावस्थान्तरमिव गतो महाकविर्मामवदत्—

भद्र! नेयं काऽपि कल्पनाश्रिता कथा! जीवद्वृत्तमिदम्। महाश्वेताऽस्ति मम पितृष्वसुः कन्या। तस्या जन्मापि ममैवाऽस्मिन् गृहे समजायत। मम पितृष्वसा सुजाता इतो नातिदूरे ग्रामे परिणीता केनापि रूपगुणपाण्डित्यमण्डितेन महापुरुषेण। तयोः प्रथमसन्ततिरासीदियं कन्या। तस्या अतितरां शुक्लिमानं निर्वर्ण्यैव सञ्जातपुलकेन तातपादेन महाश्वेतेति तस्या अभिधानं कृतम्। साऽऽसीन्मत्तः पञ्चहायनैर्यवीयसी, तथापि [illegible] शैशवमावयोः प्रायेण युगपदेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यतीतम्। सा कदाचित् प्रीतिकूटे निवसति स्म, कदाचिदहमपि तद्ग्राममासाद्य कालं यापितवान्।

महाश्वेताया भवनं निकषैवासीत्पद्मसरः किमपि अछौधनाम। कादम्बर्यां मया तदेवोपवर्णितम् अच्छोदनाम्ना। अस्य सरोवरस्य जलेनैव सकलस्यापि ग्रामस्य गतिरासीत्। यतो हि देवालयसोपानमार्गाद्यलङ्कृते कस्मिंश्चिद् घट्टे ग्रामवासिनः स्नान्ति स्म, वनोपकण्ठलग्ने श्यानपङ्के कस्मिंश्चिद् घट्टे पशवो जलं पिबन्ति स्म, सन्तरणलीलाञ्चापि नाटयन्ति स्म, दूरवर्तिनि घट्टे कस्मिंश्चिद्रजका ग्रामवास्तव्यानां वस्त्राणि क्षालयन्ति स्म। समागतप्राय एव शरदृतौ पुष्करमिदं विकसित-कोकनदैर्मधुपानलम्पटैर्भ्रमरै रिरंसावर्धितप्रणयिनीप्रसादनोपायै राजहंसैर्मत्स्यभक्षण-लोलुपैः कारण्डवैः सचीत्कारं गगनमण्डलचङ्क्रमणलीलां नाटयद्भिष्टिट्टिभैश्च कामप्यपूर्वामेव सुषमां धारयति स्म। अहमप्यादिवसं तत्रैव महाश्वेतया सह कृत्रिमपुत्रिकाकूकूरुतादिक्रीडाः सम्पादयन् समयमनैषम्।

लावण्यशालभञ्जी आसीन्महाश्वेता। सम्पिण्डिताङ्गपारावतयुग्ममिव नयनयुगलं, कम्बूपमा ग्रीवा, चमूरुपोतक्या इव सलज्जा मन्दगतिः, परभृतिकाया इव मधुवचनोपन्यासः, पारिजातपुष्पमिव मन्दस्मितं, साक्षात्सरस्वत्या इव मनोहरिणबन्धनरज्जुकल्पं वीणावादनम्। भद्र! किमधिकेन? स्वर्गान्निपतिता देवाङ्गनैव काऽपि प्रतीयते स्म मम भगिनी। मत्तातपादास्तु तस्या वीणावादनमाकर्ण्य सर्वमपि विस्मरन्ति स्म। अस्मिन्नेव शिवायतनेऽनेकधा सा पर्वावसरेषु भगवन्तमाशुतोषं पराम्बाञ्च स्ववीणावादनेन प्रसादितवती।

यथावसरं विवाहोऽपि महाश्वेताया निर्व्यूढः; परन्तु महासौख्यसम्भारेऽस्मिन् दत्तसन्धि दौर्भाग्यं निभृतनिभृतं कदा कस्मात्कथं वा सम्प्रविष्टमिति न कोऽपि वेत्तुं शशाक। व्यतीतप्राय एव परिणयोत्तरमासे श्वसुरालयग्रामो मद्भगिन्या निष्करुणैराटविकशबरैराक्रान्तो निर्दयं लुण्ठितश्च। सान्द्रान्धकारे रजन्यामाक्रान्तारः कांश्चन पशुमारं मारितवन्तः, कांश्चन कुटीरस्तम्भेषु संयतवन्तः, कांश्चन युवकांश्च सबलात्कारं सार्धं नीतवन्तः। ममानुत्तोऽपि तेषामेव शबरापहृतानां यूनामन्यतम आसीत्।

व्यवसितेऽस्मिन् दारुणव्यतिकरे विपन्नं जातं महाश्वेताजीवनम्। उपावर्ततासौ पितुर्गृहम्। मम तातपादस्तु महाश्वेताविपदभिभूत एव समयात्प्राक् निजेहलीलां संवृतवान्। उभयमपि कुलं कन्यकायास्तस्याः कुलिशप्रहारातिशायिनं दुर्भाग्यक्रममसहमानं विषादकवलितं सञ्जातम्, क्षीणा हर्षसम्भाराः, क्षीणाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षपोत्सवाः, ग्लानिमुपगतं गीतनृत्यवादित्रादिकम्, शून्यतामुपयाताश्शास्त्रचर्चाः, विरक्ता रागाः, स्मृतिशेषं स्मितकम्, सातङ्कोऽट्टहासः। किञ्च, परमार्थतोऽहासिषुः कुलद्वयं प्रसादमाधुर्यादिगुणाः। अवशिष्टं केवलं कारुण्यमेव।

भद्र! अद्य सत्यमिदं प्रकाशये यत्कान्यकुब्जेश्वरस्य हर्षदेवस्य राजकविप्रतिष्ठाऽङ्गीकारेऽपि मम भगिनी महाश्वेतैव कथञ्चित्कारणभूता। यतो हि नृपतेर्भगिन्यां महीयस्यां राजश्रियि स्वभगिन्या महाश्वेतायाः प्रतिच्छविमहमपश्यम्। अत एव स्वसृसंरक्षणपरे हर्षदेवे, सत्यपि ममावमन्तरि मम प्रीतिर्जाता।

जानात्येव भवान् यत्तातपादो मे सुगृहीतनामधेयश्चित्रभानुर्महान् ज्योतिर्विदासीत्। सर्वमपि त्रैकालिकं वृत्तं हस्तामलकमिव तस्य प्रत्यक्षमभासत। मृत्योः प्रागेव घुष्टं तेन यदक्षतस्तिष्ठति महाश्वेतायाः पतिः। किञ्च, कस्मिंश्चिद्दिने सोऽवश्यमेवोपावर्तिष्यते स्वगृहम्। पितुर्वचनमिदं समेषामेव कुटुम्बिनां कृते श्रुतिवाक्यभूतं प्राणपाथेयभूतञ्चासीत्। तदाकर्ण्य तनयाविपद्भारभुग्नाया मे पितृष्वसुर्दुःखं किञ्चिन्न्यूनं सञ्जातम्। अहमपि विविधोपायैर्भगिन्याश्चित्तमनुरञ्जयितुं प्रयत्नपरोऽभवम्। दावाग्निपरिप्लुष्टप्राया नवमालिकाऽकालजलदवर्षणेन परिरक्षिता, तथाप्यभिनवकिसलयप्रसूनाद्युपगमार्थं तया वसन्तः प्रतीक्षणीय आसीत्।

भद्र! पताकावृत्तमनाख्याय मूलकथेयं महाश्वेतायाः पूर्तिं नोपैष्यति। किञ्च, तस्याः पताकाकथाया नायकोऽप्यहमेवास्मि। ततोऽपि श्रोतव्येयं प्रासङ्गिकी कथा। महाश्वेतायाः प्रतिवेश एवासीत् कश्चनाऽन्योऽपि कुटुम्बः सद्धर्माचरणपरायणो यस्मिन् विलसन्ति स्म विश्रुतयशसोऽनेकेऽनूचाना दैवज्ञा भिषजो देशिकाश्च। कुटुम्बिनामन्यतमस्य मयूरभट्टस्य कन्या कदम्बप्रिया मद्भगिन्या महाश्वेतायाः प्रतिबिम्बभूता विश्वस्ता च सखी जाता। निशीथन्येव ते पृथगकरोत्। समानरूपसम्पदौ समानगुणे समानाभिरुचिके समानशीलसमुदाचारे च ते सर्वान् विस्मापयतः स्म।

मां तत्र नियतागन्तारमवेक्ष्य सद्वंशोत्पन्नञ्च विज्ञाय मयूरभट्टः कदा मयि जामातृबुद्धिं न्यस्तवानित्यहमपि न सुष्ठु ज्ञातवान्; परन्तु अकस्मादेवाचिरो-परूढयौवनायाः कदम्बप्रियायाः परिवर्तितव्यवहारानवलोक्य ममापि विस्मयो जातः। न सा पूर्वमिव मया सार्धं वार्ताक्रमं प्रावर्तयत्, न चापि निर्विघ्नं मत्सम्मुखीनाऽतिष्ठत्। ततश्चैकस्मिन् दिवसे महाश्वेतैव रहस्यमिदमवगमयन्ती मां सूचितवती यत्कदम्बप्रिया सार्धं मयोद्वाहाय उभाभ्यामपि पक्षाभ्यामङ्गीकृतः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतदाकर्ण्यैव मन्मानसाम्बुधिः समुज्जिजृम्भे कदम्बप्रियाननेन्दुं चुम्बितुम्; परन्तु महाश्वेतया ज्ञापिततदभिप्रायाऽसौ न मत्समक्षमागतवती।

तस्मिन्नेव मासे विवाहसंस्कारस्सम्पन्नः। मम शैशवक्रीडाशुकी चिरपरिचिता कदम्बप्रिया पत्नीभूय मद्गृहमागता। विरलकुटुम्बिनि मम कुटुम्बेऽरण्यप्रख्ये वासन्तीसुषमेव समवातरत्। मत्प्रसूप्रतियातनाभूता सुनन्दाऽपि स्नुषालभ्यं बहुमानमात्मसात्कुर्वती सततामोदनिर्भरा जाता। पितृचरणोऽपि मे कदम्बप्रियोपनत-समादरपरिचर्यासन्ततिमनुभूय मम जनन्या अभावं केनचिदंशेनाधरीकृतवान्। ततश्च वर्षानन्तरमेव भूषणभट्टोऽपि जनिं लेभे। भूषणागमनेन सकलाऽपि गृहसमृद्धिः परां काष्ठामधिरूढा।

तस्मिन्नेव वर्षे महाश्वेतायाः परिणयोऽपि सम्पन्नः। ततश्च शबराक्रमणवृत्तं घटितम्। वर्षानन्तरमेव पितृचरणो दिवङ्गतः। ततश्च भूषणं सप्तवर्षीयं विहाय मद्भार्या कदम्बप्रियाऽपि लोकान्तरनिवासप्रीतिं प्रदर्शयन्ती मामेकाकिनं त्यक्तवती। अनेन नृशंसदुर्घटनाचक्रेण समुत्सन्नं जातं मम गार्हस्थ्योद्यानम्, प्राङ्मातुर्वियोगस्ततो महाश्वेताविपद्व्यतिकरस्तदनु तातपादानामभावोऽन्ते च जीवनदीपशिखायाः परिनिर्वाणम्। हृदयं विशीर्णमिव जातं धातुर्नृशंसतामवेक्ष्य। जिजीविषैव प्रणष्टा। क्व गन्तव्यम्? किं करणीयम्? कथमात्मा विपन्नोऽवलम्बनीयः? न किञ्चिदपि निश्चेतुं शक्यमासीत्।

एकतो महाश्वेताया विपदितिवृत्तम्। गृहपरिसरे तातपादानामभावजन्या दारुणव्यथा। गृहाभ्यन्तरे च कदम्बप्रियाया हृदयोन्माथिनी स्मृतिः। शोणतटमुपगम्य पाषाणशिलायामुपविश्य मुषित इव, कदर्थित इव, भृशमवमत इव, किंकर्तव्यविमूढ इव प्रभातात्सन्ध्यां यावत्कालमनैषम्। शिवालयगमनेऽप्यश्रद्ध इवाभवम्। चतुर्विंशतिवर्षदेशीय एव सन्नपि शरीरेण, चेतनया मनसा च वार्धक्यजर्जर इव जातोऽहम्।

मामेतदवस्थमवलोक्य सर्वेऽपि शैशववयस्याः सम्भूय समागताः सान्त्वयितुम्। ते मां प्रबोधितवन्तः—मित्रवर्य! न वयं भवादृशाः शास्त्ररसायनपायिनः पण्डिताः। ततश्चैव भवन्तं प्रबोधयितुमप्यक्षमाः; परन्तु धात्रोट्टङ्कितं भालपट्टलेखं मृषा कर्तुं को नु शक्तः? सर्वगुणसम्पन्नोऽपि नैषधो नलः किं विपद्ग्रस्तो नाऽभूत्? मर्यादापुरुषोत्तमोऽपि दाशरथिः किं कान्तारवासव्यथां प्रियापहरणजन्यावमानं न सोढवान्? अयुतसंख्यसिन्धुरबलोऽपि मध्यमपाण्डवः किं मत्स्येश्वरमहानसे भोजनं न पपाच? सङ्ग्रामजितत्रिपुरान्तकोऽपि सव्यसाची किं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बृहन्नलावृत्तिं नाऽवललम्बे? परन्तु न कोऽप्येतेषां जिजीविषां तत्याज। तन्महानुभाव! सन्धारयात्मानम्। चटकोऽपि नाम, वात्ययोत्सादिते सति कुलाये नवनीडनिर्माणं करोत्येव। वृक्षोऽपि, निकृत्ते सति शाखाचये शाखान्तरप्ररोहान् जनयत्येव। एतत्सर्वं दृष्टान्तीकुर्वताऽपि भवता कथमात्मा सन्तप्यते! न भवानेकलः। न भवानसहायः। न भवान्निरुपायः। सन्त्यनेकेऽभ्युपाया आत्मविनोदस्य। तद्यदि भवाननुमन्येत, सर्वेऽपि भवच्छैशववयस्या वयं नृत्यगीतवादित्रकुशला विषोपचारेन्द्रजालप्रदर्शनरदक्षा भवन्नेतृत्वे नाट्यप्रयोग-मनुष्ठाय सहृदयहृदयानुरञ्जनं कुर्याम। एतेन भवच्चित्तवृत्तिपरिवर्तनमपि भविता, कुलक्रमागतस्य विद्याविनोदस्य कलात्मक उपन्यासोऽपि वात्स्यायनवंशसमज्ञां संवर्धयिष्यति। शास्त्राभ्यासो नाम निश्चप्रचमौदासीन्यवर्धक एव; परन्तु नाट्यं नाम त्रिवर्गसाधनभूतं सद्यःपरनिर्वृतिकरञ्च। मन्निवेदनं श्रुत्वा मित्रवर्या एव प्रमाणमिति।

नाट्यप्रयोगप्रस्तावं श्रुत्वैव विद्युदुन्मेष इवाभ्यन्तरे मे समजनि। प्रगाढस्वापमग्नो मम कलाकारोऽकस्मादेव प्रबुद्धः। महापण्डितचित्रभानुपुत्रोऽयं शास्त्रमन्थनसरणिमपहाय लोकविनोदपरायणः कलाजीवी सञ्जातः। ततश्च यत्संवृत्तं, तन्नाविदितचरं भवतोऽपि भद्र! काव्यनाट्यकलाविलासेन लक्षकोटिमितानामपि सहृदयानां हृदयानि जित्वा, कस्यचिदेकस्याऽसहृदयस्य हृदयं जेतुं बाणभट्टोऽयं नाऽशकत्। तस्मादेव कान्यकुब्जं विहाय पुनरपि प्रीतिकूटमुपावृत्तोऽस्मि। भद्र! मनुष्यकल्पः कोऽपि हर्षः परित्यक्तो मया; परन्त्वीश्वरकल्पो हर्षोऽत्र समवाप्तो यतो हि सुखिनी महाश्वेतेदानीं स्ववल्लभेन सार्धम्।

निसर्गादेव कलासक्तोऽहमासम्। यद्यपि कुलपरम्पराऽनुरोधात् त्रयी मयाऽभ्यस्ता। शास्त्राण्यधीतानि। तन्त्रमन्त्रादिसंविधानकेऽपि परिश्रमः कृतः, तथापि ललितोचितसन्निवेशचारु काव्यमेव मह्यं सविशेषमरोचत। नाट्यप्रयोगेऽपि महत्यभिरुचिरासीत्। उदारदृष्टिस्तातपादोऽपि कुलक्रमागतदुर्धर्षपाण्डित्याभि-मानरक्षणदृष्ट्या मां शास्त्रादिपरिशीलनार्थमेव नितरां प्रेरयामास, तथापि कविकर्मणि काव्यप्रस्तुतौ चासीदेव तत्पक्षपातः। अद्याऽहं स्मरामि तस्य कादाचित्कं प्रीतवचनम्—

वत्स! या निम्नगा समतलभूमिभागे शान्तं स्थिरं निर्विघ्नञ्च प्रवहति, सैव हस्तिनखे प्रदेशे दुर्वारतीव्रगत्या पुरस्सरति; किन्तु समवाप्य पर्वतशिलान्तभूमिं गर्ते प्रपतन्ती सैव भैरवाकृतिर्जायते। तथैव कविप्रतिभा समवाप्य कोमलकान्तपदावलीं ललितोदात्तसंवेदनाञ्च सहृदयहृदयहारिकाव्यविग्रहमाधत्ते। शास्त्रार्थप्रभृति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाण्डित्यप्रदर्शनसन्दर्भे सैव प्रतिभा वितण्डाछलजातिनिग्रहस्थानाद्युपस्कृता वेगवती प्रतीयते। किञ्च, दुरारोहक्लिष्टशास्त्रमन्थनव्यापृता सैव प्रतिभा रुक्षाऽतिरुक्षा कठिनाऽतिकठिना जायते; परन्तु किमेतावता? विविधाऽध्वाऽध्वनीनेनायुष्मता भवितव्यम्। इति।

भद्र! अनेन वाचिकेन तातपादस्य मे सहृदयता स्फुटीभवति। नासीदसौ गताऽनुगतिकः। न चापि तातकूपधिया क्षारसलिलपायी। तदुदारदृष्टेः प्रसङ्गान्तरमेकमपरं स्मर्यते मया। तातपादैः सार्धं शिवालयं गतवता मया कस्मिंश्चित्सान्ध्यकाले स्तुतिपद्यमेकं गीतम्—जयन्ति बाणासुरमौलिलालिता इत्येवमादि। तत्पद्यं निशम्यैव सञ्जातरोमहर्षो जनको मेऽवसिते समर्चनोपक्रमे मां सस्नेहमपृच्छत्—आयुष्मन्! कुतस्त्यमिदं स्तुतिपद्यम्?

—तात! मयैव यथाकथञ्चित्प्रणीतम्। त्रपाभारभुग्नोऽहमकथयम्।

—साधु साधु! चिरञ्जीव। वत्स! प्रीतोऽस्मि पद्येनानेन। वंशकीर्तिं संवर्धयिष्यसि त्वम्। इत्येवमादि भणन्नेव तातपादो मां प्रगाढालिङ्गने बबन्ध।

सन्दर्भमिमं श्रावयतो महाकवेर्लोचनद्वन्द्वं सजलं जातम्। पुनरसौ वार्ताक्रमं प्रावर्तयत्—भद्र! नाट्यप्रयोगैर्लोकानुरञ्जनं सम्पादयता सरसकविगोष्ठीभिर्देववाणीं जनमानसे प्रतिष्ठापयता च मया दिवङ्गतानां तातपादानां सैवाकाङ्क्षा पूरिता। सैव तदुदारदृष्टिः सार्थक्यमुपनीता। न मया तदिच्छाप्रतिकूलं वंशप्रतिष्ठाविरुद्धं वा किमप्याचरितम्। ललितमार्गाश्रयेण कोमलाभिरुचिसंवर्धनेन वा न मे दुर्धर्षशास्त्रमन्थनमीषदपि क्षीणम्। तथापि अकारणवैरिभिः खलैः कैश्चित् कान्यकुब्जेश्वरं प्रसादयितुमस्मद्विषये नतोन्नतं श्रावितमेव।

भवतु! शिवाऽनुग्रहमात्राकाङ्क्षिणो बाणभट्टस्य जीवने राजानुग्रहप्रसङ्गोऽप्यसौ स्वप्नकल्प एवाऽऽसीत्। स्वप्नस्तु स्वप्न एव! तद्विस्मृतावेव भव्यमस्माकम्। भद्र! स्वप्नाः सम्भवन्ति रात्रावेव, प्रगाढनिद्रायामेव; परन्तु सा रात्रिर्मया व्यतीता कान्यकुब्ज एव। स्वप्नोऽप्यसौ विलीनस्तस्यामेव रात्रौ। सम्प्रति विलसति दिनं भास्करातपमण्डितम्। प्रबुद्धोऽस्मि। प्रोन्मीलितलोचनोऽस्मि।

भद्र! यदवाप्तं राजानुग्रहपारितोषिकं तदधिकं मया समर्पितं हर्षदेवाय तच्चरितं प्रणीय। सम्प्रति प्रीतिकूटस्थस्सन् प्रारब्धप्रीतिकथां पूरयिष्यामि। अस्यामतिद्वय्यां कथायां भविष्यति मद्भगिनी महाश्वेता, भविष्यति तद्वल्लभः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुण्डरीकः, भविष्याम्यहं, भविष्यति मत्सहचरी कदम्बप्रिया। आक्रान्ता शबरसेनापतिरपि भविष्यति कथायामस्याम्। निखिलाऽप्यस्मज्जन्मभूमिर्विन्ध्याटव्युपान्तभूता वृत्तेऽस्मिन् प्रतिबिम्बिता भविष्यति। यथार्थकल्पनयोः सङ्गमस्थली भविष्यति कथेयम्।

सम्प्रति विश्राम्य त्वम्। श्वस्तने प्रभाते महाश्वेतां द्रष्टुं तदग्रहारमावां गमिष्यावः। एहि, भवनमेव गच्छावः।

उत्तिष्ठ, चायपेयमानीतवत्यस्मि। पत्न्यास्तारस्वरं श्रुत्वाऽकस्मादेव प्रगाढनिद्रा मे तावदेव भग्ना। हतप्रभ इवाऽहमुत्थाय पत्नीमवोचम्—भो, महाकविना बाणभट्टेन सार्धं महाश्वेतां द्रष्टुं गन्तास्मि!

साट्टहासमर्धाङ्गिनी प्रोवाच—भो, संस्कृताध्यायकानामयमेव दोषो यत्ते स्वप्नेऽपि कादम्बरीरघुवंशादिकमेव पाठयन्ति। भवतु, प्रथमं तावत्पश्य स्वकीयां महाकालीं माम्। पश्चान्महाश्वेतां द्रक्ष्यसीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्क्ङिति चेति सूत्रार्थविचार:

डॉ. गिरिजेशकुमारदीक्षित:
उपाचार्य:, व्याकरणविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालय:
वाराणसी

***

अत्र सूत्रे ककारात्पूर्वं चर्त्वेन गकारस्यापि निर्देश:। तेन क्क्ङितीत्यस्य 'गित्त्वे कित्त्वे ङित्त्वे' चेत्यर्थ: सम्पद्यते। तथा च यं प्रत्ययमाश्रित्येग्लक्षणे गुणवृद्धी विधीयेते, तस्याश्रियमाणस्य प्रत्ययस्य गित्त्वे कित्त्वे ङित्त्वे च सति ते इग्लक्षणे गुणवृद्धी न भवत इति सूत्रार्थ:। तत्र गित्त्वे 'जिष्णु:', कित्त्वे 'स्तुत:', ङित्त्वे च 'चिनुत:' इत्यादीन्युदाहरणानि बोध्यानीति।

अत्र तावत्सर्वत: पूर्वमिदं विचार्यते यत् 'जिष्णु:' इत्यत्र 'ग्लाजिस्थश्च क्स्नु:[1]' इत्यनेन क्स्नुप्रत्यये सति 'क्ङिति च[2]' इति गुणनिषेधे 'जिष्णु:' इत्यस्य सिद्धिर्भवति। न चैवं जिष्णुरिति कित्त्वस्योदाहरणं भवितुमर्हति, न तु गित्त्वस्येति विचिकित्सायामुच्यते क्ङिति चेत्यस्य सूत्रस्य न्यासे—'क्स्नुप्रत्ययोऽयं यदि कित् स्यात्तर्हि 'स्थास्नु:' इत्यत्र 'घुमास्थागापाजहातिसां हलि[3]' इति सूत्रेण तिष्ठतेरीत्त्वं स्यात्। अतस्तत्परिहाराय क्स्नोर्गित्त्वं प्रतिज्ञायते। तथा हि 'ग्लाजिस्थश्च क्स्नु:[4]' इत्यत्रोक्तं गिच्चायं प्रत्ययो न कित्। तेन स्थ ईकारो न भवतीति।

नन्वेवं क्स्नोर्गित्त्वे सति 'जिष्णु:' इत्यत्र 'क्क्ङिति च[5]' इति प्रतिषेधो न स्यादित्यत आह—गकारोऽप्यत्र चर्त्वभूतो निर्दिश्यते। चर्त्वं भूत: = चर्त्वं प्राप्त इत्यर्थ:। अत एव गकारप्रश्लेषात् संख्यातानुदेशो न भवति। अन्यथा क्ङितौ द्वौ, गुणवृद्धी अपि द्वे—इति संख्यातानुदेश: प्राप्नोति। तथा सति किति गुणस्य, ङिति

---

१. पा.सू. ३।२।१३९। २. पा.सू. १।१।५।
३. पा.सू. ६।४।६६। ४. पा.सू. ३।२।१३९।
५. पा.सू. १।१।५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृद्धेर्निषेध इत्येवं स्यात्, न चैवमवलोक्यते। अथवा यदयं 'मिदेर्गुणः'[१] इति श्यनि ङिति गुणं शास्ति तत्ज्ञापयत्याचार्यः 'नात्र संख्यातानुदेशो भवति' इति। तथा चैतज्ज्ञापकाद्वा नात्र संख्यातानुदेशः।

नन्वेवमपि यदि हि क्स्नोर्गित्त्वमिष्यते तर्हि 'भूष्णुः' इत्यत्र 'श्र्युकः किति'[२] इति किति प्रतिषेध उच्यमानोऽत्र कित्त्वाभावान्न स्यादिति मनसि निधायोच्यते न्यासे—'नैष दोषः, तत्रापि चर्त्त्वभूतो गकारो निर्दिश्यते'। तथा हि 'ग्लाजिस्थश्च क्स्नुः'[३] इत्यत्र जयादित्यवृत्तौ ग्रन्थः—'क्क्ङिति च'[४] इत्यत्र गकारश्चर्त्त्वभूतो निर्दिश्यते। तेन गुणो न भवति। 'श्र्युकः किति'[५] इत्यत्रापि गकारो निर्दिश्यते। तेन भुव 'इड्' न भवतीति। 'श्र्युकः किति'[६] इत्यत्रापि जयादित्यवृत्तौ ग्रन्थः—'गकारोऽप्यत्र चर्त्त्वभूतो निर्दिश्यते। 'भूष्णुः' इत्यत्र यथा स्यादिति।

वामनस्य त्वेतत्सर्वमनभिमतम्। तथा हि तस्यैव सूत्रस्य तद्विरचितायां वृत्तौ ग्रन्थः—''केचिदत्र द्विककारनिर्देशेन गकारप्रश्लेषं वर्णयन्ति, भूष्णुरित्येवं यथा स्यात्। सौत्रत्वाच्च निर्देशस्य 'श्र्युकः किति'[७] इत्यत्र चर्त्त्वस्यासिद्धत्वमनाश्रित्य 'हशि च'[८] इति रोरुत्वं न कृतम्, 'कुप्वोः ≍क≍पौ च'[९] इति विसर्जनीयश्च कृत इति। 'ग्लाजिस्थश्च क्स्नुः'[१०] इत्यत्र 'स्था आ' इत्याकारप्रश्लेषेण स्थास्नोः सिद्धत्वान्न किञ्चिदेतत्'' इति। स एवं मन्यते—यदि क्स्नुप्रत्ययस्य कित्त्वे सति तिष्ठतेरीत्त्वं प्राप्नुयात्तदा तत्परिहारार्थं गित्त्वं युज्यते प्रतिज्ञातुम्। गित्त्वे च सति 'जिष्णुः', 'भूष्णुः' इत्यत्र यथायोगमिड्गुणयोर्निरासाय 'क्क्ङिति च'[११] इत्यत्र 'श्र्युकः किति'[१२] इत्यत्र च गकारश्चर्त्त्वभूतो निर्दिश्यमानः शोभेत, न च क्स्नुप्रत्ययो गित्, किं तर्हि किदेव। तत्किमिड्गुणप्रतिषेधार्थेन चर्त्त्वभूतगकारस्य निर्देशेन। न च क्स्नोः कित्त्वे सति तिष्ठतेरात्वं प्राप्नोति। तस्मात्—'' 'ग्लाजिस्थश्च क्स्नुः'[१३] इत्याकारप्रश्लेषः कृतः। क्स्नुप्रत्ययान्तस्य तिष्ठतेराकार एव यथा स्यात्,

---

१. पा.सू. ७।३।८२। २. पा.सू. ७।२।११।
३. पा.सू. ३।२।१३९। ४. पा.सू. १।१।५।
५. पा.सू. ७।२।११। ६. पा.सू. ७।२।११।
७. पा.सू. ७।२।११। ८. पा.सू. ६।१।११४।
९. पा.सू. ८।३।३७। १०. पा.सू. ३।२।१३९।
११. पा.सू. १।१।५। १२. पा.सू. ७।२।११।
१३. पा.सू. ३।२।१३९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदन्यत्राप्नोति तन्मा भूत्'' इत्येवमर्थ:। ततश्च तेनैव सिद्धत्वात् स्थास्नु-शब्दस्याकिञ्चित्करमिह गकारप्रश्लेषवर्णनमिति।

इग्लक्षणे इति किम्? लैगवायन:। 'ओर्गुण:'[1] इति निर्दिष्टस्थानिकत्वादिक्पदानुपस्थित्या फक: कित्त्वेऽपि तन्निमित्तको गुणो यथा स्यात्। अत एव 'कामयते' इत्यत्र कमेर्णिङो ङित्त्वेऽपि तमाश्रित्य 'अत उपधाया:'[2] इति वृद्धिर्धात्वकारस्य भवत्येव। आश्रित्येति किम्? छिन्नम्, भिन्नमित्यादौ लघूपधगुणोऽपि यथा न स्यात्।

अत्र 'इको गुणवृद्धी'[3] इत्यत इक इत्यनुवर्तते, गुणवृद्धी इति च। तथा च क्क्ङतीत्यनेनेको विशेषणे क्क्ङति परतो य इगित्यर्थे 'तस्मिन्निति निर्दिष्टे पूर्वस्य'[4] इति परिभाषोपस्थितौ निर्दिष्टशब्दस्याव्यवहितोच्चारितार्थकतया 'चितम्, स्तुतम्' इत्यादौ किदाव्यवहितपूर्ववर्तिन एवेको गुणनिषेधे चितम्, स्तुतमित्यादावेव गुणनिषेध: स्यान्न तु भिन्नम्-भिन्नवानित्यादौ दकारेण व्यवहितत्वात्।

तस्मात् क्क्ङतीति गुणवृद्धिविशेषणमेव। ततश्च नेयं परसप्तमी, क्क्ङति परे गुणवृद्ध्योरविहितत्वात्। अन्यथा विकल्पापत्ते:; किन्तु निमित्ततामात्रे। तच्चेगन्तेऽव्यवधानेन, लघूपधे व्यवधानेनेति यथाप्राप्तं गृह्यते, अनुवादस्य यथाप्राप्तपरत्वनियमात्। निमित्तत्वमपि सार्वधातुकत्वादिना तत्तद्विधौ श्रूयमाणेन धर्मेण। क्ङिदादौ निषेधसामर्थ्याद्विधिवाक्येषु तदनुल्लेखाच्च। यद्यपि निमित्तत्वं सप्तम्यर्थो विशिष्य नोक्तस्तथापि 'क्ङिति सति प्राप्ते ये गुणवृद्धी' इति सम्बन्धे अर्थात्तत्प्रत्ययस्य निमित्तत्वं पर्यवस्यतीत्याहु:।

'रलो व्युपधाद्धलादे: संश्च'[5] इत्यादिना कित्त्वातिदेशश्चात्र मानम्। अन्यथा व्यवधानेन गुणनिषेधाप्रवृत्तौ तदर्थकित्त्वस्य वैयर्थ्यापत्ते:।

वस्तुत: क्क्ङतीत्यत्र विशेष्याकाङ्क्षायां 'न धातुलोप आर्धधातुके'[6] इति सूत्रस्थार्धधातुकपदेन तिङ्शिद्भिन्नत्वे सति धात्वधिकारोक्तप्रत्ययत्वेन रूपेण तत्समर्पणेऽपि विशिष्टस्यात्र विशेष्यत्वस्वीकारे 'सार्वधातुकमपित्'[7] इत्यादीनां

---

१. पा.सू. ६।४।१४६। २. पा.सू. ७।२।११६।
३. पा.सू. १।१।३। ४. पा.सू. १।१।६६।
५. पा.सू. १।२।२६। ६. पा.सू. १।१।४।
७. पा.सू. १।२।४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यर्थत्वापत्त्या सत्यन्तम्परित्यज्य धात्वधिकारोक्तप्रत्ययत्वमेव विशेष्यतावच्छेदकम्। विशिष्टवाचकपदानां सति बाधकत्वे विशेष्यमात्रपरत्वस्य लक्षणां विनैव स्वीकारात्।

श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।
मत्वा च सततं ध्येय एते दर्शनहेतवः[१]॥

इत्यत्र श्रुतिशब्दस्य प्रमाणशब्दमात्रपरत्वाङ्गीकारात्। ततश्च प्रत्ययेनाङ्गस्योपस्थित्या लघूपधस्याङ्गस्याव्यवधानादुभयत्रापि निषेधसिद्धिः, अङ्गापेक्षस्यैवाव्यवधानस्य स्वीकारात्[२]। इहान्ये वैयाकरणा मृजेरजादौ सङ्क्रमे विभाषा वृद्धिमारभन्ते क्ङित्यचि वा इति 'इको गुणवृद्धी'[३] इति सूत्रे भाष्यम्[४]। सङ्क्रमो गुणवृद्धिप्रतिषेधहेतुभूतः क्ङित्प्रत्ययः, पूर्वाचार्यसङ्केतात्। अजादौ क्ङिति प्रत्यये परे मृजेर्विकल्पेन वृद्धिर्भवतीति तस्यार्थः। मृजन्ति, मार्जन्ति।

अत्र हरदत्तः[५]—'यस्मिन्विधिस्तदादावल्ग्रहणे'[६] इति परिभाषयैव सिद्धौ 'अजादाविति' वचनं मुख्याजादिग्रहार्थम्। तेन व्यपदेशिवद्भावेनाजादौ न भवति। यथा 'पूयं ममृज, त्वया ममृजे' इति। अत्र केचिदेवं वदन्ति—तथापि ममृज इत्यत्र विकल्पो दुर्वारः। लिटि मध्यमपुरुषबहुवचनस्य थस्य स्थाने विधीयमानोऽकारादेशोऽन्त्यस्य प्राप्नोति। न चैवं विधिवैयर्थ्यम्, थकारोत्तराकारस्य तत्र स्वत एव सत्त्वादिति वाच्यम्, णलादीनां यथासंख्यसम्पादनेन सार्थक्यादित्याशङ्क्य अकारद्वयात्मकोऽयमादेशोऽनेकाल्त्वात्सर्वस्य।

यद्वा 'धातोः'[७] इत्यधिकाराद्धातोः परस्य थस्याकारविधाने 'आदेः परस्य'[८]

---

१. सांख्यप्रवचनभाष्यम्, पृ. १।

२. पा.सू. १।१।५ (प्रदीपे कैयटः)।

३. पा.सू. १।१।३।

४. एवं तर्हीहान्ये वैयाकरणा मृजेरजादौ सङ्क्रमे विभाषा वृद्धिमारभन्ते। परिमृजन्ति, परिमार्जन्ति, परिमृजन्तु, परिमार्जन्तु, परिममृजतुः, परिममार्जतुरित्याद्यर्थम्। तदिहापि साध्यम्। तस्मिन् साध्ये योगविभागः करिष्यते (मृजेर्वृद्धिरचः) मृजेर्वृद्धिरचो भवति। ततः—'अचि क्ङिति'। अजादौ च क्ङिति मृजेर्वृद्धिर्भवति। परिमार्जन्ति, परिमार्जन्तु, परिममार्जतुः। किमर्थमिदम्? नियमार्थम्, अजादावेव क्ङिति, नान्यत्र। क्वान्यत्र मा भूत्? 'मृष्टः' मृष्टवानिति। ततो 'वा'। वाऽचि क्ङिति मृजेर्वृद्धिर्भवति। परिमृजन्ति, परिमार्जन्ति, परिममृजतुः, परिममार्जतुरिति। (महाभाष्यम्, पा.सू. १।१।३)।

५. पदमञ्जरी, पा.सू. १।१।५।

६. परि. ३३।

७. पा.सू. ३।१।९१।

८. पा.सू. १।१।५४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

131026

131026

इति परिभाषया थकारस्यैवाकारः, उभयथापि 'अतो गुणे'[1] इति पररूपमिति भाष्ये स्पष्टम्। तस्य स्थानिवद्भावेन मुख्याजादित्वमस्त्येवेति।

अन्ये त्वाहुः—व्यपदेशिवद्भावनिबन्धनाजादित्वस्येव स्थानिवत्त्वनिबन्धनस्यापि तस्य गौणताया वक्तुं शक्यत्वान्नेदं साधीयः; किन्त्वजादाविति न विधिवाक्यशरीरम्, येनोक्तमर्थं ज्ञापयेत्; किन्तु 'क्ङित्यचि वा' इति तदुत्तरभाष्यपठितमेव। पूर्वभाष्यस्थमजादिपदं तु अचीत्यस्य 'यस्मिन्॰'[2] इति परिभाषासिद्धार्थानुवादमात्रम्। अतो न हरदत्तोक्तं युक्तम्। अत एव ममृजेत्यत्र भिदादिपाठादङ् गणपाठादेव वृद्ध्यभाव इत्याह—**आत्रेयः**।

अत एव **मैत्रेयरक्षितेनापि धातुप्रदीपे** तुन्दपरिमृजस्तुन्दपरिमार्ज इत्युभयं दर्शितम्। **दुर्घटवृत्तौ** तु 'तुन्दपरिमृजः' इत्यत्र व्यवस्थितविभाषया वृद्धिर्नेत्युक्तम्। अत एव **धातुवृत्तिषु** पूयं ममृज, ममार्जेति रूपद्वयमुदाहृतम्।

इदं चान्यदप्यवधेयम्। क्ङित्येव विकल्पारम्भाद् धात्वंशलोपनिमित्तत्वेन वृद्धिनिषेधहेतावच्प्रत्यये नायं विकल्प इत्यत्रोक्तम्। तत्सूत्रप्रत्याख्यानप्रस्तावे तु अतो लोपस्य स्थानिवद्भावमाश्रित्य यथोत्तरं मुनीनां प्रामाण्येन वृद्धिविकल्पो भवत्येवेत्युक्तम्, तच्चिन्त्यम्। सूत्रारम्भपक्षे यथारूपं तथैव तत्प्रत्याख्यानेऽपीति तत्र भाष्याभिप्रायस्यावश्यकत्वात्। तस्य चात्र हरदत्तोक्ताभिप्रायेणैव सिद्धेरिति दिक्।

ननु 'अचिनोत्', 'अमार्ट्' इत्यादौ स्थानिवद्भावेन तिबादेर्ङित्त्वात् 'क्ङिति च'[3] इति गुणवृद्धिनिषेधापत्तिः। न चानल्विधाविति तन्निषेधः शङ्क्यः? अनुबन्धकार्येष्वनल्विधाविति निषेधस्याप्रवृत्तेः। अन्यथाऽचिनवममार्जमित्यादावपित्त्वेन 'सार्वधातुकमपित्'[4] इति ङित्त्वापत्तेः। ज्ञापकं चात्र 'न ल्यपि'[5] इति सूत्रेणेत्त्वनिषेधः। अन्यथा क्त्वानिष्ठकित्त्वस्य स्थानिवद्भावेन ल्यप्यप्रवृत्तौ कित्त्वाभावादेवेत्त्वाप्रसक्तौ तद्वैयर्थ्यापत्तेः।

यत्तु 'सेर्ह्यपिच्च'[6] इत्यपिद्वचनं ज्ञापकमिति तन्न, 'शृणोहि विश्वतः प्रति' इत्यादौ 'स्थानेऽन्तरतमः'[7] इति परिभाषया पित्त्वादनुदात्तस्य सिपः स्थानेऽनुदात्तस्यैव हेः प्राप्तावुदात्तसम्पादनेन चरितार्थत्वात्। अपित्त्वसामर्थ्याद्धि

१. पा.सू. ६।१।९७।
२. परि. ३३।
३. पा.सू. १।१।५।
४. पा.सू. १।२।४।
५. पा.सू. ६।४।६९।
६. पा.सू. ३।४।८७।
७. पा.सू. १।१।५०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रान्तरतमपरिभाषा बाध्यते। प्रतिपत्तिलाघवार्थमुदात्त इति वक्तव्येऽपिद्वचनं ज्ञापकमिति वाऽस्तु। न्यायसिद्धोऽप्ययमर्थः—'अनुबन्धानामनेकान्तत्वेन स्थानिकोटावप्रविष्टतया स्थान्यलाश्रयविधिविषयकस्यानल्विधाविति निषेधस्याऽप्रवृत्तेः। 'अनुबन्धा एकान्ताः'[१] इति मतेऽपि स्थानित्वप्रतीतेः प्रागेवान्तरङ्गेण लोपेन तेषामपहारात्।

तस्माल्लङाद्यादेशानां तिबादीनां स्थानिवद्भावेन ङित्त्वं दुर्वारमित्यत्राहुः—'यासुट् परस्मैपदेषु०'[२] इति सूत्रे ङिद्वचनं ज्ञापकम्—'लादेशानां स्थानिवद्भावेन ङित्त्वन्न भवतीति'। तथा च वार्त्तिकम्—लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावप्रसङ्ग इति चेत्, यासुटो ङिद्वचनात्सिद्धमिति। अन्यथा लिङ्वद्भावप्रयुक्तङित्त्वेन तदादेशानां ङित्त्वे तदवयवस्य यासुटोऽपि तत्त्वात् 'यासुट् परस्मैपदेषूदात्तो ङिच्च'[३] इति ङिद्वचनं व्यर्थं स्यात्।

न च 'स्तुयात्' इत्यादौ 'उतो वृद्धिर्लुकि हलि'[४] इत्यस्या उत इति निर्दिष्टस्थानिकत्वेनानिग्लक्षणाया वृद्धेः, 'चिनुयुः' इत्यादौ—'क्ङिति च'[५] इति निषेधापवादस्य 'जुसि च'[६] इति गुणस्य च प्रतिषेधार्थं ङिद्वचनमस्तु, पुनर्ङित्त्वसामर्थ्यं विना स्थानिवत्त्वप्रयुक्तङित्त्वमात्रेण तन्निषेधस्यानुपपत्तेरिति कथं तस्य ज्ञापकत्वमिति वाच्यम्, 'उत औत्' इत्येव सिद्धे वृद्धिग्रहणेन 'संज्ञापूर्वको विधिरनित्यः'[७] इति वृद्धिनिषेधसिद्धेः। 'क्सस्याचि'[८] इत्यस्मादचीत्यनुवर्त्त्याजादौ जुसि गुणविधानात्, यासुटि कृते च जुसो हलादित्वसम्पत्तेः। यद्वा 'मिदेर्गुणो जुसि च' इति संहितापाठे 'अजुसि' इति छित्त्वाऽजादावुसि गुणविधानात्।

यत्त्वेवं 'चक्रुः, जह्रुः' इत्यादावतिप्रसङ्ग इति, तन्न। तस्याजादित्वव्यभिचाराभावेन विशेषणवैयर्थ्यापत्त्या तत्सामर्थ्येन जुस्येव पर्यवसानात्।

वस्तुतस्तु—अच्चासावुस् चेति न कर्मधारयः। उकारसकारात्मकसमुदायेऽजभेदस्य बाधितत्वात्। न चाच्पदमजादौ लाक्षणिकम्? गौरवात्। न चात्र

---

१. परि. ५।
२. पा.सू. ३।४।१०३।
३. पा.सू. ३।४।१०३।
४. पा.सू. ७।३।८९।
५. पा.सू. १।१।५।
६. पा.सू. ७।३।८३।
७. परि. ९४।
८. पा.सू. ७।३।७२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'यस्मिन्विधिस्तदादावल्ग्रहणे'[१] इति निर्वाहः। यस्मिन्निति सप्तम्यन्तानुकरणेनालः सप्तम्यन्तत्व एव तत्प्रवृत्तेः। अत्र च विशेष्येणान्वये तद्विभक्त्याऽस्य सप्तम्यन्तत्वे परिभाषाप्रवृत्तिः। तस्यां चाजादिपरत्वेन योग्यतासम्पत्त्या विशेष्यान्वय इत्यन्योऽन्याश्रयात्। एतेन—उजुसीतिच्छेदोऽपि निरस्तः। अत एवाचीति सप्तम्यन्तानुवृत्तिपक्ष एव सप्तमे भाष्यकृता[२] सिद्धान्तित इति दिक्।

न चैवं 'जुसि गुणे यासुट्प्रतिषेधः'[३] इति तत्रत्यवार्तिकवैयर्थ्यम्? उक्तरीतावेव तस्य तात्पर्यस्य तत्रोक्तत्वादिति।

न चैवमपि 'ब्रूतात्' इत्यत्र 'ब्रुव ईट्'[४] इतीडागमापत्तिः, तातङः स्थानिवत्त्वेन पित्त्वादिति वाच्यम्? 'अनित्यमागमशासनम्'[५] इति परिहारात्।

भाष्यमते तु 'सार्वधातुकमपित्'[६] इत्यत्र 'अपित्' इति योगो विभज्यते, ङिदिति चानुवर्तते। पर्युदासवृत्तिं नञं च पृथक्कृत्य ङित् पिन्न, पित् ङिन्न भवतीत्यावृत्त्या वाक्यद्वयं कल्प्यते। तथा च ङित्त्वपित्त्वयोः परस्परात्यन्ताभावव्याप्यत्वलाभे अर्थादौपदेशिकेनातिदेशिकस्य बाधः फलति। तेन 'ब्रूतात्' इत्यत्रेण्न। तातङ औपदेशिकङित्त्वेनान्तरङ्गेणातिदेशिकस्य बहिरङ्गस्य पित्त्वस्य बाधात्। 'अतिदिष्टादुपदिष्टं बलीयः'[७] इति न्यायात्।

'अचिनोत्' इत्यादौ त्वौपदेशिकेन तिबादीनां पित्त्वेन लाश्रयमातिदेशिकं ङित्त्वम्बाध्यते। तेन गुणादिसिद्धिः। अस्मिंश्च पक्षे यासुटो ङिद्वचनं न ज्ञापकम्; किन्तु 'मृज्यात्' इत्यादावप्राप्तङित्त्वविधायकम्। तेन च पित्त्वस्य 'चिनोति' इत्यादौ सावकाशस्य बाधोऽतः 'स्तुयात्' इत्यादौ 'पिति हलि' इति विधीयमाना वृद्धिर्न प्रवर्तते। 'चिनुयुः' इति तु प्राग्वदेव समर्थनीयम्। पूर्वोदाहृतवार्त्तिकमते तु 'ब्रूतात्' इत्यत्रेट् प्राप्नोति, 'आगमशासनमनित्यम्'[८] इति तु कथञ्चित्समाधेयः।

---

१. परि. ३३।

२. अथवाऽचीति वर्तते। तेन जुसं विशेषयिष्यामः। अजादौ जुसीति। (महाभाष्यम्, पा.सू. ७।३।८३)।

३. पा.सू. ७।३।८३।

४. पा.सू. ७।३।९३।

५. परि. ९५।

६. पा.सू. १।२।४।

७. परि. १३०।

८. परि. ९५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तुतस्तु 'हलः श्नः शानज्झौ'[१] इति शानचः शित्करणेन 'क्वचिदनुबन्धकार्येऽप्यनल्विधाविति निषेधः प्रवर्त्तते' इति ज्ञाप्यते। तेन 'ब्रूतात्' इत्यादौ न कश्चिद्दोष इति। अत एव भाष्यमते 'भविषीष्ट' इत्यत्र ङित्त्वं न, 'करिष्यमाणा' इत्यत्रोगिल्लक्षणष्टिल्लक्षणश्च ङीब्नेति दिक्।

१. पा.सू. ३।१।८३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पातञ्जलमहाभाष्ये पर्यावरणविज्ञानम्

डॉ. श्रीकान्तपाण्डेयः
उपाचार्यः, व्याकरणविभागे
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी

* * *

शाब्दिकसमवाये महर्षिपतञ्जलिप्रणीतं पाणिनीयाष्टकस्य कात्यायनविरचित-वार्तिकानाञ्च व्याख्यानभूतं व्याकरणमहाभाष्यं सुप्रथितं विद्यते। ग्रन्थोऽयं विश्वकोष इव मन्यते संस्कृतवाङ्मये। यतो हि तत्र पाणिनीयसूत्राणां कात्यायनवार्तिकानाञ्च विवेचनप्रसङ्गे श्रीपतञ्जलिना विभिन्नानि भौतिकविज्ञानतत्त्वान्यपि प्रकरण-वशात्प्रकाशितानि। निबन्धेऽस्मिन् पातञ्जलमहाभाष्ये पर्यावरणविज्ञानमधिकृत्य कानिचित्तथ्यानि निरूप्यन्ते।

पर्यावरणविज्ञानमाधुनिकयुगे विश्वस्मिन् सर्वातिशायि चिन्तनीयं विज्ञानं वरीवर्ति। यतो हि पर्यावरणप्रदूषणहेतुना चराचरसृष्टिरव्यवस्थिता जाता येनाभिनवा अभिनवा रोगाः, क्वचिदतिवृष्टिः क्वचिच्चानावृष्टिः, क्वचिज्झंझावातः, क्वचिज्जलप्लावनञ्च दरीदृश्यते। पौरस्त्यपाश्चात्यवैज्ञानिकैरनुसन्धायेदं निश्चितं यद् भौतिकविज्ञामस्याधिकाधिकसुविधाभिर्मानवजातिः स्वां योजयितुं तासामुपभोगाय च प्रकृतेर्दोहनं प्रचुरमात्रायां कृतवती। पृथिव्यामाकाशे समुद्रे पातालेऽन्तरिक्षे च सर्वत्र भौतिकविज्ञानस्य हस्तक्षेपः सञ्जातः। वनानि विच्छिन्नानि, रासायनिकपदार्थैः सरःसरित्समुद्रजलानि प्रदूषितानि, आकाशे 'ओजोन' इत्याख्ये आवरणे (सूर्यस्य परावैंगनीकिरणानि भयङ्कररोगजनकानि सन्ति, तेषामवरोधकमिदमावरणम्) विशालं छिद्रं जातम्। यथा यथा रोगलक्षणविरोधिभेषजानामाविष्कारो भवति, तथा तथा विभिन्ना असाध्यरोगा जायन्ते। सन्ति चेमे पर्यावरणप्रदूषणस्योत्पाताः।

किमिदं पर्यावरणं प्रदूषणञ्चेति प्रथमतः समासेन प्रस्तूयते। परितः आवरणं पर्यावरणमत्र 'परि', 'आ' इत्युपसर्गाभ्यां वृञ्[१]-धातोर्ल्युटि[२] प्रत्यये सति पर्यावरणशब्दो निष्पद्यते। आवरणञ्च पृथिव्यप्तेजोवाय्वाकाशात्मकं प्रकृतिरेव तात्पर्यविषयतामञ्चति। प्रत्यग्रप्रयुज्यमाने पर्यावरणे मुख्यतया वातावरणस्याध्ययनं

---

१. धातुपाठः-१२५४; २. पा.सू. ३।३।११७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पद्यते। पूर्वं हि वातावरणस्याध्ययनं भूगोलविज्ञाने यत् क्रियते स्म तस्यैवाधुना मानववातावरणसम्बन्धे विधीयते। वस्तुतो भूगोलविज्ञानमपि पृथिव्यां समस्तमानवसमुदायस्य तथा तस्य प्राकृतिकवातावरणस्य परस्परं क्रियाशीलाया विस्तृतायाः प्रणाल्या अध्ययनं भवति[1]।

वातावरणस्य शाब्दिकोऽर्थो विद्यते 'आवरणमेकप्रकारकम्'। अर्थात् प्राकृतिकसांस्कृतिकतत्त्वानामेकमावरणमथवा विन्यासो यो मानवमावृतं कृतवान् तथा यस्मिन् मानवो वसति, जीविकोपार्जनं विधत्ते, निर्माणं करोति, कलासाहित्ययोरानन्दमनुभवति, अपि च विविधा जीवनोपयोगिनीः क्रिया निर्वर्त्तयति। पर्यावरणवातावरणपरिवेशपरिस्थितिशब्दाः पर्यायाः। आङ्ग्लभाषायां पर्यावरणस्य कृते Envarronment (एनवायरनमेण्ट) शब्दः प्रयुज्यते।

वातावरणस्य लक्षणानि यथा—'वातावरणं तासां सर्वासां प्रभावजनिकानामवस्थानां योगः कथ्यते यत्र जीवो वसति'[2]। 'तत्प्राकृतिकं सांस्कृतिकं च व्यवस्थापनं यत्र मानवस्य निवासः'[3]।

भारते प्रथमविश्वयुद्धस्यानन्तरं जीवविज्ञानान्तर्गतं पारस्थैतिकी-विज्ञानस्याध्ययनं प्रारभत। अस्य विज्ञानस्याध्ययनस्य मुख्यमुद्देश्यमासीत्—वनभूमिसंरक्षणम्, पशुसंरक्षणम्, नदीनां प्रदूषणराहित्यम्, अन्याः सामाजिक्यो गतिविधयश्च।

प्राचीनभारते पर्यावरणस्याध्ययनं विशेषतो नासीत्, आवश्यकताऽपि न काचिदनुभूयते स्म। यद्यपि भूगोलविज्ञानस्याध्ययनमासीदिति वाल्मीकीयरामायणस्य किष्किन्धाकाण्डे सुग्रीवेण भूगोलविषयकं यज्ज्ञानं वानरा विज्ञापितास्तेन विज्ञायते। किञ्च श्रीमद्भागवतादिपुराणेष्वपि खगोलविज्ञानस्य भूगोलविज्ञानस्य च भुवनकोषवर्णनसन्दर्भे विस्तरेण विवेचनमवलोक्यते[4]।

पुरा भारतीयानां जीवनशैल्यां पर्यावरणस्यानुकूलतां प्रति स्वाभाविकी सद्भावना आञ्जस्येन जागर्ति स्म। प्रकृतिं प्रति प्राचीनभारतीयकवीनां शास्त्रकाराणां महर्षीणां चाभिनिवेशः स्वत आसीत्, अत एव प्राचीनभारतीयवाङ्मये प्रकृतेर्वर्णनमथवा तदुल्लेखो बहुशो दृश्यते। किं बहुना, ओषधयो वनस्पतयो वृक्षा लता इत्यादयो देवताः कथिताः। अपि च पृथिव्या अन्तरिक्षस्य अपामाकाशादीनां च शान्तिः पर्यावरणशुद्धिदिशा प्रार्थिता। तथा च—

१. पी. हेगडे जियोग्रॉफी, ए माडर्न सिन्थेसिस (१९७५ ई.) पृ. ११।
२. ए.जी. टांसले—प्रैक्टिकल प्लाण्ट इकोलॉजी (१९२६ ई.)।
३. जे.पी. फिल्डिंग—जियोग्रॉफी एज सोशल साइन्स (१९७४ ई.) पृ. ३१९।
४. श्रीमद्भागवतपुराणम् स्क. ५, अ. १६-२६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'य ईङ्खयन्ति पर्वतान् तिरः समुद्रमर्णवम्।
मरुद्भिरग्न आ गहि'[१]।
'......नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय'[२]।

'द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि'[३]। 'अक्रान्त्समुद्रः प्रथमे विधर्मं जनयन् प्रजा भुवनस्य गोपाः। वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः'[४]। 'नमो रुद्राय नमो अस्तु तक्मने नमो राज्ञे वरुणाय त्विषीमते। नमो दिवे नमः पृथिव्यै नम ओषधीभ्यः'[५]। '.....माता भूमिः पुत्रोऽहं पृथिव्याः पर्जन्यः पिता स उ नः पिपर्तु'[६]। 'येनावृतं श्वं दिवं महीं च येनादित्यस्तपति तेजसा भ्राजसा च। यमन्तः समुद्रे कवयोऽवयन्ति यदक्षरे परमे प्रजाः'[७]।

प्रान्तच्छायाविनिर्मुक्ता न मनोज्ञा जलाशयाः।
यस्मादतो जलप्रान्तेष्वारामान् विनिवेशयेत्[८]॥

तस्य मध्ये सुपर्याप्तं कारयेद् गृहमात्मनः।
गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमन्वितम्[९]॥

'खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दिशो द्रुमादीन्।
सरित् समुद्रांश्च हरेः शरीरं यत्किञ्च भूतं प्रणमेदनन्यः'[१०]॥

'पञ्चाम्ररोपी नरकं न याति इति विधानात्'[११]। इत्यादिना पर्यावरणस्यातिशयितं महत्त्वं ख्याप्यते।

पातञ्जले महाभाष्येऽपि पर्यावरणविज्ञानस्य तत्त्वानि सिद्धान्ताश्च बहुशः संक्षेपेण क्वचिद् विस्तरेण च निरूपिताः। 'केषां शब्दानाम्' इति प्रश्नस्योत्तरे सर्वप्रथमं पतञ्जलिना 'गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मणः' इत्युक्तम्[१२]। अत्र पतञ्जलिर्लौकिकशब्दानां परिगणनप्रसङ्गे गामेवोदाहरति। शब्दोऽयं लोके वेदे च सामान्येन प्रसिद्धः। अग्रे 'गौरित्यत्र कः शब्दः' इति जिज्ञासायाः समाधानावसरे यद् गोर्लक्षणं तेन प्रस्तुतं तत्तस्य पशुधनं प्रत्यभिरुचिं प्रदर्शयति। शकुनिशब्दः

१. ऋग्वेदः, १।१९।७;
२. शुक्लयजुर्वेदः, १६।४०।
३. तदेव–३६।१७;
४. सामवेदः, सोमसूक्तम्–७।
५. अथर्ववेदः, तक्मनसूक्तम्, २;
६. अथर्ववेदः–१२।१।१२।
७. नारायणोपनिषद्;
८. बृहत्संहिता, वृक्षायुर्वेदाध्यायः।
९. मनुस्मृतिः, ७।७६;
१०. श्रीमद्भागवतपुराणम्, ११।२।४१।
११. मन्वर्थमुक्तावली, ३।१६३;
१२. महाभाष्ये पस्पशाह्निकम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पक्षिवाचकः, एतेनेदं द्योत्यते यल्लौकिकजीवने पशुधनस्य पक्षिणाञ्च प्रचुरमहत्त्वमासीत्। पतञ्जलिना प्राय उदाहरणप्रदर्शनावसरे पशुधनस्योल्लेखः क्रियते। असन्देहार्थमध्येयं व्याकरणमित्यस्मिन् प्रसङ्गेऽपि—

'स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति'[१] प्रस्तूयते।

शब्दानुशासनं केन विधिना कर्तव्यमित्यत्र महाभाष्यकृता यदुक्तं तेन पर्यावरणविज्ञानस्य तत्त्वं स्पष्टं भवति। आधुनिककाले मांसभक्षणस्य विशिष्टं प्रचलनं दृश्यते। आपणेषु कुक्कुटाः, कुक्कुटाण्डानि, अजादीनां मांसानि च प्रदूषितानि स्थाप्यन्ते विक्रीयन्ते च। कुक्कुटाण्डानां प्रजननाय विशेषतो रासायनिकौषधियुक्तः सूचीवेधः क्रियते। एतेषां प्रयोगेणोच्चरक्तचापः, हृदयरोगः, प्रमेहरोगश्च जायते। अत एवाधुनिकचिकित्साविदोऽपि मांसभक्षणाद् वारयन्ति जनान्। अत्र पतञ्जलेरुक्तिर्द्रष्टव्या—'पञ्च पञ्चनखा भक्ष्या इत्युक्तेर्गम्यत एतदतोऽन्येऽभक्ष्या इति। अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः। तद्यथा—'अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यसूकर इत्युक्ते गम्यत एतद्—आरण्यो भक्ष्य इति'[२]।

प्रस्तरयुगे नवप्रस्तरयुगे मानवस्याहारेषु जन्तूनां मांसमपि मुख्य आहार आसीत्। तदा हि जीविकाया अन्यानि संसाधनानि विकसितानि नासन्; परन्त्वधुना संसाधनानि प्रायः सर्वत्र देशेषु विकसितानि, अतो मांसभक्षणस्य नोपयुक्तता, तथापि यद्यावश्यकं चेत्तर्हि आरण्यकपशूनामेव मांसं भक्षणीयम्। यतो हि ग्राम्यस्य नागरस्य वा पशोः पक्षिणश्च प्रदूषितस्याशङ्का बलवती विद्यते, तेषामपशिष्ट-सामग्रीभक्षणात्। यद्यपि चिकित्साग्रन्थेषु मांसस्याण्डस्य वा वाजीकरणसन्दर्भे प्रयोगो लक्ष्यते, तथापि निवृत्तिस्तु महाफला भवत्येव।

महाभाष्यस्यैकेनोल्लेखेन ज्ञायते यत्पाञ्चालजनपदे पर्यावरणं निर्दुष्टमासीत्, तेन च तत्र अन्नानि, फलानि, जलानि च पर्याप्तमात्रायामुपलब्धानि—

'पञ्चाला जनपद इति। सुभिक्षः सम्पन्नपानीयो बहुमाल्यफल इति न सिध्यति। अथ विज्ञायते—जातेर्यानि विशेषणानीति सिद्धम्—सुभिक्षः सम्पन्नपानीयो बहुमाल्यफल इति। पञ्चाला जनपद इति न सिद्ध्यति'। अत्रैवाग्रे— 'बदरी सूक्ष्मकण्टका मधुरा' इत्युल्लेखः[३]। तादृशी बदरी अधुना अत्यल्पमात्रायां क्वचिद् दृश्यते, प्रायः तस्या लोप एव जातः। यतो हि लघुवनान्यपि छिन्नानि जनैः, ग्रामस्य पार्श्वे लघुवने तस्या अनेके वृक्षा आसन्। महाभाष्यकारस्य महत्त्वपूर्णः सङ्केतो द्रष्टव्यः—'एको व्रीहिः सम्पन्नः सुभिक्षं करोति, एको यवः

---

१. महाभाष्ये पस्पशाह्निकम्; २. तदेव।
३. म.भा., पा.सू. १।२।५२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पन्नः सुभिक्षं करोति'[१]। यद्यप्यत्रैकस्य बहुत्वातिदेशः। सम्पन्नोऽर्थात् प्रदूषणरहितः, प्रदूषिते व्रीहौ यवे वा दुर्भिक्षं भवतीति तात्पर्यम्।

वृक्षान् प्रति पतञ्जलेरनुरागः कीदृश आसीदिति तस्य महाभाष्यावलोकनेन ज्ञायते यत्रोदाहरणान्तरसम्भवेऽपि तेन वृक्षाः, लताः, पशवः, पक्षिणः, नक्षत्राण्येव प्रस्तूयन्ते—'वृक्षश्च वृक्षश्च वृक्षौ। वृक्षश्च वृक्षश्च वृक्षश्च वृक्षा इति'। अत्रैव— 'हरितस्य स्त्री हरिणी, हरिणस्यापि हरिणी, हरिणी च हरिणी च हरिण्यौ। श्येनस्य स्त्री श्येनी, श्येनस्यापि स्त्री श्येनी, श्येनी च श्येनी च श्येन्यौ। रोहितस्य स्त्री रोहिणी, रोहिणस्यापि रोहिणी, रोहिणी च रोहिणी च रोहिण्यौ'[२]।

एवं हि प्रतीयते यत्पतञ्जलेः परिवेशः सुरम्यैर्वृक्षैर्लताभिरोषधिभिः पशुभिः पक्षिभिर्व्याप्त आसीत्। अत एवोदाहरणप्रस्तुतौ भूरिशस्तेषामुल्लेखो जातः। आधुनिकयुगे पक्षिणां पशूनाञ्च संरक्षणाय शासनाधिकारिणः स्वायत्तसंस्थाश्च कृतप्रयत्ना दृश्यन्ते। यतो हि अनेके पक्षिणो लुप्तप्राया जाताः। गृध्रपक्षी भारते न कुत्राप्यधुना दृश्यते। यत्र तत्र श्वेतवर्णोऽल्पकायो गृध्रश्चावलोक्यते। चण्डीगढनगरे गृध्राणां संरक्षणाय एका शासकीया संस्थाऽपि विद्यते; किन्तु तत्रस्था अधिकारिणोऽपि न जानन्ति यद् गृध्रपक्षिणः किं भूताः, मृताः पलायिता वा।

साम्प्रतं हि गोवंशह्रासाद् दुग्धस्यापूर्त्त्यै रासायनिकं दुग्धं निर्मीयते राष्ट्रकण्टकैः, अपि च दुग्धे जलानि मिश्रयित्वा तद् विक्रीयते। सरूपसूत्रेऽपि भाष्यकृता गौरुल्लिख्यते—'न हि गौरित्युक्ते विशेषः प्रख्यायते—शुक्ला नीला कपिला कपोतिकेति'[३]। जातेर्विनाशो न भवतीत्यत्र महाभाष्यकार उदाहरणं प्रस्तौति—'वृक्षस्थोऽवतानो वृक्षे छिन्नेऽपि न विनश्यति'[४]। अत्र प्रदीपः—'यथा वृक्षस्योपरि द्राक्षादिलतावतानः स्थितो न वृक्षविनाशमनु विनश्यति तथा जातिरपि'[५]। 'वृद्धो यूना.' इति सूत्रस्य व्याख्यानप्रसङ्गे 'अजश्च बर्करश्च अश्वश्च किशोरश्च उष्ट्रश्च करभश्चेति'[६] इत्युल्लेखः कृतः। यद्यपि करभकिशोरशब्दौ शावकवचनौ तथापि भाष्यप्रामाण्यात्तरुणवचनौ बोध्यौ, बर्करस्तरुणोऽजः[७]। 'स्त्रीपुंवच्च' इति सूत्रे 'अजा च बर्करश्च वडवा च किशोरश्च उष्ट्री च करभश्चेति'[८] इत्युक्तम्। एतेनेदं द्योत्यते यच्छास्त्रकारा मनुष्येतरप्राणिविषयेऽपि विचारवन्त आसन्। अत एव व्याकरणशास्त्रस्य दुरूहसूत्राणामर्थस्पष्टीकरणायापि त एवोद्ध्रियन्ते।

१. म.भा., पा.सू. १।२।५८;
२. तदेव-१।२।६४।
३. तदेव-१।२।६४;
४. तदेव-१।२।६४।
५. तदेव-१।२।६४;
६. तदेव-१।२।६५।
७. तदेव-१।२।६५;
८. तदेव-१।२।६६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्च, 'समाने रक्ते वर्णे गौर्लोहित इति भवति, अश्वः शोण इति। समाने च काले वर्णे गौः कृष्ण इति भवति, अश्वो हेम इति। समाने च शुक्ले वर्णे गौः श्वेत इति भवति, अश्वः कर्क इति'[१]। तात्पर्यमिदं विद्यते यन्महाभाष्यकृता यान्युदाहरणानि प्रस्तूयन्ते, तानि पर्यावरणस्य महत्त्वपूर्णघटकानि सन्ति, येषां ह्रासं दृष्ट्वा आधुनिकवैज्ञानिकाश्चिन्तिताः सन्ति। भूयो भूयस्तथाविधान्येवोदाहरणानि द्योतयन्ति यत्प्राचीनभारते वैयाकरणा अपि प्राकृतिकवातावरणेन सह एकीभूता आसन्। राष्ट्रेऽस्मिन् वैदिकयुगादेव पशुधनस्य महत्त्वं दृश्यते। अत एव देवाः पशुधनप्रदानाय भूरिशः प्रार्थ्यन्ते।

आध्यात्मिकजगति भौतिकजगत्यपि ध्वनेर्विशिष्टं महत्त्वं विद्यते। वैदिकानां समुचितारोहावरोहस्वरविशेषसमन्वितो ध्वनिरिष्टं साधयितुं सर्वथा क्षमोऽस्ति। गायनवादनध्वनयोऽपि मानवान् पशूँश्चापि प्रभावयन्ति। एवं श्रूयते यत्तानसेनस्य गायनं श्रुत्वा मेघोऽपि वर्षति स्म। मृगाः सुमधुरध्वनिं समाकर्ण्य उपसर्पन्ति स्म। वाराणस्यामपि एका किंवदन्ती श्रूयते यद् योगिराजेन विशुद्धानन्दस्वामिना कदाचिद् विशेषध्वनिना कतिचन पक्षिणः सम्मूर्छिताः पुनरपरध्वनिविशेषेण ते प्रबोधिताः। भारतीयपरम्परायामियं मान्यता विद्यते यन्मरणासन्नपुरुषस्य कर्णे ध्वनिविशेषस्य 'राम' इत्यस्य जपात्सद्गतिर्भवति। तात्पर्यमिदमस्ति यद् ध्वनेर्महत्त्वं पुराकाले यथाऽऽसीत्तथैवाद्यापि विद्यते। सम्प्रति ध्वनिप्रदूषणं विशेषरूपेणापन्नम्, येनानेके बाधिर्योच्चरक्तचापादयो रोगा जायन्ते। महानगरेषु वाहनानां, यन्त्रालयस्थयन्त्राणां जनानां च कोलाहलो विविधान् रोगान् जनयति।

विश्वस्मिन् मुम्बईदेहलीटोकियोन्यूयार्कादिनगरेषु ध्वनेस्तीव्रता शतडेसिमलमात्रामतिक्रान्ता। सामान्यतया ५.६५ डेसिमलमात्रा शान्तध्वनेः, ६६.७५ डेसिमलमात्रा च साधारणध्वनेः स्वीक्रियते। ७५ डेसिमलमात्रातस्तीव्रध्वनिः कोलाहलत्वेन प्रोच्यते। चत्वारिंशदधिकशतडेसिमलमात्रामतिक्रान्तध्वन्यात्मके वातावरणे विद्यमाना जना उन्मादरोगग्रस्ता भवेयुः। वैज्ञानिकसर्वेक्षणदिशा साम्प्रतं मुम्बईनगरे ध्वनिप्रदूषणाद् दशप्रतिशतं मनुष्याः स्वीयं मन एकाग्रं कर्तुं न पारयन्ति, सप्तप्रतिशतमशान्तिमनुभवन्ति, षट्त्रिंशत्प्रतिशतञ्च चित्तावसादग्रस्ता व्याकुलाः सन्ति। इदं ध्वनिप्रदूषणं कोलाहलस्य न्यूनीकरणेनैवावरोद्धुं शक्यते।

सन्दर्भेऽस्मिन् पातञ्जलमहाभाष्ये विशेषरूपेण सङ्केतो विहितः। तथा च— कस्तर्हि शब्दः? इति प्रश्नस्य समाधाने 'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः। अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवक इति ध्वनिं

१. म.भा., पा.सू. १।२।७१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः'[१]। अयमाशयः—शब्दो द्विविधः—स्फोटात्मको ध्वन्यात्मकश्च। तत्राद्यो नित्यः, द्वितीयश्च ध्वनिरूपोऽनित्यः। तत्रापि मन्दमुच्चार्यमाणं प्रति शब्दं कुर्विति विधिः, शेषयोर्द्वयोस्तीव्रोच्चारणेन ध्वनिप्रदूषणवारणधिया निषेधः ख्याप्यते। एवञ्च शब्दस्वरूपनिरूपणव्याजेन भगवता पर्यावरण-विज्ञानमप्युपस्थापितम्।

किञ्च व्याकरणाध्ययनस्यानुषङ्गिकप्रयोजनप्रसङ्गे—'तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः'[२] इत्युक्तम्। अत्र शब्दकर्मकाशुद्धोच्चारणेन पराभवरूपं फलं ध्वनिप्रदूषणं प्रकाशयति। एवमेव—

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्[३]॥

अत्रानिष्टस्वरोच्चारणप्रयुक्तध्वनिप्रदूषणेनार्थान्तराभिधानाद् इन्द्र एव वृत्रस्य शातयिता सम्पन्नः। 'सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः।'[४] अपि च 'एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति'[५]। इत्यादयो भाष्यकृन्निर्देशा द्योतयन्ति यच्छब्दानामुच्चारणमत्यन्तं सावधानतया करणीयम्, अन्यथा ध्वनेरशुद्धोच्चारणेन महाननर्थो जायेत। ध्वनिप्रदूषणं ध्वनेरसाधूच्चारणेन आवश्यकतापेक्षया तीव्रोच्चारणेन चोत्पद्यते। समस्येयमाधुनिकयुगे प्रधानरूपेणानुभूयते।

उन्मुक्तयौनाचारोऽपि साम्प्रतिकयुगस्य जन्यः। 'एड्स' इत्यभिधानोऽसाध्यो रोगोऽस्य पुरस्कारः, येन विश्वस्यानेकेषु देशेषु पुरुषाः स्त्रियो बालकाश्च प्रपीडिताः सन्ति। यौनाचारविषयेऽस्माकं धर्मशास्त्रेषु संयमस्योपदेशः प्रमुखतया कृतः। पातञ्जले महाभाष्ये विषयेऽस्मिन् य उल्लेखो विद्यते, सः सर्वथा अनुपालनीयतामञ्चति—

'खेदात्स्त्रीषु प्रवृत्तिर्भवति, समानश्च खेदविगमो गम्यायां चागम्यायाञ्च। तत्र नियमः क्रियते—इयं गम्येयमगम्येति'[६]। 'अत्रेन्द्रियनियमासामर्थ्यं खेदः। अथवा खेदयतीति खेदो रागः'[७]।

अपि च—'भक्ष्यं नाम क्षुत्प्रतिघातार्थमुपादीयते। शक्यञ्चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम्। तत्र नियमः क्रियते—इदं भक्ष्यमिदमभक्ष्यमिति'[८]।

१. म.भा. पस्पशाह्निकम्; २. तदेव; ३. तदेव।
४. तदेव; ५. म.भा., पा.सू. ६।१।८४।
६. म.भा. पस्पशाह्निकम्; ७. तदेव; ८. तदेव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधुना उपभोक्तृवादसंस्कृतेः सर्वत्र प्रसारः। उपभोगस्य महत्त्वं गुणवत्तापेक्षया अधिकं विद्यते। उपभोक्तृसंस्कृतेः प्रभाविते समाजे उपभोगस्योत्कटलालसा विवेकं नाशयति, येन गम्यागम्यभक्ष्याभक्ष्यविचारशून्यो भवति जनः। तेन चाचारहीनत्वमायाति, आचारहीनत्वादेव विविधा मानसिकशारीरिकरोगाः समुत्पद्यन्ते। उपभोक्तृवादेनैव बहुधा पर्यावरणं प्रदूषितम्। शृङ्गारसामग्रीणां समुत्पादने वानरशशकमृगादीनां पशूनां चर्माणि, रक्तमङ्गानि च प्रयुज्यन्ते। गोर्वत्सानां सर्पाणाञ्च चर्मभिः 'पर्सू' (बटुआ) निर्मीयते। पातञ्जलमहाभाष्यस्यानयोक्त्योपभोक्तृवादसंस्कृतिं प्रति सुस्पष्टं निषेधो द्योत्यते।

निष्कर्षस्त्वयं विद्यते यद् यद्यपि महाभाष्यं शब्दशास्त्रस्य ग्रन्थोऽस्ति, तथापि प्राचीनभारतस्य परिस्थितिं पर्यावरणविज्ञानदृष्ट्या दर्शयति। पतञ्जलिना सूत्रवार्तिकानां व्याख्यानप्रसङ्गे उदाहरणरूपेण येषां वृक्षाणां, लतानां, गुल्मानाम्, ओषधीनां, पशूनां, पक्षिणां, जलचराणां, मेघानाम्, विद्युतः, आकाशस्य, अग्नेः, अन्तरिक्षस्य, आहुतेः, खाद्याखाद्ययोः, गम्यागम्ययोश्च य उल्लेखः कृतः, तस्य शब्दसाधुत्वदिशा तु उपयोगो विद्यत एव; किन्तु तत्रेदमपि विचारणीयं भवति यदेतेषामेवोदाहरणप्रदर्शने किमुद्देश्यमासीत्? स्मारं स्मारं गोः किं सन्दिशति पतञ्जलिः?

उपभोक्तृवादसंस्कृतौ तेषामुपर्युक्तानां महत्त्वं गौणं जातम्। यन्त्राश्रितो मनुष्यः शारीरिकश्रमशून्यो भूत्वा सुविधां भुनक्ति। परिणामतः सृष्टेरन्यैः प्राणिभिस्तस्य रागः सम्बन्धश्च विच्छिन्नः। संवेदनहीनो मानवः स्वगुम्फित एव जाले पतित्वा किंकर्तव्यविमूढः शारीरिकमानसिकावसादादिरोगैर्ग्रस्तो भवति। अस्मिन् लघुनिबन्धे महाभाष्यग्रन्थस्य संक्षेपेण विहङ्गावलोकनं पर्यावरणदृष्ट्या प्रस्तुतम्। विस्तृतरूपेणास्य ग्रन्थस्यानया दृष्ट्या मननमपेक्षितमस्ति। तथा सति भरतवाक्यमिदं सर्वथा सार्थकं स्यात्—

क्षीरिण्यः सन्तु गावो भवतु वसुमती सर्वसम्पन्नसस्या
पर्जन्यः कालवर्षी सकलजनमनोनन्दिनो वान्तु वाताः।
मोदन्तां जन्मभाजः सततमभिमता ब्राह्मणाः सन्तु सन्तः
श्रीमन्तः पान्तु पृथ्वीं प्रशमितरिपवो धर्मनिष्ठाश्च भूपाः।। इति।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिन्युपज्ञं कारकार्थविश्लेषणम्

डॉ. रामचन्द्रद्विवेदी
उपाचार्यः, व्याकरणविभागे
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी

***

"कारके"[१] इत्यधिकारसूत्रम्, अधिक्रियते उपरितनसूत्रजालशेषत्वेन पठ्यत इत्यधिकारः, कर्मणि घञ्, 'घञजबन्तात्पुंसि'[२] इति पुंस्त्वमित्यधिकारशब्दस्य स्वरूपम्, याथातथ्यं लक्षणन्त्वित्थम्—स्वदेशे लक्ष्यसंस्कारकबोधाजनकत्वे सति विधिसूत्रैकवाक्यतया बोधजनकत्वमधिकारत्वम्। अधिकारश्च त्रिप्रकारकः। इति 'षष्ठी स्थानेयोगा'[३] इति सूत्रे भाष्यकृतोपदिष्टम्—तत्राद्यः 'अधिकार एकदेशस्थः सर्वं शास्त्रमभिज्वलयति प्रदीपवत्' इति परिभाषारूपः। द्वितीयश्च—यथा रज्वा अयसा वा बद्धं काष्ठमनुकृष्यते, तद्वदनुकृष्यते चकारेण। तद्यथा—'सहस्य सः संज्ञायाम्'[४] इत्यविशेषेण 'ग्रन्थान्ताधिके च'[५], 'द्वितीये चानुपाख्ये'[६], 'अव्ययीभावे चाकाले'[७] इत्यादावनुकृष्यते। सहस्य सादेशश्चकारेणेति। तृतीयस्तु—प्रतियोगं तस्यानिर्देशार्थ इति योगे योगे उपतिष्ठते, 'स्वरितेनाधिकारः'[८] इति स्वरितत्व-प्रतिज्ञानादुत्तरेषु योगेषु तस्यानुमानं भवत्वित्यधिक्रियमाणस्यानुच्चारणार्थ इति यावत्।

अधिकारस्यान्येऽपि भेदाः शास्त्रानुसन्धानेनावसीयन्ते, तद्यथा—संज्ञा, विशेषणम्, स्थानी, प्रकृतिः, निमित्तम्, आदेश इति। तत्र 'प्रत्ययः'[९] (संज्ञात्वेन) 'शेषे'[१०] (विशेषणत्वेन) 'एकः पूर्वपरयोः'[११] (स्थानित्वेन) 'ङ्याप् प्रातिपदिकात्'[१२]

१. पा.सू. १।४।२३;
२. लिङ्गानुशासनम्, ३७, पुल्लिङ्गे।
३. पा.सू. १।४।४९;
४. तदेव-६।३।७८।
५. तदेव-६।३।७९;
६. तदेव-६।३।८०।
७. तदेव-६।३।८१;
८. तदेव-१।३।११।
९. तदेव-३।१।१;
१०. तदेव-४।१।९२।
११. तदेव-६।१।८४;
१२. तदेव-४।१।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(प्रकृतित्वेन) 'धातोः'[१] (निमित्तत्वेन) 'आर्धधातुके'[२] 'अपदान्तस्य मूर्धन्यः'[३] (आदेशत्वेन) इत्येतेऽधिकारत्वेनैवोपदिष्टा यथायथमूह्याः।

इह 'अपादानादिविधेयानिर्देशात् स्वरितत्वाधिकाराच्च कारक इति विशेषणमपादानसम्प्रदानादिविषयमधिक्रियते, नायमधिकारः संज्ञात्वेन भाव्यमानत्वात् संज्ञायाः सप्तम्यनुपपत्तेः। अथ च संज्ञानुसारं प्रथमानिर्देशः 'प्रत्ययः' इत्यादिवत् कथन्नेति चेदुच्यते? कारकसंशब्दनेषु भाव्यमानानामपादानादीनां ध्रुवादीनां नेयं संज्ञेति. अयन्तु सप्तम्या निर्दिष्टः 'कारके' इति निर्धारणे सप्तमी. निर्धारणञ्च बहुषु भवति. न त्वेकस्मिन्। अस्य सामान्यापेक्षया त्वेकवचनम्, अथवा 'छन्दोवत्सूत्राणि भवन्ति' इति धिया 'व्यत्ययो बहुलम्'[४] इति बहुवचने प्राप्त एकवचनम्—संज्ञाक्षेकारकेषु मध्ये अपाये यद्ध्रुवं तत्कारकं सद् अपादानसंज्ञकं भवति. अथवा अपाये यद् ध्रुवं कारकसंज्ञं भवति. अपादानसंज्ञञ्चेत्यर्थो लभ्यते। एवमेव कर्म-करण-सम्प्रदानाधिकरणेष्वप्यर्थसङ्गतिः कर्तव्या। एवं कारकापादानसंज्ञयोरेककालावच्छेदेन परस्परं निमित्तनिमित्तिभावाभावादकारकस्यापि व्यापाररहितस्य (शून्यस्य) अपादानसंज्ञा प्रसज्येत। अत एव विशेषणाधिकारोऽवसितः, तस्मिन् सति—कारकेषु मध्ये यदपाये ध्रुवमित्यर्थलाभः, तेन निर्धारणस्य सजातीयस्य विषयत्वाद् व्यापारशून्यस्यापादानसंज्ञा न भवति। अतो विशेषणानुरूप एव निर्देशः, न तु संज्ञानुरूपः। एतदेवोद्दिश्योक्तं भगवता भाष्यकृता—'न वापायस्याविवक्षितत्वात्'[५] इति।

ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति वाक्ये ब्राह्मणस्य कर्मसंज्ञाप्रसङ्गादकथितस्येति दोषनिरासाय कारक इति महती संज्ञा कृता। लघ्वर्थं हि संज्ञाकरणं. संज्ञा च नाम यतो न लघीय इति धिया महत्याः संज्ञायाः कारक इति करणमन्वर्थज्ञापनार्थम्। तच्च 'करोतीति कारकम्'[६]। अन्वर्थत्वात् कारकसंज्ञा व्यापारशून्यस्य न भवति। एवमर्थे कृते सति कारकशब्दस्य द्विधात्वमप्यायाति। कर्तृपर्यायः कारकशब्दो व्युत्पन्नो ण्वुल्प्रत्ययान्तः। संज्ञापर्यायस्त्वव्युत्पन्नो निमित्तवाचकः, यदि कर्तृपर्यायस्य कारकशब्दस्यात्र सूत्रे ग्रहणं स्यात्तदापादानादिषु कारकशब्दस्याप्रवृत्तिः, कर्तृकारकशब्दौ 'ण्वुल्तृचौ'[७] इति कर्तरि व्युत्पादितौ, कर्ता

१. पा.सू. ३।१।९१;
२. तदेव–६।४।४६।
३. तदेव–;
४. तदेव–३।१।८५।
५. म.भा. १।४।२३;
६. तदेव–१।४।२३।
७. पा.सू. ३।१।१३३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च स्वतन्त्रः 'स्वतन्त्रः कर्ता'[१] इति सूत्रानुगमात्, अपादानादयोऽस्वतन्त्रास्तर्हि कथं तेषु व्यपदेश्यता स्यात्। कारकव्यपदेशाभावे कारकसंशब्दनेष्वपादानादीनां कारकेषु ग्रहणमेव न भवेत्। यदि च कर्हिचित् स्वतन्त्राभ्युपगम्येत्तर्हि तत्र कर्तृसंज्ञा प्रसज्येत, ततो हि ग्रामादायाति, ब्राह्मणाय गां ददातीत्यादौ कर्तृत्वात् 'कर्तृकरणयोस्तृतीया'[२] इति गोब्राह्मणयोस्तृतीया प्रसज्येत। इतरेतराश्रयाणि कार्याणि शास्त्रे न प्रकल्पन्ते, इति धिया इतरेतराश्रयतारूपो दोषोऽपि प्रसज्येत। कर्तृकारकयोर्निष्पत्तिः कर्त्रर्थ एव। यदि च कर्तृसंज्ञोत्तरं कारकव्युत्पत्तिः, तस्यामवस्थायां कारकशब्दोपक्रमेण कर्तृसंज्ञा इति चेदुच्यते—वह्निदं प्रतिविधेयं भवति, प्रतिविधाने च प्रतिपत्तिगौरवापत्तिः।

करोतीति कारकमिति भाष्योक्ता व्युत्पत्तिः, अत्र कृधातुना निष्पन्ना क्रिया धात्वर्थरूपा, न परिस्पन्दात्मिका, धातुना च सकलोऽधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणादयः फलावच्छेदेन एकीकृतो व्यापारोऽभिधीयते। तत्रैकस्यां मुख्यक्रियायामुपयोगो यथायथमवान्तरव्यापारमुखेन यथा— अपादानस्यावधिभावोपगमनं व्यापारः[३], सम्प्रदानस्य प्रेरणानुमत्यनिराकरणादिः[४], करणस्य काष्ठादेर्ज्वलनादिः[५], अधिकरणस्य सम्भवनधारणादिः[६], कर्मणो निर्वर्त्यविकार्यप्राप्त्यादिः[७], कर्तुः प्रयोजकप्रेषणादिः[८]। एतादृक्षु स्थलेषु कर्तृसंज्ञापरिहाराय निमित्तपर्यायस्याव्युत्पन्नस्य कारकशब्दस्य ग्रहणे दोषाभावः।

---

१. पा.सू. १।४।५४; २. तदेव–२।३।१८।

३. अवधिः पञ्चम्यर्थः, वैयाकरणभूषणसारः, नामार्थनिर्णयः। अपायविषयं ध्रौव्यं यत्तु व्यवस्थितम्। (वा.प.३।७।१३८)

४. अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम्। प्रेरणानुमतिभ्यां लभते सम्प्रदानताम्॥ (वा.प. ३।७।१२९)

५. क्रियायाः परिनिष्पत्तिर्यद् व्यापारादनन्तरम्।
विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम्॥ (वा.प. ३।७।९०)
एधाः पक्ष्यन्त्याविक्लित्तेर्ज्वलिष्यन्तीति ज्वलनक्रियाकरणस्य पाकः। (म.भा. १।४।२३)

६. द्रोणं पचत्याढकं पचतीति सम्भवनक्रिया धारणक्रिया चाधिकरणस्य। (म.भा. १।४।२३)
कर्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियाम्।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्॥ (वा.प. ३।७।१४८)

७. निर्वर्त्यं च विकार्यं च प्राप्यञ्चेति त्रिधा मतम्।
तत्रेप्सिततमं कर्म चतुर्धाऽन्यत्तु कल्पितम्॥ (वा.प. ३।७।४५)

८. प्रेषणाध्येषणे कुर्वंस्तत्समर्थानि चाचरन्।
कर्तैव विहितां शास्त्रे हेतुसंज्ञां प्रचक्षते॥ (वा.प. ३।७।१२५)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं सति 'ग्रामादायाति' इत्यत्र ग्रामस्य ध्रुवस्यागमनक्रियां प्रति निमित्तभावोऽस्ति, यदीह ग्रामोऽवधित्वेन नोपतिष्ठेत्तर्हि आगमनं न प्रतिपद्येत, तस्मान्निमित्तत्वेन ग्रामः कारकम्। कारकशब्दश्च क्रियाहेतावेव ख्यातः, अनाश्रित-व्यापारं निमित्तं हेतुः, आश्रितव्यापारं कारकम्, उक्तञ्च भर्तृहरिणा, तद्यथा—

द्रव्यादिविषयो हेतुः कारकं नियतक्रियम्।
कर्ता कर्त्रन्तरापेक्षः क्रियायां हेतुरिष्यते[१]।। इति।

सामान्यशब्दादयोऽप्यर्थप्रकरणादिना विशेषवृत्तिमुपगच्छन्ति।

वृक्षस्य पर्णं पततीत्यत्र वृक्षो नावधित्वेनाभिप्रेतः, प्रत्युत सम्बन्धित्वेन, विवक्षितावधिभावस्यैव वृक्षस्य सम्बन्धित्वेन विवक्षितत्वात्। भाष्येऽप्युक्तम्—'न वापायस्याविवक्षितत्वात्'[२]। अपायस्य कारकग्रहणान्निमित्तत्वेनाविवक्षितत्वादपादान-संज्ञाया अप्रवृत्तिः। अवधिभूतस्य वृक्षस्य पर्णमित्यर्थावगमात्, सम्बन्धित्वेन विवक्षाऽवधिभावस्य विवक्षया न विरुध्यते, ध्रुवन्तु तदेव यदवधिभूतमपाये साध्ये—'अपाये साध्ये यदवधिभूतम्' इत्युक्तं भूषणसारेऽपि, तद्यथा—

अपाये यदुदासीनं चलं वा यदि वाचलम्।
ध्रुवमतदावेशात् तदपादानमुच्यते[३]।। (भूषणसारे)

ध्रुवमवधिरपायोऽपि समवेतस्तथा ध्रुवे[४]।
द्रव्यत्वभावो न ध्रौव्यमिति सूत्रे प्रतीयते।
अपायविषयं ध्रौव्यं यत्तु तावद्विवक्षितम्[५]।। इति।

तस्माद्विवक्षितावधिभावस्यैव वृक्षस्य सम्बन्धित्वमात्रं विवक्षितम्, न विद्यमानस्यायं प्रतिनिमित्तत्वमिति काऽत्रायुक्तता।

इत्थमपादानस्य त्रिधात्वमप्यायाति, तद्यथा—

निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा।
अपेक्षितक्रियञ्चेति त्रिधापादानमुच्यते[६]।। इति।

यत्र धातुना साक्षाद् गतिर्निर्दिश्यते तन्निर्दिष्टविषयम्, यथा—अश्वात्

१. वा.प. ३।७।२५; २. म.भा. १।४।२३।
३. इयं कारिका भूषणसारे हरिणोक्ता निर्दिष्टा; परन्तु वाक्यपदीये नोपलभ्यते।
४. वा.प. ३।७।१३७ कारिकार्धभागः; ५. तदेव-३।७।१३८।
६. तदेव-३।७।१३६।

In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पतति। यत्र धात्वर्थान्तराङ्गं स्वार्थं धातुराह, तदुपात्तविषयम्, यथा—बलाहकाद्विद्योतते विद्युत्। अपेक्षिता क्रिया यत्र तदपेक्षितक्रियम्—यथा कुतो भवान्? पाटलिपुत्रादिति।

यत्तूक्तं ब्राह्मणस्य पुत्रं पन्थानं पृच्छति तदिह विमृश्यते, 'अकथितञ्च'[1] इत्यकथितस्य विधीयमाना कर्मसंज्ञा 'कारके'[2] इत्यस्याभावे ब्राह्मणस्यापि कर्मसंज्ञा प्रसज्येत। उक्तञ्च भाष्यकृता—

'कर्मसंज्ञाप्रसङ्गोऽकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति'[3] इति वार्तिकोपन्यासे अकथितशब्दोऽसङ्कीर्तिते वर्तते, असङ्कीर्तित इत्यस्याकीर्तित इत्याशयः। स च कस्यचिद्विशेषस्याप्रकृतत्वाद् विशेषानुपादाने सति प्रयुज्यमानः सर्वत्राकीर्तितमात्रे भवेत्। अकथितमित्यनेन सर्वं कारकञ्चाकारकञ्च अकथितमित्यवसीयते। यथात्र पिताऽपादानादिभिर्विशेषैर्न कथितस्तथैव माणवकोऽपि, अतस्तस्यापि माणवकस्य कर्मसंज्ञा प्रसज्येत। 'कारके'[4] इति सति तु प्रश्नक्रियानिमित्तस्य पितुरेव कर्मसंज्ञा, न तु माणवकस्य। अत्र पितुः सम्बन्धित्वेन माणवको विवक्षितः, न तु प्रश्नक्रियां प्रति निमित्तभावेनोपलक्षितः। किन्तर्हि सम्बन्धित्वेनेति।

यदि च 'कारके' ध्रुवादीनां विशेषणमिदमित्यवसीयते, न संज्ञेति, तदा 'कारकाद्दत्तश्रुतयोरेवाशिषि' इत्यादिषु स्थलेषु कारकशब्दः संशब्द्यते, तदा तत्रापादानादीनां वक्ष्यमाणानां षण्णामेव ग्रहणमिष्यते, तन्न सेत्स्यति। संज्ञापक्षे तु दोषाभावः, संज्ञा ह्यावर्तमाना संज्ञिनं प्रत्याययति, उक्तञ्च भाष्यकृता—

'कारक इति संज्ञानिर्देशश्चेत्संज्ञिनो निर्देशः कर्तव्यः'[5]।

प्रदेशान्तरेऽपि कारकशब्दस्य निमित्तपर्यायतयोपादानम्। तच्च निमित्तमपादानाद्येव, न हिं ततोऽन्या क्रिया निमित्तं भवति। एतावता कारकग्रहणेन अपादानादीनामेव ग्रहणम्।

भाष्यकारस्तु—'एकद्रव्यसमवायित्वात्' इत्युपदिश्योक्तम्—यथा 'गार्ग्यो देवदत्तः' इत्युक्ते न हि गार्ग्य इत्यनेन देवदत्तत्वं देवदत्त इत्युक्ते गार्ग्यत्वमुक्तं भवति। उभौ चान्योऽन्यविशेषकौ भवतः, एकद्रव्यसमवायित्वात्।

---

१. पा.सू. १।४।५१; २. तदेव-१।४।२३।
३. म.भा. १।४।२३; ४. पा.सू. १।४।२३।
५. म.भा. १।४।२३; ६. तदेव-१।४।२३।

CC-0 In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयं भावः—सर्वेषां कारकाणां साध्यत्वेन साधारणी क्रिया, ततश्च सर्वेषां कारकाणां क्रियां प्रति कर्तृत्वम्, अवान्तरविवक्षायान्तु करणादिरूपत्वम्। तथा मातापित्रोरपत्योत्पादने कर्तृत्वम्, भेदविवक्षायां त्वयमस्यामियमस्मिञ्जनयतीत्यधिकरणत्वमपादानत्वञ्चोपतिष्ठते। यत्र च शक्तीनां निमित्तनिमित्तिभावेनैककालावच्छेदेन विवक्षा तत्र संज्ञानां विप्रतिषेध आश्रीयते, यथा 'धनुषा विध्यति' इत्यादौ विनाऽप्यपायविवक्षया धनुषः साधकतमत्वाभावात् संज्ञाद्वयोपस्थितौ परत्वात् करणसंज्ञैवेति। कारकापादानादौ सामान्यभूता क्रिया, तस्या निवर्तकं कारकमिति भाष्याभिप्रेतोऽर्थः। केचन तु साहचर्यात् कारविशेषणसहचरिता अपादानादयः कारकशब्देन व्यपदिश्यन्त इति तद्ग्रहणेनैव तेषां ग्रहणमित्यभिलषन्ति।

भाष्यकारस्त्ववसाने—'अथवा यावद् ब्रूयात् 'क्रियायामिति' तावत् 'कारके' इति। एवञ्च कृत्वा निर्देश उपपन्नो भवति। 'कारके' इति। इतरथा हि कारकेष्विति ब्रूयात्'[१]।

कारकग्रहणं वा स्वरयितव्यम्, अतः 'स्वरितेनाधिकारः'[२] इत्येष विधिर्भवति। तस्मात् कारकग्रहणेनापादानादीनां ग्रहणं भविष्यतीति शम्।

●

१. म.भा. १।४।२३।

२. पा.सू. १।३।११।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बाधबीजानुशीलनम्

डॉ॰ वृजकिशोरत्रिपाठी
प्रवक्ता, संस्कृतस्य
राजकीयस्नातकोत्तरमहाविद्यालयः
फतेहपुरम्, आलापुरम्, अम्बेडकरनगरम् (उ.प्र.)

***

ऐन्द्रचान्द्रकाशकृत्स्नादिव्याकरणेषु रत्नायमानं पाणिनीयमेव व्याकरणं समुपलभ्यत इदानीम्। संस्कृतवाङ्मयस्यानुपमरत्नमिदं व्याकरणमित्यत्र नास्ति मनागपि संशीतिः। पूर्वोक्तेषु व्याकरणेषु समग्रस्य शब्दराशेः व्युत्पत्तिसामर्थ्यमदृष्ट्वा पाणिनिमुनिर्लौकिकवैदिकोभयविधप्रयोगसाधनार्थं महेश्वरप्रसादाप्तौजा व्याकरणमिदं विरचितवान्।

पाणिनेः व्याकरणस्य आदितः सम्पूर्तिं यावत् परस्परामाबद्धां ग्रन्थ-शैलीमालोच्य प्राच्याः पाश्चात्त्याश्च विद्वांस आश्चर्यान्विता भवन्ति। महाभाष्यकारेण पतञ्जलिनाप्यस्य गाम्भीर्यगुम्फनमाकलय्योक्तम्—**'प्रमाणभूत आचार्यो दर्भ-पवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण'**[१] इति।

पुनश्च ब्रवीति—**'सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्'**[२] इति।

किञ्च, भिन्नानुबन्धकरणमपि पाणिनेः कस्यचनार्थस्य ज्ञापकम्; का कथा पुनः सूत्राणाम्? महतोऽस्य शब्दराशेः सुपरिज्ञानाय पाणिनिना षड्विधानि सूत्राणि विरचितानि। यथोक्तम्—

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्[३]॥

---

१. महाभाष्यम्, १।१।आ. ३, सू. १।

२. म.भा., ६।१ आ. ३, सू. ७७।

३. ल.श.शे., अभिनवचन्द्रिकाटीका, संज्ञाप्रकरणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधिशास्त्रोपकारीण्यन्यान्यपि संज्ञादीनि सूत्राणि। तत्र साक्षाल्लक्ष्यसंस्कारकसाधुत्वप्रकारकबोधजनकत्वं विधिसूत्रस्य लक्षणमुक्तम्। इदञ्च विधिसूत्रं द्विविधं द्रष्टव्यम् उत्सर्गापवादाभ्याम्। महाभाष्यकारः पतञ्जलिरप्याह— 'कथं तर्हीमे शब्दाः प्रतिपत्तव्याः? किञ्चित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्। किं पुनस्तत्? उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्त्तव्यः कश्चिदपवादः। कथञ्जातीयकः पुनरुत्सर्गः कर्तव्यः, कथञ्जातीयकोऽपवादः? सामान्येनोत्सर्गः कर्त्तव्यः। तद्यथा—'कर्मण्यण्'[1]। तस्य विशेषेणापवादः। तद्यथा—'[2]आतोऽनुपसर्गे कः'[3]। इति।

सामान्यरूपेण कस्यचन कार्यस्य विधायकं सूत्रमुत्सर्गसूत्रं कथ्यते। यथोक्तम्—'कर्मण्यण्'। विशेषरूपेण तत्कार्यस्य विधायकं सूत्रमपवादसूत्रमुच्यते। यथा—'आतोऽनुपसर्गे कः' इति सूत्रम्। सूत्रमिदं कर्मवाचकपद उपपदे सति उपसर्गरहितादादन्ताद्धातोः कप्रत्ययं कर्त्रर्थे विदधाति। 'कर्मण्यण्'-सूत्रन्तु कर्मवाचक उपपदे सति धातोरण्प्रत्ययं कर्त्तरि विदधाति। तदीयोद्देश्यतावच्छेदको धर्मः कर्मवाचकोपपदधातुवृत्तिधातुत्वम्। 'आतोऽनुपसर्गे कः' इत्यस्योद्देश्यतावच्छेदको धर्मः कर्मवाचकानुपसृष्टादन्तधातुत्वम्। एष च धर्मो व्याप्यः। 'कर्मण्यण्' इत्यस्योद्देश्यतावच्छेदको धर्मः कर्मवाचकोपपदधातु-वृत्तिधातुत्वम्। एष च 'आतोऽनुपर्गे कः' एतदीयोद्देश्यतावच्छेदकव्यापकः। यतश्च यत्र यत्र कर्मवाचकोपपदानुपसृष्टादन्तधातुवृत्तिधातुत्वम्, तत्र तत्र कर्मवाचकोपपदधातुवृत्तिधातुत्वं वर्तत एव। अत एव व्याप्यधर्मावच्छिन्नातिरिक्तत्वेन व्यापकधर्मावच्छिन्ने = उत्सर्गशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने सङ्कोचो भवतीति सिद्धान्तः पर्यवसन्न उत्सर्गापवादयोः शास्त्रयोः। तेन 'गोदः' 'कम्बलदः' इत्यादौ न 'कर्मण्यण्' इति सूत्रप्रवृत्तिः।

अतः परमुत्सर्गापवादशास्त्रयोः स्वरूपज्ञानाय प्रयतिष्ये। स्वरूपज्ञानानन्तरं येन सह यस्य सम्बन्धो निरूप्यनिरूपकभावः सम्भविष्यति, तेन सह तस्योत्सर्गापवादौ निश्चेतुं शक्येत एव।

सामान्यधर्मावच्छिन्नोद्देश्यताकशास्त्रस्य बाध्यत्वे बीजम्

विशेषशास्त्रीयोद्देश्यो यो विशेषधर्मावच्छिन्नस्तद्वृत्तिर्यः सामान्यधर्मस्तद-वच्छिन्नोद्देश्यताकशास्त्रस्य विशेषशास्त्रेण = विशेषधर्मावच्छिन्नोद्देश्यताकशास्त्रेण बाधो भवति। सामान्यधर्मो नाम व्यापको धर्मः, विशेषधर्मो नाम व्याप्यो धर्मः।

१. पा.सू. ३।२।१; २. पा.सू. ३।२।३।
३. महाभाष्यम्, पस्पशाह्निकम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु सामान्यधर्मे विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तिविशेषणं व्यर्थम्, सामान्यधर्मे विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नावृत्तित्वे तस्य सामान्यत्वासम्भवादिति चेत्सत्यम्, उद्देश्यतावच्छेदकावच्छेदकसम्बन्ध एव व्यापकतावच्छेदको ग्राह्य इति भ्रमवारणायैवात्रोक्तविशेषणस्य सार्थक्यात्। अन्यथा 'एकाचो द्वे प्रथमस्य'[1], 'अजादेर्द्वितीयस्य'[2] इति सूत्रयोर्व्याप्यव्यापकभावाभावेन बाध्यबाधकभावो न भवेत्, तथा हि, 'अजादेर्द्वितीयस्ये'ति व्याप्यसूत्रस्योद्देश्यतावच्छेदको धर्मो द्वितीयैकाच्त्वम्, स च स्वरूपसम्बन्धेन यत्र वर्तते, तत्र स्वरूपसम्बन्धेन धात्ववयवप्रथमैकाच्त्वं व्यापकशास्त्रीयोद्देश्यतावच्छेदकं नास्ति, अतः सामानाधिकरण्याभावेन व्याप्यव्यापकभावाद् बाध्यबाधकभावो न भवेदित्यर्थः। गृहीते तु तस्मिन् विशेषणे येन केनापि सम्बन्धेन सामानाधिकरण्येऽपि व्याप्यव्यापकभावे, 'अजादेर्द्वितीयस्ये'ति व्याप्यशास्त्रीयोद्देश्यतावच्छेदकं द्वितीयैकाच्त्वं स्वरूपेण सम्बन्धेन यत्र वर्तते, तत्र 'एकाचो द्वे प्रथमस्यो'द्देश्यतावच्छेदकं धात्ववयवप्रथमैकाच्त्वं स्वघटकाच्त्ववदुत्तरत्वसम्बन्धेन द्वितीयैकाचि वर्तते। अतो द्वयोर्धर्मयोरेकत्र वर्तमानतया व्याप्यव्यापकभावेन बाध्यबाधकभावः सिद्ध्यति।

अत्र पुनराशङ्क्ते—ननु साक्षादुद्देश्यतावच्छेदकयोर्व्याप्यव्यापकभावोऽपेक्ष्यतेऽत्र बाधनार्थम्, उत साक्षात्परम्परासाधारणोद्देश्यतावच्छेदकयोः। नाद्यः, 'नेमौ रहौ कार्यिणौ किन्तर्हि निमित्तम्'[3] इति भाष्यविरोधापत्तेः। तत्र हि, 'अचो रहाभ्यां द्वे'[4] इत्येतच्छास्त्रीयोद्देश्यतावच्छेदकतावच्छेदकस्य रत्वस्य 'अनचि च'[5] इति शास्त्रीयोद्देश्यतावच्छेदकयर्त्वापेक्षया व्याप्यत्वेन अपवादत्वात् तद्बाधेन रेफस्य द्वित्वाभावः सिद्ध्यति। अस्यायं स्फुटाभिप्रायः—यदि साक्षादुद्देश्यतावच्छेदकयोरेव विशेषसामान्यशास्त्रयोर्व्याप्यव्यापकभावोऽपेक्ष्यते, तदा 'हर्य्यनुभवः' इति प्रयोगे प्राप्तं द्वित्वं वारयितुं 'नेमौ रहौ कार्यिणौ किन्तर्हि निमित्तमि'ति भाष्यं न सङ्गच्छेत। तथा हि, 'हर्य्यनुभवः' इत्यत्र 'अनचि च' इति सूत्रेण रकारस्य अजव्यवहितपूर्वत्वाभावविशिष्टाजव्यवहितोत्तरयर्त्वाद् द्वित्वं प्राप्यते। तं प्रबाध्य 'अचो रहाभ्यां द्वे' इति सूत्रेणात्र द्वित्वप्रसक्तिः। ननु 'हर्य्यनुभवः' इत्यत्र यथा 'अनचि चे'ति सूत्रस्य रकारे साक्षादुद्देश्यतावच्छेदकस्य यर्त्वस्य सत्त्वात्प्राप्तिर्द्वित्वस्य तथा 'अचो रहाभ्यां द्वे' इति सूत्रस्य साक्षादुद्देश्यतावच्छेदकता नास्ति रकारे, तस्या अजव्यवहितोत्तररकारहकाराव्यवहितोत्तरे यर्य्येव सत्त्वादिति

१. पा.सू. ६।१।१; २. पा.सू. ६।१।२।
३. महाभाष्यम्, हयवरट्सूत्रस्थं, द्वितीयाह्निकम्।
४. पा.सू. ८।४।४६; ५. पा.सू. ८।४।४७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चेत्, न, प्रसङ्गेऽस्मिन् परम्परयाप्युद्देश्यतावच्छेदकस्य ग्रहणात्। तथा च सति 'अचो रहाभ्यां द्वे' इति सूत्रस्य यद्यपि साक्षादुद्देश्यतावच्छेदकता तादृशे यरि, तथापि परम्परयोद्देश्यतावच्छेदकता अर्थादुद्देश्यतावच्छेदकतावच्छेदकता रकारेऽपि विद्यते। रकारस्य च यर्त्वापेक्षया व्याप्यत्वाद् विशेषः, तेन चास्य 'अनचि चे'ति सूत्रस्य बाधकत्वम्। एवञ्च रकारस्य 'अचो रहाभ्यां द्वे' इति सूत्रप्राप्तद्वित्वबाधनाय उपर्युक्ता भाष्योक्तिः सङ्गच्छते। यदि साक्षादुद्देश्यतावच्छेदकधर्मयोर्व्याप्यव्यापकभावो बाधप्रयोजकस्तदा प्रकृते 'अचो रहाभ्यामि'त्यस्य साक्षादुद्देश्यतावच्छेदकत्वाभावात्तस्य कथं प्राप्तिः। तदभावे कथं व्याप्यव्यापकभावचर्चा। तदभावे कथं बाध्यबाधकभावः। कथञ्चानचि चेति सूत्रस्य बाध्यत्वाभावे 'अचो रहाभ्यामि'ति सूत्रप्राप्तिस्तदपहाराय भाष्योक्त्यावश्यकता।

नापरः, अनुशतकादिषु[1] पुष्करसच्छब्दपाठसामर्थ्येन आदिवृद्धिरन्त्योपधावृद्धी बाधते, इत्यर्थज्ञापकपरभाष्यविरोधापत्तेः। परम्परयोद्देश्यतावच्छेदकयोर्ञ्णित्प्रत्ययत्वञ्णित्तद्धितयोर्व्याप्यव्यापकभावेन 'तद्धितेष्वचामि'[2]ति शास्त्रेण 'अचो ञ्णिति'[3], 'अत[4] उपधाया' इत्यनयोर्बाधादेवोक्तार्थसिद्धेर्निरुक्तभाष्यविरोधः स्पष्टः। अस्येयं स्पष्टता—'अचो ञ्णिति', 'अत उपधायाः' इति सूत्रद्वयं ञ्णितिप्रत्यये पर एव प्रवर्तेते। 'तद्धितेष्वचामादेरि'ति च ञ्णिति तद्धिते परे प्रवर्तते। अतः 'तद्धितेष्वचामादेरि'ति सूत्रस्य तद्धितप्रत्ययमात्रविषयत्वाद् व्याप्यविषयता, तथा व्याप्यत्वन्तस्य पूर्वोक्तसूत्रद्वयापेक्षया; किन्त्वेषां सूत्राणामुद्देश्यतावच्छेदकत्वमेकन्नास्ति, अतो व्याप्यव्यापकभावो नास्ति। तदभावे 'तद्धितेष्वचामादे'-रादिवृद्धेर्बाधनाय भाष्यकारवचनं सङ्गच्छते। इदानीमिह परम्परयोद्देश्यतावच्छेदकयोर्व्याप्यव्यापकभावस्वीकारे पूर्वोक्तवद् आद्यच्, उपधाभूतेऽकारे अङ्गान्तनिष्ठाचि च वर्तते, तद् व्याप्यव्यापकभावो निराबाधः। तेन चादिवृद्ध्यन्तोपधावृद्धी बाधत इति किमर्थं भाष्यवचनमिति विरोधः।

अत्रोच्यते-व्याप्यव्यापकधर्मयोः साक्षात्परम्परया वा तत्तदुद्देश्यतावच्छेदकयोर्विशेषणदलप्रविष्टयावत्पदार्थसङ्कुचितयोरेव ग्रहणेन, 'तद्धितेष्वचामादेरि'ति शास्त्रीयतादृशोद्देश्यतावच्छेदकस्य अज्घटिताङ्गावधिकपरत्वविशिष्टञ्णित्तद्धितत्वस्य; अदुपधावधिकपरत्वविशिष्टञितिणित्प्रत्ययत्वस्य, अजन्ताङ्गावधिकपरत्वविशिष्टञितिणित्प्रत्ययत्वरूपस्य चेत्युभयशास्त्रीयोद्देश्यतावच्छेदकाभाववति, मारुच्छब्दघटकतद्धिते, वर्तमानत्वेन, तस्य व्याप्यत्वाभावादनेन न्यायेन आदिवृद्धेरन्त्योपधावृद्धिबाधनासम्भवेनोक्तज्ञापकपरभाष्यविरोधाभावात्।

---

१. पा.सू. ७।३।२०; २. पा.सू. ७।२।११७।
३. पा.सू. ७।२।११५; ४. पा.सू. ७।२।११६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अचो रहाभ्यामि'त्यत्राजव्यवहितपरत्वयरव्यवहितपूर्वत्वधर्माभ्यां सङ्कुचितस्य रत्वस्य अजव्यवहितपूर्वत्वाभावरूपधर्मसङ्कुचितस्य 'अनचि चे'ति शास्त्रस्योद्देश्यतावच्छेदकयर्त्वस्यापेक्षया व्याप्यत्वेन 'नेमौ रहावि'ति भाष्यसङ्गतिश्च। उभयत्र परम्परयोद्देश्यतावच्छेदकत्वं गृह्यते। इत्थञ्च साक्षात्परम्परा-साधरणोद्देश्यतावच्छेदकयोः सामान्यविशेषशास्त्रयोर्बाध्यबाधकभावः स्थापित इति ध्येयम्।

यद्वा, अत्रोद्देश्यतापदेन उद्देश्यदलप्रविष्टशाब्दबोधीयविषयत्वमात्रं गृह्यते, तच्च सङ्कुचितमेवास्तीति, न विशेष्यविशेषणदलप्रविष्टयावत्पदार्थसङ्कुचितमिति निवेशस्योपयोगः।

इत्थञ्च प्रकारद्वयेऽपि 'यावत्पदार्थसङ्कुचितः' इति प्रकारे, 'यद्वा' प्रकारे च; सामान्यविशेषशास्त्रयोर्बाध्यबाधकत्वनियमस्वरूपकथने आदौ वृत्त्यन्तविशेषणदानं निष्फलमेव। नन्वेवं वृत्त्यन्तविशेषणाभावे 'एकाचो द्वे प्रथमस्ये'ति सामान्यशास्त्रस्य 'अजादेर्द्वितीयस्ये'ति विशेषशास्त्रेण कथं बाध इति चेत्, न, 'एकाच्' इति शास्त्रीयोद्देश्यतावच्छेदकधातुत्वस्य, तादृशधातुत्वावच्छिन्नविषयतायाश्च; 'अजादेरि'ति शास्त्रीयोद्देश्यतावच्छेदकस्य, तादृशधातुत्वावच्छिन्नविषयतायाश्चापेक्षया व्यापकत्वेन तद्बाधसिद्धेः।

अत्र च विषयतयोर्व्याप्यव्यापकभावस्तद्विषयतामात्रवृत्तितद्व्यक्तित्वादिनैव इति नाग्रहः, किन्त्वन्यतरत्वादिनापि। अत एव 'इको यणची'[1] त्येतच्छास्त्रीयेक्पद-प्रयोज्यविषयतायाः 'दैत्यारिः' इत्यत्रासत्त्वेन 'आद्गुणः'[2] इत्येतच्छास्त्रीयापद-प्रयोज्यविषयतायाश्च 'श्रीशः' इत्यत्रासत्त्वेन प्रत्येकवृत्तिधर्मपुरस्कारेण तयोर्व्यापकत्वविरहेऽपि अन्यतरत्वेन तयोर्विषयतयोर्व्यापकत्वमादाय 'अकः सवर्णे दीर्घः'[3] इत्यनेन 'इको यणचि', 'आद्गुणः' इत्येतयोर्द्वयोरपि बाधः सिद्ध्यति। 'दैत्यारिः' इत्यत्र 'इको यणचि' इति सूत्रस्य यद्यपि विषयता नास्ति, तथापि 'आद्गुणः' इत्यस्य त्वस्त्येव। एवमेव 'श्रीशः' इत्यत्र 'आद्गुणः' इत्यस्य विषयत्वाभावेऽपि 'इको यणची'ति शास्त्रीयविषयतायाः सत्त्वेनान्यतरत्वमादाय व्याप्यव्यापकभावोऽस्तीति स्मर्तव्यम्।

नन्वेवं 'कुप्वोः[4] ≍क ≍पौ च' इति शास्त्रेण 'विसर्जनीयस्य[5] सः', 'शर्परि विसर्जनीयः'[6] इत्येतच्छास्त्रीयविसर्जनीयपदप्रयोज्यविषयताद्वयस्यापि अन्यतरत्वेन

---

१. पा.सू. ६।१।७७; २. पा.सू. ६।१।८७।
३. पा.सू. ६।१।१०१; ४. पा.सू. ८।३।३७।
५. पा.सू. ८।३।३४; ६. पा.सू. ८।३।३५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वघटकविसर्जनीयपदप्रयोज्यविषयताव्यापकत्वेन तयोर्द्वयोरपि बाधापत्तिः। न च स्वव्यापकतावच्छेदकत्वस्वव्यापकतावच्छेदकाव्यापकत्वोभयसम्बन्धेन स्वघटकपदप्रयोज्यविषयताविशिष्टधर्मावच्छिन्नव्यापकतावद्विषयताकशास्त्रस्य स्वेन बाध इत्यर्थकल्पनेन निरुक्तविषयताद्वयवृत्त्यन्यतरत्वे 'कुप्वोरि'ति-शास्त्रीयविसर्जनीयपदप्रयोज्यविषयताया आद्यसम्बन्धेन वैशिष्ट्येऽपि, स्वव्यापकतावच्छेदक-'विसर्जनीयस्य सः' इत्येतच्छास्त्रीयविसर्जनीयपदप्रयोज्यविषयतावृत्तितद्व्यक्तित्वव्यापकत्वेन, द्वितीयसम्बन्धेन तदभावाद् बाध्यत्वप्रयोजकोक्तरूपाभावेन नोक्तशास्त्रद्वयबाधः।

अस्येदं स्फुरणम्—स्वव्यापकतावच्छेदकत्व-स्वव्यापकतावच्छेदकाव्यापकत्वोभयसम्बन्धेन स्वघटकपदप्रयोज्यविषयताविशिष्टधर्मावच्छिन्नव्यापकतावद्विषयताकशास्त्रस्य स्वेन = व्याप्येन बाधः। एवं सति स्वं = 'कुप्वोरि'ति शास्त्रं, तद्घटकपदं विसर्जनीयपदं, तत्पदप्रयोज्यविषयता विसर्जनीयनिष्ठा, तस्या व्यापकतावच्छेदको धर्मः, 'विसर्जनीयस्य सः', 'शर्परे विसर्जनीयः' इत्येतद्द्वयीयसूत्रनिष्ठान्यतरत्वं, तद्धर्मावच्छिन्नव्यापकतावद्विषयताकत्वमुभयोः सूत्रयोः समस्तीति प्रथमः सम्बन्धः साधु घटते। किन्तु द्वितीयः सम्बन्धो न घटते। तथा हि, 'कुप्वोरि'ति शास्त्रघटकपदविसर्जनीयपदप्रयोज्यविसर्गनिष्ठविषयताया व्यापकतावच्छेदकधर्ममन्यतरत्वमगृहीत्वा 'विसर्जनीयस्य सः' इत्येतच्छास्त्रीयविसर्जनीयपदप्रयोज्यविषयतावृत्तितद्व्यक्तित्वं गृह्यते, तस्य व्यापकतावच्छेदकधर्मस्य तद्व्यक्तित्वरूपस्यान्यतरत्वं धर्मो व्यापक एव, न त्वव्यापको यो ह्यत्रापेक्ष्यते। अन्यतरत्वमादायात्र व्याप्यव्यापकशास्त्रयोर्बाध्यबाधकभावो विचारितः।

न चैवं सति, स्वं = 'उरृदि'[1]ति शास्त्रीयपदप्रयोज्यविषयता ऋपदप्रयोज्यविषयता ऋनिष्ठा, तस्या व्यापकतावच्छेदको धर्मः 'उपधायाश्च'[2], 'मृजेर्वृद्धिः'[3], 'पुगन्तलघूपधस्य[4] च' इत्येतच्छास्त्रीय-ऋत्पदेक्पदप्रयोज्यविषयतात्रयवृत्त्यन्यतमत्वं तद्धर्मावच्छिन्नविषयताकत्वं त्रिष्वपि सूत्रेषु घटते; किन्तु द्वितीयसम्बन्धसङ्घटनसमये 'उरृत्'-सूत्रघटक-ऋत्पदप्रयोज्यविषयताव्यापकतावच्छेदकत्वमन्यतमत्वमगृहीत्वा 'उपधाया' इति 'पुगन्त' इति च शास्त्रद्वयीयोद्देश्यताख्यविषयतावृत्त्यन्यतरत्वं गृह्यते, तस्य च व्यापकत्वमेवान्यतमत्वं न त्वव्यापकं यदभीष्टम्। तथा च स्वव्यापकतावच्छेदकाव्यापकत्वसम्बन्धेन वैशिष्ट्याभावेन 'उरृत्'-शास्त्रस्येरराराम-पवादत्वानापत्तिः। यथोक्तम्—'उरृदि'ति-शास्त्रीय-ऋपदप्रयोज्यविषयताया अपि

१. पा.सू. ७।४।७;
२. पा.सू. ७।१।१०१।
३. पा.सू. ७।२।११४;
४. पा.सू. ७।३।८६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'उपधायाः, 'मृजेः', 'पुगन्त' इत्येतच्छास्त्रत्रयीय-ॠपदेक्पदप्रयोज्यविषयतात्रय-वृत्त्यन्यतमत्वे स्वव्यापकतावच्छेदकीभूतं 'यदुपधायाः' इति 'पुगन्ते'ति शास्त्रद्वयीयोद्देश्यताख्यविषयताद्वयवृत्त्यन्यतरत्वं तद्व्यापकत्वस्यैव सत्त्वेन स्वव्यापकतावच्छेदकाव्यापकत्वरूपसम्बन्धेन वैशिष्ट्याभावेन 'उर्ॠदि'ति शास्त्रस्येरराराामापवादत्वानापत्तेरिति चेन्न'[१], निरुक्तद्वितीयसम्बन्धघटकव्यापकता-वच्छेदकपदेन पुगन्तेति शास्त्रीयेक्पदप्रयोज्यविषयता, 'उपधायाश्चे'ति शास्त्रीया, ॠपदप्रयोज्यविषयता चेत्येतद्द्वयावृत्तिनो ग्रहणेन सर्वत्र दोषाभावात्।

अस्यायं स्फुटार्थः—स्वघटकपदप्रयोज्यविषयताव्यापकतावच्छेदको धर्मो नात्र 'उपधाया' इति 'पुगन्ते'ति शास्त्रीयोद्देश्यतान्यतरत्वं गृह्यते, येन तस्यान्यतमत्वे व्यापकतावद्विषयताकशास्त्रस्य व्यापके धर्मे, अव्यापकत्वं भवेत्किन्तु, निरुक्तद्वितीयसम्बन्धघटकव्यापकतावच्छेदकपदेन 'पुगन्ते'ति शास्त्रीयेक्पदप्रयोज्यविषयता 'उपधायाश्चे'ति शास्त्रीया, ॠपदप्रयोज्यविषयता चेत्येतद्द्वयावृत्तिनो धर्मस्य ग्रहणम्। अर्थाद् उपर्युक्तान्यतरत्वमिह व्यापकतावच्छेदकधर्मत्वेन न गृह्यते; किन्त्वन्य एव कश्चन धर्मः, यमादायाव्यापकत्वं गृह्येत, न तेन दोषः।

न चैवमपि 'यचि भम्'[२] इति शास्त्रेण बाध्यसामान्यचिन्तया 'सुप्तिङन्तं पदम्'[३], 'स्वादिष्वसर्वनामस्थाने'[४] इति शास्त्रद्वयबाधानापत्तिः; तदुभयशास्त्रीय-विषयताद्वयवृत्त्यन्यतरत्वस्य, स्वव्यापकतावच्छेदक'स्वादिष्वि'ति-शास्त्रीयविषयता-वृत्तितद्व्यक्तित्वव्यापकत्वात्; तथा च 'राजन्यः' इत्यत्र 'सुप्तिङन्तमि'ति पदत्वेन नलोपापत्तिरिति वाच्यम्, अत्र दोषापनयनाय पूर्वोक्तस्वव्यापकतावच्छेदका-व्यापकत्वस्थाने स्वव्यापकतावच्छेदकविशिष्टभिन्नत्वं गृह्यताम्। वैशिष्ट्यञ्च स्वव्यापकत्वस्वाश्रयविषयताऽव्याप्यविषयताऽवृत्तित्वोभयसम्बन्धेन। तथा च विस्तरः—स्वघटकपदप्रयोज्यविषयताविशिष्टधर्मावच्छिन्नव्यापकतावद्विषयताक-शास्त्रस्य स्वेन बाधः। वैशिष्ट्यञ्च स्वव्यापकतावच्छेदकत्वस्वव्यापकता-वच्छेदकविशिष्टभिन्नत्वोभयसम्बन्धेन। अत्रापि च वैशिष्ट्यम्—स्वव्यापकत्वस्वाश्रय-विषयताऽव्याप्यविषयताऽवृत्तित्वोभयसम्बन्धेन। स्वघटकपदप्रयोज्यविषयताया यो व्यापकतावच्छेदकः, तस्य च व्यापकः; अथ च स्वाश्रयविषयताऽ-व्याप्यविषयताऽवृत्तिर्यो धर्मस्तद्धर्मावच्छिन्नव्यापकतावद्विषयताकशास्त्रस्य स्वेन =

१. परिभाषेन्दुशेखरः, भूतिटीका, परि. ५८, बाधबीजप्रकरणम्।
२. पा.सू. १।४।१८;
३. पा.सू. १।४।१४।
४. पा.सू. १।४।१७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याप्यशास्त्रेण बाधो भवति। यथाऽत्र स्वं = 'यचि भम्' तद्घटकपदं स्वादिरिति, तद्व्यापकतावच्छेदकं 'स्वादिष्वसर्वनामस्थाने', 'सुप्तिङन्तं पदम्' इति सूत्रद्वयवृत्त्यन्यतरत्वम्। अत्र द्वितीयस्मिन् वैशिष्ट्ये पूर्ववद् व्यापकतावच्छेदकत्वन्नान्यतरत्वं ग्रहीष्यामः, किन्तु तद्व्यक्तित्वम्। तथा च तद्व्यक्तित्वस्यान्यतरत्वं व्यापकमेवेति द्वितीयविशिष्टसम्बन्धस्य प्रथमः सम्बन्धो घटते; किन्तु द्वितीयो न घटते। यथा, स्वस्य = स्वादिशास्त्रस्य यत् तद्व्यक्तित्वं व्यापकतावच्छेदकत्वं तदाश्रयविषयता पञ्चवचनभिन्ना, तस्या अव्याप्यविषयता सुप्तिङन्तस्य। यतो हि सा 'राम' इत्यत्रापि वर्तते। ततस्तदव्याप्यविषयतावति सुप्तिङन्तशास्त्रेऽन्यतरत्वस्य वृत्तित्वमेव नाऽवृत्तित्वम्। तथा च 'एकसत्त्वेऽपि द्वयं नास्ती'ति न्यायेनोभयसम्बन्धेन स्वविशिष्टभिन्नत्वस्य सत्त्वेनोभयशास्त्रबाधकत्वं सुवचम्, इति सर्वं सुघटितम्। तथा च 'यचि भम्' इत्यनेन बाधः। न च 'राजन्यः' इत्यत्र नलोपापत्तिः।

विशेषधर्मावच्छिन्नोद्देश्यताकशास्त्रस्य बाधकत्वे बीजम्

विशेषधर्मावच्छिन्नोद्देश्यताकशास्त्रस्य बाधकत्वे बीजं चतुर्विधम्—

१. तदप्राप्तियोग्येऽचारितार्थ्यम्।

२. तदप्राप्तियोग्येऽचारितार्थ्ये सति कृते चारितार्थ्यम्।

३. तदप्राप्तियोग्येऽचारितार्थ्ये सति कृतेऽचारितार्थ्यम्।

४. तदप्राप्तियोग्येऽचारितार्थ्ये सति अपवादशास्त्रप्रवृत्त्युत्तरमुत्सर्गशास्त्रप्रवृत्तावपवादशास्त्रप्रणयनवैयर्थ्यसम्भावना च।

सर्वथा तदप्राप्तियोग्येऽचारितार्थ्यमपवादशास्त्रस्य बाधकत्वे बीजम्। नास्ति तादृशं स्थलं यत्र बाध्यशास्त्रसामान्यधर्मावच्छिन्नोद्देश्यताकस्य प्राप्तिर्न स्यात्, चरितार्थञ्च बाधकशास्त्रं स्यात्। तदचारितार्थ्यमेव तद्बाधकत्वे बीजम्। अत्र तदप्राप्तियोग्यस्थलं तद्विधेयाघटितं गृह्यते तेन, तद्विधेयघटिते = उत्सर्गशास्त्रविधेयघटिते पुनरप्राप्तेः, विशेषशास्त्रस्य चारितार्थ्येऽपि न क्षतिः।

प्रथमबाधबीजोदाहरणम्

अस्मिन् बाधबीजे उत्सर्गस्य पूर्वमप्रवृत्तिरित्येव बाधः। तथा चोत्सर्गशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्नेऽपवादशास्त्रप्रवृत्तियोग्यलक्ष्यघटकातिरिक्तत्वेन सङ्कोचः। यथा च 'सम्बुद्धौ[1] च' इत्यस्य 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं[2] हल्'

१. पा.सू. ७।३।१०६; २. पा.सू. ६।१।६८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति सूत्राप्राप्तियोग्येऽचारितार्थ्येन सम्बुद्ध्यव्यवहितपूर्वत्वविशिष्टाबन्ताङ्गातिरिक्तत्वेन हल्ङ्यादिशास्त्रीयसुपदार्थे सङ्कोचात् 'रमा स्' इत्यत्र 'हल्ङ्यादि'सूत्राप्राप्त्या अनेनेत्वे 'एङ्ह्रस्वात् सम्बुद्धेः'[1] इत्यनेन सुलोपसिद्धिरिति। एवञ्च 'हे रमे' इति प्रयोगसिद्धिः।

न चात्र द्वितीयबाधबीजेन निर्वाहः, तस्य बीजस्य हल्ङ्यादिसूत्र-विषयेऽप्रवृत्तिस्वीकारात्। अत एव 'अनड्वान्' इत्यत्र सुलोपसिद्धिः। अन्यथा 'सावनडुहः'[2] इत्यनेन हल्ङ्यादिलोपस्य द्वितीयबाधबीजेन बाधापत्त्या नुमुत्तरं हल्ङ्यादिलोपानापत्तेः। अयमभिप्रायः—अनडुह्शब्दात्सौ, आमि; हल्ङ्यादिसुलोपः, 'सावनडुहः' इत्यनेन नुम् च प्राप्येते। तत्र यदि हल्ङ्यादिलोपस्थलेऽपि द्वितीयबाधबीजप्रवृत्तिस्स्यात्तदा 'अनड्वाह' इत्यत्र कृते सुलोपे प्रत्ययलक्षणेन नुमश्चारितार्थ्यात्, द्वितीयबाधबीजेन नुमा हल्ङ्यादिलोपस्य बाधापत्त्या नुमुत्तरं हल्ङ्यादिलोपो न स्यादिति।

द्वितीयबाधबीजोदाहरणम्

एतद्बाधश्च, उत्सर्गशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने स्वविहितकार्याश्रयाति-रिक्तत्वेन सङ्कोचरूपः। यथा 'सर्वेषाम्' इत्यत्र 'ह्रस्वनद्यापो नुट्'[3] इत्यत्रामपदार्थे 'आमि सर्वनाम्नः सुट्'[4] इति शास्त्रविहितसुडाश्रयातिरिक्तत्वेन सङ्कोचात्, न सुडुत्तरं नुट्। 'आमि सर्वनाम्नः सुडि'त्यस्य नुडप्राप्तियोग्येऽचारितार्थ्यात्कृतेऽपि नुटि 'यदागम'न्यायेन चारितार्थ्याच्च द्वितीयबाधबीजेन सुटा नुटो बाधसिद्धिः। एतद्बाधबीजेनोत्सर्गशास्त्रस्योद्देश्यतावच्छेदकावच्छिन्ने अपवादशास्त्रस्य प्रवृत्तियोग्यातिरिक्तत्वेन स्वविधेयघटितातिरिक्तत्वेन चोभयथा सङ्कोचः क्रियते। तेनापवादशास्त्रप्रवृत्तियोग्यस्थले पूर्वं नोत्सर्गशास्त्रप्रवृत्तिः। न चापवादशास्त्रस्य विधेये सति पश्चादुत्सर्गशास्त्रप्रवृत्तिः। यथा प्रकृते, सुटः प्रवृत्तियोग्याददन्त-सर्वनामाव्यवहितोत्तरामः अतिरिक्तत्वेन सङ्कोचान्न सुटः पूर्वं नुट्। न च सुटि तद्घटितातिरिक्तत्वेन सङ्कोचान्नुट्। एतदेव तक्रकौण्डिन्यन्यायस्वरूपम्।

तृतीयबाधबीजोदाहरणम्

तृतीयबाधबीजेन तु, प्रथमबाधबीजप्रयोज्यसङ्कोचरूपघटकस्वप्रवृत्तियोग्यार्थे स्वीयोद्देश्यतावच्छेदकावच्छिन्नेति विशेषणदानरूपः सङ्कोचः क्रियते। बाधबीजेनानेन उत्सर्गशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने अपवादशास्त्रस्य यत्स्वीयोद्देश्यता-

---

१. पा.सू. ६।१।६९; २. पा.सू. ७।१।८२।

३. पा.सू. ७।१।५४; ४. पा.सू. ७।१।५२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वच्छेदकावच्छिन्नं स्वप्रवृत्तियोग्यं तदतिरिक्तत्वेन सङ्कोचः क्रियत इत्यर्थः। तथा च 'रमायाम्' इत्यत्र 'रमा'शब्दात् ङौ 'याडापः'[१] इत्यनेन याट्, 'ङेराम्नद्याम्नीभ्यः'[२] इत्यनेन ङेराम्च प्राप्येते। अत्र ङेराम् याट् अप्राप्तिस्थलेऽचरितार्थम्; सति च याटि, आबन्ताङात् परत्वाभावात् पश्चादपि न ङेराम्, स्वीयोद्देश्यतावच्छेदकावच्छेदकत्वाभावात्। 'तदप्राप्तियोग्येऽचारितार्थ्ये सति कृतेऽचारितार्थ्यम्' इति तृतीयबाधबीजेन 'ङेराम्' इत्यादिसूत्रेण 'याडापः' इति सूत्रोद्देश्ये स्वीयोद्देश्यतावच्छेदकावच्छिन्नं यदाबन्ताङाव्यवहितोत्तरत्वविशिष्टङित्वं, स्वप्रवृत्तियोग्यञ्च 'रमा ङि' इत्यादि, तदतिरिक्तत्वेन सङ्कोचः क्रियते। येन पूर्वम् आम्प्रवर्तते, पश्चाच्च स्थानिवद्भावेन ङित्वमादाय याट्प्रवृत्तिः।

यद्यपि अत्र प्रथमबाधबीजेन निर्वाहः, तथापि वाक्यसंस्कारपक्षे 'अयज इ इन्द्रम्' इत्यत्र 'आद्गुणः'[३] इत्यस्य प्रवृत्तये एतस्यावश्यकत्वम्। प्रथमबाधबीजे हि उत्सर्गशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्नेऽपवादशास्त्रप्रवृत्तियोग्यलक्ष्यघटकातिरिक्तत्वेन सङ्कोचः क्रियते। तथा ह्यत्र, इट इकारस्य 'अकः सवर्णे दीर्घः'[४] इति शास्त्रप्रवृत्तियोग्यत्वेनोत्सर्गशास्त्रस्य 'आद्गुणः' इत्यस्य प्रवृत्तिर्न स्यात्तथा चायजे इन्द्रम् इत्यस्यासिद्धिः स्यात्।

यद्यप्यत्र अच्पदार्थे 'अकः सवर्णे दीर्घः' इति शास्त्रप्रवृत्तियोग्यातिरिक्तत्वेन संकोचापेक्षया, 'आद्गुणः' इत्यत्र 'अकः सवर्णे दीर्घः' इति शास्त्रीयसवर्णाजव्यवहितपूर्वत्वविशिष्टाक्त्वरूपोद्देश्यतावच्छेदकावच्छिन्नो यः स्वप्रवृत्तियोग्यस्तदतिरिक्ताद् अवर्णादगव्यवहितपरसवर्णाज्रूपस्वप्रवृत्तियोग्यातिरिक्तेऽचीत्येवंरूपस्यैव वा सङ्कोचस्यात्र प्राप्त्या, 'अयज इ इन्द्रम्' इत्यत्र अगव्यवहितपरसवर्णाच्त्वाभावादाद्गुण इत्यस्योद्देश्ये नात्र सङ्कोचः। तेन गुणस्य दुर्वारत्वेन नेदमप्यसाधारणं फलम्।

चतुर्थबाधबीजोदाहरणम्

'कुलमि'ति चतुर्थबाधबीजोदाहरणम्। 'कुल सु' इति स्थिते 'अतोऽम्'[५] इति सूत्रेण सोरम्, [६]'स्वमोर्नपुंसकात्' इत्यनेन च तस्यैव लुगिति प्राप्येते। अत्रामविधानं लुगप्राप्तावचरितार्थम्, कृते चामि तस्य 'स्वमोर्नपुंसकात्' इत्यनेन लुकि, अपवादशास्त्रस्य 'अतोऽम्' इति शास्त्रस्य प्रणयनं वैयर्थ्यमियात्। तस्मादत्र

१. पा.सू. ७।३।११३; २. पा.सू. ७।३।११६।
३. पा.सू. ६।१।८७; ४. पा.सू. ६।१।१०४।
५. पा.सू. ७।१।२४; ६. पा.सू. ७।१।२३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्थबाधबीजेनापवादशास्त्रं स्वविहितकार्याश्रयातिरिक्तत्वेन उत्सर्गशास्त्रस्योद्देश्ये सङ्कोचं करोति। तेन अमि सति, पश्चादपि न लुक्। प्रथमबाधबीजेन बाधाच्चामः प्रागपि न लुगिति बोध्यम्।

बाधबीजानां चतुष्ट्वं कथम्? द्वितीयेऽन्तर्भावात् समेषाम्

केचित्—द्वितीयबाधबीजेनैव स्वप्रवृत्तियोग्यातिरिक्तत्वेन स्वविहितकार्याश्रयातिरिक्तत्वेन चोत्सर्गशास्त्रे सङ्कोचः। 'रमे' इत्यत्र प्रथमबाधबीजोदाहरणेऽपि अनेनैव बाध इति प्रथमबाधबीजस्य नोपयोगः। न चास्य द्वितीयबाधबीजस्य हल्ङ्यादिलोपविषयेऽप्रवृत्तेः कथं 'रमे' इत्यत्र हल्ङ्यादिसुलोपेऽनेन सङ्कोच इति वाच्यम्, हल्ङ्यादिलोपविषये तदप्रवृत्तिस्वीकारे मानाभावात्। नापि फलमस्मिन्। ननु 'हल्ङ्यादिलोपविषये द्वितीयबाधबीजस्वीकारे 'अनड्वान्' इत्यत्र कथं सुलोपसिद्धिः, 'सावनडुहः' इत्यनेन हल्ङ्यादिलोपस्य बाधापत्त्या नुमुत्तरं हल्ङ्यादिलोपानापत्तेरिति चेन्न, 'अनड्वानि'त्यत्र पुनः पुनः संयोगान्तलोपेन निर्वाहात्। सावपि पदं भवतीत्यस्य सर्वाभिमतत्वेन 'अनड्वान् ह्स्' इति दशायामेकस्मिन्नेव काले 'संयोगान्तस्य लोपः'[1] इति सूत्रस्य वर्णद्वये प्राप्त्या, 'लक्ष्ये लक्षणं सकृदेव प्रवर्तते' इति न्यायस्य विषयाभावात्। एवमेव तृतीयचतुर्थाभ्यां बाधबीजाभ्यां प्रथमबाधबीजप्रयोज्योऽपवादशास्त्रप्रवृत्तियोग्यलक्ष्य-घटकातिरिक्तत्वरूपः सङ्कोचः स्वीकरणीयः। सर्वबाधबीजान्तर्भावकेऽस्मिन् द्वितीयबाधबीजे, प्रथमबाधबीजस्य द्वितीयबाधबीजस्य च सङ्कोचौ स्वीकृतौ। येन प्रथमबाधबीजस्य सङ्कोचेन तृतीयचतुर्थबाधबीजयोः सर्वेष्टसिद्धिः। तेनापवादशास्त्रात्पूर्वमप्युत्सर्गाप्रवृत्तेरिति वदन्ति।

प्रथमबाधबीजेऽन्येषामन्तर्भावः

प्रथमबाधबीजेनैव सर्वत्र निर्वाहे अन्यानि त्रीणि बाधबीजानि निष्फलत्वान्नाङ्गीकार्याणि इत्यन्ये।

तत्र यथा द्वितीयबाधबीजस्योदाहरणेषु 'सर्वेषामि'त्यादिषु 'आमि सर्वनाम्नः सुट्' इत्यत्र आ आमीत्याकारप्रश्लेषेणाकारादावामि सुट्नुटोः प्रवृत्त्या प्रथमबाधबीजेन पूर्वं सुटि पश्चाच्चाकाराद्यामपरकत्वाभावेन नुटोऽप्राप्तिः।

'उर्णुनाव' इत्यादिषु यत्र द्वितीयबाधबीजेन प्रथमद्विर्वचनस्य तदुत्तरं सावकाशेनापि द्वितीयद्विर्वचनेन बाधस्तत्रापि 'अजादेर्द्वितीयस्ये'त्यनेन 'एकाचो द्वे प्रथमस्य' इत्यस्य परत्वाद् बाधेन 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव'[2]

---

१. पा.सू. ८।२।२३। २. परिभाषेन्दुशेखरे, प. ४०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति न्यायात्र पुनरेकाच् इत्यस्य प्रवृत्तिः। यद्वा, प्रथमबाधबीजेन 'एकाच्' इत्यस्य बाधेन अनभ्यासग्रहणेन तत्प्रत्याख्यानप्रकारेण[१] वा न पुनस्तत्प्राप्तिः।

'रमायामि'त्यत्र प्रथमबाधबीजेनापवादशास्त्रप्रवृत्तियोग्यलक्ष्यघटकातिरिक्तत्वेनोत्सर्गशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने सङ्कोचात्, अर्थादाबन्ताङ्गव्यवहितपरत्वविशिष्टङित्त्वेन सङ्कोचाद् याटः पूर्वमाम्सिद्धिरिति तृतीयस्य नैतत्फलमिति पूर्वमुपपादितमेव। 'अयजे इन्द्रम्' इत्यत्र तु 'अपवादो[२] यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते' इति न्यायेनैव दीर्घात् पूर्वमाद्गुणप्रवृत्तिरिति तत्रैवोपपादितम्। एवञ्च तृतीयस्यापि बाधबीजस्य नासाधारणं फलम्।

चतुर्थबाधबीजफले 'कुलमि'त्यत्रापि प्रथमबाधबीजेन 'स्मोरि'त्यस्य बाधेन पूर्वमप्रवृत्त्याऽमुत्तरञ्च 'अतोऽमि'ति सूत्रारम्भसामर्थ्यादेव तद्बाधसिद्धिरिति वदन्ति शाब्दिकमूर्धन्याः।

तक्रकौण्डिन्यन्यायेन द्वितीयबाधबीजेन बाधस्वीकारे दोषाः

किञ्च, तक्रकौण्डिन्यन्यायेन द्वितीयबाधबीजेन बाधस्वीकारे काश्चिदापत्तयोऽप्यापतन्ति। यथा 'ई घ्रा ध्मोः'[३] 'हन्तेर्हिंसायां यङि घ्नीभावो वाच्यः'[४] इत्यादिभिर्द्वित्वबाधापत्तिः। 'जेघ्रीयते' 'देध्मीयते' इत्यनयोः प्रयोगयोः कृतेऽपि द्वित्वे अभ्यासविशिष्टे धातुत्वस्वीकाराद् ईत्वप्राप्तेः। अत एव कृतेऽपि द्वित्वरूपोत्सर्गशास्त्रे पश्चादीत्वापवादशास्त्रस्य प्रवृत्तेरीत्वेन द्वित्वबाधापत्तिः। एवमेव 'देध्मीयते' इत्यत्रापि बोध्यम्। 'तदोः सः[५] सावनन्त्ययोः' 'अनाप्यकः'[६] इति सूत्राभ्यां त्यदाद्यत्वबाधापत्तिः। 'सः' इत्यादिप्रयोगे 'त्यदादीनामः[७]' इत्यनेनात्वे कृतेऽपि अनन्त्यस्य तकारस्य सत्वप्रसक्तिः, तेन कृतेऽप्युत्सर्गेऽपवादचारितार्थ्यात् त्यदाद्यत्वबाधापत्तिः। एवमेव 'अनेन' इत्यत्र कृतेऽप्यत्वेऽनि सिद्धे, पूर्वोक्तद्वितीयबाधेनात्वबाधापत्तिः। 'तावकीनः, तावकः, मामकीनः, मामकः' इत्येतेषु प्रयोगेषु 'तवकममकावेकवचने'[८] इत्यनेन तवकममकादेशयोः आदिवृद्धौ सत्यामपि चारितार्थ्यात्, आदेशेनादिवृद्धिबाधापत्तिः। 'स्यतासी ऌलुटोः'[९] इत्यनेन च 'भवितासि' इत्यादिप्रयोगेषु कृतेऽपि तिबादिषु स्थानिवद्भावेन तासश्चारितार्थ्यात् तासा तिबादिबाधापत्तिः। एवमेव स्येऽपि ज्ञेयम्। 'पक्वः' इत्यत्र च 'पचो वः'[१०]

---

१. महाभाष्यम्, ६।१।८;
२. परिभाषेन्दुशेखरे, प. ६६।
३. पा.सू. ७।४।३१;
४. वार्तिकम्-४६२१।
५. पा.सू. ७।२।१०६;
६. पा.सू. ७।२।११२।
७. पा.सू. ७।२।१०२;
८. पा.सू. ४।३।३।
९. पा.सू. ३।१।३३;
१०. पा.सू. ८।२।५२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यनेन निष्ठातस्य वत्वं 'चो: कु:'[1] इत्यनेन कृतेऽपि कुत्वे सिद्धम्। अतस्तेन तक्रकौण्डिन्यन्यायेन द्वितीयाबाधबीजेन कुत्वबाधापत्तिरित्यादयो दोषा: स्वीकारेऽस्य समापतन्ति। न चैतदादिषु बहुषु लक्ष्येष्वननुगतत्वात् तस्य बाधबीजस्यानित्यत्वमेव स्वीकार्यमिति वाच्यम्, अनित्यत्वस्वीकारापेक्षया तदस्वीकारस्यैव श्रेयस्करत्वात्। एतस्यास्वीकारादेव 'इदमो म:'[2] इति सूत्रं चरितार्थम्; अन्यथा 'अयम्' इति प्रयोगेऽनेन बाधबीजेन बाधबीजस्वीकारे कृतेऽपि त्यदाद्यत्वे, चारितार्थ्याद् अयादेशस्य, तेनायादेशेन त्यदाद्यत्वबाधसिद्धिस्तदर्थं मस्य मविधिर्व्यर्थ:। एवमेव 'इयम्' इति प्रयोगेऽपि 'य: सौ'[3] इत्यनेनात्वे कृतेऽपि चरितार्थतां प्राप्ते बाधसिद्धि:, तदर्थं 'इदमो म:' इति सूत्रं व्यर्थम्। एवञ्च पाणिनिसूत्रमेव ज्ञापकं यद् द्वितीयबाधबीजं न स्वीक्रियत इति।

न चैतदस्वीकारे 'नेमौ रहावि'ति भाष्यासङ्गति:, 'हर्यनुभव:' इत्यादौ रेफस्य द्वित्वापत्तिश्च, मम तु तक्रन्यायेन 'अनची'त्यत्र यर्पदार्थे रेफातिरिक्तत्वेन सङ्कोचात्तदप्राप्तिरिति वाच्यम्; अत्र तक्रन्यायेन सङ्कोचेनेष्टसिद्धेरयोगात्। तक्रन्यायेन हि विशेष्यविशेषणदलप्रविष्टयावत्पदार्थसङ्कुचितव्याप्यतावच्छेदकरूपावच्छिन्नातिरिक्तत्वेन सङ्कोच आवश्यक:, अन्यथा ह्रस्वनद्यापो' इत्यत्राऽऽम्पदार्थेऽवर्णावधिकपरामतिरिक्तत्वेन सङ्कोचापत्तौ 'रामाणामि'त्यत्र नुडनापत्ते:। एवम् 'एकाचो द्वे प्रथमस्य' इत्यत्र अजादिधात्वतिरिक्तत्वेन सङ्कोचे 'आटे'त्यत्र द्वित्वानापत्तेश्च। एवम् 'अनचि चे'त्यत्रापि यरवधिकपूर्वत्ववदजवधिकपरत्ववद्रेफातिरिक्तत्वेन 'अचो रहाभ्यामि'ति सूत्रस्य विशेषणविशेष्यदलप्रविष्टयावत्पदार्थसङ्कुचितव्याप्यतावच्छेदकरूपावच्छिन्नातिरिक्तत्वेनोक्तदोषाणामभावाय सङ्कोच आवश्यक:। तादृशे च सङ्कोचेऽभ्युपगते 'अर्हेण' इत्यत्र तादृशरेफातिरिक्तयर: सत्त्वेन रेफस्यानचीति द्वित्वापत्ते:। तादृशसङ्कुचितयर्पदस्य च सूत्रवार्तिकयोरपि सम्बन्धे 'मद्रह्रदो' 'धात्त्रंश' इत्यादौ रेफस्य 'यणो मयो द्वे वाच्ये'[4] इत्यनेन वार्तिकेन द्वित्वापत्तेर्दुर्वारत्वाच्च। किञ्च 'अनचि चे'त्यस्य वैकल्पिकत्वेन 'शेषाद्विभाषा' इति सूत्रस्थभाष्यरीत्या रपदप्रयोज्यनिमित्तताख्यशाब्दविषयतायास्तदप्राप्तियोग्येऽचारितार्थ्यमपि दुर्वचमेव। अभावपक्षे तदप्राप्तियोग्ये चारितार्थ्यात्। तस्मादत्र तक्रन्यायादन्येन 'माठरपरिवेषण'न्यायेनैव बाध्यबाधकभाव:। अत एव तत्र सूत्रे भाष्ये माठरपरिवेषणन्याय एतदुपष्टम्भकतया प्रतिपादित:।

---

१. पा.सू. ८।२।३०।

२. पा.सू. ७।२।१०८।

३. पा.सू. ७।२।११०।

४. हयवरट्-सूत्रभाष्यप्रदीपोद्योते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्तु केनचित्— [१]शेखरकृता हि 'माठरपरिवेषण'न्यायं तक्रन्यायादभिन्नं मत्वा तक्रन्यायेनेत्युक्तं, तदयुक्तमेव, 'सर्वे ब्राह्मणा भोज्यन्ताम्, माठरकौण्डिन्यौ परिवेविषाताम्' इति हि तन्न्यायस्वरूपम्। अनेन चैककार्यविनियोगोद्देश्येन प्रवृत्तवाक्यकदम्बघटकव्यापकपदार्थे तत्प्रकरणघटकव्याप्यपदार्थातिरिक्तत्वेन सङ्कोचः क्रियते। अत एव [२]'ष्णान्ताः षडि'ति टान्तशब्दनिर्देश उपपद्यते; अन्यथा षष्शब्दे तक्रन्यायेन 'झलां [३]जशोऽन्ते' इत्यनेन कृतं जश्त्वं बाधित्वा 'वाऽवसाने'[४] इत्यनेन विवारश्वासाघोषवतो महाप्राणवतः षकारस्य स्थाने चर्त्वेन षकारे तदभावे जश्त्वेन डकारेऽपि टान्तनिर्देशासङ्गतिः।

अयं भावः—तक्रन्यायेन द्वितीयबाधबीजेन, जश्त्वेन डकारेऽपि, चर्त्वस्य सिद्धत्वात् जश्त्वं बाध्यते। तेन 'षष्'शब्दस्य षकारस्य टकारषकारयोर्मूर्धास्थानसाम्येऽपि आन्तरतम्यपरीक्षया विवारश्वासाघोषवतो महाप्राणवतश्च षकार एव चर्त्वेन विधीयते। 'वाऽवसाने' इत्यस्य वैकल्पिकत्वात् चर्त्वाभावे जश्त्वेन डकारेऽपि टान्तनिर्देशासङ्गतिः। ततश्च चर्त्वविधिपक्षे 'षष्' तदभावपक्षे च 'षड्' इति निर्देशः स्यान्न तु 'षट्' इति। मम तु मते 'वाऽवसाने' इत्यत्रैव व्याप्यचर्पदार्थातिरिक्तत्वेन तच्छास्त्रीयव्यापकझल्पदार्थे सङ्कोचेन 'वाऽवसाने' इत्यस्याप्राप्त्या पूर्वं जश्त्वेन डकारे, पश्चात्तस्यैव चर्त्वेन टकारे उक्तनिर्देश उपपद्यते। अत एव 'इको यणची'त्यत्रानेन 'दध्युदकादौ' क्वचिद् निमित्तत्वमंश्नुवानस्येकारस्य कार्यित्वं 'माठरपरिवेषण'न्यायेन बाध्येत इत्याशङ्क्य 'तस्मादित्युत्तरस्ये'ति निर्देशान्न बाध्यत इति कैयटः[५]। तत्र माठरकौण्डिन्यन्यायमेवोपक्रम्य विचारः प्रक्रान्तः। पाणिनेर्हि वर्णद्वित्वं वक्ष्यामीतीच्छायाः सत्त्वेन तादृशद्वित्वप्रकरणीयव्यापकपदार्थे यरात्मके च रेफरूपव्याप्यपदार्थातिरिक्तत्वेन सङ्कोचात्; 'अर्हेण, मद्रह्रदः, धात्त्रंशः' इत्यादौ 'अनचि च' 'अचो रहाभ्यां, 'यणो मयो द्वे' इत्यादिभिर्द्वित्वं नेति। अत एव वार्तिककृताऽप्यसम्भव एवापवादत्वं विरोधस्य तद्बीजत्वादित्यादिनाऽनन्यथासिद्धफलाभावेन च तदनङ्गीकार आदृत इति शम्।

●

१. पा.सू. १।१।२४;
२. पा.सू. ८।२।३९।
३. पा.सू. ८।४।५६;
४. हयवरट्-सूत्रप्रदीपे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोमकसिद्धान्तानुशीलनम्

डॉ० नागेन्द्रपाण्डेयः
उपाचार्यः, ज्योतिषविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

***

प्राचीनसिद्धान्तपञ्चके रोमकसिद्धान्तोऽन्यतमः। सुविदिततथ्यमिदं यदाचार्यवराहमिहिरेणैव पञ्चसिद्धान्तानां सर्वप्रथमं वर्णनं कृतम्।

तेषामाचार्यवर्याणां पञ्चसिद्धान्तिकानामके ग्रन्थे पौलिशरोमकवासिष्ठसौरपैतामहेति पञ्चसिद्धान्तानां विस्तृतं वर्णनं दरीदृश्यते। यथात्र ग्रन्थकारोक्तिः—

पौलिशरोमकवासिष्ठसौरपैतामहास्तु पञ्चसिद्धान्ताः।
पञ्चभ्यो द्वावाद्यौ व्याख्यातौ लाटदेवेन।। (१.३)

अत्रेदमपि संसूचितमाचार्येण यदाद्ययोर्द्वयोः पौलिशरोमकयोर्व्याख्याता लाटदेवनामकोऽस्ति एक आचार्यः। कोऽयं लाटदेवः? इत्यस्य विचारोऽग्रे भविष्यति, प्रथमन्तु रोमकसिद्धान्तस्यानुशीलनमावश्यकम्। आचार्यवराहमिहिरेण पञ्चसिद्धान्ताधारेण गणितं कृत्वा ग्रहाणां निरीक्षणं कृतम्। एषाम्पञ्चसिद्धान्तानां कः सिद्धान्तस्साधु घटते, कस्य च सिद्धान्तस्य ग्रहगणितीयप्रक्रिया शुद्धताम्भजते, इत्येतत्सर्वं तात्कालिकग्रहावलोकनेन विनिश्चितञ्ज्ञातम्। तथा चोक्तम्—

पौलिशकृतस्स्फुटोऽसौ तस्यासन्नस्तु रोमकः प्रोक्तः।
स्पष्टतरस्सावित्रः परिशेषौ दूरविभ्रष्टौ।। (१.४)

वराहमिहिरस्स्वयमेव सर्वेषां सिद्धान्तानामनुशीलनं कृत्वा गणितीयमानानां परिशोधनार्थं परीक्षणार्थञ्च ग्रहवेधं कृतवान्। वेधानन्तरमुद्घोषितवान् यदत्र सर्वविधपरिशुद्धस्सूर्यसिद्धान्तो विद्यते। तस्यासन्नौ पौलिशरोमकौ च वर्तेते। तथा च वसिष्ठपैतामहौ द्वावपि सिद्धान्तावशुद्धौ स्तः। एवं रोमकसिद्धान्तस्य महत्त्वं गणितीयदृष्ट्या महत्त्वपूर्णं शुद्धञ्च सिद्ध्यति। रोमकसिद्धान्तस्यास्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्णनमाचार्यब्रह्मगुप्तकृतब्राह्मस्फुटसिद्धान्ते दृश्यते। ब्रह्मगुप्तस्य कथनेनास्य रोमकसिद्धान्तस्य महत्त्वं वर्द्धते। यथा ब्रह्मगुप्तेनोक्तम्—

पौलिशरोमकवासिष्ठसौरपैतामहेषु यत् प्रोक्तम्।
तन्नक्षत्रानयनं नार्यभट्टोक्तं तदुक्तिरतः।। (४.४६)

अनेनात्र विज्ञायते यद् ब्रह्मगुप्तस्य काले (५५० शतके) रोमकसिद्धान्तस्य प्रचलनमासीत्। आर्यभट्टस्य ग्रन्थे पञ्चसिद्धान्तानां समुल्लेखो नास्तीत्यत्र कारणमपि स्पष्टम्। वराहमिहिरसङ्कलितेषु पञ्चसिद्धान्तेषु येषां पञ्चसिद्धान्तानां विवरणानि सन्ति तेषाम्प्रचारोऽल्प एव आसीदार्यभट्टस्य (४२६ शतके) काले। श्रीषेणाचार्येण कृते (सङ्कलिते, सम्पादिते वा) रोमकसिद्धान्ते मूलरोमकसिद्धान्तस्य विस्तारोऽधिको वर्तते, प्रायः सर्वत्रास्यैव पञ्चसिद्धान्तस्य चर्चा भवति। सिद्धान्तग्रन्थेष्वस्यैव रोमकसिद्धान्तस्य विषये ब्रह्मगुप्तो लिलेख—

युगमन्वन्तरकल्पाः कालपरिच्छेदकाः स्मृतावुक्ताः।
यस्मान्न रोमके ते स्मृतिबाह्यो रोमकस्तस्मात्।।

अनेन प्रकारेण रोमकसिद्धान्तस्य विस्तारः सिद्ध्यति। इत्थमत्र विज्ञायते यत् श्रीषेणाचार्यात् पूर्वं रोमकसिद्धान्तस्य प्रचलनमासीद् यस्य सङ्कलनं कृतं वराहमिहिरेण। रोमकसिद्धान्तस्य प्रथमा आर्या एवं विद्यते—

सप्ताश्विवेद(४२७)संख्यं शककालमपास्य चैत्रशुक्लादौ।
अर्धास्तमिते भानौ यवनपुरे भौमदिवसाद्यः[१]।।

अत्र ४२७ शकाब्दं वर्षं स्वीकृत्य ग्रहाणामानयनं प्रतिपादितम्। वर्षेऽस्मिन् मध्यममेषसङ्क्रान्तिदिनम्पञ्चोत्तरपञ्चख्रिष्टाब्दे मार्चमासस्य विंशतितारिका सिद्ध्यति (२०।५।५०५ ईस्वीय)कालोऽयं रोमकसिद्धान्तस्य प्रणयनस्य नास्ति, अपि तु वराहमिहिराचार्यस्य गणितारम्भस्य कालोऽयम्। निश्चप्रचं ५०५ ख्रिष्टाब्दात् पूर्वमेव रोमकसिद्धान्तस्य रचना सञ्जाता, येन वराहमिहिरः स्वकीये कार्ये नूतनां गणनां कृत्वा ग्रहगणितसाधनस्य परीक्षणं कृतवान्।

अत्र ग्रन्थे विशिष्टरूपेण रोमकयुगस्य समुल्लेखोऽस्ति। यथा २८५० वर्षाणां युगपरिकल्पना विद्यते। अत्रैकस्मिन् युगे १०५० अधिमासाः, तथा च १६५४५ तिथिक्षयाः प्रलयरूपेण निरूपिताः सन्ति। यथात्र तद्वाक्यम्—

१. १।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोमकयुगमर्केन्दोर्वर्षाण्याकाशपञ्चवसुपक्षः।
खेन्द्रियदिशोऽधिमासाः स्वरकृतविषयाष्टयः प्रलयाः[१]॥

अनेनेदमपि परिकल्प्यते यत्तस्मिन् काले प्रचलितमान्यतानुसारं महायुगस्य मानं ४३२०००० वर्षात्मकन्नासीदिति।

ग्रीकज्योतिर्विदः हिपार्कसमहोदयस्य कालः ई.पू. १५० वर्षं स्वीक्रियते। एतस्य वर्षमानं (३६५।१४।४८) यदस्ति तदेव रोमकसिद्धान्तेऽपि प्राप्यते। तदनन्तरं टालमीमहोदयस्य ग्रन्थे इत्थमेव वर्षमानं स्वीकृतमस्ति। आलोचका एवं वदन्ति यत् टालमीमहोदयात् पूर्वमेव ग्रीकज्योतिषशास्त्रस्य प्रभावो भारते प्रसृतोऽभवत्।

अत एव हिपार्कसटालमीज्योतिर्विदोर्मध्य एव रोमकसिद्धान्तस्य रचना सम्भाव्यते। तत्रापि हिपार्कसमहोदय एव रोमकसिद्धान्तस्य प्रेरकः। अथवा तद्ग्रन्थाधारेणैव केनापि भारतीयेन विदुषा सिद्धान्तोऽयं प्रतिपादित इत्यत्र भवति सन्देहः।

अतो हिपार्कसमहोदयस्य कालात् (१५० ई.) पश्चात् तथा च टालमीमहोदयस्य कालात् (१५०) पूर्वमेव ग्रन्थोऽयं विलिखितः। विचारोऽयं बर्जेस(Burgess)महोदयस्य सूर्यसिद्धान्तस्य आंग्लानुवादे ३०३ पृष्ठे प्राप्यते। एवमेव ग्रान्ट्स्महोदयस्य (Grants) ज्योतिषशास्त्रस्येतिहासस्य[२] भूमिकायां प्राप्यते।

भारतीयज्योतिषमिति ग्रन्थस्य रचयितुः श्रीबालकृष्णदीक्षितमहोदयस्य मतस्याधारेणैवं परिकल्पितम्। परञ्च रोमकसिद्धान्तात् पूर्वमेव अर्थाद् हिपार्कसमहोदयस्य कालात् (१५० ई.) पूर्वमेव पैतामहसिद्धान्तस्य वासिष्ठ-सिद्धान्तस्य च रचना निर्विवादरूपेण अभवदिति सर्वैः स्वीक्रियते, तर्हि कथन्नाम सिद्धान्तद्वयस्य विद्यमानत्वेऽपि ग्रीकज्योतिर्विदोऽनुकुर्वाणाः केऽपि भारतीयाः सिद्धान्तसम्पादने संलग्ना बभूवुः, इति विचारस्य विषयः।

वर्षमानस्य साम्याद् यत् समालोचकैः प्रतिपादितं, तन्नास्ति तर्कयुक्तम्। यतो हि वर्षमानगणितसाधने रोमकसिद्धान्तकारस्य सामर्थ्यं नासीदिति वक्तुं न शक्यते। तत्र युगमानस्य या नूतना व्यवस्था प्रकल्पिता सापि अभूतपूर्वा नूतनैव दृश्यते। अतोऽत्र ग्रन्थकारस्य अन्वेषणदृष्टिः, चमत्कारपूर्णा च धीः, सुप्रमाणिता

१. १।१।
२. Almajest-History of Physical Astronomy. Introduction, p. 439

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति। अतोऽत्र निःसंशयेन वक्तुं पार्यते स्वकीयज्ञानबलेन रोमकसिद्धान्तस्य रचना हिपार्कसमहोदयात् पूर्वमेव केनापि ज्योतिर्विदा कृता।

पञ्चसिद्धान्तेषु केषां सिद्धान्तानां रचना केन कालक्रमेण अभवदिति बालकृष्णदीक्षितमहोदयेन सम्यग् विचारितम्। तत्र पैतामह-वासिष्ठ-पौलिश-सौर-रोमकसिद्धान्ताः क्रमेण विरचिता मन्यन्ते। रोमकसिद्धान्तस्य व्याख्यानं लाटदेवेन भारतीयविदुषा कृतमिति तत्रैव समुल्लिखितम्। यथा—

पञ्चभ्यो द्वावाद्यौ पौलिशरोमकसिद्धान्तौ।
व्याख्यातौ लाटदेवेन[१]।

परञ्चेदमवधेयं यदत्र लाटदेवः केवलं व्याख्यां कृतवान्। न हि सः सिद्धान्तस्यास्य प्रणेता। इत्थमत्र निबन्धेऽस्माभी रोमकसिद्धान्तस्य विषये किञ्चिद् विचारितम्। प्रायश आधुनिका रोमकशब्दं दृष्ट्वा रोमकसिद्धान्तं वैदेशिकाः कृतवन्त इति मन्यन्ते; परन्तु रोमशसिद्धान्तोऽपि प्राप्तोऽस्ति। रोमशलोमशशब्दयोः साम्यमपि सहजतयावबोद्धुं शक्यते। इयमेव रोमकशब्दस्य व्युत्पत्तिरपि यत्—करोतीति कः, रोमस्य कः रोमकः। अथवा रोम एव रोमक इति भवति। सुप्रसिद्धस्य रोमकनगरस्य साम्यं नैवात्र कल्पनीयम्। यद्यपि ज्योतिषग्रन्थेषु सिद्धपुरस्य यवनपुरस्य रोमकपत्तनस्य अक्षांशादि सूर्योदयादि च विगणितम्।

परन्त्वत्र ज्योतिषशास्त्रस्य सार्वभौमिकता हिन्दूसंस्कृतेश्च सुप्रभाव एव कारणम्। अस्माभिः प्राचीनशास्त्राणामन्तःसमीक्षणं कृत्वैव आधुनिकसमीक्षकाणां वर्णिततत्त्वानामनुशीलनं करणीयमिति ममाभिप्रायः। मन्ये, विषयेऽस्मिन् अन्येऽपि गवेषका विचारं विधास्यन्तीति।

●

१. पञ्चसिद्धान्तिका—१।३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदान्तमीमांसाशास्त्रारम्भणं युक्तम्

[विमर्शः]

डॉ० कमलाकान्तत्रिपाठी
अध्यक्षः, मीमांसाविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

* * *

[सारस्वतां सुषमायां प्रकाशितान् लेखविशेषान् अधिकृत्य विचारसरणीं प्रवर्तयितुं 'विमर्शः' इति नाम्ना कश्चन स्तम्भविशेषः समारब्धः। ५६ वर्षे १-२ अङ्कयोः प्रकाशितमाचार्यश्रीपारसनाथद्विवेदिमहाभागानां 'वेदान्तमीमांसाशास्त्रारम्भणं युक्तम्' इति लेखमधिकृत्य डॉ. कमलाकान्तत्रिपाठिमहोदयैः कृतो विमर्शः प्रकाश्यते। एतदुपर्यपि विदुषां विचाराः प्रार्थ्यन्ते—सम्पादकः]

अस्ति तावद् महर्षिजैमिनिप्रणीता द्वादशलक्षणी महर्षिबादरायणप्रणीता च चतुर्लक्षणी वेदार्थज्ञानौपयिकविचारात्मकन्यायनिबन्धनात्मिका मीमांसापदवाच्या। तत्राद्या पूर्वमीमांसा अन्या चोत्तरमीमांसेति व्यवहारपदवीमधिरूढा। उभयोः केचिदेकशास्त्रत्वमन्ये भिन्नशास्त्रत्वञ्चाङ्गीकुर्वन्ति। यद्येकशास्त्रत्वं तर्हि ब्रह्ममीमांसाया नियमेनोभयोर्वेदाध्ययनानन्तर्यवत् कर्ममीमांसानन्तर्यमपेक्ष्यत एव। यदा भिन्नशास्त्रत्वं तदा ब्रह्ममीमांसायाः साधनचतुष्टयसम्पत्त्यैव सिद्धेर्न कर्ममीमांसानन्तर्यं नियमेनापेक्ष्यते। इष्यते च कर्मणामनुष्ठानस्य चित्तशुद्ध्यादावुपयोग उभयवादिभिरपि। कर्मानुष्ठानञ्च नर्तेऽर्थज्ञानात् सम्भवति। अर्थज्ञानस्य च कर्मानुष्ठानाङ्गत्वं केवललिङ्गादेव, तस्य तदनुष्ठानौपयिकत्वात्। उक्तमेतदापदेवेन— 'यदन्तरेण यन्न सम्भवत्येव तस्य तस्य तदङ्गत्वं तदनपेक्षं केवललिङ्गादेव यथा— 'अर्थज्ञानस्य कर्मानुष्ठानाङ्गत्वम्। न ह्यर्थज्ञानमन्तरेणानुष्ठानं सम्भवति' इति[1]। एवं नित्यनैमित्तिककर्मणां ब्रह्मवादिभिरप्यपेक्षितत्वात्तदनुष्ठानाय कर्ममीमांसाया अप्यवश्यानुष्ठेयत्वं बलादायातीत्येकशास्त्रत्वमेवोभयोः युक्तमिव प्रतिभाति। अभ्युपगतमेतद् विशिष्टाद्वैतवादिभिः। यदि पुनर्जन्मान्तरीयकर्ममीमांसानुशीलनपुरः-

---

१. मीमांसान्यायप्रकाशे सारविवेचनीयुते ३८ तमे पृष्ठे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरनित्यनैमित्तिककर्मानुष्ठानवशादेव ब्रह्मजिज्ञासा जायेत तदा कर्ममीमांसाया अवश्यानुष्ठेयता न स्यात्, येन च तदानन्तर्याभावाद् ब्रह्मजिज्ञासाया भिन्नशास्त्रत्वमपि सिद्ध्येत्। न त्वेवमस्ति। अव्यवस्थाप्रसङ्गात्। शूद्रादीनामपि जन्मान्तरीयकर्मवशादेव ब्रह्मजिज्ञासासत्त्वात्तत्र तेषामधिकारः कथमपि निवार्यो न स्यात्। अपशूद्राधिकरणन्यायविरोधश्च तदा शिरसि सीधुपरिपूरितघट इव निपतेत्। अपि च तदा ब्रह्मजिज्ञासाया वेदाध्ययनानन्तर्यमपि न स्यात्। कथम्? जन्मान्तरीयाध्ययनादेव तत्राधिकारितालाभात्। वेदाध्ययनानन्तर्यं ब्रह्मजिज्ञासाया[1] 'वेदाध्ययनानन्तर्यन्तु समान'मिति वदद्भिर्भगवत्पादैरङ्गीकृतमेव।

एवञ्च प्रयोजनवदर्थज्ञानौपयिकत्वाद् वेदाध्ययनमन्तरेण धर्माधर्मविचारो यथाऽसङ्गतस्तथैव ब्रह्मविचारोऽपीति भगवत्पादानामाशयः। अध्ययनं विना वेदार्थविचारस्यासम्भवादेव न तद्विना साधनचतुष्टयसम्पत्सचिवस्यापि कृते ब्रह्मजिज्ञासोपकल्पते। तथा हि भाष्यकारेणोक्तम्[2] —

'तादृशीन्तु धर्मजिज्ञासामधिकृत्याथशब्दं प्रयुक्तवानाचार्यः, या वेदाध्ययनमन्तरेण न सम्भवति। कथं वेदवाक्यानामनेकविधो विचार इह वर्तिष्यते'। इति।

अनेकविधविचारायाध्ययनस्यावश्यकर्तव्यतानेन भाष्येण ध्वन्यते। अध्ययनञ्चोपनीतस्य सनियमस्यैव वटोरिति न्यायसिद्धम्। अत्र तादृशीं धर्मजिज्ञासामधिकृत्येति भाष्येण जिज्ञासाया वैविध्यमप्यायाति। तथा ह्युक्तं पार्थसारथिमिश्रैः[3] —

'जिज्ञासैकोपनीतस्य द्वितीया पठितश्रुतेः।
ज्ञातविद्यान्तरस्यान्या या मीमांसापुरःसरा'।। इति।

अयमभिप्रायः—पूर्वन्तावद् वृद्धवाक्यश्रवणसमनन्तरं धर्माधर्मविषयकज्ञानसम्पादनेच्छया स्वाध्यायविध्यनुरोधेन सनियमं वेदमधीते। अधीतवेदस्तु व्याकरणादिना गृहीतपदपदार्थसङ्गतिको न्यायज्ञानपरिशून्यतया संशयान्तरितचेता मीमांसाधीतितत्परो भवति। चरमजिज्ञासाभिप्रायेणैवात्र पूर्वोक्तं भाष्यं नेयं भवति। एवन्तावत् कर्तव्यैवेति धर्मजिज्ञासायाः कथमिव त्यागो भवेत्। मीमांसान्यायानाकलनेन साधनचतुष्टये जातेऽपि कथं वा याथातथ्यतो वेदान्तं विचारयेत्। तस्मादुभयोरेकशास्त्रत्वमेवाङ्गीकर्तव्यम्।

---

१. वैयासकिसूत्रे, १।१।१।
२. शाबरभाष्ये कल्पकलिकायुते, १६ तमे पृष्ठे।
३. न्यायरत्नमालायाः प्रयुक्तितिलके, ११ पृष्ठे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः।
पुराणं धर्मशास्त्रञ्च विद्याश्चैताश्चतुर्दश'॥

इति चतुर्दशविद्यामध्य एकैव मीमांसा निर्दिष्टा, सा चैकशास्त्रत्वं विनानुपपन्ना। एकशास्त्रत्वमपि न रामानुजीयानामिव मीमांसकानामभिमतमस्ति। ते हि पूर्वभागनिश्चितस्य कर्मणोऽल्पास्थिरफलकत्वं चरमभागनिश्चितस्य ब्रह्मज्ञानस्यानन्ताक्षयफलकत्वमङ्गीकुर्वन्ति। तेन चात्मज्ञानस्यैव प्राधान्यं कर्मानुष्ठानस्य तदङ्गत्वं सिद्ध्यति। एवं तर्हि कर्मब्रह्ममीमांसयोः पौर्वापर्यस्वीकरणं केवलमदृष्टार्थं स्यात्। तत्तु दृष्टे सम्भवति न युज्यते। साधनचतुष्टयसम्पद एवाध्ययनसचिवाया ब्रह्मजिज्ञासाप्रयोजकत्वाङ्गीकारे न काचित् क्षतिः।

अपि च यो वेदभागोऽर्थज्ञानायापेक्षितस्तस्यैवाध्ययनमायाति, अन्यभागीयाध्ययनस्योपयोगाभावात्। गुरोः समीपे स्वशाखाध्ययनव्यापृतस्य बटोर्जन्मान्तरसंस्कारवशाद् यदि मुमुक्षा परिस्फुरति, तदा ब्रह्मविचाराय कर्मप्रतिपादकवेदभाग एवाध्येतव्यो ब्रह्मविचारोपयोगितत्प्रतिपादकभागो वा सकलो वेदो वा। नाद्यः, आनर्थक्यात्। अधीतस्योपयोगाभावादानर्थक्यम्। तृतीये पक्षेऽप्ययमेव दोषः। द्वितीयोऽपि न सम्भवति। सकलशास्त्रव्याकोपात्। उपनयनसंस्कृतस्य वटोः सकलशाखाध्ययनस्य प्रतिज्ञातत्वात्। 'अधीत्य स्नायादि'ति शास्त्रेण सकलवेदाध्ययनानन्तरमेव मधुमांसादिवर्जनादिसकलब्रह्मचारिधर्मत्यागपुरःसरमेव वेदार्थस्य विचार्यमाणत्वात्। किं वेदान्तविचारोऽपि तथैव भवति, न, तथाऽनिष्टत्वात्। विचारानन्तरं गुरुगेहत्यागो दारपरिग्रहश्च धर्मानुष्ठानाय विहितः। दारपरिग्रहश्च नित्यनैमित्तिकानुष्ठानाय मुमुक्षुभिरप्यपेक्षणीय एव। अन्यथा तदकरणजन्यप्रत्यवायस्यापरिहरणीयतया नरकनिवसतिर्दूषितकुल्यातटवसतिरिव प्रसज्येत। न च नित्यनैमित्तिकाकरणजन्यप्रत्यवायस्य मुमुक्षुव्यतिरिक्तविषयतेति वाच्यं, तत्र प्रामाणाभावात्। प्रत्युत मुमुक्षुभिरप्यवश्यकर्तव्यतैव तयोः प्रतिपाद्यते शास्त्रेण। तथा च मन्त्रवर्ण आह[1] —

'कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः'। इति।

सकलशास्त्रतत्त्वदर्शी खलु भगवान् वासुदेवोऽप्याह[2] —

'यज्ञो दानं तपश्चैव न त्याज्यं कार्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्'॥ इति।

एवं न कथमपि वेदाध्ययनानन्तरं धर्मजिज्ञासा त्यक्तुं शक्यते मुमुक्षुभिः।

---

१. ईशावास्योपनिषदि, २. श्रीमद्भगवद्गीतायाम्, १८ तमेऽध्याये।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वविधफलभोगविरागशमदमादिमुमुक्षाविधुरैरपि वा वेदार्थभूतस्य ब्रह्मणो जिज्ञासा। अन्यथा सकलवेदाध्ययनस्यानर्थक्यं प्रसज्येत। एवं तर्हि धर्मब्रह्मोभयप्रतिपादक-सकलवेदाध्ययनानन्तर्यविवक्षायां कथं जैमिन्यृषिणा धर्मस्यैव जिज्ञासा प्रतिज्ञाता न ब्रह्मण इति शङ्काकलङ्ककुत्सितभारः शिरसि पतेत्। मैवं वोचः, जैमिन्यृषिणा सकलस्यैव वेदार्थस्य जिज्ञासायाः प्रतिज्ञातत्वात्। 'अथातो धर्मजिज्ञासा' इत्यनेन धर्मस्यैव जिज्ञास्यता दृश्यते न ब्रह्मण इति दृष्टमपलपति भवान् ननु। न दृष्टमपलपामि। धर्मस्यैव जिज्ञास्यता न ब्रह्मण इति स्वीकरोम्येव। सकलस्य वेदस्य धर्माधर्मातिरिक्ते तात्पर्यविरहात्। अर्थाद् धर्माधर्मप्रतिपादक एव वेदः। तयोरेवानुष्ठानानुष्ठानयोरपेक्षिततत्वात्। सिद्धस्य ब्रह्मणोऽननुष्ठेयत्वेनापेक्षाविरहात्। एवं तर्हि वेदान्तानामुपयोगाभावेनानुपयोगित्वलक्षणमप्रामाण्यं प्रसज्येत। नेति ब्रूमः। वेदान्तानां यथा प्रामाण्यं तथोपरिष्टाद् व्याख्यास्यामः। यत्तु वेदान्तविद्यानिष्णातैः कर्ममीमांसातो वेदान्तमीमांसाशास्त्रस्य पृथक्शास्त्रत्वं प्रतिपादयद्भिः श्रीमत् पारसनाथद्विवेदिमहाभागैरुच्यते[1] —

"वेदान्तमीमांसाशास्त्रं कर्ममीमांसातः पृथक् शास्त्रम्, अधिकारिविषय-प्रयोजनादिभेदाद् न्यायादिशास्त्रवत्। कर्मब्रह्ममीमांसयोर्नैकशास्त्रत्वम्, अधिकारिविषयप्रयोजनादिभेदाद् वा। कर्ममीमांसायाः स्वर्गकामोऽधिकारी, इह तु मुमुक्षुरिति"। तन्नातीवशोभते। कर्ममीमांसाया यद्यधिकारी स्वर्गकामस्तर्हि प्रतिष्ठाकामब्रह्मवर्चसकामपशुकामेन्द्रियकामग्रामकामस्वाराज्यकामादीनां तत्राधिकारिता न स्यात्, स्याच्च स्वर्गकामनाविशेषात् शूद्रादीनां यवनादीनामपि वा तत्राधिकारिता। यदि परं स्वर्गकामपदस्योपलक्षणत्वमङ्गीक्रियेत तदा शूद्रादीनां बौद्धजैनयवनादीनां वा तत्राधिकारो न निवारणीयो भवेत्। एवमेव यदि केवलं ब्रह्ममीमांसायां मुमुक्षुरेवाधिकारी स्यात्, तर्हि तथैव मुमुक्षासत्त्वे शूद्रादियवनम्लेच्छादीनामपि तत्राधिकारः स्यात्। न चैवमिष्यते। उभयत्रार्थज्ञानकामस्यैवाधिकारितायाः शास्त्रे निरूपणात्। वेदाध्ययनानन्तर्यबलाच्च त्रैवर्णिकानामेवार्थज्ञानकामानामिति निश्चीयते। अतो नोक्तदोषावतारोऽस्मिन् पक्षे। उपनीतानामध्ययनाधिकारात्, उपनयनस्य च त्रैवर्णिकमात्रविषयत्वात्। त्रैवर्णिकविषयत्वञ्च 'वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं, शरदि वैश्यमि'ति शास्त्रान्निश्चीयते। अत्र द्वितीयानिर्देशादुपनयनसंस्कृतत्रैवर्णिकानामग्रे कर्तव्यताविषयिण्याकाङ्क्षा जायते। उपनयनविधिसन्निधौ च 'स्वाध्यायोऽध्येतव्य' इत्यध्ययनविधिना विधीय-मानस्याध्ययनस्य कर्तृविषयिण्याकाङ्क्षा जायते। एवमपेक्षासन्निधि-योग्यताभिर्निश्चीयते त्रैवर्णिकैरेवाक्षरग्रहणप्रणाडिकयाऽर्थज्ञानं सम्पादनीयमिति।

---

१. सारस्वतीसुषमायां 'वेदान्तमीमांसाशास्त्रारम्भणं युक्तमिति' निबन्धे ५६ वर्षे १-२ अङ्कयोः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवञ्चोपनयनस्याध्ययनाङ्गत्वम्, प्रयोजनवदध्ययनकर्तृभूतमाणवकसंस्कारत्वात्। अध्ययनञ्चार्थज्ञानाङ्गम्, दृष्टार्थत्वात्। अर्थज्ञानस्य च केवललिङ्गादनुष्ठानाङ्गत्वमिति पूर्वमेवोक्तम्। एतत् सर्वमुक्तं शास्त्रदीपिकायां पार्थसारथिमिश्रैः[१]। न्यायरत्नमालायामपि तैस्तथैवोक्तम् —'येन हि फलेनार्थज्ञानाख्येनेतिकर्तव्यताभूतो विचारः प्रयुज्यते' इति, 'अर्थज्ञानाख्यं हि कार्यान्तरं साधयतोऽध्ययनस्य विचारोऽङ्गमिति' च।

एवं प्रयोजनवदर्थज्ञानकामस्यैवोभयत्राधिकारिताया निर्णीतत्वाद् यद् द्विवेदिमहाभागैः कर्ममीमांसायां स्वर्गकामस्य ब्रह्ममीमांसायाञ्च मुमुक्षोरधिकारित्वं प्रतिपादितं तन्न्यायानाकलननिबन्धनम्।

अपि च स्वर्गकामो यागादिष्वधिकारी। 'ज्योतिष्टोमेन स्वर्गकामो यजेत, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्येवमादि-विधिभिस्तथाऽवगतत्वात्। तत्रापि न तथैव, शूद्रादेरप्यधिकारप्रसङ्गात्।

अहो खलु दोषदर्शी भवान्। मीमांसायां स्वर्गादिकामस्याधिकारो मा भूत्। न्यायविरोधादित्यङ्गीकुर्मः। यागादिषु स्वर्गकामादेरधिकारमपलपति भवान् यो हि साक्षाद् विधिभिरेवावगम्यते। नूनं मात्सर्यग्रहग्रस्तो भवान्। मैवं वादिषुः। न्यायमालोच्यैव मयैवमुच्यते। 'स्वाध्यायोऽध्येतव्यः' इत्यध्ययनविधिबलादेव तथा निश्चयो यथाऽहं ब्रवीमि। यद्यध्ययनविधिर्न स्यात् तर्हि ज्योतिष्टोमादिशास्त्राणि बाहुल्येन वर्तमानतयाऽविद्वांसमेव यागादिष्वधिकुर्युः। विद्यामन्तरेणानुष्ठानासम्भवस्य न्यायलभ्यत्वेन तान्येव शास्त्राणि विद्यामाक्षिपन्ति सन्ति विशेषाभावादेव चतुरो वर्णानधिकुर्युः। एवं सति शूद्रादेरनिवारणीयोऽधिकारो भवेत्। सति त्वध्ययनविधौ पूर्वोक्तप्रकारेण त्रैवर्णिकानामेवाध्ययनविधिसिद्धविद्यावतामधिकारो न शूद्रादेरिति निश्चीयते। तथा ह्युक्तं पार्थसारथिमिश्रैः[३] —

'एवञ्च त्रैवर्णिकेषु विद्वत्सु लब्धेषु नाग्निहोत्रादिविधयश्चतुर्थवर्णस्य विद्यामाक्षिपन्ति, किन्तु त्रैवर्णिकानेव विदुषोऽधिकुर्वन्ति' इति।

एवमेवाग्निसाध्यकर्मस्वाधानविधिसिद्धाग्निमत्ताऽप्यपेक्ष्यते तथा सामर्थ्यमपि काम्यकर्मसु। प्रयोगविधिनाऽङ्गवाक्यैकवाक्यतापन्नप्रधानविध्यात्मकेन साङ्गप्रधान-कर्मकर्तुरिवाधिकारबोधनात्। असमर्थस्य च तत्राधिकाराभावात्। अतो न केवलस्वर्गकामादेरेवाधिकारः कर्मसु।

१. शास्त्रदीपिकायां जिज्ञासाधिकरणे।

२. न्यायरत्नमालायां प्रयुक्तितिलके, १४ तथा १६ पृष्ठे।

३. शास्त्रदीपिकायां जिज्ञासाधिकरणे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतेन मधुसूदनसरस्वतीपादैः[१]—'तस्मान्न स्वाध्यायविधिप्रयुक्तो विचारः, किन्तूत्तरक्रतुविधिप्रयुक्त इति यथा तथा श्रवणादिविधिप्रयुक्त एव ब्रह्मविचारोऽपि भविष्यतीति को विरोधः' इति यदुक्तं तत् सर्वं पूर्वोक्तेनैव न्यायेनाऽनर्थापत्तेर्निराकृतं वेदितव्यम्। श्रवणादिविधिप्रयुक्त एव ब्रह्मविचारो भविष्यतीति वचनं स्वसिद्धान्तविरोधादेवापास्तम्। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो निदिध्यासिव्यश्चेति वाक्यं न विधित्वेनाङ्गीकृतं वेदान्तिभिरेव। विधिसरूपाण्येतानि वाक्यानि न विधय इति वेदान्ताकरग्रन्थेषूक्तत्वात्। अपि च विधित्वेऽपि 'द्रष्टव्यः श्रोतव्यः' इति वचनाभ्यां न दर्शनपदवाच्यज्ञानस्य श्रवणस्य वा विधिः सम्भवति। तयोरध्ययनविधिनैव प्राप्तत्वाद् विधित्वायोगात्। अतो निदिध्यासनपदवाच्यस्य ध्यानस्यैव विधिरिति श्रीभाष्ये भगवद्रामानुजैरुक्तत्वात्। एवं सति श्रवणादिविधि-प्रयुक्तो ब्रह्मविचार इति कथनं धूलिप्रक्षेपन्यायमावहति।

यत्तु तैरेवाग्रे[२]—'इष्टसाधनताविधिपक्षेऽपि कस्येष्टस्य साधनमध्ययनमित्य-पेक्षायामक्षरग्रहणस्यैवाकाङ्क्षापूरकत्वे नान्यफलकल्पनावकाशः' इति यदुक्तं तत्रा-द्वैतमतरसिकतैव हेतुर्न तु न्यायपर्य्यालोचनम्। अन्यथा कथमिव तेऽध्ययनापरपर्य्यायस्याक्षरग्रहणस्याध्ययनेष्टत्वं वदेयुः। एवमध्ययनमर्थज्ञान-रूपस्यैवेष्टस्य साधनमित्यकामेनाप्यङ्गीकर्तव्यम्। तस्यैव दृष्टरूपत्वात्। दृष्टे सम्भवत्यदृष्टकल्पनस्यान्याय्यत्वात्। अपि च ते नियोगविधिपक्षेऽध्ययननियोगस्य नियोज्याभावात् स्वविषयाननुष्ठापकत्वं प्रतिपादयन्तः प्राभाकरपक्षमङ्गीकुर्वन्ति। तथा कुर्वन्तस्तेऽध्यापनविधावपि नियोज्याभावात् स्वविषयस्यैवाननुष्ठापकत्वेन तत्प्रयुक्ताध्ययनानुष्ठापकत्वस्य दूरतो निरस्तत्वेनाऽध्ययनविधावर्थज्ञानकामरूपस्य नियोज्यस्यावश्यकल्पनीयत्वाद् अध्ययनविधिप्रयुक्तस्याध्ययनस्य सिद्धेर्न स्वेष्टं साधयितुं क्षमा भवेयुः। एवमेव भावनावादेऽपि तेऽध्ययनकरणिकाया भावनायाः स्वाध्यायस्य भाव्यत्वं मीमांसासम्मतमेव ख्यापयन्तोऽनिच्छन्तोऽपि प्रयोजन-वदर्थज्ञानसाधनत्वमध्ययनस्य स्वीकुर्वन्त्येव। अन्यथा भामतीग्रन्थेनैव तेषां दृढतरो विरोधः स्यात्। इत्थं सिद्धं तावदर्थज्ञानकाम एव यथा कर्ममीमांसायामधिकारी तथैव ब्रह्ममीमांसायामपीति अधिकारिभेदाभावान्न कर्ममीमांसातो भिन्नं ब्रह्ममीमांसाशास्त्रमिति। एतेन द्विवेदिमहाभागानां 'न चैकपुरुषे उभयोः शास्त्रयोरधिकारिता सम्भवती'त्यादिप्रतिपादनप्रकारः परक्लेशापादक एव। एकशास्त्रत्वाभ्युपगमात्। एकस्मिन् शास्त्रे सम्भवत्येवैकस्य पुरुषस्याधिकारिता। यदि पुरुषस्य परा विरक्तिः स्यात्, तर्हि मा कार्षीत् स काम्यं कर्म। नित्यनैमित्तिकयोः समाचरणे को विरोधः। तयोरल्पास्थिरफलत्वाभावात्।

१. अद्वैतरत्नरक्षणे शास्त्रारम्भोपपत्तौ। २. तत्रैव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्तु तैरेव[१]—'न चैक एवाधिकारी फलस्वाम्यभाक् 'स्वाध्यायोऽध्येतव्यः' इत्यादिना वेदाध्ययने नियुक्तः कृताक्षरग्रहणापाततोऽर्थग्रहणरूपाध्ययनः स एव धर्माख्यविधिनिषेधात्मककर्मावबोधे 'अथातो धर्मजिज्ञासे'त्यादिशास्त्रेण नियुक्तः स एव सम्यक्कर्मावबोधपूर्वकं कृतानुष्ठानः कर्मफलेष्वसारतामनुसन्दधानः, अत एव विरक्तो मोक्षकामो ब्रह्मजिज्ञासायां नियुक्त इति वाच्यमि'ति यदुक्तं तदपि न्यायासमीक्षणनिमित्तम्। अत्र 'कृताक्षरग्रहणापाततोऽर्थग्रहणरूपाध्ययनम्' इति पदं पूर्वं समीक्षणीयम्। तत् पदद्वयमस्ति एकं वा पदम्। यद्येकं पदं तर्हि को विग्रहः? कृतमक्षरग्रहणं येन स कृताक्षरग्रहणः, आपाततोऽर्थग्रहणरूपमध्ययनं यस्य स आपाततोऽर्थग्रहणरूपाध्ययनः, कृताक्षरग्रहणश्चासावापाततोऽर्थग्रहणरूपाध्ययनः स कृताक्षरग्रहणापाततोऽर्थग्रहणरूपाध्ययन इति प्रतिभाति। तत्र 'आपातत' इति पदं कामिनीद्वयेनालिङ्ग्यमानं भल्लूकशरीरमिव नूनं चेतोविक्षोभं जनयति। यदि पदद्वयं तर्हि कृतञ्च तदक्षरग्रहणं तेनापातत इत्येकं पदं तथा अर्थग्रहणरूपाध्ययन इत्यपरं पदमिति प्रतिभाति। अत्राप्यक्षरग्रहणपदेन आपातत इति पदस्य समासः काञ्चनपुटके धृतं कुचीवरमिव नातीव शोभामावहति।

अपि च अक्षरग्रहणरूपाध्ययनेन आपाततो योऽर्थः प्रतिभाति तद्ग्रहणे सत्येव धर्माख्यविधिनिषेधात्मककर्मावबोधे शास्त्रेण पुरुषो नियुज्यत इति द्विवेदिपादानामभिप्रायो विवक्षितोऽस्ति। स चाभिप्रायो न तदीयेन वाक्येन सम्यक् परिस्फुरति, तत्स्फुरणेऽपि परस्परविरोधो धर्मनिरपेक्षत्वतत्सापेक्षत्ववादिनोरिव हृदयतलमाविशति। तथा हि—अर्थग्रहणमित्यनेनार्थज्ञानमेव वक्तुं शक्यते नान्यत् किञ्चन। अर्थज्ञानञ्चाक्षरग्रहणरूपस्याध्ययनस्य फलं भवति, न तु तदध्ययनमेव। अतोऽर्थग्रहणरूपाध्ययन इति कथनं विरुद्धमेव। पुनश्चापाततो यस्यार्थज्ञानं जातं स एव कर्मावबोधरूपार्थज्ञाने शास्त्रेण नियुज्यत इति कथनमपि तथैव विरुद्धम्। येनाक्षरग्रहणं कृतं स एव नियुज्यतेऽर्थज्ञाने नान्यः। 'धर्माख्यविधि-निषेधात्मककर्मावबोधे' इत्यनेन विधिनिषेधात्मकं यत् कर्म तदेव धर्माख्यं भवति, तस्यावबोधे इत्यर्थविवक्षाऽस्ति। सा च नोपपद्यते। कथम्? विधिनिषेधौ धर्माधर्मयोः प्रमाणमित्येव चोदनालक्षणे प्रतिपाद्यते। अतो विधिनिषेधगम्यौ धर्माधर्मौ न तु तावेवेति सुव्यक्ताऽनुपपत्तिः।

यद्यपि तैरुक्ताशङ्कानिवारणायाग्रे[२]—'बहुशो विरोधात्। तथा हि—वेदाध्ययनं ततः कर्मावबोधस्ततः कर्मानुष्ठानं ततो ब्रह्मजिज्ञासेति क्रमोऽभिहितः। तस्मिन् यदि कार्यकारणभावस्तर्हि तन्नोपपद्यते—कर्मावबोधे सत्यपि ब्रह्मजिज्ञासा न दृश्यते,

१. सारस्वतीसुषमायां प्रकाशिते वेदान्तमीमांसाशास्त्रारम्भणं युक्तमिति निबन्धे, १४ पृष्ठे।

२. तत्रैव निबन्धे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

असत्यपि कर्मावबोधे ब्रह्मजिज्ञासा दृश्यते। अतः कार्यकारणभावः कर्मब्रह्ममीमांसयोर्नास्ति। यत्रापि कर्मावबोधानन्तरं ब्रह्मजिज्ञासा जायते, तत्र न तदेव हेतुरपि तु कर्मफलस्वर्गादेरनित्यत्वावगम एव। कर्मावबोधे सम्पन्ने ब्रह्मजिज्ञासा कर्तव्या इति, यदि अथातो ब्रह्मजिज्ञासेत्यस्यार्थस्तदा न व्यर्थतैवास्य वाक्यस्य स्यात्, कर्मावबोधस्य जिज्ञासाया अप्रयोजकत्वा'दित्युक्तं तदपि गन्धर्वनगरे स्वकीयभवननिर्माणमिव प्रतीयते। तथा हि—उक्तस्य क्रमस्यानङ्गीकारादेव। वेदाध्ययनानन्तरमेव ब्रह्मजिज्ञासाया जायमानत्वात्। सकलस्य वेदस्याध्ययनस्य भगवत्पादसम्मतत्वात्। यो हि स्वशाखान्तर्गतामुपनिषदमधीतवान् कथमिव तस्योपनिषदर्थभूतस्य ब्रह्मणो जिज्ञासा न जायेत। तज्जिज्ञासाकारण-भूतोपनिषदध्ययनस्य पुरःस्फूर्तिकत्वात्। अपि च येन पुरुषेणोपनिषद् नाधीता तस्य मुमुक्षासत्त्वेऽपि ब्रह्मविषयकपरिचयाभावादेव न जायेत ब्रह्मजिज्ञासा। 'कर्मावबोधे सत्यपि ब्रह्मजिज्ञासा न दृश्यते' इति कथनमपि तेषां शिष्याणामेव मनांस्यावर्जयितुं क्षमम्। सति कर्मावबोधे तदनुष्ठानाय नित्यात्मभूतस्य ब्रह्मणो विचारस्या-पेक्षितत्वात्। अन्यथाऽऽत्मनिश्चयाभावात् को हि सचेताः कर्मणि प्रवर्तेत। अतः कर्मावबोधस्य ब्रह्मजिज्ञासायाः प्रयोजकत्वमपि नानुपपन्नम्।

यत्तु तैरेवाग्रे—'किञ्च कर्मावबोधानन्तरं कर्मानुष्ठानं स्यात्। न च शक्यं कर्मानुष्ठातुं तत् त्यक्तुञ्च सहैव। कर्माण्यनुष्ठाय स्वर्गार्थी स्वर्गफलं प्राप्नुयात्, न च ब्रह्म जिज्ञासेत। अथासक्तभावेन कर्मानुष्ठानं तच्च चित्तशुद्ध्यर्थमनुष्ठानमिव स्वर्गफलासाधकत्वादि'ति यदुक्तं तदन्तरात्मनि महान्तमाह्लादं जनयति। 'कर्मावबोधानन्तरं कर्मानुष्ठानं स्यादिति वचस्तु ब्रह्मावबोधानन्तरं ब्रह्मप्राप्तिवदेव। न हि कर्मावबोधानन्तरं तदनुष्ठानमत्यन्तमपेक्ष्यत एव। स्वर्गादिफलकामनाया अभावादेव। नित्यनैमित्तिककर्मानुष्ठानन्तु तदकरणजन्यप्रत्यवायपरिजिहीर्षया यद्यप्यत्यन्तमपेक्ष्यते, तथापि चित्तशुद्ध्यर्थत्वेन तदनुष्ठानमनुष्ठानमेव न भवतीति भवन्तो निगदन्ति। अतः कर्मावबोधानन्तरं कर्मानुष्ठानं स्यादिति वचो धूमवर्तिकया निःसरन् धूम इव खे विलीयते। अनन्तरमेव चोपरितनं वचोऽपि तथैव। अपि च कर्मानुष्ठानायापेक्षितात्मभूतब्रह्मविचारस्य तेन सह विरोधाभावादेव सहानुष्ठानेऽपि न कश्चिद् विरोधः। कर्मानुष्ठानोपयोगिन एव ब्रह्मज्ञानस्योपनिषद्भिरस्माकमिष्टत्वात्। अतथाभूतस्य च शुद्धबुद्धमुक्तस्वभावसच्चिदानन्दानन्तात्मविषयकस्य ज्ञानस्यात्मनः स्तुत्यर्थत्वेनाङ्गीकारात्। तथाविधस्य ज्ञानस्यैव वाऽऽत्मसंस्कारकत्वेन स्वीकाराच्चेत्यास्तां तावत्। तस्मात् सिद्धमधिकारिभेदाभावादुभयोरेकशास्त्रत्वमिति।

एवं सकलस्यैव वेदस्य धर्माधर्मयोरेव तात्पर्यावसायाद् धर्माधर्मयोरेव प्रतिपाद्यत्वात् प्रतिपाद्यविषयभेदाभावादेव भवत्येकशास्त्रत्वम्। अत्र प्रसङ्गे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्विवेदिमहाभागैः कर्ममीमांसाविषयत्वेन विधिनिषेधयोरेव धर्माधर्मप्रमाणयोर्धर्मत्वमुक्तं तत् प्रागेव निरस्तम्।

एवमेव प्रयोजनाभेदोऽपि तयोरस्ति। अत उभयोरेकशास्त्रत्वम्। एतेन 'कर्ममीमांसायाः प्रयोजनं कर्मज्ञानं तच्चानुष्ठानापेक्षं स्वर्गादिसाधकम्' इति द्विवेदिमहाभागानामुक्तिश्चातकमुखे स्वातीव्यतिरिक्तनक्षत्रीयजलबिन्दुवन्निरवकाशैव। कर्मज्ञानस्यानुष्ठानापेक्षत्वेऽपि काम्यवर्जनपुरःसरनित्यनैमित्तिकानुष्ठानद्वारा दुःखात्यन्तसमानाधिकरणमनःकरणकसुखभोगात्मकमोक्षसाधकत्वात्। न हि मीमांसकमते दुःखात्यन्तनिवृत्तिमात्रं प्रमातृत्वविगलनापरपर्यायजीवत्वात्यन्तसमुच्छेदरूपनिर्विशेषत्वापत्तिरूपो वा मोक्ष इति साम्प्रतम्। तन्मात्रस्य पुरुषाभिलाषविषयत्वाभावादपुरुषार्थत्वप्रसक्तेः। अस्मदुक्तस्य च सर्वजनाभिलषणीयतया पुरुषार्थत्वोपपत्तेः। न च मीमांसकसम्मतो नासौ मोक्ष इति वाच्यम्। श्रीमद्वार्तिकग्रन्थपर्यालोचनया तथाविधस्यैव मोक्षस्य वार्तिककारसम्मतत्वेन दृढनिश्चयात्। उक्तमपि[1] —

'दुःखात्यन्तसमुच्छेदे सति प्रागात्मवर्तिनः।
सुखस्य मनसा भुक्तिं मुक्तिमाहुः कुमारिलाः'॥ इति।

एतेन मीमांसाशास्त्रे स्वर्ग एव क्षयिष्णुः पुरुषार्थो न मोक्ष इति मुक्तलज्जं प्रतिपादयन्तो दूरतो निरस्ताः। मीमांसाशास्त्रे मोक्षस्यापुरुषार्थत्वे यावज्जीवाधिकरणविरोधः स्यात्[2]। यावज्जीवाधिकरणे हि 'यावज्जीवमग्निहोत्रं जुहोति, यावज्जीवं दर्शपूर्णमासाभ्यां यजेते'त्येवमादि 'अग्निहोत्रं जुहुयात् स्वर्गकामः, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादि-काम्यप्रयोगानन्तरमाम्नातं वाक्यमुदाहृत्य विचार्यते—किमयं यावज्जीविको विधीयमानो धर्मो कर्मार्थोऽभ्यास उत नियमः पुरुषार्थः? इति। तत्र कर्माङ्गविधौ कर्मणः कथम्भावाकाङ्क्षापरिगृहीतत्वात् प्रकरणानुग्रहस्य सत्त्वात्, पुरुषार्थविधौ तु प्रकरणबाधापत्तेरभ्यासविधिरेव। एवञ्च यावज्जीवमग्निहोत्रादेरभ्यासः कार्यः। ततश्च व्याप्यप्रयोगव्यासक्तव्यापकप्रयोगादेव स्वर्गाद्येव फलमिति प्राप्ते—न यावज्जीविकाभ्यासविधिः सम्भवति। लक्षणाप्रसक्तेः। जीवनवाचिना यावज्जीवपदेन हि तत्सम्बद्धकाललक्षणा यजिना च यागाभ्यासलक्षणा स्यात्। प्रकरणवशेन श्रुतेर्लक्षणार्थताया अन्याय्यत्वात्, जीवने निमित्ते प्रयोगान्तरमेव विधीयते फलान्तराय। यावद्विनिपातञ्च जीवनस्य नियतत्वाद् नियतनिमित्तकत्वेन पुरुषार्थो

१. मानमेयोदये।
२. जैमिनीये, २।४, अधि. १।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नियमो विधीयत इति सिद्धान्तितम्। अत्रानियतनिमित्तकत्वेन नैमित्तिकत्वाङ्गीकारेण नित्यनैमित्तिकयोर्व्यवस्थोपपद्यते। एवं सति काम्याद् नित्यनैमित्तिकयोर्भेदे सिद्धे न स्वर्गाद्येव फलं कल्पयितुं युज्यते। मुमुक्षुभिरप्रार्थितत्वात्। अवश्यकर्तव्यता तु विधिवशात् तेषामपीति फलमवश्यं कल्पनीयम्, अन्यथा भावनाया अपुरुषार्थभाव्यकत्वेन विधेरप्रवर्तकत्वापत्तेः। अतोऽत्र विश्वजिन्न्यायावताराभावाद् 'धर्मेण पापमपनुदति' इत्यादिवाक्यशेषबलेन रात्रिसत्रन्यायेन तत्करणे पापक्षय एव फलं कल्प्यत इति केचनाऽऽचार्या आहुः। एतन्मतमेव युक्तमिव प्रतिभाति। अत्र प्राभाकरा विधेयाकरणस्य प्रत्यवायापादकत्वेऽपि तत्करणस्याफलत्वमङ्गीकुर्वते। न्यायसुधाकारास्तु भावनाया भाव्याकाङ्क्षायां तदकरणनिमित्तकप्रत्यवाय-प्रागभावपरिपालनमेव भाव्यत्वेन सम्बद्ध्येत इत्याहुः। पूर्वोक्तमते वाक्यशेषानुग्राहकत्वमेव विशेषः।

पापक्षयस्य मोक्ष एवोपयोगो न चित्तशुद्धौ, प्रमाणाभावात्। प्रस्तुतज्ञानस्यैव चित्तशुद्धावुपयोगः, औचित्यात्। शुद्धचेतसाऽनुष्ठीयमानस्यैव कर्मणः फलजनकत्वस्य 'यदेव विद्यया करोती'त्यादिशास्त्रेण बोधितत्वात्। भवतु वा चित्तशुद्धावेवोपयोगः कर्मणाम्। न चैतावता मोक्षजनकत्वविरोधः। चित्तशुद्धिद्वारा ब्रह्मज्ञानसंस्कृतपुरुषेणाऽनुष्ठीयमानस्य तस्य मोक्षजनकत्वोपपत्तेः। मोक्षोत्पत्तौ काम्यनिषिद्धवर्जनमप्यपेक्ष्यत इत्यन्यदेतत्। उक्तमेव—

'वेदोदितानि कर्माणि कुर्यादीश्वरतुष्टये।
यथाश्रमं त्यक्तकामः प्राप्नोति परमं पदम्।।
काम्यं विषयभोगार्थमिहामुत्र प्रयुज्यते।
मोक्षाय सुकृतं विद्धि ब्रह्मार्पणधिया कृतम् ।।' इति।

भगवानपि वासुदेव आह[१] —

'कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्'।। इति।

एतेन 'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः', 'तद् यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते', 'नास्त्यकृतः कृतेन' इत्यादिश्रुतिभिस्तथा—

---

१. श्रीमद्भगवद्गीतायाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'ज्ञानग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन।
कर्मणां परिणामित्वादाविरिञ्चादमङ्गलम्।।'

इत्यादिस्मृत्या च कर्मणां यन्निषेधः प्रतीयते तत्तु केवलकर्मणां निषेधो न तु ज्ञानदीपितकर्मणामित्येवाङ्गीकर्तव्यम्। ज्ञानदीपितकर्मणान्तु निःश्रेयसजनकत्वमविरुद्धम्। अस्मिन् पक्षे श्रीमदभिनवगुप्तपादाचार्या अप्यनुकूलाः। तथा हि तैः—

'श्रेयान् द्रव्यमयाद् यज्ञाज्ज्ञानयज्ञः परन्तप।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते।।'

इति श्रीमद्भगवद्गीताटिप्पणे—'द्रव्यमयात् केवलाद् द्रव्याज् ज्ञानदीपितो यज्ञः श्रेयान्, केवलत्वञ्च मयटा सूच्यते। यतः सर्वमखिलं कर्म ज्ञाने सत्येव परिसमाप्यते'। इत्यभिहितम्। एवं सिद्धं कर्मभिरेव मोक्षः, कर्मानुष्ठानाय चोपनिषज्जन्यज्ञानेनाऽऽत्मसंस्कारोऽपेक्ष्यत इति। एवं सति याः सन्ति ज्ञानफलश्रुतयस्ताः सर्वा अपि '[१]द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्या'दिति न्यायेन ज्ञानस्तुत्यर्थमर्थवादरूपाः। सिद्धमित्थमधिकारिविषयप्रयोजनभेदाभावान्न पूर्वोत्तरमीमांसयोर्भिन्नशास्त्रत्वमिति। एवञ्च शास्त्रैकत्वसाधनेऽधिकारिविषयप्रयोजनाभेदरूपस्य नोपाधित्वं न च भेदानुमानेन सत्प्रतिपक्षिततत्वम्।

एतेन 'एवञ्च कर्तृभेदात् पूर्वोत्तरकाण्डनिबन्धनत्वात् कर्मब्रह्ममीमांसाशब्दव्यवहारविषयत्वाच्चानेकहेतुभिर्नैकशास्त्रत्वं सिद्ध्यती'ति श्रीमद्द्विवेदिपादोक्तिः स्वयमेव प्रवाते निहितं कर्पूरमिव प्रविलीयमाना न हृदयपुण्डरीकमधिवसति। कर्तृभेदादेः शास्त्रभेदेऽप्रयोजकत्वात्।

यत्तु तैरेवाग्रे—'न च अथातो धर्मजिज्ञासेत्यनेन धर्मशब्देन वेदार्थमात्रस्योपलक्षणाद् ब्रह्मजिज्ञासाया अपि तेनैव गतार्थत्वं युक्तमिति वाच्यम्, एवं सति वेदार्थमात्रजिज्ञासां प्रतिज्ञाय सिद्धब्रह्मबोधकवाक्यानां मीमांसासूत्राणि अरचयतां परमर्षीणां जैमिनीयानामन्यायत्वापत्तेः। न च ते तत्रभवन्तः प्रारम्भे वेदार्थजिज्ञासां प्रतिज्ञाय ब्रह्मप्रतिपादकवाक्यमीमांसां विस्मरेयुः। अतो ब्रह्ममीमांसा अप्रतिज्ञातैव महर्षिणेत्येव कल्पना ज्यायसी, अन्यथा वेदार्थजिज्ञासेत्येव सूत्रयेत्' इत्युक्तम्, तत्तु शब्दजालेनैव प्रमुग्धमानसानां मीमांसान्यायविरहितस्वान्तानामेव चेतोभूमौ चमत्कृतिकन्दोत्पादनायालम्।

१. जैमिनीये, ४।३, अधि. ९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सकलस्यैव वेदस्य धर्म एव तात्पर्यात् तस्यैव वेदार्थत्वात्। न च भगवाञ्जैमिनिर्वेदार्थजिज्ञासां प्रतिज्ञाय ब्रह्मप्रतिपादकवाक्यमीमांसां विस्मृतवान्। यदि स भगवान् विस्मरेद् ब्रह्मवाक्यमीमांसां कथं गुरुर्बादरायणः—'शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः'[१] इति तदीयं मतमुपस्थापयेत्। शारीरकमीमांसायां यत्र तत्र जैमिनिमतोल्लेख एवोपनिषदर्थविषयकविचारस्य प्रतिज्ञातत्वं महर्षेर्जैमिनेर्व्यनक्ति।

नन्वेवं विधिप्रतिषेधयोः साध्यसाधनेतिकर्तव्यताविशिष्टभावनाविषयकविधिप्रतिषेधप्रतिपादकत्वादर्थाच्च तद्विषययागकलञ्जभक्षणादेरिष्टानिष्टसाधनताक्षेपाद् धर्माधर्मप्रमितिजनकत्वेन प्रामाण्योपपादनेऽपि सिद्धब्रह्मबोधकवाक्यानां कथमपि भावनान्तर्गतेः सम्भवाभावाद् विधिप्रतिषेधापेक्षाविरहतयाऽप्रामाण्यमेवानुपयोगित्वलक्षणमापद्येतेति चेत्, न, अर्थवादाधिकरणन्यायेनैवोपनिषदामपि भावनोपयोगिपदार्थसमर्पणतया प्रामाण्योपपत्तेः। तत्र हि विध्यर्थवादमन्त्राणामेवापौरुषेयतया प्रामाण्यस्य पूर्वाधिकरणे[२] स्थापितत्वे फलतोऽपि प्रामाण्यं स्थापितम्। यथोक्तं वार्तिककारमिश्रैः[३] —

'सिद्धप्रमाणभावस्य धर्मे वेदस्य सर्वशः।
विध्यर्थवादमन्त्राणामुपयोगोऽधुनोच्यते'।। इति।

यद्यपि विधेरेव प्राधान्येन प्रवृत्तिकारणत्वं तथापि तस्यैवाऽर्थवादबोधितप्राशस्त्यज्ञानमनुग्राहकत्वेनाङ्गीक्रियते। स्वभावमनोहरे तावत् पुरुषाणामभिलाषविषयता फले स्वत एव भवति। एवं तत्साधने तेषां स्वतो द्वेषसत्त्वेऽपि प्रवृत्तिः फलमभिप्रेत्यैव भवति। इष्टसाधनताज्ञानमपि फल एव रुचिसम्पादनद्वारा तत्साधनप्रवृत्तिहेतुर्भवति। तत्तु पुरुषरुचिसमुत्पादनाय गुणकथनमपेक्षते। एवं सति पुरुषप्रवर्तनाय विधेः प्राशस्त्यापेक्षा तथाऽर्थवादानामपि स्वाध्यायविधिवशादेव प्रयोजनापेक्षेति विधिना सहैककार्यकारित्वाद् विधिवदेवाऽर्थवादानां प्रामाण्यं सिद्ध्यति। एवमेव प्रमादालस्यसत्त्वेऽर्थवादबोधितप्राशस्त्यज्ञानं विना विधिर्यथा बह्वायासव्ययसाध्ये दुःखाकरे कर्मणि पुरुषान् प्रवर्तयितुं न भवति क्षमस्तथैवोपनिषद्बोधितशरीरादिव्यतिरिक्तनित्यात्मज्ञानं विनाऽपि। को हि नाम देहाद्यव्यतिरिक्तमात्मानं जानन् दृश्यमानदेहानुपभोग्यफलके कर्मणि प्रवर्तेत। नूनं प्रवर्तेत दृश्यमानदेहोपभोग्यफलके कर्मणि यथा

१. ब्रह्मसूत्रम्, ३।४, सूत्रम् २।
२. वेदापौरुषेयत्वाधिकरणे, १।१ अधि.।
३. मीमांसादर्शने, १।२।१ सूत्रे तन्त्रवार्तिके।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रवर्तन्तेऽधुनाऽत्रभवन्तोऽध्यापकाः कर्मचारिणोऽधिकारणिश्च। आत्मनो देहादिव्यतिरिक्तनित्यरूपता च समर्प्यते 'अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा मात्राऽसंसर्गस्त्वस्य भवती'त्याद्युपनिषद्भिः। अत्र मात्राशब्देन भूतेन्द्रियधर्माधर्माभिधानात् शरीरादिव्यतिरिक्तसंसारिकर्तृभोक्तृनित्यात्मप्रतिपादनपूर्वकेण 'आत्मा वा अरे द्रष्टव्यः' इत्यात्मज्ञानविधिनाऽऽक्षिप्तभावनायाः प्रयोजनाकाङ्क्षायां फलाश्रवणादेव 'दृष्टे सम्भवत्यदृष्टकल्पनाया अन्याय्यत्वाद् योग्यतया कर्मप्रवृत्तिसिद्धिरेव गृह्यते'। एवं तावत्—सिद्धमात्मज्ञानस्य क्रत्वर्थत्वम्। उक्तमेव वार्तिककारपादैः[१] —

'आत्मा ज्ञातव्य इत्येतन्मोक्षार्थं न च चोदितम्।
कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यते।।
विज्ञाते चास्य पारार्थ्ये यापि नाम फलश्रुतिः।
साऽर्थवादी भवेदेव न स्वर्गादिः फलान्तरम्'।। इति।

क्रतुविध्यनपेक्षिताऽऽत्मप्रतिपादिकानाम्—'अपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः' इत्यादिप्रकाराणां श्रुतीनामात्मस्तुतिमात्रप्रयोजनकत्वमेव। न तु स्वतन्त्रफलकत्वं तासां पारार्थ्येन स्वतन्त्रफलकत्वाभावात्। यथाहुर्वार्तिककारमिश्राः[२] —

'एतेन क्रत्वर्थकर्तृप्रतिपादनद्वारेणोपनिषदां नैराकाङ्क्ष्यं व्याख्यातम्' इति। सर्वथा सर्वेषामेव वेदानामंशत्रयविशिष्टभावनायामेव तात्पर्यवसायात् तद्विषयकविधिप्रतिषेधप्रतिपादकत्वेनांशत्रयप्रतिपादकत्वेन वा भावनायामेवोपयोगसम्भवात् प्रामाण्यं भवति। न तु तद्व्यतिरिक्तविषयप्रतिपादकत्वेन कस्यापि वेदभागस्य प्रामाण्यमिति मीमांसकसरणिः।

नन्वेवं तर्हि वेदान्तमीमांसाशास्त्रारम्भणं न कर्तव्यं भवति। जैमिनिनैव सकलस्यैव वेदार्थस्य विचारितत्वादिति महर्षेर्बादरायणस्य सकलोऽपि प्रयासो धर्मनिरपेक्षराष्ट्रे त्रयीमार्गव्यवस्थापनमिव लोभाकृष्टमानसे वैराग्याङ्कुरोत्पादनमिव शास्त्रपरिचयशून्याध्यापके शास्त्राध्यापनप्रवर्तनमिव पदार्थावबोधमात्रेण निःश्रेयसाधिगमनमिव यतिवृन्दपूरिते मठे शान्त्युद्भावनमिव क्लेशलाभमात्रप्रयोजनः स्यात्। न चैवं युज्यते। अधिगतसकलशास्त्रतत्त्वाभासस्त्रिकालदर्शी सकललोककल्याणकामो महर्षिर्बादरायणो न खलु निष्प्रयोजनमेव

---

१. श्लोकवार्तिके सम्बन्धवार्तिके।
२. तन्त्रवार्तिके, १।२।७ सूत्रे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदान्तमीमांसाशास्त्रारम्भणं विदध्यात्। न च श्रीमद्भगवत्पादप्रभृतयो महापुरुषा भाष्यादिकं विरचयेयुः, पठेयुश्च तन्मार्गानुसारिणः शिष्याः। अतः प्रयोजनवदेव वेदान्तमीमांसाशास्त्रमिति स्वीकर्तव्यम्। प्रयोजनवत्ता च तस्य सिद्धेऽपि ब्रह्मणि वेदस्य तात्पर्यं विना न सम्भवतीत्यायातं तर्हि वेदान्तानां निरस्तसकलभेदनिर्विशेषप्रत्यगात्मचैतन्यरूपब्रह्मावबोधकत्वम्, तेन चाविद्यानिवृत्तिरूपनिःश्रेयसाधिगतिः। पृथक्शास्त्रत्वमपि तेन पीयूषपरिपूरितकाञ्चनकंस इव हठादधस्तलमधितिष्ठति। तथा च न भवदिष्टसिद्धिरिति चेत्, न।

न खलु महर्षिबादरायणकृतारम्भश्रीमद्भगवत्पादकृततद्भाष्यतन्मतानुसारिकृतानुशीलनमात्रेण वेदतात्पर्यमन्यथयितुं युक्तं तेन चाक्लृप्तं प्रयोजनविशेषं कल्पयितुम्। न हि पदार्थानुष्ठानयोग्ये सर्वथा भावनातदंशव्यतिरिक्तेऽर्थे वेदानां तात्पर्यं सम्भवति। अध्ययनविधिना च सकलस्यैव वेदस्य प्रयोजनवदर्थपर्यवसायित्वं बोधितम्। अतस्तद्वशेनोपनिषदां यथा प्रयोजनवत्ता सिद्ध्येत्, तथैव कल्पना ज्यायसी न तद्व्यतिरेकेण। यादृशमात्मज्ञानं कर्मप्रवृत्तिसिद्ध्यर्थं भावनयाऽपेक्ष्यते तादृग्रूप एवाऽऽत्मोपनिषद्भिः समर्प्यते, न भवदिष्टनित्यशुद्धबुद्धमुक्तस्वभावरूपः। कर्मणि प्रवृत्तौ तादृगात्मविषयकज्ञानस्याऽनपेक्षितत्वात्।

एवं सिद्धं पारार्थ्यान्नोपनिषज्जन्यात्मज्ञानस्य पृथक्प्रयोजनकत्वमिति वेदान्तमीमांसाशास्त्रस्यानारम्भणीयतैवाऽऽयातीति। यश्चारम्भो विहितो महर्षिबादरायणेन स कृत्वाचिन्तान्यायावलम्बनेनैव शिष्यबुद्धिवैशद्यमात्रप्रयोजनकः। कृत्वाचिन्तया विचारश्च दृश्यते मीमांसायामपीति न कोऽपि विरोधः। पूर्वपक्ष एव संशयमुपन्यस्य पुनः पूर्वोत्तरपक्षाभ्यां यो विचारः, स एव कृत्वाचिन्तान्यायः। सिद्धेऽपि वेदतात्पर्यमस्तीति मीमांसाशास्त्रीयपूर्वपक्षे सिद्धान्तयुक्तिभिर्निरस्ते सति यदि सिद्धेऽपि तात्पर्यं स्यात्, तर्हि उपनिषदां किं जीवे, ईश्वरे, ब्रह्मणि वा तात्पर्यमिति विचारः कृत्वाचिन्तयैव। एवं तेन न्यायेनावश्यमेव वेदान्तमीमांसाशास्त्रारम्भणं युक्तमिति।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीयदर्शनेषु पुनर्जन्मसिद्धान्तः

डॉ॰ धर्मेन्द्रकुमारसिंहदेवः
शोधसहायकः, संस्कृतविभागस्य
डॉ॰ हरीसिंहगौरविश्वविद्यालये
सागरम् (म.प्र.)

***

भारतीयदर्शनेषु कर्मिणां मनुष्याणां कृते पुनर्जन्मव्यवस्था प्रतिष्ठापिता वर्तते। अपवादरूपेण चार्वाकाः खल्वात्मनः सद्भावं नैव स्वीकुर्वन्ति। अतः परलोकस्य पुनर्जन्मनो वा न तत्र काचिद् व्यवस्था। यद्यपि चार्वाकाणां नास्ति कोऽपि सिद्धान्तः, ते हि लौकायतिकाः। यथा लोके विलोक्यते तदनुसारेण ते ब्रुवन्ते, तथापि सर्वेषां भारतीयदर्शनानां पूर्वपक्षत्वेन लोकायतदर्शनं विचारणीयतां लभत इति तस्यैव प्राग् विचार आरभ्यते।

१. चार्वाकदर्शने पुनर्भवस्य प्रतिवादः

चार्वाका एव लौकायतिका इति निगद्यन्ते[१]। ते यदृच्छावादिनश्चतुर्भूतवादिनश्च। पृथिव्यप्तेजोवायूनां यदृच्छासंघातेन शरीरं जायते। तत्र चैतन्यं तथोत्पद्यते यथा यवगुडादिषु मिलितेषु मद्यरूपेण परिणतेषु मदो जायते। तन्मते मरणमेव मुक्तिः। एतेषां नये प्रत्यक्षमेव केवलं प्रमाणत्वेनानुगृहीतम्, न च ते प्रमाणान्तराणि मन्यन्ते। तेनात्र पुनर्भवस्य नैव स्वीकृतिः, तस्य परोक्षत्वात्। किञ्च पुनर्जन्मनि स्वीकृते तत्र तत्र दर्शनेषु कर्मफलव्यवस्था विजृम्भते। तां च दुर्व्यवस्थां मन्वानाश्चार्वाकाः प्राहुः—

> यावज्जीवेत् सुखं जीवेद् ऋणं कृत्वा घृतं पिबेत्।
> भस्मीभूतस्य देहस्य पुनरागमनं कुतः।।

---

१. पाणिनिना भगवता उक्थादिषु द्वितीयस्थाने लोकायतशब्दः पठितः। तेन लोकायतमधीयते विदुर्वा ये ते लौकायतिकाः (पा.सू. ४.२.६०)। शङ्करभगवत्पादैस्तु ब्रह्मसूत्रभाष्ये (१.१.१) लोकायतिक इति प्रयुक्तम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मिन्नेव जन्मनि कर्मफलानि समीहन्ते देहिनः। एवञ्च पुनर्जन्मनः प्रत्यक्षाभावेनास्मिन् दर्शने नैव ग्रहणम्। परमेतेषां मतं प्रत्याख्याय सर्वेषु दर्शनेषु पुनर्जन्मनो व्यवस्था कृता विद्यते।

२. बौद्धदर्शने पुनर्भवः

बौद्धानां सर्वेषु प्रस्थानेषु न कश्चिदात्मा परिगणितः। तथापि तत्र बौद्धप्रस्थानेषु रूपसंज्ञासंस्कारवेदनाविज्ञाननामकेषु पञ्चसूपादानस्कन्धेष्वपि मिथ्यासङ्घातभूतेषु आत्मत्वारोपेण पुनर्जन्मनो व्याख्यानं प्रसरति। स्कन्धा एव कर्मणां प्रतीत्यसमुत्पादे हेतवः। त एव जायन्ते, म्रियन्ते, पुनर्जायन्ते च। पुनर्जन्मविषये बौद्धास्तावदेवं समुद्घोषयामासुः—

पुनर्भवाय संस्कारानविद्यानिवृतस्त्रिधा।
अभिसंस्कुरुते यांस्तैर्गतिं गच्छति कर्मभिः[१]॥

अस्याः कारिकायाः प्रसन्नपदायां वृत्तावुक्तम्—

कुशला अकुशला आनेञ्ज्याश्च यदि वा कायिका वाचिका मानसाश्चेति। तांस्त्रिविधान् कर्मलक्षणान् संस्कारानविद्यानिवृतः पुद्गलः करोति[२]। निबन्धने तावदुक्तम्—

'अतीतावस्थं कर्म संस्काराः। वर्तमानावस्थं कर्म भवः'[३]।

अपि च,

'पुनर्भवोऽनागतं जन्म'[४]। बौद्धनयेऽपि वर्तमानं जन्मातीतकर्माधीनम्। वर्तमानजन्मनि कृतकर्मभिः पुनर्जन्मेति प्रसिद्धम्। अर्थाद् वर्तमानजन्मनः कुशलाकुशलकर्मणां विपाकनिमित्तं पुनर्जन्म भवति। अत एव पुनर्भवसन्तानमभिप्रेत्य बौद्धा अपि निगदन्ति—

'जन्मसंक्लेशः पुनर्भवजातिः, जातस्य चित्तचैत्तानां प्रतिक्षणोत्पादः, पुनर्भवप्रबन्धश्च'[५]। अस्य टीकाकारो विवृणोति—

---

१. म.शा. २६.१; २. तत्रैव, प्रसन्नपदावृत्तिः।
३. निबन्धटीका, १४७; ४. तत्रैव, १६२।
५. मध्यान्तविभागशास्त्रम्, भाष्यम्, ५.२७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'पुनर्भवजातिः प्रतिसन्धिचित्तम्।........प्रतिक्षणोत्पादः प्रतिसन्धिबन्धादूर्ध्वमामरणात्। पुनर्भवप्रबन्ध इति क्लेशसहितो मरणभवः...........ततश्च पुनरपि उत्पत्तिभवः'[१]।

बौद्धा अनात्मवादमवलम्ब्यापि पुनर्भवं व्यवस्थापयन्ति। पुनर्जन्महेतूनां विमर्शे कर्मणः कारणतां सर्वे सम्प्रदायाः स्वीकुर्वन्ति। तत्र चातीतकर्माधीनं वर्तमानं जन्म। वर्तमानजन्मनि कृतैः कर्मभिरनागतं जन्म पुनर्जन्म वा भवति। अर्थाद् यदा कर्माणि विपाकाय तत्परतां व्रजन्ति तदैव पुनर्भवः पुनर्जन्म वा स्थानं लभते। एवञ्च सर्वेषां पुनर्भवप्रदानानां हेतूनां मूलमविद्येति नास्ति विवादलेशः। यथा चाहुः—'अविद्या खलु संसारमूलम्'[२]।

अनयैवाविद्यया असत्यप्यात्मतत्त्वे आत्मवाद उपादीयते, तेन च पुनर्जन्मसम्बन्धः। तथा हि—'भोगयोग एव सहाविद्यया आत्मवादोपादानम्'[३]।

अपि चाभिधर्मकोशे—

'पूर्वक्लेशदशाविद्या संस्काराः पूर्वकर्मणः'[४]।

अविच्छिन्नभवचक्रस्य व्यवस्थामुद्दिश्य भगवतो बुद्धस्य वचनमभिधर्मकोशे प्रोक्तम्—

'क्लेशात् क्लेशः क्रिया चैव ततो वस्तु ततः पुनः।
वस्तुक्लेशाश्च जायन्ते भवाङ्गानामयं नयः'[५]॥

इदमत्र तात्पर्यम्। क्लेशादपि क्लेशः, ततश्च पुनः कर्म ततो वस्तु प्राप्यते। ततश्च पुनः क्लेशा जायन्ते; अतः परस्परं कार्यकारणभावो विलसति। अत एवाविद्यापि कारणतां भजति।

बौद्धा हि सर्वथा नवीनामेव कामपि सरणिमनुसरन्ति। आत्मवादिदर्शनेषु यथा पुनर्भवादीनां व्यवस्था जीवस्य च स्वरूपं प्रतिपादितं तथा नेह प्रवर्तते। बौद्धानां चतुर्षु सम्प्रदायेषु सौत्रान्तिका वैभाषिकाश्च पालिग्रन्थाननुसृत्य कर्मविपाकं पुनर्भवं वा व्यवस्थापयन्ति। तथा हि—पञ्चस्कन्धरूपमात्मानं सत्कायदृष्टिसंवलितं

---

१. मध्यान्तविभागशास्त्रम्, स्थिरमतिटीका;
२. विभाषाप्रभा, ३६१।
३. तत्रैव, ३६३;
४. अभिको. ३.२१।
५. तत्रैव, ३.३७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वीकृत्य ते स्कन्धसङ्घातमेव भोक्तृत्वेन स्थापयन्ति। तत्रैव कर्माणि विपच्यन्ते, भोगाश्च वेदनास्कन्धेन जायन्ते, संस्काराः प्रभवन्ति, चक्षुर्विज्ञानादिकं भवति, रूपं संज्ञा च यथायोनि सञ्जायत इति। विज्ञानवादिनो योगाचारास्तु विज्ञानस्कन्धमेव मुख्यतया प्रतिष्ठाप्य तमेव विपाकं स्वीकुर्वन्ति। शून्यवादिनो माध्यमिकास्तत्र कर्मणामविप्रणाशमुपस्थापयन्ति। तेन फलभोगसिद्धिः पुनर्भवो वा भवतीति संक्षेपः।

३. जैनदर्शने पुनर्भवः

जैनदर्शने किल कर्मफलदातृत्वेन नेश्वरस्य स्थापना क्रियते। जीवानां कर्माण्यनुसृत्य पुद्गलाश्च जीवाश्च तथा परिणामं लभन्ते, यथा तत्तद्योनिषु जन्म भवति। अस्मिन् नये बन्धस्य जन्मनो वा पञ्च कारणानि निर्दिष्टानि सन्ति। तानि च तत्त्वार्थाधिगमसूत्रे प्रोक्तानि वर्तन्ते। यथा—

'मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः'[१]।

अयमर्थः—मिथ्यादर्शनम्, अविरतिः, प्रमादः, कषायः, योगश्चेति पञ्चकं जीवमावरणरूपेण बध्नाति। निर्विकल्पकज्ञानरूपं दर्शनं यदा मिथ्या जायते, तदा सम्यग्दर्शनस्याभाव एव सर्वथा भवतीति बन्धस्य मूलकारणमेतत्। तेन च विरतिर्न जायते। भोगेषु रतिरेव निरन्तरं प्रसरति। तथा च सम्यग्ज्ञानादीनामर्जनाय नावधानं दीयत इति जीवः प्रमादी भवति। एवञ्च पापादिवासना कषायरूपेण जीवं बध्नाति। कषायेभ्यश्च योगो भवति। कर्मणां सम्बन्ध एवेह योगः। कर्मसम्बन्धरूपयोगेन जीवः पौनःपुन्येन जन्ममरणचक्रं गृह्णातीति।

आर्हतानां दर्शने भगवतीसूत्रमेव प्राथम्यं भजते। तत आरभ्य बहुषु बहुधा च पुनर्भवविषयको विचारः प्रसारं लेभे। इह तु पुनर्जन्मविमर्शे साररूपेणैव बन्धं निर्देष्टुं तत्त्वार्थवार्तिकस्यैव प्रथमतोऽवतारणा कृता। तथा हि—

'बध्यतेऽनेन बन्धनमात्रं वा बन्धः। बध्यते येनास्वतन्त्रीक्रियते अस्वतन्त्रीकरणमात्रं वा बन्धः'[२]। 'कर्मणा जीवः सकषायो भवति........जीवकर्मणोरनादिः सम्बन्धः। ....कर्मणो योग्यान् पुद्गलानादत्ते। पुद्गलवचनं 'कर्मणस्तादात्म्यख्यापनार्थम्'[३]।

---

१. त.सू. ८.१।
२. त.वा. १.४.१०।
३. तत्रैव, ८.२.४-५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अतस्तदुपश्लेषो बन्धः'[१]।

आचार्यो गृद्धपिच्छोऽपि बन्धस्य लक्षणमित्थं मनुते—

'आत्मकर्मणोरन्योन्यप्रवेशात्मको बन्धः'[२]।

अभिधानराजेन्द्रकोशे भावबन्धमेव मूलं निश्चित्य बन्धकारणमुक्तम्—

'भावेन मिथ्यात्वादिना......जीवस्य बन्धो भावबन्धः'[३]।

तद् रागद्वेषाभ्यां भावबन्धस्य द्विधा भेदः स्थानाङ्गसूत्रे (२.४) विवृतो दृश्यते—

'माया लोभः कषायश्चेत्येतद् रागसंज्ञिकं द्वन्द्वम्।
क्रोधो मानश्च पुनर्द्वेष इति समासनिर्दिष्टः'[४]॥

अत्रेदं तात्पर्यम्—मायालोभयोर्युगली रागो भवति। क्रोधमानयोर्द्वन्द्वं द्वेषरूपतां भजति। तत्र जीवस्य कायबन्धः खलु पुद्गलबन्ध इति कथ्यते।

अत्र प्रकारान्तरेण पुनर्भवस्य बन्धस्य वा त्रिधा व्यवस्था दृश्यते। जीवबन्धः, अनन्तरबन्धः, परस्परबन्धश्चेति। अभिधानराजेन्द्रकोशे त्रयाणामेव बन्धानां तात्पर्यं निदर्शितं विद्यते। मानसव्यापारादिप्रयोगेण कर्मणां पुद्गलानाञ्च यः संश्लेषो जायते, स एव जीवप्रयोगबन्धः। अनेनैव जीवो जीवत्वं लभते। प्रारब्धकर्माणि पुद्गलैः सह संयुज्य प्रयोगबन्धं तन्वते। अयं प्रथमो बन्धः। ततश्च या अविच्छिन्नबन्धधारा बद्धानां पुद्गलानां समायाति साऽनन्तरबन्ध इति निगद्यते। कर्मभिर्भोगाः, भोगैश्च कर्माणि परम्परां सूयन्ते। तत्र प्रथमं बन्धकालं विहाय ये द्वितीयादयोऽवसराः समायान्ति, तेऽपि सर्वे समुदितरूपेण परस्परबन्ध इति निगद्यन्ते। अनेनैव बन्धेन पुण्यापुण्यमिश्रभोगाः सम्भवन्ति। तेन च जीवो भोक्ता भवति। तथा च पञ्चास्तिकायस्यामृतचन्द्रवृत्तौ प्रोक्तम्—

'निश्चयेन शुभाशुभकर्मनिमित्तसुखदुःखपरिणामानां व्यवहारेण शुभाशुभसम्पादितेष्टानिष्टविषयाणां भोक्तृत्वाद् भोक्ता'[५]।

अत्रायं विशेषः—भोगा एव भोक्तृत्वेन हेतुतां वहन्ति। भोक्तृत्वमेव वा भोगः। स हि द्विधा व्यवस्थानं लभते। निश्चयनयेन शुभाशुभकर्मजनितानि सुखानि

---

१. त.वा., ८.२.८; २. सर्वार्थसिद्धिः, १.४।
३. अ.रा.को.; ४. तत्रैव।
५. पञ्चा., २७ अमृतचन्द्रवृत्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुःखानि च जीवस्यैव परिणामानि भवन्ति। स एव तेषां भोगं करोति। व्यवहारनयेन तु शुभाशुभकर्मभिः सम्पादितानामिष्टानिष्टविषयाणां भोक्ता जीवः। निश्चयनयेन य आत्मनः परिणामो भोगः, स भावभोगो भावनारूपेण चित्तवृत्तिरूपेण वा तिष्ठति। किन्तु पौद्गलिकविषयाणां भोग्यत्वे यो द्रव्यभोगो भवति, व्यवहारतः स एव भोग इति कथ्यते।

अयमत्र सारः—जीवकृतानि कर्माण्येव बन्धभोगयोः कारणानि भवन्ति। जीव एव पुद्गलयोगेन जन्म लभते मरणञ्चानुभवति। मरणानन्तरं च पुनर्भवं प्राप्नोति। अस्मिन् दर्शने जीवः परिणामी भवति। तथा च जीवपरिणामरूपौ बन्धभोगौ भवतः। तेन भावबन्धस्य भावभोगस्य च व्यवस्था क्रियत इति।

४. न्यायदर्शने पुनर्भवः

नैयायिकानां वर्तमानजन्मार्जितकर्माशयेन पुनर्जन्म भवतीति सिद्धान्तः। तच्च ते प्रेत्यभावनाम्ना व्यवहरन्ति। तथा च सूत्रम्—'पुनरुत्पत्तिः प्रेत्यभावः'[1]।

'नास्येदं शरीरमपूर्वमनुत्तरं च। पूर्वशरीराणामादिर्नास्ति, उत्तरेषामपवर्गान्त इति प्रेत्यभावः....पुनरुत्पत्तिः पुनर्देहादिभिः सम्बन्धः। पुनरित्यभ्यासाभिधानम्। यत्र क्वचित्प्राणभृन्निकाये वर्तमानः पूर्वोपात्तान् देहादीञ्जहाति, तत्प्रैति। यत् तत्रान्यत्र वा देहादीनन्यानुपादत्ते तद् भवति। प्रेत्यभावो भूत्वा पुनर्जन्म। सोऽयं जन्ममरण-प्रबन्धाभ्यासोऽनादिरपवर्गान्तः प्रेत्यभावो वेदितव्य इति'[2]।

'पूर्वोपात्तशरीरादिपरित्यागादन्यशरीराद्युपसङ्क्रान्तिः प्रेत्यभाव इति। पुनर्ग्रहणं संसारस्यानादित्वज्ञापनार्थम्'[3]।

न्यायनयेऽपि जीवो यथाकर्म शरीरं प्राप्य सुखदुःखात्मकं फलं भुङ्क्ते। अयमेव भोगः संवेदनशब्देन धर्माधर्मौ च प्रवृत्तिनाम्ना व्यवह्रियन्ते। एवञ्च धर्माधर्मरूपा प्रवृत्तिः सुखदुःखसंवेदनरूपं फलं प्रसूते। येषां धर्माधर्माणां समवायो जीवो जन्मना आयुषा संयुनक्ति। स कर्माशय इति निगद्यते। जन्मायुर्भोगाः समवेतरूपेण विपाकनाम्ना व्यवह्रियन्ते। कर्मणां कर्माशयस्य वा विपाकेन

---

१. न्या.सू., १.१.९।

२. तत्रैव, भाष्यम्।

३. तत्रैव, वार्तिकम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदुपभोगः क्षीयते। अत एव प्रयाणं वा मरणं वा भवति। पुनर्जन्मनः कृतेऽन्यकर्माशय उपतिष्ठत इति भाष्यकारो निगदति—

> 'विपाकसंवेदनात् कर्माशयक्षये शरीरपातः प्रयाणम्। कर्माशयान्तराच्च पुनर्जन्म'[1]।

अत्रेदमवधेयम्—इयं पुनरुत्पत्तिरात्मनो भवति, शरीरस्य वा? आत्मा तावदजन्मा नित्यः। स कथं पुनर्जन्म लभेत? शरीरं चैकं न पुनः पुनर्जन्म गृह्णीयादिति चेदुद्योतकरः प्राह—मनस एव पुनर्जन्म भवति। सुखदुःखभोगाश्चात्मन इति आत्मानं प्रेत्यभावभागिनं मन्यन्ते न्यायविद इति। जयन्तभट्टस्तु प्राह—

'आत्मनश्च स्थायित्वेन क्रियाभ्यावृत्तिसम्भवात् तस्यैव पुनः पुनरुत्पत्तिं ब्रूमः। उत्पत्तिवन्मरणमपि सोऽयमात्मनो मृत्वा पुनर्जन्म प्रेत्यभाव इति।.......मरणमात्मनो भोगायतनदेहेन्द्रियादियोग उच्यते। जन्म तु तत्सम्बन्धः'[2]।

अस्मिन् दर्शने स्थूलशरीरमिन्द्रियाणि च भौतिकान्येव सन्ति, अतो मनःसहितस्यात्मन एव प्रेत्यभावः सिद्धान्तितः, उभयोः शाश्वतत्वात्।

अपि च, ईश्वरो दिक्कालौ धर्माधर्मरूपमदृष्टं च साधारणानि कारणानि भवन्ति सर्वेषां विपाकानाम्। नैतैर्विना कथमपि पुनर्जन्म वा सुखदुःखरूपो विपाको वा सम्भवति। न्याये नातिवाहिकशरीरस्य स्वीकृतिः। अतस्तेषां जन्मद्वयान्तराले शरीरादिरहितस्य प्रेतस्य सम्मतिर्नास्तीति विशेषः। अत एव ते खण्डशरीरं कल्पयन्ति, यच्च धर्माधर्मवशेन मरणात्प्रागेव जनितं विद्यते। तथा च मरणकालादनन्तरमेव प्रेत्यभावः पुनर्जन्म वा लभ्यते, येन सुखदुःखभोगा जन्यन्त इति।

५. वैशेषिकदर्शने पुनर्भवः

वैशेषिकाणां तत्त्वमीमांसा प्रायेण नैयायिकैः सङ्गृहीतेति न तत्र पुनर्भवस्य व्यवस्थायां कापि विमतिः। अत्रापि प्रस्थाने जीवात्मानः परमात्मवद् विभवः। मनश्चाणुपरिमाणम्। तत्सन्निकर्षेणात्मा कर्मफलानि भुङ्क्ते। तत्र सुखं दुःखं चेति द्वयी कर्मविपाकः। कर्म च धर्माधर्मौ जनयित्वा नश्यति। धर्माधर्मौ चादृष्टनाम्ना व्यवह्रियेते। सुखदुःखादेरुपलब्धावचेतनस्य मनसः साधनमात्रत्वेन प्रेत्यभावः पुनर्जन्म वाऽऽत्मन एवाभिमतः। अत्राहुः कणादपादाः—

---

१. न्यायभाष्यम्; २. न्यायमञ्जरी, २, पृ. ७२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्ति:। तत्संयोगो विभाग:'[१]।

ताभ्यां धर्माधर्माभ्यां संयोगो जन्म अपूर्वाभि: शरीरेन्द्रियवेदनाभि: सम्बन्ध: संयोग इहोच्यते विभागस्तु शरीरमनोविभागो मरणलक्षण:। तथा चायं जन्ममरणप्रबन्ध: संसारो भावापरनामा धर्माधर्माभ्यामित्यर्थ:[२]।

एवं धर्माधर्मयो: फलरूपेण यथानाम पुनर्भवो जायते। तस्य त्रिधा व्याख्यानं भाष्यकारै: प्रशस्तपादै: कृतं विद्यते। तथा हि—

१. अविदुषो रागद्वेषवत: प्रवर्तकाद् धर्मात् प्रकृष्टात् स्वल्पाधर्मसहिताद् ब्रह्मेन्द्रप्रजापतिपितृमनुष्यलोकेषु आशयानुरूपैरिष्टशरीरेन्द्रियविषयसुखादिभिर्योगो भवति।

२. तथा प्रकृष्टादधर्मात् स्वल्पधर्मसहितात् प्रेततिर्यग्योनिस्थानेषु अनिष्टशरीरेन्द्रियविषयदु:खादिभिर्योगो भवति।

३. एवं प्रवृत्तिलक्षणाद् धर्माधर्मसहिताद् देवमनुष्यतिर्यङ्नारकेषु पुन: संसारबन्धो भवति[३]। इत्थं जननमरणचक्रमेव संसार इति प्रेत्यभाव इति वा निगद्यते।

६. सांख्यदर्शने पुनर्भव:

सांख्यानां तावत् प्रकृते: प्रधानस्य वा बन्ध: संस्करणं वा जायते। यथोक्तम्—

'तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृति:'[४]।।

एते सांख्या: पुरुषस्य भोक्तृत्वं साधयन्ति। तथा हि—

'पुरुषोऽस्ति भोक्तृभावात्'[५]।

अत्र युक्तिदीपिकायां व्याख्यातम्—

'इह सुखदु:खमोहात्मकत्वादचेतनं व्यक्तमव्यक्तं च। तस्मादस्य परस्परेण भोगो नोपपद्यत इत्यवश्यं भोक्त्रा भवितव्यम्। योऽसौ भोक्ता स पुरुष:। आह, क: पुनरयं भोगो नाम? उच्यते, भोग उपलब्धिसद्भावात्'[६]।

---

१. वै.सू. ६.२.१४-१५; २. तत्रैव, उपस्कार:।
३. प्रभा., पृ. ६७५-७९; ४. सां.का. ६२।
५. तत्रैव, १७; ६. युक्तिदीपिका।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्यपि प्रकृतिपुरुषौ विभू अनादी नित्यौ। तथापि प्रकृतेरेकत्वेन पुरुषाणां च नानात्वेन यस्य पुरुषस्य कृते प्रकृतिर्भोगसाधनात्मकपरिणामान् गृह्णाति, तमेव पुरुषं बुद्ध्यादिरूपेण ते परिणामा अवच्छिन्दन्ति। अवच्छेदेनैव भोक्तृत्वं कल्पते। अपि चाहुर्विज्ञानभिक्षुपादाः—

'तथा हि प्रमाणवृत्त्यारूढं प्रकृतिपुरुषादिकं प्रमेयं वृत्त्या सह पुरुषे प्रतिबिम्बितं सद् भासते अतोऽर्थोपरक्तवृत्तिप्रतिबिम्बावच्छिन्नं स्वरूपचैतन्यमेव भानं पुरुषस्य भोगः प्रमाणस्य च फलमिति। ततश्च प्रतिबिम्बरूपेणार्थसम्बन्धे द्वारतया वृत्तीनां करणत्वम्'[१]।

अत्रेदमवधेयम्—भोक्तृत्वं चापि लिङ्गशरीरसहकारेणैव सम्पद्यते। इदमेव लिङ्गशरीरं भावैरधिवासितं सद् भोगाय वासनानुसारेण तत्र तत्र जन्म गृह्णाति। विभोः पुरुषस्य तु जन्ममरणे नोपपद्येते इति। पाञ्चभौतिकं शरीरं यावन्न लभते, तावल्लिङ्गशरीरं भोगशून्यं संसरतीत्याह—

'पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम्।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्'[२]॥

तथा च भोगाय लिङ्गशरीरं स्थूलशरीरे प्रविशति, प्रविश्य च भोगानश्नुते। न च स्थूलशरीरमपेक्ष्य लिङ्गशरीरस्य सूक्ष्मशरीरस्य वा व्यापकत्वेन प्रवेशानुपपत्तिः, आतिवाहिकशरीरस्यापि स्वीकृतत्वात्। तथा च सूत्रम्—

'न स्थूलमिति नियम आतिवाहिकस्यापि विद्यमानत्वात्'[३]।

एवं पुनर्भवं व्याख्यातुमातिवाहिकशरीरस्य विद्यमानतां स्वीकुर्वन्ति सांख्यसूत्रकाराः। आतिवाहिकं शरीरं सूक्ष्ममिति न प्रत्यक्षम्, सूक्ष्मस्येन्द्रियातीतत्वात्। अपि च व्याचष्टे विज्ञानभिक्षुः—

'लोकाल्लोकान्तरं लिङ्गदेहमतिवाहयतीत्यातिवाहिकम्'[४]।

पुनर्भवं सङ्केतयन् युक्तिदीपिकाकारः प्राह—

'आतिवाहिकं सूक्ष्मशरीरमिन्द्रियाणां धारणप्रापणसमर्थं नित्यं बाह्येनापायिना परिवेष्ट्यते परित्यज्यते च'[५]।

---

१. विज्ञानभिक्षुः, सां.सू. १.१०४;   २. सां.का. ४०।
३. सां.सू. ५.१०३;   ४. विज्ञानभिक्षुः।
५. युक्तिदीपिका, सां.का. ३९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रायं सारः—यावत् प्रकृतिपुरुषयोर्भोगप्रयोजकः सम्बन्धस्तावज्जन्ममरण-चक्रं नैव विरमति। त्रैगुण्याधीनोऽयं भोगः। येन देवानां मनुष्याणां नारकाणां च ज़न्मानि भवन्ति। तत्तत्कर्मानुसारेण तत्तद्योनीः प्राप्नुवन्ति। तथा च सांख्यकारिका—

ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः स्वर्गः।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तम्[1] ।।

युक्तिदीपिकामनुसृत्यादृष्टानुसारेण भौतिकसर्गचक्रं ज्ञातव्यम्। तथा हि—

भौतिकसर्गः (अदृष्टफलम्)



अत्रायं विशेषः—तच्च सूक्ष्मशरीरं स्थूलशरीरपातेन सहोत्पद्यते। स्थूलशरीरजन्मना सह नश्यति। पुनश्चोत्पद्यते। सूत्रकारमतेन तु आतिवाहिकशरीरं विना देहान्तरयात्रा पुनर्भवो वा नोपपद्यत इति। सांख्यकारिकाकारस्तु लिङ्गशरीरमेव पुनर्जन्मने पर्याप्तं मनुते। तथा चाह—

'चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया।
तद्वद् विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्।।
पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन।
प्रकृतेर्विभुत्वयोगान् नटवद् व्यवतिष्ठते लिङ्गम्'[2] ।।इति।

७. योगदर्शने पुनर्भवः

योगदर्शने कर्मणां विपाकं कर्माशयञ्चाधिकृत्य बहु विवेचितं विद्यते। तत्र भगवता पतञ्जलिना यत् सूत्रितं तदेव प्रथमत आदीयते—

'सति मूले तद्विपाको जात्यायुर्भोगाः'[3]।

अत्र व्यासभाष्ये स्पष्टीकृतं विद्यते—

---

१. सां.का. ५४; २. तत्रैव, ४१-४२।
३. यो.सू. २.१३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'सत्सु क्लेशेषु कर्माशयो विपाकाऽऽरम्भी भवति, नोच्छिन्नक्लेशमूलः। यथा तुषावनद्धाः शालितण्डुला अदग्धबीजभावाः प्ररोहसमर्था भवन्ति, नापनीततुषा दग्धबीजभावा वा; तथा क्लेशावनद्धकर्माशयो विपाकप्ररोही। विपाकस्त्रिविधो जातिरायुर्भोग इति'[1]।

अत्र जातिर्जन्म, आयुर्जीवनकालः, भोगश्च सुखदुःखरूपः। त्रिविधोऽपि विपाकः कर्मफलनिष्पत्तिरूप इति कर्माशय एव तत्र हेतुः। अस्मिन् प्रसङ्गे भाष्यकृद्भिः कतिपये प्रश्ना उपस्थापिताः। यथा—

१. एकैकं कर्म किमेकस्य जन्मनः कारणं भवति? अथवा—
२. एकमेव कर्म जन्मनामनेकेषां हेतुतां भजति? अथवा—
३. किमनेकैः कर्मभिरनेकेषां जन्मनां निष्पत्तिः? अथवा—
४. अनेकानि कर्माणि एकस्यैव जन्मनः कारणानि भवन्तीति।

एतेषां प्रश्नानां समाधानाय भाष्यमेवोद्ध्रियते—

'जन्मप्रयाणान्तरे कृतः पुण्यापुण्यकर्माशयप्रचयो विचित्रः प्रधानोपसर्जनभावेनावस्थितः प्रयाणाभिव्यक्त एकप्रघट्टकेन मरणं प्रसाध्य सम्मूर्च्छित एकमेव जन्म करोति। तच्च जन्म तेनैव कर्मणा लब्धायुष्कं भवति। तस्मिन्नायुषि तेनैव कर्मणा भोगः सम्पद्यत इति'[2]।

अयं भावः—एकजन्मना भोग्यानां कर्मणां समूह एव कर्माशय इति निगद्यते। येन जीवो यथार्हमायुर्लभते। तस्मिंश्चायुषि तत्कर्मसमूहस्य भोगो भवति। कश्चित् कर्माशय एकजीवनेन भुज्यते। स एकभविकः कथ्यते। तत्र त्रैविध्यं दृश्यते। शङ्करभगवत्पादैर्योगभाष्यविवरणे तत्सर्वं विशदीकृतं विद्यते। तत्र कर्माशयानामियं व्यवस्था भवति। यथा—



१. तत्रैव, भाष्यम्।   २. तत्रैव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रापि कर्माशयेन वासनायाः सहभावो विवेचितः। तथा हि—

'क्लेशकर्मविपाकानुभवनिर्वर्तिताभिस्तु वासनाभिरनादिकालसम्मूर्च्छितमिदं चित्तं विचित्रीकृतमिव सर्वतो मत्स्यजालं ग्रन्थिभिरिवाततमित्येता अनेकभवपूर्विका वासनाः। यस्त्वयं कर्माशय एष एवैकभविक उक्त इति। ये संस्काराः स्मृतिहेतवस्ता वासनाः। ताश्चानादिकालीना इति'[1]।

'प्रधानोपसर्जनीभावेन त्रिविपाकारम्भी एष एवैकभविक उक्तः। न दृष्टजन्मवेदनीयो नाप्यनियतविपक्तिरदृष्टजन्मवेदनीयो नापि च वासनाः'[2]।

अपि च कर्माशयानामेकजन्मना वा नैकजन्मभिर्वा विपाको भवति, तेषां भोगविषये योगसूत्रे प्रोक्तम्—

'ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात्'[3]।

ते नाम जात्यायुर्भोगरूपास्त्रिविधा विपाकाः पुण्यजन्यत्वे सुखरूपं पापजन्यत्वे च दुःखरूपं फलं प्रसूयन्ते।

अत्रायं सारः—पातञ्जलाः पुनर्जन्मने कर्माशयस्य स्थापनां कुर्वन्ति। विपाकोन्मुखो वासनासङ्घात एव कर्माशयः। स च कर्माशय एकस्मिन् जन्मनि जन्मान्तरेषु वाऽऽयूरूपेण भोगरूपेण च विपच्यते। सेयमर्जिता वासना। भोगव्यवस्था तु विविधासु योनिष्वनादिवासनया जायते। सा च वासना विपाकेन व्यज्यते। अभिव्यक्ता चेयं वासना कर्माशयात् पृथक् तिष्ठन्ती फलानि प्रसूते। पूर्वस्मिन् जन्मनि मनुष्यो यदि जन्मान्तरे मार्जारत्वं लभते, तर्ह्ययं कर्माशयस्य विपाकः। इयमर्जिता वासना। परं मार्जारस्य मूषिकं प्रति द्वेषस्तावदनादिवासनया फलतीति।

८. मीमांसादर्शने पुनर्भवः

मीमांसकाः कर्मणामपूर्वं स्वीकुर्वाणाः पुनर्जन्म व्यवस्थापयन्ति। कर्मजन्यस्यापूर्वस्य फलपाकपर्यन्तं जीवात्मन्यवस्थानं भवतीति तेषामभिमतम्। अपूर्वशब्दस्तु अदृष्टपर्यायः। अपूर्वत्वं नाम कर्मजन्यं पुण्यापुण्यत्वम्। तस्यैव तादृशफलस्योपजनकत्वम्। इदमपूर्वं तावदेवात्मनि तिष्ठति यावत् फलं

---

१. यो.सू.।

२. तत्रैव, विवरणम्।

३. तत्रैव, २.१४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नोत्पादयति। शरीरान्तरं भोगसाधनं प्रदायैव तन्नश्यतीति मीमांसकानामभिमानः। अत आहुर्भट्टपादाः—

'कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा।
योग्यता शास्त्रगम्या या परा साऽपूर्वमिष्यते'[१]॥

अयमाशयः—कर्मणां सम्पूर्तेः प्राक् फलनिष्पत्तये कर्म न प्रभवति, पूर्वरूपाभावात्। कर्मणां कर्तापि कर्मसम्पूर्तिं विना फलयोग्यतां नैव लभते। अत एव यागादिविधिशास्त्रैर्ब्राह्मणवधादिनिषिद्धवचनैश्च या योग्यता जायते, सैवापूर्वमिति निगद्यते। फलं निष्पाद्य तदपूर्वं नश्यति। एवं प्रत्येकं कर्म जन्मनाशशीलं भवति। अपि चाहुः—

'यागादेव फलं तद्धि शक्तिद्वारेण सिध्यति।
सूक्ष्मशक्त्यात्मकं वा तत् फलमेवोपजायते'[२]॥

एवञ्च धर्माधर्मयोरुद्देश्येन सुखदुःखे फलरूपेण समाश्रित्य मीमांसका अपूर्वस्य स्थापनां कुर्वन्ति। संक्षेपतः सुखफलको धर्मो दुःखफलकश्चाधर्मः। अयं धर्म आत्मन्यपूर्वरूपेण फललाभं यावत् तिष्ठति। अधर्मकृतमपूर्वमपि तथैव। धर्माधर्मौ हि कर्मणी। वेदविहितं कर्म धर्मो वेदेन निषिद्धं कर्म चाधर्मः। अपूर्वं चोभयत्र धर्माधर्माभ्यां जन्म लब्ध्वाऽऽत्मना सहात्मनि वा तिष्ठन् सुखदुःखरूपे फले प्रसूते। अपूर्वाधिकरणारम्भे जैमिनीयं सूत्रं यथा—'चोदना पुनरारम्भः'[३]।

अत्रेदं भाष्यम्—'कथं पुनरिदमवगम्यतेऽस्ति तदपूर्वमिति? उच्यते, चोदना पुनः आरम्भः। चोदनेत्यपूर्वं ब्रूमः। अपूर्वं पुनरस्ति। यत आरम्भः शिष्यते स्वर्गकामो यजेतेति। इतरथा हि विधानमनर्थकं स्याद् भङ्गित्वाद् यागस्य। यद्यन्यदनुत्पाद्य यागो विनश्येत्, यदि पुनः फलवचनासामर्थ्यात् तदेव न विनश्यतीति कल्प्यते, नैवं शक्यम्। न हि कर्मणोऽन्यद् रूपमुपलभामहे'[४]।

यदि कर्मैव फलदानाय पर्याप्नोति, तर्हि किमर्थमपूर्वस्य कल्पनागौरवमाश्रियते। अत्राहुः कुमारिलपादाः—

---

१. तन्त्रवार्तिकम्, २.१.५;   २. तत्रैव।
३. मी.सू. २.१.५।   ४. तत्रैव, भाष्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'फलाय विहितं कर्म क्षणिकं चिरभाविने।
तत्सिद्धिर्नान्यथेत्येवमपूर्वं प्रति गम्यते'[१]॥

इदमत्रावधेयम्—धर्माधर्मनियुक्तानां धर्माधर्मरूपाणां वा विविधानां कर्मणां बहून्यपूर्वाणि जायन्ते। तेषां प्रधानापूर्वाणि जन्मने प्रभवन्ति, गौणानि च यथायोगं तत्तत्प्रधानापूर्वेण सह विपच्यन्त इति सिद्धान्तः।

प्राभाकरास्तु नापूर्वं सिद्धान्तयन्ति। प्रत्युत क्रियैव कार्यत्वेन सूक्ष्मरूपेण जीवात्मनि सुखदुःखरूपफलभोगपर्यन्तं तिष्ठति। कौमारिला अपूर्वमात्मनिष्ठशक्तिरूपेण प्रतिष्ठापयन्ति। तन्मतं प्रत्याचक्षाणः प्रभाकरानुयायी शालिकनाथमिश्रः प्राह—

'शक्तिमति चातीते शक्तिरप्यतीतेति प्रमाणान्तरसिद्धमिति न सापि स्थायिनी शक्या कल्पयितुम्। अपि चाश्रये निवृत्ते किमाश्रया शक्तिरवतिष्ठताम्? आत्माश्रितेति चेत्, नान्यदीया शक्तिरन्यत्र वर्तते प्रमाणान्तरविरोधादेव। किञ्च शक्तिमत्यसति शक्तेः फलं न युक्तम्। शक्तिमद्धि साधनम्, न शक्तिः केवला, अन्यथा शक्तित्वं न स्यात्'[२] इति।

मण्डनमिश्रास्तु कर्तृत्वस्यानुपपत्तिं मनसिकृत्य अपूर्वं कल्पयामासुः। यदा वेदो यागेन स्वर्गप्राप्तिं श्रावयति, तदा स एव वेदः पुरुषं यागे नियोज्य अवान्तरव्यापाररूपेणापूर्वमपि सूचयति। तथा हि—

'स्वर्गादिकं कामयमानस्य तदेव कार्यतया बोद्धुमवकल्पते यदेव तस्य काम्यमानस्य सिद्ध्यनुगुणम्। अन्यथा हि तत्कामिना सता तत्कार्यतयानवबुद्धं स्यात्। अपरित्यक्ततत्कामनासम्बन्धो हि तत्साधनं कार्यतयावबुद्ध्यते। तस्माद् यत्कामिनो यत्कार्यतयोपदिश्यते, तत् तस्य काम्यस्य साधनमिति नियोज्यकार्यान्वयानुपपत्त्यैव गम्यते'[३]।

तथा च विधिविवेके—'प्रलीयमानकर्मलब्धोपजनः पूर्वापराङ्गोपपादितावस्थान्तरो देशकालाद्यासादितपरिणतिभेद आनन्तर्यमपि कर्मणोऽतिवर्तमानः कोऽप्यतिशयः कर्तरि कर्मणश्चिरभाविनः फलस्य साधनं कथ्यते। तदसौ न कर्मकाले वर्तमानः। स्वकाले वर्तमानोऽपि कर्मणोऽतिवृत्तत्वान्न

---

१. तन्त्रवार्तिकम्, २.१.५।

२. प्रपं. वाक्यार्थमातृका, २.२३; ३. तत्रैव, २.१९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मसम्बन्धितयाध्यक्षमीक्षते। ....कर्मकाले तस्य भावितं तत्काले च कर्मणोऽभावः'[1]।

ब्रह्मसिद्धौ तु मिश्रपादैः कर्मफलदाता ईश्वर एव निगद्यत इति दर्शनान्तरेण व्याख्या।

पूर्वमीमांसादर्शने यज्ञादिभिः सुकृतैः स्वर्गलाभो भवति। तत्र मोक्षस्य चिन्ता नैव विधीयते। स्वर्ग एव मोक्ष इति तेषां सिद्धान्तः। एवं तर्हि पुनर्भवाय सुकृतेन सह दुष्कृतस्यापि योग आवश्यकः। धर्मेण सहाधर्मोऽपि दर्शनेऽस्मिन् बहुधा विचारविषयीकृतो विद्यते। तथाऽधर्मकर्मणा दुःखभोगाय पुनर्जन्म भवतीति।

९. अद्वैतवेदान्ते पुनर्भवः

अद्वैतिनामविद्यैव पुनर्भवस्य संसारस्य वा मूलं कारणम्। अविद्या च प्रतिव्यक्ति भिन्ना। सैव कर्मानुरूपाणि जीवरूपाणि विदधाति, यथायथं संसारयति। अविद्यारचितेन सूक्ष्मशरीरेण कर्मणां संस्कारान् धारयन् जीवो विश्वस्मिन् संसरति। अद्वैतवेदान्ते पुनर्भवव्यवस्था बन्धमोक्षव्यवस्था वा मायामाश्रित्य क्रियते। माया च मिथ्या भवति। मिथ्यात्वं च सदसद्विलक्षणत्वमनिर्वचनीयत्वम्। मायापरिणाम एव बन्ध इति कृत्वा तस्य मिथ्यात्वं स्थाप्यते। न हि नित्यमुक्तस्य आत्मनो यथार्थरूपः कोऽपि बन्धो भवति। जगतः सत्यत्वप्रतीतिरेव जन्ममरणचक्रं संसारं प्रवर्तयतीति संक्षेपः।

उपनिषत्प्रमाणं स्वीकुर्वाणा वेदान्तिनस्तावन्मुक्तपुरुषानतिरिच्य सर्वे जायन्ते म्रियन्ते, म्रियन्ते जायन्ते चेति सिद्धान्तयन्ति। यथोपनिषत्सु प्रोच्यते—

'न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्।
अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे'[2]॥

आचरणं वा कर्म वा पुनर्जन्मनो हेतुः। तथा च श्रूयते—

'यथाकारी यथाचारी तथा भवति। साधुकारी साधुर्भवति। पापकारी पापो भवति। पुण्यः पुण्येन कर्मणा। पापः पापेन'[3]।

अयमाशयः—जीवो यथेच्छति तथा कर्म करोति। यथा कर्म करोति, तथैव फलं लभते। शङ्करभगवत्पादैः स्पष्टमुक्तम्—

---

१. विधिविवेकः, पृ. १६३-६४।

२. कठ. २.६। ३. बृ.उ. ४.४.५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'संसारित्वे च काम एव हेतुरिति'[1]।

पुनर्जन्मकारणं प्रति सामान्यतया प्राणिनो द्वे गती वेदितव्ये। देवयानं पितृयानञ्चेति। त एव पुनरुत्तरायणदक्षिणायनशब्दाभ्यां निगद्येते। मनुष्याः सुखाय प्रयतन्ते। तत्कृते केचन ज्ञानमर्जयन्ति सद्योमुक्तये वा क्रममुक्तये वा। अपरे किलेष्टापूर्ताचरणेन स्वर्गादिसुखं प्राप्तुकामा भवन्ति। तत्र तावद् दक्षिणायनमार्गमधिकृत्य संक्षेपेण विविच्यते।

दक्षिणायनम् : यथा चाह निरुक्तकारः—

'अथ ये हिंसामाश्रित्य विद्यामुत्सृज्य महत्तपस्तेपिरे चिरेण वेदोक्तानि वा कर्माणि कुर्वन्ति ते धूममभिसम्भवन्ति। धूमाद् रात्रिं रात्रेरपक्षीयमाणपक्षम्। अपक्षीयमाणपक्षाद् दक्षिणायनम्, दक्षिणायनात् पितृलोकम्, पितृलोकाच्चन्द्रमसम्, चन्द्रमसो वायुम्, वायोर्वृष्टिम्, वृष्टेरोषधयश्चैतद् भूत्वा तस्य संक्षये पुनरेवेमँल्लोकं प्रतिपद्यन्ते'[3]।

अत्र धूमरात्रिप्रभृतयोऽधिदेवरूपमर्थमभिदधति। दक्षिणायनशब्दस्य तु स्पष्टमेव प्रयोगः कृतः। तत्रापि तदधिष्ठातृदेव एव गृह्यते। पितृलोकशब्दे च पितृपदं मातापित्रोर्वाचकम्, माता च पिता च पितरौ तयोर्लोक इति व्युत्पत्तेः। तत्र माता पृथिवीत्यनर्थान्तरम्। 'माता भूमिः पुत्रोऽहं पृथिव्याः' इत्याथर्वणश्रुतेः। पितृपदञ्च द्युलोकवाचकम्। तेन द्यावापृथिव्योरन्तराले गतिरुक्तेत्युपपन्नम्। तत्तत्कर्मलिप्तो जीवस्तत्तत्कर्मफलभोगाय मनुष्यलोकं प्रतिपद्यत इति श्रुतेराशयः।

उत्तरायणम् : अथोत्तरायणं विवव्रुः—

अथ ये हिंसामुत्सृज्य विद्यामाश्रित्य महत्तपस्तेपिरे ज्ञानोक्तानि वा कर्माणि कुर्वन्ति तेऽर्चिरभिसम्भवन्ति। अर्चिषोऽहरहन् आपूर्यमाणपक्षम्, आपूर्यमाणपक्षादुदगयनमुदगयनाद् देवलोकम्, देवलोकादादित्यम्, आदित्याद् वैद्युतम्, वैद्युतान्मानसम्। मानसः पुरुषो भूत्वा ब्रह्मलोकमभिसम्भवन्ति। ते न पुनरावर्तन्ते'[2]।

इदमुत्तरायणम्। एतेऽपि न सद्योमुक्ता भवन्ति, किं तर्हि, पूर्वोक्तं पितृलोकं नैव प्रतिपद्यन्ते। अयं हि कार्यब्रह्मणो लोकस्य मार्गः। ते च तत्र गत्वा ज्ञानार्जनं विधाय क्रममुक्तिभाजो भवन्ति। ये नाम दक्षिणायनं लभन्ते, ते मनुष्यलोकं प्रतिपद्यन्ते। किन्तु,

---

१. बृ.उ., शाङ्करभाष्यम्; २. निरुक्तम्, १४.८।

३. तत्रैव, १४.९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'शिष्टा दन्दशूका य इदं न जानन्ति। तस्मादिदं वेदितव्यम्'[1]।

इह दन्दशूकपदं मनुष्येतरतिर्यगादिकीटपतङ्गादियोनिवाचकम्। अत्र च ये केवलं खादतमोदतां सिद्धान्तं मत्वा विसरन्ति, ते तु तिर्यगादियोनिं लभन्त इति फलितम्।

नात्मा जन्म वा नाशं वा लभते, किं तर्हि, तस्य लिङ्गशरीरं षोडशकलात्मकं पुनर्जन्म गृहणाति। स्थूलशरीरस्य परित्यागमेव मरणमित्याचक्षते। तत्रापि नाकाशस्य गमनागमने भवतः, तस्य विभुत्वाद् वा सापेक्षतया जगति सर्वत्रावस्थितत्वाद् वा। वायुरपि प्राणादिरूपेण शरीरमभिव्याप्य तिष्ठति। शरीरान्ते प्राणवायुरेव बहिर्गच्छति। प्राणैः सहैव तेजोऽबन्नमयं स्थूलशरीरं त्यक्त्वा सूक्ष्मशरीरस्य पुनर्जन्म भवतीत्यद्वैतवेदान्तिनः। तत्रापि स्थूलशरीरे वा सूक्ष्मशरीरे वा कारणशरीरे वा चैतन्यमध्यारोप्य तस्य शरीरस्यात्मत्वमध्यस्यते।

१०. विशिष्टाद्वैतवेदान्ते पुनर्भवः

अस्मिन् प्रस्थाने पुनर्भवस्य बीजं श्रीभाष्ये (३.२.४) स्पष्टीकृतं विद्यते। तदनुसारेण परमात्मनः सङ्कल्पादेव जीवस्य स्वाभाविकं कल्याणरूपं स्वरूपं तिरोधीयते। तेन बन्धः, बन्धेन च पुनर्भवः। ब्रह्मणः सङ्कल्पादेव कल्याणरूपतायाः प्राप्तौ सत्यां मोक्षोऽपि भवति। यथा चोक्तम्—

'पराभिधानात् परमपुरुषसङ्कल्पादस्य जीवस्य स्वाभाविकं रूपं तिरोहितमनादिकर्मपरम्परया कृतापराधस्य ह्यस्य स्वाभाविकं कल्याणरूपं परमपुरुषस्तिरोधापयति। ततस्तत्सङ्कल्पादेव ह्यस्य बन्धमोक्षौ श्रुतौ'[2]।

एवञ्च जीवानां त्रैविध्यमस्मिन् दर्शने विचारितम्, बद्धा मुक्ता नित्याश्चेति। तथा चोक्तम्—

'बद्धा इत्युच्यन्ते संसारिणः। मुक्ता निवृत्तसंसाराः। नित्या इत्युच्यन्ते कदापि संसारमप्राप्ताः'[3]।

इमे संसारिण एव सामान्यतया पुनर्भवभागिनो भवन्ति। तेन च कर्मफलभोगाय संसरन्ति। तत्र सुखदुःखादीनां प्रतीतिरेव भोगः। स च भोगो जीवकृतकर्मणां फलमेव। एवं प्रारब्धस्य भोगेन क्षयो भवति। यदि प्रायश्चित्तादीनां

---

१. निरुक्तम्।

२. ब्र.सू., श्रीभाष्यम्, ३.२.४। ३. तत्त्वत्रयम्, पृ. २३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सञ्चितानां कर्मणामपि नाशो भवेत्, तर्हि मोक्षलाभ इत्येतेषामभिमानः। तथा चाह आचार्यो रामानन्दः—

'आरब्धकार्ये पुण्यपापे स्वारब्धफलभोगेन क्षपयित्वा तत्फलभोग-समाप्त्यनन्तरं ब्रह्म सम्पद्यते। ते च पुण्यपापे एकशरीरभोग्यफले चेत्, तच्छरीरावसाने सम्पद्यते। अनेकशरीरोपभोग्यफले चेत्, तदवसाने सम्पद्यते। भोगेनैव च क्षपयितव्यत्वादारब्धफलयोः कर्मणोः। ....भोगेन तयोः कर्मणोर्विमोक्ष उच्यते'[1]।

अस्मिन् प्रस्थाने ईश्वरीयसङ्कल्पादेव संसारबन्धनं पुनर्भवो वा भवतीति सर्वसम्मतम्।

११. शुद्धाद्वैतवेदान्ते पुनर्भवः

वल्लभाचार्यपादानां शुद्धाद्वैतवेदान्तेऽविद्याजनितबन्धः कर्मजनितो भवतीति गीतातत्त्वदीपिकायाम् (५.३) उक्तम्। कर्मजनितानां फलानां भोगाय जन्म गृह्यत इति कर्मशब्देन तत्र कर्मफलमुच्यते। पुरुषोत्तमगोस्वामिकृतायां तत्त्वदीपिकाटीकायां (१८.३०) भगवत्सेवाङ्गाभावे कर्मैव बन्धः। तथा चोपासनाङ्गभूतानि कर्माणि बन्धशब्देन न गृह्यन्ते। ब्रह्मसूत्रभाष्ये (३.२.५) वल्लभपादैर्बन्धस्य विपर्ययस्य च कारणं कल्याणगुणानां तिरोभाव इत्युक्तम्। परमेश्वर एव षड्गुणा विद्यन्ते— ऐश्वर्यम्, वीर्यम्, यशः, श्रीः, ज्ञानम्, वैराग्यञ्चेति। परमात्मनः सकाशाद् व्युच्चरणं प्राप्य यदा जीवः स्वरूपं लभते, तदैव गुणानामेतेषां तिरोभावो जायते। यथा अग्नेः स्फुलिङ्गा व्युच्चरिताः सन्तः पृथग् रूपं गृह्णन्ति। तथा जीवा अपि परमात्मनो व्युच्चरिताः सन्तः स्वरूपमश्नुवते। तथा हि—

१. ऐश्वर्यतिरोभावाद् दैन्यं पराधीनता।
२. वीर्यस्य तिरोभावाद् दुःखसहिष्णुता।
३. यशसस्तिरोभावेन हीनता।
४. श्रियस्तिरोभावेन सर्वासामापत्तीनां विषयता।
५. ज्ञानस्य तिरोभावेन देहादावात्मबुद्धिः, विपरीतज्ञानम्।
६. वैराग्यस्य तिरोभावेन विषयासक्तिरिति।

तत्रैवाणुभाष्ये स्पष्टीकृतं विद्यते—

---

१. ब्र.सू. श्रीभाष्यम्, ४.१.१९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'बन्धश्चतुर्णां कार्यो विपर्ययो द्वयोस्तिरोभावात्। ऐश्वर्यवीर्ययशसां तिरोभावेन बन्धः। ज्ञानवैराग्ययोस्तिरोभावेन च विपर्ययः'[1]।

अत्रेदमवधेयम्—माया भगवतः शक्तिः। तया शक्त्या प्रपञ्चः सम्भवति। अविद्यया च शक्त्या जीवस्य संसरणं जायते। कर्मणां फलभोगाय जन्ममरणरूपसंसारः प्रभवति। 'पुनरपि जननं पुनरपि मरणम्' इत्येव संसारः। स एव बन्धो जीवस्य ममताहन्ते संसारं निष्पादयत इति संसार एव बन्धः।

अत्रेदं ध्यातव्यम्—ज्ञानेन भक्त्या च संसारो विनश्यति। प्रपञ्चस्तु नित्य एव। संसारप्रपञ्चयोरिदमन्तरं ज्ञात्वैव शुद्धाद्वैतवेदान्तो बुद्धिगतो भवति। अन्यदपि विविक्तं ज्ञातव्यम्। माया प्रपञ्चस्य जननी न तु बन्धस्य कारणम्। अविद्यया संसाररूपो बन्धो जायते। तत्त्वार्थदीपनिबन्धे भगवता वल्लभाचार्येणाविद्यायाः पञ्च पर्वाणि निरूपितानि। यथा—

स्वरूपाज्ञानमेकं हि पर्व देहेन्द्रियासवः।
अन्तःकरणमेषां हि चतुर्धाऽध्यास उच्यते॥
पञ्चपर्वा त्वविद्येयं यद्बद्धो याति संसृतिम्[2]।

कारिकार्थस्तावद् कोष्ठकबन्धेन ज्ञातव्यः—

पञ्चपर्वा अविद्या

स्वरूपाज्ञानम् | अध्यासः

देहात्माध्यासः | इन्द्रियात्माध्यासः | प्राणात्माध्यासः | अन्तःकरणात्माध्यासः

बन्धः

१२. द्वैतवेदान्ते पुनर्भवः

आनन्दतीर्थपादानां द्वैतवेदान्ते परमेश्वर एव बन्धमोक्षयोः प्रदाता। स एव च स्वप्नस्येष्टं तिरोधापयति। तथा चोक्तम्—

'बन्धमोक्षप्रदत्वात् स एव स्वप्नस्तिरस्कर्ता'[3]।

भाष्यकारः कूर्मपुराणमुद्धृतवान्—

---

१. ब्र.सू. अणुभाष्यम्, ३.४; २. तत्त्वार्थदीपनिबन्धः।

३. ब्र.सू. माध्वभाष्यम्, ३.२.५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'स्वप्नादिसृष्टिकर्ता तिरस्कर्ता स एव तु।
तदिच्छया यतो ह्यस्य बन्धमोक्षौ व्यवस्थितौ'[१]॥

तैजस-विश्व-प्राज्ञभेदेन भगवान् संसारदशां प्रवर्तयति। वासुदेवरूपेण तुरीयेण स एव संसारं निवर्तयति। मोक्षं च सम्पादयति। तथा चोक्तम्—

'संसारावस्थाप्रवर्तकस्त्रिरूपो भगवान् अथ वासुदेवाख्यस्तुरीयस्तन्निवर्तको मोक्षावस्थाप्रवर्तकश्च'[२]।

अनेन स्पष्टमस्मिन् दर्शने संसार एव बन्धः। स च जाग्रत्स्वप्नसुषुप्त-मोहात्मकश्चतुरवस्थासम्पन्नः। भोगं मोक्षञ्चाधिकृत्यानन्दतीर्थेन प्रोक्तम्—

'आरब्धपुण्यपापस्य भोगेन क्षपणादनु।
प्राप्नोत्येवं तमो घटं ब्रह्म वा नात्र संशयः'[३]॥

अत्र प्रस्थाने जीवानां जीवब्रह्मणोश्च परस्परं स्वाभाविको भेदः स्वीकृतः। प्रतिजीवं स्वपुण्यपापरूपाणि कर्माणि सुखदुःखरूपं फलं व्यवस्थापयन्ति, एवं जीवभेदेन भोगभेदस्यापि व्यवस्थां प्रतिष्ठापयन्ति। अस्मिन् विषये चानन्दतीर्थेणोक्तम्—

'सुखदुःखादिभोगश्च, स्वरूपैक्ये न, भेदतः'[४] इति।

१३. द्वैताद्वैतवेदान्ते पुनर्भवः

निम्बार्काचार्याणां द्वैताद्वैतवेदान्तो माध्वानां द्वैतवेदान्तवदेव जीवेश्वरयोर्भेद-मङ्गीकरोति। ईश्वरः खलु सदा मुक्तः। तस्य मायया जीवो बद्ध उच्यते। एतच्छास्त्रप्रामाण्यादवगम्यते, बद्धः सन्नपि जीवो मोक्षस्य पात्रतां न जहाति। अनादिकर्मणां भोगेन क्षये जाते भगवत्कृपया स एव मुक्तो भवति। तथा चाहुः—

'बन्धमोक्षार्हता तेषां शास्त्रमानेन गम्यते।
अनादिकर्मरूपेण मायायोगेन यन्त्रिता॥
अहैतुक्या हरेर्विष्णोः कृपया चाथ संश्रयात्।
मुच्यते नात्र सन्देहस्तदुक्तेनैव वर्त्मना'[५]॥

अस्मिन् दर्शने कर्मैव बन्धः। कर्मणां च जीव एव कर्ता। तथा चोक्तम्—

---

१. तत्रैव, कूर्मपुराणस्योद्धरणम्;　　२. आनन्दमाला, पृ. १०४।
३. ब्र.सू. माध्वभाष्यम्, ४.१.१९;　　४. दप्र. भागः १, पृ. ६।
५. वेदान्तकारिकावली, ३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'बन्धकाले क्वचित् प्रोक्तं तस्याकर्तृत्वचिन्तनम्।
तत् स्वातन्त्र्यनिवृत्त्यर्थमभिमाननिवृत्तये'[१]॥

को नाम बन्धादेः कर्तेति जिज्ञासायामुच्यते—

'बन्धस्य मोक्षस्य तथाज्ञताया
ज्ञानस्य कर्ता नियतेश्च विष्णुः'[२]।

एवं कर्मानुसारेण संसाररूपबन्धस्य पुनर्भवस्य वा परमेश्वर एव प्रदातेति द्वैतवेदान्तवदेतेषामपि स्वीकृतिरिति।

१४. अचिन्त्यभेदाभेदवेदान्ते पुनर्भवः

गौडीयवेदान्तधारायामचिन्त्यभेदाभेदवादः स्वीक्रियते। बन्धविषये, फलतः पुनर्जन्मविषये च द्वैतवेदान्तेन द्वैताद्वैतवेदान्तेन च साम्यमुपलभ्यते। तथापि किञ्चिद् वैमत्यमपि दृश्यते। तथा च बलदेवविद्याभूषणपादेनोक्तम्—

'एवं साम्येति वैषम्यमैहिकं कर्मभिः स्फुटम्।
प्राहुः पारत्रिकं तत्तु भक्तिभेदैः सुकोविदाः'[३]॥

अस्य प्रभाटीकायां स्पष्टीकृतम्—

'जीवः कर्मभिरस्मिञ्जगति उत्कृष्टापकृष्टभावं प्राप्नोति'[४]।

एवञ्चास्मिन्नपि दर्शने कर्मैव बन्धः। भोगेन कर्माणि समाप्य ईश्वरानुग्रहेण बन्धाद् मोक्षो भवतीति।

१५. प्रत्यभिज्ञाशैवदर्शने पुनर्भवः

प्रत्यभिज्ञाशैवदर्शने बन्धस्य प्रकारान्तरेण व्यवस्था दृश्यते। अस्मिन् दर्शने जीवो मायाप्रमातेत्युच्यते। शक्तेः शिवाभिन्नायाः सङ्कुचितस्वरूपाया नाम मायेति। सा च माया पशुपतेः स्वरूपं सङ्कोचयति तदभिन्नत्वेन रागादिभिः पाशैर्बध्वा पशुत्वं नयति। अत एव जीवः पशुरिति निगद्यते। पशुपतिश्च परमेश्वर इति। अस्मिन् दर्शने भगवतः स्वातन्त्र्यशक्तेः प्रकाशरूपं पशुं पृथगिव कृत्वा प्रकाशयति, किन्तु न स्वस्वरूपात् पृथक् करोति। इत्येवं मायाप्रमाता पशुर्जीवो वा निर्मितिं लभते। तथा चोक्तम्—

---

१. वेदान्तसिद्धान्तसङ्ग्रहः, ३.२८; २. तत्रैव, ५.२।
३. प्रमेयरत्नावली, ६; ४. तत्रैव, टीका।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अपरिगणित-सर्वभावनिर्भरो भगवान् स्वातन्त्र्याद् भावराशिमध्यात् कञ्चिद् भावं प्रकाशस्वरूपात् पृथक् करोति। पृथक्कृतञ्च प्रकाशयति। न च पृथक्-कृतस्य प्रकाशनोपपन्नेति न महाप्रकाशात् पृथक् करोति। अपि तु तथाविधमपरार्थप्रकाशरूपमारोपितप्रकाशं मायाप्रमातारं निर्मिमीते। तथा सङ्कोचेनावभासनमेव च भगवतः स्वात्मनि तन्निर्माणमुच्यते। एवञ्च मायाप्रमाता शरीराद्यवच्छिन्नसङ्कुचितप्रकाशस्वभावो भवन् स्वापेक्षया पृथग्भूतं भावमवभासयति। तद् नवनवतदीयच्छायोपरक्तमस्य बहिर्मुखं रूपं नवनवं ज्ञानमुच्यते। तत्र च यदैश्वरं स्वातन्त्र्यं सा ज्ञानशक्तिरिति'[१]।

इत्थं ज्ञानस्य सङ्कोच एव बन्धः। येनासीनः पशुर्जीवो वा मायाप्रमाता वा स्वरूपं गृह्णाति। तत्रापि त्रिंशत् तत्त्वानि मायाप्रमातारं निर्मिमते। तानि च माया, कञ्चुकपञ्चकम्, अन्तःकरणचतुष्टयम्, इन्द्रियदशकम्, तन्मात्रपञ्चकम्, भूतपञ्चकमिति संक्षेपः।

मायापरिग्रहादेव पुरुषः पशुर्भवति। पशुरित्यत्र जीवपर्यायः। यथा चोक्तं परमार्थसारे—

'मायापरिग्रहवशाद् बोधो मलिनः पुमान् पशुर्भवति।
कालकलानियतिवशाद् रागाविद्यावशेन सम्बद्धः'[२]॥

'मायायाः पाल्यः पाशश्चेति पशुः, आणवमायीयकार्ममलस्वभावानां पाशानां भाजनम्'[३]।

अस्मिन् दर्शने मलशब्देन पाश एव निगद्यते। आणवमलं, मायीयमलं कार्ममलञ्चेति त्रिधा मलरूपः पाशः परिगण्यते। यथा—'अणुः कर्म माया चेति त्रयः पाशाः'[४]।

तथा चोक्तं शिवसूत्रवार्तिके—

१. स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता।
२. द्विधाणवं मलमिदं स्वस्वरूपापहारतः।
३. भिन्नवेद्यप्रथात्रैव मायीयं जन्म भोगदम्।
४. कर्तर्यबोधे कार्मं तु, मायाशक्त्यैव तत् त्रयम्[५]।

---

१. ईश्वरप्रत्यभिज्ञाविवृतिः, १-३;
२. परमार्थसारः, १६।
३. तत्रैव, योगराजवृत्तिः;
४. योगिनीहृदयदीपिका, ४३।
५. शिवसूत्रवार्तिकम्, १.२१-२२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च

मायाजनितपाशाः

- आणवमलम्
  - स्वातन्त्र्यहानिः
  - स्वातन्त्र्यबोधः
    - कालः
    - कला
    - रागः
    - विद्या
    - नियतिः
- कार्ममलम्
  - पुण्यम्
  - पापम्
- मायीयमलम्
  - चतुर्विंशतिस्तत्त्वानि

'स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या।
मायातृतीये ते एव पशोः सत्त्वं रजस्तमः'[1]॥

इत्थं भगवान् परमशिव एव लीलाप्रभुरसंख्यपशुरूपेण पशुपतित्वं नाटयति। तस्य प्रकाशेनैव पुनर्भवो वा मोक्षो वा भवतीति।

१६. काश्मीरविशिष्टाद्वैतशैवदर्शने पुनर्भवः

काश्मीरेऽपि विशिष्टाद्वैतवेदान्तस्य समानत्वं दधद् विशिष्टाद्वैतशैवदर्शनं प्रावर्तत। अस्मिन् दर्शने बन्धमोक्षौ परमेश्वरस्य सङ्कल्पेन जनितौ स्वीक्रियेते। तथा चाहुः—

'जीवस्यानाद्यपचारप्रवाहेण पराभिध्यानात् परमेश्वरसङ्कल्पात् तस्य सत्यसङ्कल्पत्वादिकं तिरोहितम्।[2] तदपचारतदनुवृत्तिकृतात् तस्मादेव परमेश्वर-सङ्कल्पादस्य बन्धमोक्षौ भवतः'।

बन्धेन संसार इति प्राङ् निरूपितमेव भवति। ईश्वरभक्त्यैव जीवो मोक्षभाजनतां लभते। अस्मिन् दर्शने अनादिरेव बन्धः। बन्धनिवृत्तिश्च ईश्वरानुग्रहेणेति—

'जीवस्य स्वरूपतिरोधानभावोऽपि देवमनुष्यादिदेहाकारचिद्योगाद् भवति सृष्टिसमये, प्रलये पुनर्नामरूपविभागानर्हसूक्ष्माकारचिद्योगात्'[3]।

अत्रापि कर्मणामेव बन्धहेतुत्वं भवति। जीवत्वस्य नित्यत्वेन मायीयमलस्य स्वीकृतिर्नैव विद्यते। स्वकृतपापपुण्याभ्यामेव बन्धः। बन्धमोक्षयोः कर्ता परमेश्वर इत्यलम्।

---

१. प्रत्यभिज्ञाहृदयम्, ५;   २. ब्र.सू. श्रीकण्ठभाष्यम्, ३.२.५।
३. तत्रैव, ३.२.६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१७. काश्मीरद्वैतशैवदर्शने पुनर्भवः

काश्मीरद्वैतशैवदर्शने चित्तत्त्वस्य नित्यत्वेन कर्मणामावरणरूपेण स्वीकृतिर्नास्ति। तथा चोक्तं नरेश्वरपरीक्षायाम्—

'सिद्धमावरणं चान्यत् कर्माख्याद् भवबन्धनात्'[१]।

पुनर्जन्मविषये बन्धविषये वेदं शास्त्रं सांख्यदर्शनस्य नैकट्यं वहति। तथा चोक्तम्—

'बन्धनानि गुणान्तानि सांख्याद्यैर्भाषितान्यथ।
प्रधानादीनि चान्यानि शैवैरेवोदितानि तु'[२]॥

मायाकृतं मलमेवास्मिन् दर्शने बन्धो वा पाशो वा स्वीक्रियते। बन्धान्मोक्षश्च शिवानुग्रहेणैव भवति। यथा—

'स्वयं करोत्यणुर्नैतां पाशरुद्धबलत्वतः।
पाशा अपि न कुर्वन्ति यतस्ते तन्निरोधकाः॥
न चापि बन्धनं बध्यं विमुञ्चद् दृश्यते यतः।
बलीयान् पशुपाशेभ्यस्तन्मोचकतया हरः'[३]॥

यावत् पशुर्जीवः पाशेन पाशितो भवति, न तावत् संसारान्मुक्तिः। पशुपाशाभ्यां बलवत्तरः परमेश्वर एव पशुपतिः पाशाद् मोक्षं वितरतीति।

१८. नकुलीशपाशुपतदर्शने पुनर्भवः

अस्मिन् दर्शने पञ्च मलानि परिगणितानि सन्ति। तान्येव पाशो वा बन्धो वा निगद्यन्ते। यथा चोक्तम्—

'मिथ्याज्ञानमधर्मश्च शक्तिहेतुश्च्युतिस्तथा।
पशुत्वमूलं पञ्चैते तन्त्रे हेया विविक्तितः'[४]॥

इत्थं मोक्षप्रतिबन्धित्वाद् एतेषामेव बन्धत्वं स्वीकृतमस्तीति।

१९. दाक्षिणात्यशैवदर्शने पुनर्भवः

अस्मिन् प्रस्थाने आणवमलं, पञ्च कर्माणि, माया च बन्धरूपेण परिणमन्ति। यद्यपि तिरोधायिका शक्तिः पाशवर्गे परिगणिता, तथापि परमेश्वरस्य

---

१. नरेश्वरपरीक्षा, १.६८;
२. तत्रैव, १.६९।
३. तत्रैव, ३.१४६, १४९,
४. सदसं. पृ. १६३, उद्धरणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिरोधायिका शक्तिरियं केवलं बन्धस्यानुग्राहिका भवति, न तु बन्धस्वरूपा, किं तर्हि, असावेव शुद्धाध्वनः कारणभूततत्त्वरूपा। अत उक्तम्—

'अयं च शुद्धाध्वा न बन्धकः, कर्मान्वयाभावात्'[1]।

अत्र पाशबन्धौ नैव समानार्थकौ। मायायाः कार्यरूपैरेकत्रिंशत्तत्त्वैर्निर्मितं स्थूलसूक्ष्मशरीरं मायामलरूपं बन्धनाम्ना निगद्यते। तत्र स्थूलशरीरं पाञ्चभौतिकं सूक्ष्मशरीरञ्च पुर्यष्टकमिति कथ्यते। तथा हि—

शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः।
मनो बुद्धिरहङ्कारः पुर्यष्टकमुदाहृतम्[2]॥

इदमपि व्याख्यानं त्रिंशत्तत्त्वानि आधारीकृत्य सर्वदर्शनसङ्ग्रहे कृतं विद्यते। यथा—

'पुर्यष्टकं नाम प्रतिपुरुषं नियतः सर्गादारभ्य कल्पान्तं मोक्षान्तं वा स्थितः पृथिव्यादिकालपर्यन्तः त्रिंशत्तत्त्वात्मकः सूक्ष्मो देहः'[3]।

इत्थं सप्त मलानि, पञ्च कर्माणि, त्रिंशत् सूक्ष्मतत्त्वानि सङ्घीभूय बन्धत्वेन कल्पन्ते। अपि चात्र पञ्चमहाभूतात्मकं स्थूलशरीरमस्थायिबन्धत्वेन निर्मितम्। एवं सप्तचत्वारिंशत्तत्त्वानां बन्धसमुच्चयो निर्मितो भवतीति।

२०. शाक्तदर्शने पुनर्भवः

शाक्तदर्शनेऽपि प्रत्यभिज्ञादर्शनवदद्वया चितिरेव जगतः कारणम्। अद्वयपरकेऽस्मिन् दर्शने चितेरेव स्वरूपात्मिका प्रकृतिर्भवति। चित्तमपि तथैव। येन कर्मणां फलव्यवस्था जायते। फलभोगाय जीवो जन्मानि गृह्णाति जहाति च। इयं वासनानादिकर्मणामेव भवति। वासनानां सङ्घातश्च पुनर्भवाय प्रभवति। यथोक्तम्—

'चितिशक्तिमधिष्ठाय विचित्रानादिकर्मणाम्।
जनानां वासनापिण्डः स्थितः प्रकृतिरुच्यते।
फलं तु त्रिविधं यस्मात् कर्मणां सा त्रिरूपिणी।
अस्या अवस्थाभेदो हि चित्तमित्यभिधीयते'[4]॥

१. शैवपरिभाषा, पृ. ८५।
२. तत्रैव, पृ. १३१।
३. सदसं. १८४।
४. त्रिपुरारहस्यम्, १४. ७०-७१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवञ्च विमर्शशक्तिरेव सङ्कोचं गृहीत्वा माया भवति। मायैव आवरणरूपेण अज्ञानरूपेण वा अल्पज्ञतया वा परमां चितिं जीवरूपेण बहुधा वितनुते। अपि च अनाद्यविद्यया बद्धोऽयं जीवो वासनया संसरति।

शाक्तागमस्य प्रत्यभिज्ञादर्शनवदद्वैतपरता दृश्यते। जीवाः खलु पाशबद्धाः सन्तो जननमरणचक्रे भ्रमन्तीति शाक्तानामुद्घोषः—

'घृणा लज्जा भयं शङ्का जुगुप्सा चेति पञ्चमी।
कुलं शीलं तथा जातिरष्टौ पाशाः प्रकीर्तिताः।।
पाशबद्धो भवेज्जीवः पाशमुक्तः सदाशिवः'[१] ।।

शाक्तागमस्य ललामभूते ग्रन्थेऽस्मिन् त्रिपुरारहस्ये शुद्धचैतन्यस्वरूपा त्रिपुरा देवी स्वयमेव भक्तेभ्य ऋषिगणेभ्य उपदिशति—

'ममैश्वर्यन्तु ऋषयः पश्यध्वं सूक्ष्मया दृशा।
सर्वाश्रया सर्वगता चाप्यहं केवला चितिः।।
स्वमायया स्वमज्ञात्वा संसरन्ती चिरादहम्'[२] ।।

अपि च,

'आत्मैव मायया ज्ञातृज्ञानज्ञेयफलात्मना।
यावद् भाति भवेत् तावत् संसारो ह्यचलोपमः'[३] ।।

त्रिपुटीकृतं भेदं सर्वेऽप्यद्वैतिनोऽङ्गीकुर्वन्ति। तत् त्रिपुटीं विमृश्य यद् वक्ति त्रिपुरारहस्यम्, तदिह समाख्यायते—

'ज्ञाता ज्ञानं ज्ञेयमपि फलं चैकं यदा भवेत्।
तदा हि परमो मोक्षः सर्वभीतिविवर्जितः।।
ज्ञानं विकल्पसङ्कल्पहानं मौढ्यविवर्जितम्'[४] ।।

अत्रापि कर्मफलभोगाय पुनर्जन्मेति दिक्।

शाक्तानामपि न हि भोगं विहाय कश्चित् प्रवर्तत इति न्यायेन सर्वोऽपि सुखभोगाय यतते, दुःखञ्च जिहासते। जिहासाबुभुक्षयोर्मध्ये बन्धो ध्रुवं दधाति पदम्। लिप्साबुभुक्षे हि बन्धकारणम्। अतः शाक्तमुनीनां वचनम्—

---

१. योगिनीहृदयदीपिका, ७२;
२. त्रिपुरारहस्यम्, २०. ४५-४६।
३. तत्रैव, २०.७६;
४. तत्रैव, २०.६७-७०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'यथा मनोरथो बद्धः केनचिच्छत्रुणा स्वयम्।
ताड्यमानस्तर्ज्यमानो यावत् सङ्कल्पवर्जनम्॥
कुर्यात् तावत् ताडनं वा तर्जनं वापि लीयते।
किं तत्र शिष्यते बन्धस्तथात्रापि विभावय'[1]॥

अयं भावः—कोऽपि यदि शत्रुद्वारा ताडनस्य तर्जनस्य वा मनोराज्यं कुर्यात्, तदा मनोराज्यगतयोस्ताडनतर्जनयोर्न तावद् हानिर्भवति, यावत् तयोः सङ्कल्पं न जहीयात्। यथा पुनर्जन्मविषयेऽपि संसारबन्धो मनोरथरूपाणां सङ्कल्पानां कार्यं भवति। इदं मनोराज्यं मनोरथो वायं यावन्न त्यज्यते, तावद् अयमाभिलाषिको बन्धो न भवन्नपि भवत्येव। अयं च बन्धो नाद्य श्व एव केनचिन्निर्मितः, किं तर्हि, स्वसङ्कल्पनिर्मित एव। अभवन्नप्ययं बन्धः सङ्कल्पिनं पुरुषं न जहाति। अत एव जामदग्न्यं रामं सम्बोध्योक्तम्—

'कोऽयं बन्धः कथं वा स्यान्निर्मलस्य चिदात्मनः।
प्रतिबिम्बात्मकैः स्वात्मादर्शान्तःप्रविभावितैः॥
बन्धो यदि तदादर्शप्रतिबिम्बाग्निरादहेत्'[2]॥

मिथ्याप्ययं बन्धो मनोराज्येन सत्यतां लभते। तथा हि—

'एष एव महाबन्धो बन्धसत्यत्वनिश्चयः।
मृषा भीतस्य बालस्य यक्षग्रह इव स्थितः'[3]॥

अपि च सिद्धान्तः—

'बन्धस्य सत्यताबुद्धिर्मनसोऽस्तित्वनिश्चयः।
एतद् द्वयमृते नास्ति बन्धः कस्यापि कुत्रचित्'[4]॥

मिथ्यात्वं भोगलिप्सायाश्च सङ्कल्पकृतत्वं लक्षयित्वा सापेक्षभोगानां तृष्णायाः पूर्तिमेव हेमलेखां ब्रूते—

'एकमेव सुखं दुःखं कालदेशाकृतिभिदा।
जनयेदत्र तत् कस्मात् प्रतिष्ठाध्यवसायिनी'[5]॥

एवञ्च निरपेक्षतया न कोऽपि बन्धो न वा भोगः। सङ्कल्पजन्या एव बन्धा भोगाश्च। भोगा अपि व्यक्तिदेशकालसापेक्षा भवन्ति। आत्मा तु बन्धभोगाभ्यामुदासीनः कश्चन भवतीति सङ्क्षेपः।

---

१. त्रिपुरारहस्यम्, १८.१२१-१२२;　२. तत्रैव, १८.१२६-१२७।
३. तत्रैव, १८.१३४;　४. तत्रैव, १८.१२७-१२८।
५. तत्रैव, ४.१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारकाणां कर्मकरणाधिकरणानां सापेक्षा प्रतीतिर्भवति। यथा 'रामस्य बाणो रावणं जघान' इत्युक्ते बाणः कर्तृत्वं लभते। 'रामो बाणेन रावणं जघान' इत्युक्ते रामः कर्तृत्वं बाणश्च करणत्वं लभते। एवमेव बन्धमोक्षयोः सापेक्षत्वं विद्यते। उक्तरीत्या सङ्कल्पहेतुको बन्धः, बन्धहेतुकश्च सापेक्षभोगः। अनादिता च तेषां सङ्कल्पजन्यैव दृश्यते। कारकत्वञ्च नास्ति निश्चितम्, तथाप्यनादिमनोराज्यविहिते बन्धे भोगे च सङ्कल्पा एव कारकत्वं लभन्ते। पुरुषः कञ्चिद् भोगं मनोरथविषयीकृत्य कर्माणि कुर्वाणो भोगमुपादत्ते। कर्माणि भोगाय भवन्ति। भोगाश्च सुखदुःखरूपाः पुनः कर्माणि कारयन्ति। तानि कर्माणि धर्माधर्महेतुभूतानि पुनर्भोगं भाविनि जन्मनि प्रददति। एवञ्च भोगैः कर्माणि, कर्मभिश्च भोगाः परस्परं कारकत्वं हेतुत्वं वा लभन्ते। एकस्मिन् जन्मनि कर्मभोगयोः सापेक्षतां विचार्यानादिवासनाकृतानां बन्धानां भोगानाञ्च परम्पराऽवसीयते। यथा मृगमरीचिकासु जलधारा मिथ्यैव दृश्यते। मृगास्तामुद्दिश्य पिपासाशमनाय सायंकालपर्यन्तं धावन्ति। तावदेव मायाकृतेयं विचितिः प्राणिनं धावयति।

२१. निष्कर्षः

पुनर्भवस्य विचारणीयत्वे प्रथमग्रासे चार्वाकदर्शनमापतति। एते मरणमेव मुक्तिं मन्वानाः पुनर्भवं नाङ्गीकुर्वन्ति। बौद्धाः स्कन्धपञ्चकेषु मिथ्यासङ्घातभूतेषु आत्मत्वारोपेण पुनर्जन्म व्यवस्थापयन्ति। जैना अस्मिन् विषये कार्मणशरीरं स्वीकृत्य पुनर्जन्म व्याख्यान्ति। स्थूलशरीरं च ते औदारिकशरीरमित्याहुः। सुखदुःखभोगायौदारिकशरीरमेव प्रभवति। मृत्युजन्मनोर्मध्ये कार्मणशरीरं कर्मभोगाय तदनुरूपमौदारिकशरीरं लब्ध्वा प्रसरति। काणादा गौतमीयाश्च नातिवाहिकशरीरमङ्गीचक्रुः। मीमांसका अपिताननुसरन्ति। शुभाशुभकर्मणां विपाकाय मन एव तत्तद्देहान् धारयितुं क्षमत इति। सांख्यानां मतेन नातिवाहिकशरीरं विना सूक्ष्मशरीरं पुनर्जन्मने प्रभवति। इदं चातिवाहिकशरीरं मरणानन्तरं जायते स्थूलदेहं दत्त्वा च निवर्तत इति। इयमेव वेदान्तिनां सम्मतिः। पातञ्जलास्तु भोगानुकूलस्थूलशरीरग्रहणाय यावन्ति कर्माणि प्रधानतया समर्थानि भवन्ति, तेषां सङ्घातः कर्माशयरूपेण सङ्घीभवति, तेन च कर्माशयेन या योनिर्लभ्यते तत्र तदनुरूपा एव वासनाः कर्माशयेनोद्बोध्यन्ते वासनाभिश्च भोगाः प्रसरन्तीति वदन्ति। शैवाः शाक्ताश्च अविद्यायाः सङ्कोचरूपं गृहीत्वा पुनर्भवव्यवस्थां विशदीकुर्वन्ति; परन्तु सर्वेषां मतेन प्रारब्धकर्मणां भोगादेव क्षय इति सिद्धान्त इति।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतवाङ्मये सैन्यविज्ञानम्

डॉ० जनार्दनप्रसादपाण्डेयः
साहित्याध्यापकः
वी.एन. मेहता-संस्कृतमहाविद्यालये
प्रतापगढस्थे (उ.प्र.)

***

कस्यापि राष्ट्रस्य रक्षा तद्देशीयनृपतिवर्गेष्वाधारिता तिष्ठति। नृपतयश्च राज्यसञ्चालनार्थं, प्रजानां परिपालनार्थं राष्ट्रमण्डलस्य निर्माणं कुर्वन्ति। यतो हि राष्ट्रसंरक्षणं तेषां मुख्यो धर्मो भवति। राष्ट्रसंरक्षणाभावे प्रजासु स्वेच्छाचारिता वर्धते। यथोक्तं महाकविना भासेन—

गोपहीना यथा गावो विलयं यान्त्यपालिताः।
तथा नृपतिहीनाश्च विलयं यान्ति वै प्रजाः॥

(प्रतिमानाटकम्, ३।१०)

गुप्तचरव्यवस्था

राज्यसंरक्षणे गुप्तचराणां महत्त्वपूर्णं स्थानं भवति। कौटिल्यमते पापाचारान्वेषणं कुनृपतिराज्यवृत्तान्तपरिज्ञानं प्रजाक्लेशादिविषये सम्यग्ज्ञानप्राप्तिः, राज्यपालनवृत्तेरवगमनं च प्रमुखं कार्यमासीत् तदानीं गुप्तचराणाम्।

कौटिलीयार्थशास्त्रे गुप्तचराणां नव भेदाः निरूपिताः सन्ति—

१. कापटिकः, २. उदास्थितः, ३. गृहपतिकः, ४. वैदेहकः, ५. तापसः, ६. सत्री, ७. तीक्ष्णः, ८. रसदः, ९. भिक्षुकी[१]।

राज्यसुव्यवस्थाया ज्ञानं प्रजानां सुखशान्त्यादिविषये परिज्ञानं मुख्यतया गुप्तचराधीनमासीत्। प्राचीनभारतीयशासनव्यवस्थायां गुप्तचरविभागस्योपयोगिता सर्वातिशायिनी आसीत्। तेषां गुप्तचराणां सङ्घटनं, गुप्तरहस्यपरिज्ञानं च

---

१. कौटिलीयार्थशास्त्रम्, १।६।१०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुव्यवस्थितमासीत्। तत्काले राष्ट्रियराजनीतिविषयकज्ञानं गुप्तचरमाध्यमेनैव नृपतयो ज्ञातुं समर्था भवन्ति स्म।

सैनिकव्यवस्था

संस्कृतवाङ्मयानुशीलनेन ज्ञायते यद् भारतीयमनीषिभिः स्वकीयासु विविधरचनासु तत्कालिकयुद्धपद्धतिसन्दर्भे सैन्यसङ्घटनविषये, विविधायुधप्रयोगेऽपि स्वकीयविचाराः प्रकटिताः।

वेदेषु पुराणेषु स्मृतिग्रन्थेषु काव्येषु नीतिग्रन्थेषु च सैन्यव्यवस्थासन्दर्भे यत्र तत्रोल्लेखः प्राप्यते।

ऋग्वेदे आर्यसेना 'पृतना' संज्ञया अभिधीयते। तदानीं पृतनाया विभागो द्विप्रकारक एवासीत्—

१. पत्तिसेनारूपेण।

२. रथसेनारूपेण।

वन्यपशुत्वाद्धस्तिसैन्योपयोगस्तदानीं निषिद्धः। श्रीरामगोविन्दत्रिवेदि-महाशयमते रथेषु भटानामारोहणायाष्टस्थानानि भवन्ति स्म। षडश्वाश्च रथं वहन्ति स्म[1]।

पुराणकालीनसेनायां हस्त्यश्वरथपदातिसेना कर्मकरात्मकं बलमासीत्। मनुस्मृतौ षष्ठाङ्गबलस्योल्लेखः प्राप्यते[2], अष्टाङ्गबलस्योल्लेखो महाभारते शान्तिपर्वणि प्राप्यते। तत्र जलगुप्तचरक्षेत्रीयदिग्दर्शकभारवाहकसेनायाश्च समुल्लेखो वर्तते[3]। महाभारतस्योद्योगपर्वणि चिकित्साविभागस्यापि वर्णनं प्राप्यते। एषु सैन्यसमूहस्य गजसेनापेक्षया महत्त्वपूर्णं स्थानमासीत्। विराट्पर्वणि मत्स्यसेनायां ८००० रथिनः १००० गजाः, ६०,००० अश्वाश्च आसन्[4]। सैन्यविभागः पत्तिः, सेनामुखं गुल्मः, गणः, वाहिनी, पृतना, चमूः, अनीकिनी, अक्षौहिणीरूपेण चासीत्। सम्प्रति पत्त्यादिसेनासु गजरथादीनां संख्याविषये विविधाचार्याणां मतं प्रस्तूयते।

---

१. सैन्य अध्ययन, पृष्ठ २५, डॉ. बाबूराम पाण्डेय एवं प्रो. एन.डी. चौबे।

२. मनुस्मृति, ७।१८५।

३. महाभारत-शान्तिपर्व, ५९।४१ उद्धृत।

४. महाभारत-विराट्पर्व, पृ. ३८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतोक्तं पत्तिलक्षणं यथा—

एको गजो रथश्चैको नराः पञ्च पदातयः।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते।। इति।

यद्वा—

एको हस्ती एकश्च रथवरस्त्रय एव च तुरङ्गाः।
पञ्चैव च पदातय एषा पत्तिर्ज्ञातव्या।। इति।

अक्षौहिणीप्रमाणं यथा—

अक्षौहिण्यामित्यधिकैः सप्तत्या ह्यष्टभिः शतैः।
संयुक्तानि सहस्राणि गजानामेकविशतिः।। (२१८७० गजाः)
एवमेव तु संख्यानं रथानां कीर्तितं बुधैः।।
पञ्चषष्टिसहस्राणि षट् शतानि दशैव तु।। (२१८७० रथाः)
संख्यातास्तुरगास्तज्ज्ञैर्विना रथतुरङ्गमैः।।
(६५६१० अश्वा रथाश्वान् विना)
नृणां शतसहस्राणि सहस्रेण तथा नव।
शतानि त्रीणि चान्यानि पञ्चाशच्च पदातयः।।
(१०९३५० पदातयः) इति।

भारतेऽक्षौहिणीमानं यथा—

अक्षौहिण्याः प्रमाणन्तु खाङ्गाष्टैकद्विकैर्गजैः।
रथैरेतैर्हयैस्त्रिघ्नैः पञ्चघ्नैश्च पदातिभिः।। इति।

'अङ्कानां वामतो गतिः' इत्यभियुक्तोक्तेः २१८७० गजाः, इयन्मिता एव रथाश्च, एतत्त्रिगुणिताः (२१८७० × ३ = ६५६१०) अश्वाः, गजसंख्या-पञ्चगुणिताः (२१८७० × ५ = १०९३५०) पदातय इति भारताशयः। हेमचन्द्राचार्यैरप्यक्षौहिणीमानं पूर्वोक्तसंख्याक्रमेणैवाङ्गीकृतम्; किन्तु पत्त्यादिक्रमो भिन्नस्तद्यथा—

एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका।
सेना सेनामुखं गुल्मो वाहिनी पृतना चमूः।।
अनीकिनी च पत्तेः स्यादिभाद्यैस्त्रिगुणैः क्रमात्।
दशानीकिन्यक्षौहिणी..............................।।
इत्यभिधानचिन्तामणिः, ३।४१२-४१३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भानुजिदीक्षितमतमेवात्र समीचीनं यद्वा 'अक्षौहिण्या......पदातयः' स्वटीकायां प्रमाणत्वेनोपन्यस्तसार्द्धत्रयश्लोकविरोधेन वदतोव्याघातात्, भारतहेमचन्द्राचार्योक्तिविरोधाच्च। महाक्षौहिणीप्रमाणं यथा—

खद्वयं निधिवेदाक्षिचन्द्राक्ष्यग्निहिमांशुभिः।
महाक्षौहिणिका प्रोक्ता संख्यागणितकोविदैः।। इति।

चम्पूरामायणे 'अलक्षत स.....' (युद्धकाण्डे, श्लो. ७९) इत्यस्यानन्तरं 'तत्क्षण......यातुधानपतिः' इति गद्यस्य टीकायां लिखितमक्षौहिणीप्रमाणमन्यदेव, तद्यथा—

'प्रयुतं नवसाहस्रं पञ्चाशत्त्रिशतं भटाः।
पदातं षष्टिसाहस्रं षट्छती दश वाजिनः।।
एकविंशतिसाहस्रं शतानामेकसप्ततिः।
द्विरदाः स्यन्दना यत्र साक्षौहिण्युच्यते बुधैः।। इति।

मङ्गलकोषे त्वेवमुक्तम्[1] —

नवनागसहस्राणि नागे नागे शतं रथाः।
रथे रथे शतं चाश्वा अश्वे अश्वे शतं नराः।। इति।

सेनाध्यक्षो राजाज्ञया युद्धकार्यं सम्पादयति स्म। सेनायाः श्रेष्ठतमोऽधिकारी अक्षौहिणीसेनापतिपदेन ज्ञायते स्म। महाभारतेऽर्जुनद्रुपदविराटधृष्टद्युम्नशिखण्डि-सात्यकिभीष्मपितामहादयः पृथक्पृथगक्षौहिणीपतय आसन्। सकलनिष्कर्षोऽत्र चक्रे द्रष्टव्यः—

पत्त्यादिसेनाविशेषे गजरथादिसंख्याबोधकचक्रम्[2]

क्रमिकसंख्या	हैमोक्तसेना-विशेषसंज्ञाः	अमरोक्तसेना-विशेषसंज्ञाः	गजसंख्या	रथसंख्या	अश्वसंख्या (रथाश्वान् विहाय)	पदातिसंख्या	सर्वसङ्कलनम्
१.	पत्तिः	पत्तिः	१	१	३	५	१०
२.	सेना	सेनामुखम्	३	३	९	१५	३०
३.	सेनामुखम्	गुल्मः	९	९	२७	४५	९०

१. अमरकोष-मणिप्रभा-टिप्पणी, पृ. २९२-९३।
२. अमरकोष-मणिप्रभा-टिप्पणी, पृ. २९४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४.	गुल्मः	गणः	२७	२७	८१	१३४	२७०
५.	वाहिनी	वाहिनी	८१	८१	२४३	४०५	८१०
६.	पृतना	पृतना	२४३	२४३	७२९	१२१५	२४३०
७.	चमूः	चमूः	७२९	७२९	२१८७	३६४५	७२९०
८.	अनीकिनी	अनीकिनी	२१८७	२१८७	६५६१	१०९३४	२१८७०
९.	*	दशानीकिनी (महेश्वर-मतेनेदम्)	६५६१	६५६१	१९६८३	३२८०५	६५६१०
१०.	*	अक्षौहिणी (महेश्वर-मतेनेदम्)	१९६८३	१९६८३	५९०४९	९८४१५	१९६८३०
११.	अक्षौहिणी	अक्षौहिणी (भानुजि-दीक्षितमतेनेदम्)	२१८७०	२१८७०	६५६१०	१०९३५०	२१८७००
१२.	*	महाक्षौहिणी (महेश्वर-व्याख्योक्ता)	१३२१२४९०	१३२१२४९०	३९६३७४७०	६६०६२४५०	१३२१२४९००

प्रशिक्षणव्यवस्था

महाकाव्यकाले पुराणकाले वा सैनिकप्रशिक्षणविषयेऽप्युल्लेखः प्राप्यते। तदानीमाश्रमेषु शिक्षाकेन्द्रस्य व्यवस्थासीत्। महाभारते आदिपर्वणि एकस्य विश्वविद्यालयस्योल्लेखो वर्तते। यस्तु नगराद्दूरे वने स्थापितः। यत्र समागत्य नवयुवका अन्यविषयैः सह सैन्यविज्ञानस्यापि शिक्षां गृहीतवन्तः। क्षत्रियबालकानां कृते सैन्यप्रशिक्षणस्य नियमः प्रचलितः।

रामायणकालस्य श्रीरामो महाभारतकालस्याभिमन्युः प्रमाणत्वेन मन्यते। सैन्यशिक्षकाचार्यरूपेण विश्वामित्रस्य द्रोणाचार्यस्य वा नामोल्लेखः कर्तुं शक्यते। युद्धक्षेत्रे विविधप्रकारैः सेना सज्जीकृत्य व्यूहाकारेण युद्धाय प्रेष्यते स्म। मनुस्मृतौ भयसमये खड्गव्यूहपार्श्वव्यूहवाराहव्यूहगरुडव्यूहमयूरव्यूहादिविविधव्यूहानां वर्णनं वर्तते। अभिमुखे समुपस्थिते भये सूचीमुखव्यूहसेनायाः प्रस्थानस्य नियम आसीत्।[1]

१. रथसेनापदातिसेनाश्वसेनानां कृते उत्तमभूमेरावश्यकता भवति।

२. १. शत्रुः, २. मित्रम्, ३. शत्रोर्मित्रम्, ४. मित्रस्य मित्रम्, ५. शत्रोर्मित्रस्य मित्रम्, एते पञ्च सेनायामग्रगामिनो भवन्ति। उक्तञ्च—

---

१. मनुस्मृतिः, ७।१८८।१९१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अरिमित्रमरेर्मित्रं मित्रामित्रमतः परम्।
तथारिमित्रमित्रं च विजिगीषोः पुरस्सराः।।
(शिशुपालवधम्-२।८१ मल्लिनाथटीका)

३. पार्ष्णिग्राहः, आक्रन्दः, पार्ष्णिग्राहसारः, आक्रन्दसारश्च। एते चत्वारो विजिगीषोर्नृपस्य पृष्ठभागानुवर्तिनो भूत्वा साहाय्यमाचरन्ति। यथोक्तम्—

पार्ष्णिग्राहस्तु तत्पश्चादाक्रन्दस्तदनन्तरम्।
आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः।।
(शिशुपालवधम्-२।८१ मल्लिनाथटीका)

४. उदासीनस्तु मण्डलाद् बहिर्भवति। मण्डलाद्बहिरेतेषामुदासीनो बलाधिकः।
(शिशुपालवधम्-२।८१ मल्लिनाथटीका)

अर्थशास्त्रे १०।१५८,१५९।१३४ स्कन्धावारसुरक्षाविषयेऽपि विचारः कृतः।

१. स्कन्धावारस्य निकटे सैन्यसंरक्षणार्थं परिखादीनां व्यवस्था।
२. स्कन्धावारस्य निकटे जलाशयस्य व्यवस्था।
३. स्कन्धावारस्य समीपे शासकीयकार्यालयादीनां व्यवस्था।
४. मौलभृतकगजाश्वसेनादीनां व्यवस्था।
५. स्कन्धावाराद् बहिर्मित्रबलानां व्यवस्था।
६. स्कन्धावाराद् बहिः अमित्रबलानामापणानां व्यवस्था।
७. स्कन्धावारस्य निकटे प्रहरीणां व्यवस्था तदानीं प्रचलिताऽऽसीत्।
८. विजिगीषुर्दशमः।
९. मध्यमस्तूभयोर्वधे समर्थो भवति, यथा—

अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः।
अनुग्रहग्रहे संहतयोः समर्थो व्यस्तयोर्वधे।।
(शिशुपालवधम्-२।८१ मल्लिनाथटीका)

युद्धव्यवस्था

महाभारतकाले काव्यकाले च युद्धस्य प्रयोजनं यशःप्राप्तिः, स्त्रीहरणं, भूमिहरणं, सम्पत्तिहरणं वाऽऽसीत्। यशसे विजिगीषा तत्कालीनक्षत्रियाणां मुख्यो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्म आसीत्।[1] रावणः सीताहरणं चकार। श्रीकृष्णो रुक्मिणीहरणं कृतवान्। कौरवपाण्डवानां युद्धं भूम्यर्थमेव जातम्। काव्यकाले, पुराणकाले च युद्धस्य केचन नियमा निर्धारिता आसन्[2]।

१. अधीनतास्वीकारे युद्धविरामः।
२. कवचधारिणा सह कवचधारिणां युद्धं भवति, न तु कवचहीनेन।
३. पदातिभिः सह पदातियुद्धम्।
४. रथिभिः सह रथिकानां युद्धम्।
५. विषयुक्ताः शङ्कुयुक्ताश्च बाणा निषिद्धा आसन्।
६. युद्धविमुखाः पददलिता दर्शकाश्च अवध्या आसन्।
७. शरणागतानां कृते अभयदानम्।
८. शस्त्रहीनेषु, ब्राह्मणेषु, स्त्रीषु च शस्त्रप्रहारो वर्जित आसीत्।
९. रुग्णेषु कारागारस्थेषु शस्त्रपीडितेषु जनेषु च सद्व्यवहार आवश्यक आसीत्।
१०. सूर्योदयेन सह युद्धारम्भः, सूर्यास्तेन सह विरामः।
११. कटितोऽधोभागे प्रहारो वर्जितः।
१२. नृपाणां युद्धं नृपतिभिः सहैव भवति स्म।
१३. सुप्तं, नग्नं, निरायुधम्, अयुध्यमानं, प्रेक्षकम्, अन्येन सह युध्यमानं च न हन्यात्।[3]
१४. स्वयं रथस्थो रथं त्यक्त्वा स्थलारूढं न हन्यात्।[4]
१५. भग्नखड्गाद्यायुधं, पुत्रशोकादिनार्तं, बहुप्रहाराकुलं, भीतं, युद्धपराङ्मुखं, शिष्टक्षत्रियाणां धर्मं स्मरन् न हन्यात्।[5]
१६. कूटयुद्धनिषेधस्यापि व्यवस्था तदानीं प्रचलिता आसीत्। कूटान्यायुधानि बहिः काष्ठादिमयान्यन्तर्गुप्तनिशितशस्त्राण्येतैः समरे युध्यमानः शत्रुं न हन्यात्। नापि कर्ष्याकारफलकैर्बाणैः, नापि विषाक्तैः, नापि अग्निदीप्तफलकैर्वा हन्यात्।[6]

---

१. रघुवंशमहाकाव्यम्, प्रथमः सर्गः; २. मनुस्मृतिः, ७।९०।
३. तत्रैव, ७।९१; ४. तत्रैव, ७।९२।
५. तत्रैव, ७।९३; ६. तत्रैव, ७।९४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सैन्यसन्धिव्यवस्था

कौटिलीयार्थशास्त्रे सैन्यसन्धिसन्दर्भेऽपि विचार: कृत:। सन्धिरयं मुख्यरूपेण चतुर्धा भवति—

१. मित्रसन्धि:।

२. हिरण्यसन्धि:।

३. भूमिसन्धि:।

४. अनवसितसन्धि:।

इत्थं मित्रहिरण्यभूमिकर्मरूपेण चतुर्धा सन्धिप्रकार: प्रदर्शित:।[१]

१. यस्तु चञ्चलप्रकृतिर्भवति तेन सार्धमर्थदानेन कालक्षेप: करणीय:, अवसरे सति सन्धिभङ्ग: कार्य:।

२. धूर्तमित्रं कपटेन हन्यात्।

३. उदासीनमित्रेण सामन्तै: सह विरोध: कार्य:।

४. दुर्बलं मित्रं सैन्यसाहाय्यप्रदानेन उपकर्तव्यम्।

५. यस्तु विजिगीषोर्नृपस्यापकारं चिन्तयति तन्मित्रं विश्वस्याङ्कमुपस्थितम् उच्छिद्यादेव।

६. विजिगीषोर्नृपस्य शत्रुर्यदि विजिगीषोर्मित्रमापद्ग्रस्तमेवावगत्य साहाय्यं करोति, तर्हि व्यसने नष्टे सति तेनैव मित्रेण सह विजिगीषो: शत्रुर्वशे करणीय:।

७. विजिगीषोर्नृपस्य कृते वृद्धि:, क्षयं, स्थानं, कर्षणम्, उच्छेदनं तथा सामाद्युपायप्रयोगे अवधानमावश्यकम्।

८. यो नृपोऽन्योन्यसञ्चारं षाड्गुण्यमनुपश्यति, स बुद्धिनिगडैर्बद्धै: पार्थिवै: सह स्वेच्छया क्रीडति।[२]

९. वेणीसंहारनाटके भूमिविषयकसन्धिसमुल्लेख: प्राप्यते।[३]

१०. महाकविना माघेनोक्तं यद् उपकर्त्रारिणा सन्धिर्न कार्य:।[४]

महाकविभारवे: कथनमस्ति यत्—आत्मोत्कर्षकाले सन्धिर्न कार्य:, विहित-सन्धावपि दोषारोपणं विधाय सन्धिरस्वीकरणीय:।

---

१. कौटिलीयार्थशास्त्रम् ९।१२ प्रकरणम् ११६, पृ. २९२-३१९।
२. कौटिलीयार्थशास्त्रम्, अधिकरणम् ७, प्रकरणम् १२४-१२६, अध्याय: १८, पृ. ५४९-५५० एवं श्रीवाचस्पतिगैरोला।
३. वेणीसंहारनाटकम्, १।१६; ४. शिशुपालवधम्, २।३७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतोऽस्माभिर्वक्तुं शक्यते यद् देशकालादिविषये सम्यक् परिज्ञानं विधाय सन्धिः करणीयोऽस्वीकरणीयो वा। क्वचित् पुरुषसन्धिरपि भवति यथा सेनापतिकुमारलक्षणपुरुषविशेषार्पणेन शत्रुसाधनात्। अयमेव सन्धिरात्मरक्षण इत्यप्युच्यते। अयं सन्धिः पुरुषान्तरनामधेयः[1]।

शस्त्रव्यवस्था

प्राचीनसंस्कृतग्रन्थेषु शस्त्र-व्यवस्था-विषयकसमुल्लेखः प्राप्यते।

वैशम्पायनेन नीतिप्रकाशिकायामा[3]युधानां वर्गीकरणं चतुर्धा कृतम्।

मुक्तायुधानि—शक्तयः, भिन्दिपालाः, दुघ्नं, चक्रं, तोमरः, नालिकम्, लगुडम्, पाशाश्च।

अमुक्तायुधानि—वज्रः, परशुः, गदा, असिधनुः, कुन्तः, खड्गः, प्रासः, पिनाकः, मुद्गरः, पट्टिशं, परिघा च।

मुक्तामुक्तायुधानि—नालीकं धनुः, बाणः, कृपाणः, कुन्तकाः।

मन्त्रप्रयुक्तायुधानि—ब्रह्मास्त्रं नारायणास्त्रं बाणास्त्रम्। महामतिना कौटिल्येन गत्याकृतिरूपेणापि शस्त्राणां वर्गीकरणं कृतम्।

कौटिल्यमते शस्त्राणि

सर्वतोभद्रजामदग्न्यबाहुमुखविश्वासघातिसङ्घाटीयानकपर्जन्यकबाहूर्ध्वबाह्वर्ध-बाहूनि स्थितयन्त्राणि।[2]

चलयन्त्राणि

पञ्चालिक-देवदण्डसूकरिका-मूसलयष्टि-हस्तिवारक-तालवृन्त-मुद्गर-द्रुघण-गदा-स्पृक्त-कुद्दालास्फोटिमोद्घाटिमोत्पाटिम-शतघ्नी-त्रिशूल-चक्राणि चलयन्त्राणि।[3]

आकृतिमूलकयन्त्राणि

शक्तिप्रासकुन्तहाटकभिण्डिपालशूलतोमरवराहकर्णककणपकर्पणत्रासिकादीनि च हलमुखानि[4]।

---

१. किरातर्जुनीयम्, १।४५।
२. कौटिलीयार्थशास्त्रम्, अधिकरणम् ७, प्रकरणम्, १०१-१०२।
३. नीतिप्रकाशिका, अध्यायः ३ तथा ४, डॉ. बाबूरामपाण्डेयः, बी.एन.डी. चौबे, पृ. ७४।
४. अर्थशास्त्रम् २।३४।१८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बेणीसंहारे (१।२१) गदासञ्चालनविषयेऽपि उल्लेखो वर्तते। रघुवंशमहाकाव्ये (३।५६-५७, ५९) पक्षिपक्षसन्नद्धबाणप्रयोगविषये उल्लेखो वर्तते। यत्र शङ्कुसदृशा भल्लसदृशा अर्धचन्द्राकाराश्च बाणा वर्णिताः सन्ति।

सुरक्षायन्त्राणि

लोहजाललोहजालिकापट्टकवचसूत्रकङ्कटशिंशुमारकखड्गधेनुकहस्तिगोचर्मखुर-शृङ्गसङ्घातवर्माणि। शिरस्त्राणकण्ठत्राणकूर्पासकञ्चुकवारबाणपट्टनागौरिका।

इत्थं विवेचनेन ज्ञायते यत् संस्कृतवाङ्मये शत्रुवधोपयोगिनां शस्त्राणामुल्लेखस्तु प्राप्यत एव; किन्त्वात्मसुरक्षादृष्ट्याऽपि शरीररक्षार्थं यन्त्राणां वर्णनं प्राचुर्येणोपलभ्यते।

शोधपत्रसर्वेक्षणेन ज्ञायते यत् संस्कृतवाङ्मये सैन्यविज्ञानसम्बन्धिनो विषयाः प्रचुरमात्रायां वर्णिताः सन्ति। तत्र हि राजमण्डलनिर्माणविषये, गुप्तचरविषये, दूतसम्प्रेषणविषये, सैनिकनियुक्तिविषये, प्रशिक्षणविषये, युद्धव्यवस्थाविषये, सन्धिविग्रहादिविषय उल्लेखः प्राप्यत एवेति दिक्।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूतकाव्यविमर्शः

डॉ० कमलेशझाः
व्याख्याता, साहित्यस्य
रानीपद्मावती-तारा-योगतन्त्र-आदर्शसंस्कृतमहाविद्यालये
इन्द्रपुरम्, शिवपुरम्, वाराणसी

***

दूतकाव्यस्योत्पत्तिः

उपलभ्यमानेषु दूतकाव्येषु कालिदासकृतं मेघदूतमेव प्राचीनतमं रचनापटुतया प्रधानतममेव पदमध्यास्ते सुरभारत्यामिति तु निर्विवादमेव। महाकविना कालिदासेन चेदृशकाव्यनिर्माणकल्पना स्वयमेव उद्भाविता पुराणादिषूपवर्णितादाख्यानाद् ग्रन्थान्तराद् वा समधिगता इत्यत्र विषये न किमपि पार्यते प्रतिपादयितुं निःसंशयम्। परं कालिदासात् प्राक्तनेऽपि काले अचेतनानां दूतत्वं कल्पितमेव। तथा च ऋग्वेदे पणीनां सविधे कुक्कुररूपायाः सरमाया दूतीरूपेण प्रेषणमुपनिबद्धम्। श्रूयते नागार्जुनग्रन्थस्य कस्यचित् चैनिकभाषायामनुवादकर्ता Hsii Kan नामधेयः चैनिककविः ख्रिष्टीयद्वितीयशताब्द्यामेव मेघस्य दूतत्वं कल्पयामास। कामविलापसंज्ञके च बौद्धजातके कामिना केनचित् काकस्य चेतनावतोऽपि अज्ञानस्य दूतत्वमङ्गीकृतम्। वाचकानां सुखावबोधाय तज्जातकं निखिलमेवात्रोद्ध्रियते—

कामविलापजातकम्

तं पण पुरिसं जीवसूत्रे उत्तासेसुं। सो तत्थ णिसिन्नो गच्छन्तं काकं दिस्वा ताव खरं पितं वेदणं अगणेत्वा पियमरियाय सासणं पेसेतुं काकं आमन्तेन्तो इमा गाथा आहा—

उच्चे सकुल ओमाण पत्रयाण विहङ्गम।
व्रजसि खो त्वं वामुरुं चिरं खो सा करिस्सति॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदं खो सा न जाणाति असिं अतिञ च ओड्डितं।
सा चण्डी काहति क्रोधं तम्मे तपति नो इध॥

एस उप्पल सण्णाहो णिकरवं उस्मीसके कतं।
कास्रियञ् च मुदुं वत्थं तप्पतु घणकामिया॥

महाभारते च नलसकाशादागतं राजहंसं दमयन्ती नलं सविधे प्रेषितवतीति उपवर्णितम्। रामायणे च रामेण सीतान्तिके दूतस्य हनुमतः प्रेषणं समुपनिबद्धम्। एतावता प्रतिभाति यथा कालिदासात् पूर्वमपि केचन चेतनावतां जन्तूनामचेतनानां •वा वस्तूनां दूतत्वं कल्पितवन्तः। एतेभ्य एव कालिदासेन दूतकाव्यप्रणयनप्रवृत्तिरासादितो न वेति न प्रतिपादयितुमीशाः केऽपि। परं सीतां प्रति रामस्य हनुमत्सन्देशं मनसि निधाय मेघसन्देशं कविः कृतवान् इत्याहुरिति मल्लिनाथेन मेघदूताद्यश्लोकीयटीकायामुपन्यस्तमिति हनुमतो दौत्यमेव मेघदूतत्वकल्पने निदानमिति प्राचीनानां मतमिति स्फुटम्। 'इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा' इति मेघदूतवचनमप्येतदेव मतमनुकूलयतीवेति प्रतीयते। परं तत्र हनुमतो मानवस्येव ज्ञानवत्तादीनामुपवर्णनात्, महाभारते च हंसस्य तथात्वप्रतिपादनात् काव्यरसासद्भावतया जातकवृत्तान्ततः चैनिककविकृतितोऽपि वा कालिदासेन दृश्यकाव्यनिर्माणधारणाधिगता भवेदिति प्रतिभाति। परमेतदपि नासम्भवि यथा—कविवरेण स्वत एव समुद्भावितमेतदिति। यथा तथा वा भवतु कालिदासीयमेव वस्तु सर्वेभ्योऽपि रामायणादिगतदृश्यवस्तुभ्यो रमणीयकत्वादिना परमं स्थानमधिकुर्वद् विराजत इत्यत्र न संशयो लेशतोऽपि पदं करोति।

श्रीमद्भागवते दशमस्कन्धे सप्तचत्वारिंशत्तमेऽध्याये समुपवर्णितमुद्धवस्य दौत्यं द्विपञ्चाशत्तमे चाध्याये समुपन्यस्तस्य वृद्धद्विजस्य दौत्यं शृङ्गाररसविषयकमपि कालिदासकाव्यात् प्राचीनं कालिदासानुकरणजन्यं वेत्यत्र महानेव समुल्लसति संशयः सुमनसां मानसपटे। एतच्चात्रावधेयं यथा दूतकाव्यमूलभूतानामिव प्राचीनप्राचीनानां रामायणमहाभारतोपवर्णितानां रामदमयन्तीप्रेषितानां हनुमद्धंसानां दौत्यमुपाश्रित्य न केनाप्यर्वाचीनेन कविना दूतकाव्यं किञ्चिदपि ग्रथितमस्माभिरिदानीमप्युपलब्धम्। विषयान्तराणामितरेषां बहूनामपि दूतकाव्यावलम्बनभूतत्वे ईदृशानां रमणीयविषयाणामुपेक्षणीयत्वे न कारणं किमप्युत्पश्यामः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालिदासानुकृतिः

यथा तथा वा भवतु, एवन्तु निश्चिततयैव प्रतीयते यथा कालिदासेनैव महाकविचूडामणिना सुरभारत्यां दूतकाव्यप्रणयनं प्रवर्तितमादाविति। एतदपि च निर्विवादं यथा कालिदासादनन्तरं बहुभिरेव सुरसरस्वतीनन्दनैः कविवरैरीदृश-काव्यस्य चमत्कारिव्यतिरेकमुपलभमानैरनेकधा कालिदासानुकृतिमुखेन दूतकाव्यानि विविधानि विरचितानीति। तेषु चार्वाचीनेषु वस्तुषु कालिदासानुकरणस्यानुभूय-मानत्वेऽपि बहुत्रैव कवित्वमाधुर्यं महदेव विलसतीति निःशङ्कं वचः। कालिदासानुकृतिषु चोपलभ्यमानेषु धोयीककविराजविरचितं पवनदूतमेव प्राचीनतममिति प्रतिभाति। परमासाद्यमानानामपि बहूनामेव दूतकाव्यानां कालस्यानिर्णीतत्वान्नैतद् दाढ्र्येन प्रतिपादयितुमीशा वयम्।

सुप्राचीनालङ्कारिकभामहकृते च ग्रन्थे भ्रमरादीनामचेतनानां दूतत्वकल्पनमयुक्तमिति समुल्लिखितत्वाद् धोयितः प्राक्तनेऽपि काले कालिदासानुकृतिरूपाणि दूतकाव्यान्यासन् इति निश्चितमनुमातुं प्रभवामः। तथा च भामहवाक्यम्—

अयुक्तिमद् यथा दूता जलभृन्मारुतेन्दवः।
तथा भ्रमरहारीतचक्रवाकशुकादयः।।

अवाचोऽव्यक्तवाचश्च दूरदेशविचारिणः।
कथं दूत्यं प्रपद्येरन्निति युक्त्या न युज्यते।।

यदि चोत्कण्ठया यत्तदुन्मत्त इव भाषते।
तथा भवतु भूम्नेदं सुमेधोभिः प्रयुज्यते।।

(भामहालङ्कारे, १।४२-४४)

पण्डितवर्येण कीथमहोदयेनोक्तं (क्लासिकल संस्कृत लिटरेचर, षट्त्रिंशत्पृष्ठे) यथा—वत्सभट्टिनैवादावनुकृतं मेघदूतमिति तत्तु भ्रमर-विजृम्भितमित्यनुमीयते, वत्सभट्टिरचिते केवलकृतौ दशपुरशासने ॠतुसंहारस्यैव सादृश्योपलम्भात्। चित्रमेतदद्रष्टव्यं यथार्वाचीनैः कविभिर्न केवलं कालिदास-भावभाषाविषयाणामेवानुकरणं कृतं परं कालिदासप्रयुक्तं छन्दोऽपि तैः परिगृहीतम्। तथा च दूतकाव्येषु प्रायेण सर्वेष्वेव कालिदासमेघदूते इव मन्दाक्रान्ताच्छन्द एव प्रयुज्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूतकाव्यपरिणतिः

निखिलमेव वस्तुजातमिह जगत्यां कालसहकारेण यथा कथञ्चित् परिवर्तनादिकं भजत्येवेति सामान्यो नियमः। न चास्य नियमस्य व्यतिक्रमो लेशतोऽपि कश्चिद् दूतकाव्यविषयेऽनुभूयते। तथा च कालक्रमेण कालिदासानुकृतिष्वपि दूतकाव्येषु परिवर्तनादिकं पदं कृतवदेव। एतच्च दूतकाव्यगतरसविषयादिषु सर्वत्रैव समुपलभ्यते। एवञ्च प्राचीनेषु दूतकाव्येषु मेघपवनादीनामचेतनानामपि गतिमतां वस्तूनां दूतत्वपरिकल्पनं ततश्च चेतनावतामप्यविज्ञातमानवभावानां शुकचातकादीनां दूतत्वनिरूपणमनन्तरञ्च दौत्यकर्मकुशलस्य मानुषस्यैव दूतरूपेण दयितानामन्तिके प्रेषणम् (यथोद्धवदूतादौ), क्रमेण च भक्तिप्रभृतीनां गुणानामपि दूतत्वं सम्पादितं भक्तिदूतादौ। इत्येवं दूतनिश्चयविधौ कालेन दूतकाव्यकृतां कविवराणां साधारणानामुपयोगितया धर्ममतप्रकटनरूपाभिलाषविशेषो दूतकाव्यपरिणतिविधौ महत् साहाय्यं समपादयत्। अपरञ्च प्राचीनेषु दूतकाव्येषु प्रधानतया विलसतो विप्रलम्भशृङ्गारस्य स्थले दूतकाव्यद्वारा 'शिवेतरक्षतिं' सम्पादयितुकामैर्जनानां धर्मोत्कर्षं विधातुकामैः कविमुख्यैः क्रमेण शान्तस्यैव रसस्य प्राधान्यमुपपादितम्। एतच्च अदूतकाव्येऽपि जिनसेनकृतौ पार्श्वाभ्युदये आदावुपलभामहे।

मनोदूतभक्तिदूतादौ चैतस्य दरीदृश्यते पूर्णा परिणतिः। तथा च क्रमेण भक्तिदूतादौ दूतकाव्यव्याजेन मानसोत्कर्षविधायकानां गुणविशेषाणामेवालोचनं कृतमित्यहो चिन्तापरिणतिः शृङ्गाररसात्मकस्य शृङ्गाराङ्गीभूतदूतप्रेषणप्रधानस्य दूतकाव्यस्य।

एवं दूतकाव्यपरिणतिविधौ जैनकवीनां साहाय्यं सर्वथैवाङ्गीकर्तव्यम्। दूतकाव्यद्वारा धर्मोत्कर्षसम्पादनवासना तेषामेव ग्रन्थेषु पार्श्वाभ्युदयनेमिदूतादिषु प्रथमतः प्रकटीभवति। अपरञ्च दूतकाव्यप्रणयनविधौ यन्नाम रचनापाटवं तैः प्रदर्शितं तत्तु नितरामेव विस्मयपदम्। प्रथमतस्तावद् यथा पार्श्वाभ्युदये पार्श्वनाथ-चरित्रोपवर्णनात्मके ग्रन्थे निखिलमेव मेघदूतमन्तर्भवति तत्तूक्तपूर्वमेव।

नेमिदूताख्ये च नेमिनाथचरित्रोपवर्णनात्मके जैनकविप्रणीते दूतकाव्यान्तरे प्रतिश्लोकं मेघदूतगतप्रतिश्लोकान्तिमपाद एवान्तिमपादरूपेण प्रयुक्त इति यत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यमनन्यसामान्यं पाटवं विक्रमाख्यस्य कविमहत्तमस्य। विषये चास्य नेमिदूतश्लोकात् कञ्चिदुद्धृत्य स्फुटतां विधास्यामः। तद्यथा—

प्राणित्राणप्रवणहृदयो बन्धुवर्गं समग्रं
हित्वा भोगान् सह परिजनैरुग्रसेनात्मजां च।
श्रीमान् नेमिर्विषयविमुखो मोक्षकामश्चकार
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥

अन्येषु च द्वित्रेषु जैनकाव्येषु एषैव रीतिरनुसृतोपलभ्यते।

दूतकाव्यवैशिष्ट्यम्

सम्यगालोचितेषु समुपलभ्यमानेषु दूतकाव्येषु प्रतिभायाद् यथा—एतेष्वधिकान्येव रामकृष्णराधाप्रभृतीनि हिन्दुपुराणोपवर्णितचरित्राणि नेमिप्रभृतीनि जिनपुराणोपवर्णितचरित्राणि चालम्ब्यैवोपनिबद्धानि। ऐतिहासिकं काल्पनिकं वा पुरुषविशेषमालम्ब्य विरचितानीदृशकाव्यानि अल्पीयांसि एव पवनदूतादीनि समुपलब्धानि। विप्रलम्भशृङ्गार एव चैतेषु प्रायेण सर्वेष्वेवाङ्गीरसः, केवलं नेमिदूतादिषु केषुचिद् अर्वाचीनेषु शान्त एव रसः प्राधान्येन प्रविलसति। शृङ्गाररसस्य च आदितः प्राधान्याद् ईदृशेषु काव्येषु। नैतच्चित्रं यथा कृष्णगोपीलीलामधिकृत्यैव बहुभिरीदृशकाव्यनिर्माणप्रवृत्तिः सफलतां गमिता। वैशिष्ट्यञ्चैतद् दूतकाव्यगतमवधेयं यथा छन्दोऽन्तरं विहाय प्रायेण सर्वैरिव दूतकाव्यविरचकैर्मन्दाक्रान्ता एव समाश्रिता। इदञ्च नाम छन्दो विषयाणामीदृशानामुपवर्णने परमोपयोगीति आदौ प्रयुक्तं कालिदासेन, अर्वाचीनैः कविवरैरपि प्रायेण सर्वैरिव च्छन्दोऽन्तरमनादृत्य स्वस्वग्रन्थेषु एतस्यैव विनियोगः कृत इति प्रतिभाति। यच्च कालिदासादिभिश्चेतनानां दूतत्वमनङ्गीकृत्य अचेतना एव दूतरूपेण दयितसविधे प्रेषिताः, तदेव च वैशिष्ट्यं रमणीयकत्व-मतितरामातनोति दूतकाव्यानाम्।

न हि दूतत्वेन पुरुषान् चेतनाज्ञानवतोऽपि कल्पयतामर्वाचीनानां काव्यानि तथा रसिकानां चेतांसि समाक्रष्टुं प्रभवन्ति, यथा कालिदासादीनामचेतन-दूतप्रेषणविषयाणि काव्यानीति सर्व एवाङ्गीकुर्युः सुधियः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूतगन्तव्यमार्गस्योपवर्णनमपरं महद्वैशिष्ट्यं दूतकाव्यानामेतद्वर्णनस्य अर्वाचीनग्रन्थेषु सम्यगनङ्गीकृतत्वेऽपि। एतद्वर्णनञ्च भारतीयप्रदेशनगरादीनां प्राचीनसंस्थाननिर्णयोपयोगीति दूतकाव्यालोचनविषये प्रत्नतत्त्वान्वेषणदत्तमनसां विदुषां चेतः स्वत एवाभिमुखीभवति। तथा च दूतकाव्यरसादीनामास्वादनव्यग्राः प्रत्नतत्त्वानुशीलनपरा रसिका भौगोलिकवृत्तसङ्कलनाय द्विगुणोत्साहा दूतकाव्यालोचने प्रवर्तेरन्निति।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

५७ वर्षे	मार्गशीर्ष-फाल्गुन-पूर्णिमे, वि.सं. २०५९	३-४ अङ्कौ

पण्डितराजजगन्नाथकाव्ये राष्ट्रियभावना

प्रो. 'अभिराज' - राजेन्द्रमिश्रः

कुलपतिः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

वाराणसी

* * *

राजाश्रितकविर्निसर्गादेव राष्ट्रकविर्भवति यतो हि स्वाश्रयभूतनरपतेः साम्राज्यसौराज्यवर्णनसन्दर्भैरसौ निखिलमपि राष्ट्रं तत्रशासनक्षेत्रभूतं यथाकथञ्चित् स्वकाव्यविषयीकरोत्येव। साहितीसूत्रधाराणां पण्डितराजश्रीजगन्नाथचरणानां सन्दर्भे पुनः सत्यमिदं सविशेषं चरितार्थतामेति यतो हि नासावासीत् कस्य-चित्साधारणभूपतेः कृपाकाङ्क्षी। तस्य संरक्षक आसीन्मुगलराजवंशोत्पलभास्करो विद्याविनयसम्पन्नः साहित्यसङ्गीतकलापक्षधरो जहाँगीरतनयश्शाहजहाँनो यः किल आकाश्मीराद् दक्षिणापथं यावन्निष्कण्टकं प्रशशास।

प्रतपति किल दिल्लीधरावल्लभे शाहजहाँने भारतराष्ट्रस्य सीमानोऽति-विस्तरमुपगताः। पश्चिमायां दिशि लाहौरमुल्तानादिकं यावत्, उदीच्यां काश्मीरान् यावत्, प्राच्यां कामरूपान् यावत्, अवाच्याञ्च सागरतटं यावत् तद्युगीनं भारतं विस्तृतमासीत्। अत एव शाहजहाँकृपापात्रस्य तद्बहुमतस्य वा राजकवेः पण्डितराजजगन्नाथस्यापि काव्यदृष्टिस्तद्युगीनभारतराष्ट्रविस्तरानुवर्तिनी सती महतीमायतिं विस्तृतिञ्चोपगता।

भवतु। पण्डितराजजगन्नाथस्य प्रशस्तकाव्यदृष्टेर्बृहती चर्चा पश्चात्करिष्यते। प्रथमं तावत्प्रास्ताविकं किञ्चिदपेक्ष्यते। मुगलराजवंशपरम्परायां बाबर-हुमायुँ-अकबर-जहाँगीरानन्तरं खुर्रमेति शैशवनामधेयः शहंशाहश्शाहजहाँनः सप्तदशतमे ख्रिस्तीयशतकेऽष्टाविंशतितमाब्दादारभ्य अष्टपञ्चाशत्तमाब्दं यावन्निष्कण्टकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शासनञ्चकार। अस्यैव स्थापत्यकलाप्रेमिणः सार्वभौमसम्राजो राजकविरासीत्तैलङ्गद्विजवंशावतंसो लक्ष्मीपेरमभट्टसूनुर्महाकविः पण्डितराजो जगन्नाथो यस्य प्रोद्धुरा काव्यधिषणाऽद्यापि स्मृतिपथमानीयते सहृदयैः।

यद्यपि पण्डितराजाभिव्यक्तैरन्तस्साक्ष्यैः साधु स्फारीभवति तथ्यमिदं यदसौ स्वकीये जीवने संरक्षकचतुष्टयस्य स्नेहसौजन्यबहुमानदाक्षिण्यसम्पदमुपबुभोज। तथापि कालक्रमेण तेषु प्रथम आसीत्सम्राट् **जहाँगीरो यं** नूरदीनव्याजेन[1] संस्मरति पण्डितराजः। द्वितीयोऽथ च सर्वप्रमुखस्संरक्षक आसीत्सम्राट् शहाबदीनाऽपरपर्याय**शशाहजहाँनो** यस्य पाणिपल्लवतले महाकविर्नवीनं वयो नीतवान्। आसफविलासाख्यायिकायामिममेव संरक्षकोत्तमं स्मरति पण्डितराजः साहिजहानाभिधश्चक्रवर्तीति श्रीसार्वभौमसाहिजहानेति च पदद्वयेन।

कामरूपाधिपतिः **प्राणनारायण** उदयपुराधीश्वरो **जगत्सिंहश्च** पण्डितराजस्यापरौ द्वौ संरक्षकौ यत्कृतेऽसौ प्राणाभरणाख्यं जगदाभरणाख्यञ्च काव्यद्वयं प्रायेण समसंविधानकं[2] रचयाम्बभूव।

एवमेव नेपालनरेशमपि कञ्चिद् अस्फुटीकृताभिधानं प्रशंसति पण्डितराजः। तद्यथा—

स्पृशति त्वयि यदि चापं स्वापं प्रापन्न केऽपि नरपालाः।
शोणे तु नयनकोणे को नेपालेन्द्र! तव सुखं स्वपितु।।

उपर्युल्लिखिताः सर्वेऽपि नरपतयः ख्रिस्तीये सप्तदशशतक एव सञ्जाताः। जहाँगीरः १६०५ तः १६२७ तमं यावत्, शाहजहाँनः १६२८ तः १६५८ तमं यावत्, जगत्सिंहः १६२८ तः १६५९ तमं यावत्, प्राणनारायणश्च १६३३ तः १६६६ तमं यावद् धरामण्डलमिदमलञ्चक्रुः। सम्राज्ञ्या नूरजहाँयाः सोदरो

---

१. श्यामं यज्ञोपवीतं तव किमिति मषीसङ्गमात् कुत्र जातः
सोऽयं शीतांशुकन्यापयसि कथमभूत्तज्जलं कज्जलाक्तम्?
व्याकुप्यन्नूरदीनक्षितिरमणरिपुक्षोणिभृत्पक्ष्मलाक्षी-
लक्षाक्षीणाश्रुधारासमुदितसरितां सर्वतः सङ्गमेन।।

२. जागर्तु क्षितिमण्डले चिरमिह श्रीकामरूपेश्वरः।
जागर्तु क्षितिमण्डलोपरि जगत्सिंहो धराधीश्वरः।।२।।
दुग्धाब्धे! भवता समो विजयते श्रीप्राणनारायणः।
दुग्धाब्धे! भवता समो विजयते श्रीकर्णजन्मार्णवः।।५।।
नुतो निखिलभूसुरैर्जयति कामरूपेश्वरः।
नुतो निखिलभूसुरैर्विजयते जगत्केसरी।।२३।।
सन्तुष्टः कमताधिपस्य कवितामाकर्ण्य तद्वर्णनम्।
श्रीराणाकलिकर्णनन्दनजगत्सिंहप्रभोर्वर्णनम्।।५३।। (प्राणाभरणजगदाभरणयोः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुगलसैन्यपतिरासफखानोऽपि एकचत्वारिंशदुत्तरषोडशशततमे खिस्ताब्दे (१६४१ ई.) स्वजीवनलीलां संववारेति निश्चीयते ऐतिह्यप्रमाणैः। एवं हि, सर्वथा सुविदितं सर्वस्वीकृतञ्चेदं तथ्यं यत्पण्डितराजो जगन्नाथोऽपि सप्तदशशताब्दं खिस्तीयमलञ्चकार। प्रायेण विद्वांसस्तस्य जीवनावधिं साहित्यसर्जनप्रचुरं विंशत्यधिकषोडशशततमात् खिस्ताब्दात् षष्टितमवर्षं यावत् (१६२०-६० ई.) स्वीकुर्वन्ति।

पण्डितराज (मूलतः पण्डितरायः) इतीयं सम्मानना जगन्नाथकवये महीपतिरेव (शाहजहाँनः) प्रायच्छदित्यत्र न कश्चन सन्देहः। स्वयमङ्गीकरोति तथ्यमिदं जगन्नाथ आसफविलासाख्यायिकायाश्चरमांशे। तद्यथा—

'श्रीसार्वभौमसाहिजहानप्रसादाधिगत**पण्डितराय**पदवीविराजितेन तैलङ्ग-कुलावतंसेन पण्डितजगन्नाथेन असफविलासाख्येयमाख्यायिका निरमीयत। सेयमनुग्रहेण सहृदयानामनुदिनमुल्लासिता भवतात्'।

एवंगुणविशिष्टः सारस्वतसाधनाविद्योतितान्तःकरणो दुर्धर्षपाण्डित्यगर्वितः काव्यशास्त्रदर्शनादिचूडान्तसिद्धान्तपारगो जगन्नाथोऽनन्यसाधारणं जीवनं जिजीवेति स्फुटं ज्ञायते ऐतिहासिकसाक्ष्यैः। स खलु लवङ्गीनाम्नीं कामप्यपूर्वसुन्दरीं तुरुष्ककन्यामुपयेमे यत्परिणामवशादाजीवनं स्वयुगीनब्राह्मणसमाजोत्थापितां तिरस्कारोपेक्षाकौलीनापमानझञ्झावात्यां जीवातुसम्बलघ्नीं सेहे। एवम्भूतेऽपि महामनसो महायशसो महौजसश्च तस्य वाणीपुत्रस्य जिजीविषा न मनागपि शैथिल्यं भेजे। आजीवनमसौ प्रतिवातं यात्रां कृतवान् ररक्ष च सम्यक्प्रकारेण स्वाभिमानं स्वव्यक्तित्वगौरवम्। पण्डितराजो न जात्वात्मानमवसादितवान्, न चात्मकृतं कदापि निनिन्द, न वा प्रायश्चित्तं कृतवान्, न चापि पश्चात्ततापा लोकविरुद्धमाचरताऽपि तेन आन्तरं मनस्सामञ्जस्यं साधु रक्षितम्। तत्कृता देवाराधना न खलु प्रायश्चित्तपर्यायभूताऽपि तु तदगाधास्थाभिव्यक्तिभूतैव। स आत्मानं विष्ण्वादिवशंवदं प्रेष्ठं नेदिष्ठं वात्सल्यकरम्बितं मत्वैव विविधान् देवान् समाराधयति। सहजदेवरतिपक्षधर आसीत्पण्डितराजः।

इयमासीत्पृष्ठभूमिः पण्डितराजस्य लोकोत्तरकविकर्मणः। नासौ देशकालव्यक्तिसीमाबन्धनैरात्मानं संयम्य कवितां प्रणिनाय। लोकस्तस्य कृतेऽसाक्षिक एवासीत्, यतो हि सर्वा पीडा, सर्वविधा व्यथा, यन्त्रणा, कदर्थना, सर्वविधोपहासो वा दुराराध्यलोकेनैव तस्मै समुपायनीकृतः। तादृश

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईर्ष्याऽमर्षपरायणलोकः पण्डितराजार्थं कथं रुचिकरः प्रमाणकल्पो वा स्यात्? अनेनैव प्रकारेण कालोऽपि तं महाकविं न कथमपि बबन्ध। पण्डितराजवाङ्मयेन केवलं मुगलशासनकालबोधो न जायते। यदि तेन आसफविलासाख्यायिका न प्रणीताऽभविष्यत्, यदि वा क्वाचित्करीत्या तत्कृता दिल्लीश्वर-प्रशस्तिर्नोट्टङ्किताऽभविष्यत् तर्हि तस्य मुग़लराजवंशाश्रिततत्वमपि सर्वथाऽज्ञेयमेवासीत्।

वस्तुतः पण्डितराजस्य कवित्वं सर्वविधबन्धनविमुक्तं सर्वतन्त्रस्वतन्त्रञ्चासीत्। इदमेव तावद् राष्ट्रियताया: प्रथमं वैशिष्ट्यम्। राष्ट्रं नाम किम्? राजते इति राष्ट्रम् (राज्धातोः ष्ट्रन्प्रत्ययः) यैरनन्यसाधारणैर्वैशिष्ट्यैः कोऽपि देशः प्रत्यायितस्सन् प्रत्यभिज्ञातस्स्यात् तेषां वैशिष्ट्यानां काव्यमयं वर्णनमेव राष्ट्रियत्वं सृजति इत्यहं मन्ये।

हिमालयपर्वतो देवविहारभूमिः। देवतात्माऽसौ गिरिर्यत्र वर्तन्ते गन्धमादनेन्द्रकीलप्रभृतयो गगनचुम्बिशिखराः। ईदृशो देवसंस्कृतिसमन्वितः पर्वतो भारत एव वर्तते, नान्यत्र क्वचित्। गङ्गायमुनासरस्वतीनर्मदा:-कावेरीशिप्रागोदावरीप्रभृतयस्तीर्थजनयित्र्यो नद्योऽपि भारतभूमावेव वर्तन्ते। विविधप्रकृतिरम्या विविधफलपुष्पसमृद्धिविलसिता विविधप्रभावाः षड्ऋतवोऽपि भारत एव वर्तन्ते, नान्यत्र क्वचिद् भूतले। शुकसारिकाचकोरचक्रवाक-हंसक्रौञ्चकलविङ्ककारण्डवकोकिलचातकादयश्चित्रविचित्रमधुरनादा विहङ्गमा अपि हरिलीलायिते भारत एव वर्तन्ते। सत्यरक्षको हरिश्चन्द्रः, शरणागतवत्सलश्शिविः, अतिथिदेवो रन्तिदेवः, पितृनिदेशानुवर्ती मर्यादापुरुषोत्तमो दाशरथिः, दानवीरो नृगो धर्ममूर्तिर्युधिष्ठिरः—किं बहुना, सर्वविधलोकोत्तरादर्शप्रतिमानभूतानि पात्राण्यस्मिन्नेव विश्वविश्रुतराष्ट्रे सम्भूतानि यैर्भारतराष्ट्रमिदं चिरकालादेव स्वगुणगन्धगरिम्णा प्रख्यातेः परां कोटिमधिरूढं निखिलेऽप्यनेहसि। भगवान् मनुरपि समर्थयते भङ्ग्यन्तरेण सत्यमिदम्[१]। एतेषां लोकोत्तरवैशिष्ट्यानां हृद्याऽनवद्यवर्णनमेव राष्ट्रियत्वमिति स्वीकरणीयम्।

कविकुलगुरुः **कालिदासो**ऽप्यस्मादेव कारणाद्राष्ट्रकविः प्रतिभाति, यतो हि तत्कवितया भारतराष्ट्रं साकारमिव प्रतीयते। रघुदिग्विजयप्रसङ्गेन, मेघस्य यात्राप्रसङ्गेन वा कविर्भारतस्थजनपदानां विस्तृतं परिचयं

---

१. एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।। (मनुस्मृतिः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शैलकानननदीनदसरोवरग्रामनगरवर्णनपुरस्सरं प्रस्तौति। ऋतुसंहारकाव्येऽपि षड्ऋतूनामसौ अद्‌भुतं मनोमुग्धकारि वर्णनमुपन्यस्यति। इन्दुमतीस्वयंवरव्याजेन भारताङ्गभूतानां विविधजनपदानां तत्तद्वैशिष्ट्यविच्छित्तिप्रस्तुतिपुरस्सरं रमणीयवर्णनमसौ प्रस्तौति। वस्तुतः कालिदासकवित्वं भारतं सम्यक् परिचाययति।

तयैव दृष्ट्या समीक्षिते सति महाप्राज्ञस्य पण्डितराजस्यापि काव्यवाङ्मयं सर्वतोमुखं भारतप्रतिबिम्बभूतं प्रतीयते। पण्डितराजोऽपि देवलीलास्थलीभूतं यामुनगाङ्गसङ्गमविलसितं भारतराष्ट्रं मनसा वाचा कर्मणा चात्मसात्करोति। भारतस्थाः शैला नद्यः काननानि विविधजनपदा विहङ्गमा निसर्गा जनसमवायाश्च कविना यथारुचि वर्णिताः। स्वोपज्ञाभिः पञ्चलहरीभिः गङ्गायमुनासूर्यविष्णुलक्ष्मीसंज्ञका देवास्तेन महाकविना प्रतिभाप्रकर्षसमन्वितै रुचिरपदबन्धैरुपस्तुताः। पक्षोऽयं पश्चात् सविस्तरं व्याख्यास्यते।

भारतराष्ट्रवैशिष्ट्यानां विस्तृतचर्चायाः प्राक् कोऽप्यन्यः प्रस्तावोऽत्र समुपस्थाप्यते। इदानीं द्वेषदैन्यवर्गसङ्घर्षजर्जरिते भारतराष्ट्रे साम्प्रदायिकविद्वेषः परां काष्ठामधिरूढो दृश्यते; परन्तु मुगलशासनकाले हिन्दुमुस्लिमसमाजयोः परं सामञ्जस्यमासीत्। आमेरराजवंशीयैः क्षत्रियैस्सार्धं सम्राजोऽकबरस्य जहाँगीरस्य च वैवाहिकाः सम्बन्धा आसन् इति प्रमाणैः परिपुष्टं तथ्यम्। शतमिताः सहस्रमिता वा मुहम्मदमतावलम्बिनो जनाश्चापि हिन्दुसुहृत्प्रभाववशात् परमभागवता वैष्णवाश्च सञ्जातास्तस्मिन् काले। बैरमखानसूनुर्महासेनानायकोऽब्दुर्रहीमो न केवलं नन्दनन्दनस्य कृष्णस्य महान् भक्त एव आसीदपि तु भगवतीं भागीरथीं प्रत्यपि तस्यासीन्महती श्रद्धा। स्वोपज्ञे संस्कृतनिबद्धे गङ्गाष्टकेऽसौ स्वमुक्त्यर्थं भगवतीं भागीरथीं सदयं प्रार्थयते।

एवं हि तस्मिन् युगे हिन्दुमुहम्मदधर्मसामञ्जस्यमयी काऽपि **तृतीया** विलक्षणा धर्मधारा प्रवहन्ती सन्दृश्यते। अस्यां धारायामुभयोर्धर्मयोः पारस्परिकं सामञ्जस्यं समवलोक्यते। एकतस्तु सम्राडकबरो **दीनइलाही**संस्थापनया तां धारां पुपोषापरतश्चाब्दुर्रहीमखानखानः स्वकीयैर्विष्णुभक्तिपरैः काव्यैस्तां धारां द्रढयति। तद्यथा—

अच्युतचरनतरंगिनी सिवसिरमालतिमाल।
हरि न बनायौ सुरसरी कीजै इन्दवभाल।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयमेवोभयधर्मसामञ्जस्यकरी राष्ट्रिया काव्यधारा पण्डितराजाय जगन्नाथायाप्यरोचत। स खलु मुक्तकण्ठेन तुरुष्कमतावलम्बिनोऽपि विद्याविनय-सद्गुणसम्पन्नान् लोकनायकान् अनुत्तमैर्विशेषणैः प्रशंसितवान्। नासौ धर्मं सङ्कीर्णदृष्ट्या समीक्षितवान्। प्राणनारायणे जगत्सिंहे आसफखाने चासीत्तस्य समानो गुणानुरोधः। न खल्वसौ हिन्दुत्वगर्वितस्सन् इस्लामधर्मं विद्वेष्टि स्म। सहृदयेस्लामधर्मानुयाय्यपेक्षयाऽसौ मात्सर्यद्वेषग्रस्तं दुर्हृदयं हिन्दुमेव समभ्यधिकं निनिन्द। प्रमाणं तत्र—

न याचे हिन्दूकं पर्वणि दत्तैकताम्रडब्बूकम्।
याचे मुगलमुलूकं तृणीकृतस्वर्णचन्दूकम्।।

पण्डितराजस्य काव्यं तत्प्रतिभोद्भूतं सदपि क्वचित् खानख़ानाऽधमर्णं संलक्ष्यत एव। उपर्युल्लिखितं रहीमदोधकं (दोहा इति) पण्डितराजोऽ-विकलमनुवदति। तद्यथा—

हरिचरणनखरसङ्गादेके हरमूर्धसंस्थितेरन्ये।
त्वां प्राहुः पुण्यतमामपरे सुरतटिनि! वस्तुमाहात्म्यात्।।

उदाहरणान्तरं तावत्पर्यायेण प्रस्तूयते—

सर सूखे पंछी उड़हिं औरे सरन्हि समाहिं।
दीन मीन बिनु पच्छ के कहु रहीम कहँ जाहिं।।

पण्डितराजो भावसौन्दर्यमिदं सविशेषं प्रस्तौति—

आपेदिरेऽम्बरपथं परितः पतङ्गा
भृङ्गा रसालमुकुलानि समाश्रयन्ते।
सङ्कोचमञ्चति सरस्त्वयि दीनदीनो
मीनो नु हन्त कतमां गतिमभ्युपैतु।।

साम्प्रदायिकसद्भाव एवाधुनातनभारतीयराष्ट्रियताया महिष्ठः पक्षः। अयमेव पक्षस्तावत् शतत्रयवर्षपूर्वं राष्ट्रेऽस्मिन् महाकविना पण्डितराजेन सयत्नं पोषितः। विद्याकलोपासकान् स्वाश्रयभूतान् भूपतीनसौ ससौहार्दं प्रशशंस। यथा हि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुराणामारामादिह झगिति झञ्झानिलहता:
पतेयुश्शाखीन्द्रा यदि तदखिलो नन्दति जन:।
किमेभिर्वा कार्यं शिव शिव विवेकेन विकलै-
श्चिरञ्जीवन्नास्तामधिधरणि दिल्लीनरपति:।। (रसगङ्गाधरे)

यथा च—

दिल्लीश्वरो वा जगदीश्वरो वा मनोरथं पूरयितुं समर्थ:।
अन्यैर्नृपालै: परिदीयमानं शाकाय वा स्याल्लवणाय वा स्यात्।।

यथा वा—

शास्त्राण्याकलितानि नित्यविधय: सर्वेऽपि सम्भाविता:
दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वय:।
सम्प्रत्युज्झितवासनं मधुपुरीमध्ये हरिस्सेव्यते
सर्वं पण्डितराजराजितिलकेनाकारि लोकाधिकम्।।
(भा.वि. ४।४५)

मात्सर्यग्रस्ता हिन्दुमतावलम्बिनो धर्मान्धा जना: पण्डितराजस्य मुगलमहीपतिकृपापात्रत्वं नाभिननन्दु:। यवनीपरिणयव्याजेन तेषां मात्सर्यमिदं समधिकतरं ववृधे। अस्मादेव कारणाल्लोकोत्तरवर्णनानिपुणमपि पण्डितराजस्य निष्कल्मषं कविकर्म तेभ्यो नातितरामरोचत। अप्पयदीक्षितप्रमुखा द्विजत्वाभिमानिन: कवय: पण्डितराजाय नितरां द्रुह्यन्ति स्म। तथाप्यप्रतिहतधर्मनिष्ठोऽयं महाकविर्न मनागपि चचाल। स आत्मानं प्रबोधितवान्—

मद्वाणि! मा कुरु विषादमनादरेण
मात्सर्यमग्नमनसां सहसा खलानाम्।
काव्यारविन्दमकरन्दमधुव्रताना-
मास्येषु धास्यसितमां कति नो विलासान्।। (भा.वि. ४।४०)

कामं सङ्कीर्णदृष्टयो जना लवङ्गीपरिणयव्याजेन पण्डितराजं धर्मच्युतं मन्येरन्, तथाप्याजीवनं महासत्त्वोऽयं कविर्धर्मपथाधिरूढमात्मानं मेने। धर्मस्य गहना गति:। किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिता:। केवलं धर्मान्तरासक्तकन्यां परिणीय मानवो न स्वधर्मच्युतो भवति।

CC-0. In Public Domain. Gurukul Kangri Collection...

Digitized by Arya Samaj Foundation Chennai and eGangotri

मौर्यवंशीयश्चन्द्रगुप्तोऽपि यवनसेनापतिकन्यां परिणिनाय; परन्तु नाऽसौ धर्माच्च्युतो जातः। प्रेम्णि सर्वं सम्भवति। पण्डितराजोऽपि स्वप्रणयरक्षणार्थं लवङ्गीमङ्गीचकार। वस्तुतो बकवृत्तिः पण्डितसमाजो राजसम्मानं दुर्धर्षपाण्डित्यञ्च जगन्नाथस्याऽसहमानस्तस्य सापत्न्यं भेजे। यवनीपरिणयस्तु अलीकव्याज आसीत् पण्डितराजविरोधस्य।

एवम्भूतेऽपि पण्डितराजस्य धर्मरतिर्निश्चलैवासीत्। सिन्धुगभीरा तस्य धर्मनिष्ठा, सुरसिन्धुसलिलनिर्मला तस्य भगवत्परायणा चित्तवृत्तिः हिमाचलशिखरोत्तुङ्गश्च तस्यात्मविश्वासः, सर्वमेतन्न किमपि दुष्टजननिन्दया खलीभूतम्। शान्तविलासपद्यानि तत्र प्रमाणभूतानि।

सपदि विलयमेतु राजलक्ष्मीः सपदि पतत्वथवा कृपाणधारा।
अपहरतुतरां शिरः कृतान्तो मम तु मतिर्न मनागपैतु धर्मात्॥
अपि बहलदहनजालं मूर्ध्नि रिपुर्मे निरन्तरं धमतु।
पातयतु वाऽसिधारामहमणुमात्रं न किञ्चिदपि भाषे॥

(शान्तविलासः, भामिनी, ४३-४४)

इयमात्मस्वीकृतिः पण्डितराजस्यार्जवं शीलं चरित्रञ्च साधु प्रकाशयति। कियत् सहिष्णुत्वं कियदौदार्यं कियच्च दैन्यं महाकवेरासीत्? सत्यमेव रिपुभिः समाचरितं तारापथविपुलं दुष्कृतं पण्डितराजो मर्षितवान्। न किञ्चिदपि बभाषे भगवदाश्रितत्वात्। अन्येषां मयूरव्यंसकोपमानां धार्मिकाणां शरणागतिर्नाट्यमात्रमासीत्; परन्तु पण्डितराजस्य शरणागतिर्हृत्प्रसूतविनयार्जवप्रतिफलकल्पाऽऽसीदित्यत्र न कश्चन सन्देहः।

साम्प्रदायिकसौमनस्यपक्षधरस्सन् पण्डितराजो राष्ट्रियमाङ्गल्यं स्वकवितया व्यवहारेण च सम्पादयामास।

न केवलमेतावन्मात्रम्। राष्ट्रियताया अपरोऽपि पक्षस्तेन दृढीकृतः। निखिलेऽपि महीतले भारतराष्ट्रं गङ्गाहिमाचलाभ्यामेव प्रत्यभिज्ञायते। बृहत्तरभारताङ्गभूतेऽपि प्रत्येकस्मिन् राष्ट्रे प्रायेण विद्यते तदीया काऽपि गङ्गा। मीकाङ्गनाम्नी काचित्सरित् सम्प्रति कम्बोडियावियतनामयोः सीमारेखां निश्चिनोति। इयं नद्यपि तत्रस्थैर्जनैः पवित्रतमा मुक्तिदात्री च स्वीक्रियते। अत्र **मी**-शब्दः मातृपर्यायभूतः **काङ्ग**शब्दश्च **गङ्गावाचकः**। एवं हि मीकाङ्गसरिदपि मातरं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गङ्गामेव स्मारयति। बालीद्वीपवासिनां कृते इन्द्रतीर्थनिःसृता (तीर्त-एम्पुल) **पकेरिसान**नाम्नी नदी एव तदीया गङ्गा। लोम्बोकद्वीपेऽपि बालीप्रतिवेशिभूते मया **सुरनद्या** दर्शनं कृतं या खलु तत्रस्थैर्हिन्दुभिर्गङ्गैवाङ्गीक्रियते। चीनदेशीयाः सीक्यांगप्रभृतिनद्योऽपि गङ्गाभिधानप्रतिच्छविमेवानुहरन्ति। मन्येऽफ्रिकाराष्ट्रे प्रवहन्ती काङ्गोनाम्नी सरिदपि गङ्गामेव स्मारयति। प्रमाणाभाववशादस्मिन् विषये पुष्कलं वक्तुं नोचितं प्रतिभाति। तथापि गङ्गाया भारतनामान्तरत्वं न कथमप्यपलपितुं शक्यते। संस्कृतकविषु स एव धन्यतमो यो भगवतीं भागीरथीं स्तौति।

यद्यपि वाल्मीकिव्यासकालिदासादयो नैके कवयो गङ्गां सश्रद्धं वर्णयन्ति; परन्तु तेषां वर्णनं केवलं स्तोत्रपरिपाटीमेव पुष्णाति। कल्पनायथार्थसम्मिश्रणभूतं प्राक्तनकवीनां वर्णनमलङ्कारदृष्ट्या सौशब्द्यदृष्ट्या कल्पनादृष्ट्या वा कामं महीयेत; परन्तु तेषु वर्णनेषु न दृश्यते जिजीविषातत्त्वम्।

पण्डितराजो जगन्नाथो यथा भगवतीं भागीरथीं स्तौति, स प्रकार एव विलक्षणः। यथा सर्वविधाऽसहायः सर्वापराधभारभङ्गुरः सर्वथा पराजितः, सर्वथा निरवलम्बः कोऽपि बालको दयावात्सल्यभरितां मातरमेवान्तिमं शरणं पश्यति, तथैव पण्डितराजोऽपि सुरसिन्धुं सर्वपापापहारिणीं मन्यते।

भारतस्य **गङ्गामयत्वं** स्वीकरोति पण्डितराजः। देवनदी गङ्गा न खलु देशान्तरनदीसमवाय इव केवलं निसर्गाङ्गभूता काचिज्जलप्रवाहवती सरित्। वस्तुतो गङ्गाऽस्ति भारतस्य प्राक्तनमैतिह्यं वर्तमानं गौरवं भविष्यत्कालीनञ्चास्तित्वम्। गङ्गा न केवलं साधारणनदी। सा खलु नृपभगीरथतपःप्रह्वीभूता कापि ममतामयी जनन्यपि, या विष्णुचरणनखनिर्णेजनसलिलभूता विरञ्चिकमण्डलोर्निर्गत्य धूर्जटिजटाजूटग्रन्थिषु परिलुठन्ती हिमगिरिशिखरस्थगोमुखादग्रेसरीभूय सहस्रमितानि तीर्थानि विरचयन्ती विविधनगरग्रामजनपदाश्रमनिकरान् पावयन्ती गङ्गाद्वारस्थे कपिलाश्रमे तच्छापदग्धान् षष्टिसहस्रमितान् भगीरथपूर्वजान् प्रेतभूतान् तारयति, स्वर्गं गमयति च।

इयमेव गङ्गा भारतस्य प्रतीकभूता। बालकानां मुण्डनकर्मणि सैव साक्षिणी। विधवानां दुर्भाग्यव्यतिकरे सैव साक्षिणी। दानकर्मणि स्नानजन्यपुण्यलाभकर्मणि सैव साक्षिभूता। प्राणत्यागक्षणेऽपि स्वर्गप्राप्त्यर्थं सैव साक्षिणी। जननादारभ्य मृत्युक्षणं यावद् गङ्गैव सर्वस्वभूता समेषामेव भारतवासिनाम्। निखिलेऽपि राष्ट्रे सहस्रमितानि गङ्गातीर्थानि वर्तन्ते। यत्र कुत्रापि कृतं स्नानं **'हर हर गङ्गे'** इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुच्चारणपुरस्कृतं गङ्गास्नानमेव समवगम्यते। अनेनैव गरिम्णाऽद्वितीया सत्यपि गङ्गा बहुलीभूता दृश्यते भारते। **आदिगङ्गे**च्यते गोमती। **दक्षिणगङ्गे**च्यते कावेरी। **अर्धगङ्गे**च्यते नर्मदापि पुराणेषु।

गङ्गानामोच्चारणमात्रेणैव भारतराष्ट्रं स्मृतिपथमेति। वस्तुतो गङ्गैव भारतम्। तामेव पापापनोदिनीं गङ्गां सादरं सविनयमुपस्तौति महाकविर्जगन्नाथः। जगन्नाथस्तुता जाह्नवी न केवलं पुराणोक्तविशेषणानां लक्ष्यभूताऽपि तु भारतराष्ट्रस्य स्वरूपं सा साधु प्रकाशयति। जनकविर्जगन्नाथो गङ्गां न केवलं धनकुबेराणां देवगन्धर्वादीनां वा पक्षधरीं मन्यते; अपि तु गङ्गामसौ दीनदरिद्राणां समुद्धारयित्रीं पश्यति। तद्यथा—

जडानन्धान् पङ्गून् प्रकृतिबधिरानुक्तिविकलान्
ग्रहग्रस्तानस्ताखिलदुरितनिस्तारसरणीन्।
निलिम्पैर्निर्मुक्तानपि च निरयान्तर्निपततो
नरानम्ब! त्रातुं त्वमिह परमं भेषजमसि॥

पुनश्च—

पुरो धावं धावं द्रविणमदिराघूर्णितदृशां
महीपानां नानातरुणतरखेदस्य नियतम्।
ममैवायं मन्तुः स्वहितशतहन्तुर्जडधियो
वियोगस्ते मातर्यदिह करुणातः क्षणमपि॥

सन्तप्तो जनः सर्वप्रथमं स्वमनोव्यथां मित्रेषु प्रकाशयति। स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवतीति कविकुलगुरोरुक्तिः शाकुन्तलनाटके; परन्तु स्निग्धजनेष्वपि व्यथानिवारणेऽसमर्थेषु सत्सु आर्तजनः स्वकीयमिष्टदेवं शरणमुपैति। तत्रापि मातृहृदयं प्रभवति। यथा शिशुर्जननीं शरणं मत्वाऽन्यजनसमक्षमनाख्येयमपि दुःखं प्रकटयति, तां सर्वस्वं मत्वा तदुत्सङ्गे मुखं गोपायित्वा व्यथाभयमुक्तमात्मानमनुभवति, तथैव पण्डितराजो जगन्नाथोऽपि गङ्गामुपेत्य आनन्दनिर्भरो जायते। तत्कृते गङ्गैव सर्वरोगव्याधिभयानामौषधम्। गङ्गासलिलचुलुकपरिपानमेव मानवजीवनस्य सौभाग्यपराकाष्ठा। इदं सौभाग्यमुत्तरोत्तरं प्रवर्धते। तद्यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केचित्स्मरन्त्यनुसरन्ति च केचिदन्ये
पश्यन्ति पुण्यपुरुषाः कति च स्पृशन्ति।
मातर्मुरारिचरणाम्बुजमाध्वि! गङ्गे!
भाग्याधिकाः कतिपये भवतीं पिबन्ति।।

सर्वविधपापानां विनाशिका भगवती गङ्गा। यैर्जनैर्निरर्थकं जीवनं यापितं तेषामप्यन्तिमं शरणं गङ्गैव। अस्मिन् सन्दर्भे पण्डितराजः प्रकारान्तरेणात्मजीवनवैयर्थ्यमपि निर्विशङ्कं प्रकाशयति। तद्यथा—

शववृत्तिव्यासङ्गो नियतमथ मिथ्याप्रलपनं
कुतर्केष्वभ्यासः सततपरपैशुन्यमवनम्।
अपि श्रावं श्रावं मम तु पुनरेवंविधगुणान्
ऋते त्वत्को नाम क्षणमपि निरीक्षेत वदनम्।।

सत्यमेव पण्डितराजः अवाञ्छन्नपि वैरिविरोधप्रशमनाय कुतर्काभ्यासमेव कृतवान्। चित्रमीमांसाखण्डनं मनोरमाकुचमर्दनमिति च टीकाद्वयं तस्यैव कुतर्कस्य परिणतिः प्रतीयते। परपैशुन्यमवनमपि अगत्या तेन कृतमेव। अकारणवैरिमुखद्वाराणि पिधातुं तेन किं किं न कृतम्? अमृतान्तःकरणोऽपि जगन्नाथो विषवमनाय सम्प्रेरितः समाजेन स्वयुगीनेन; परन्तु को नु खल्वन्यः कविः स्वकीयमाचरणमेवं प्रकाशयति? पण्डितराजः पुनः स्फटिकनिर्मलान्तःकरणो भगवत्या गङ्गायाः समक्षं सर्वं प्रकाशयत्यात्मानं सर्वविधदुष्कर्ममुक्तञ्च विदधाति। तत्प्रमाणेनैव—

त्रपन्ते तीर्थानि त्वरितमिह यस्योद्धृतिविधौ
करं कर्णे कुर्वन्त्यपि किल कपालिप्रभृतयः।
इमं तं मामम्ब त्वमियमनुकम्पार्द्रहृदये
पुनाना सर्वेषामघमथनदर्पं दलयसि।।

पण्डितराजप्रणीता **गङ्गालहरी** न तावत्स्तोत्रकाव्यमात्रमेव। वस्तुतः काव्यमिदं **सुतजननीसंवाद** इव प्रतीयते। स्तोत्रस्येयमेव पराकाष्ठा यद् भक्तः किमपि व्यवधानं नानुभवेत्। स्वदैन्यं दुःखं पापं दोषञ्च स्वामिसमक्षं निर्भयं प्रकाशयेत्। वस्तुतः पण्डितराजः स्वार्तिनिवेदनव्याजेन निखिलामपि भारतीं प्रजां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रस्तौति। अद्यापि लक्षकोटिमिता भारतीया गङ्गास्नानमात्रेणैव आत्मदोषदैन्यपापक्षयं मन्यन्ते। इदं भारतस्य राष्ट्रियं वैशिष्ट्यं सद्रहस्यमतिगूढं प्रतीयते।

तोयं गङ्गा तदितरदयां निर्मलं सङ्गमात्रं
देवौ तस्याः प्रभवनिलयौ नाकिनोऽन्ये च देवाः।
सा यत्रास्ते स हि जनपदो मृत्तिकामात्रमन्य-
स्तां यो नित्यं नमति स बुधो बोधशून्यस्तदन्यः॥

गङ्गायाः पारमार्थिकं निराकारं रूपं विलक्षणमेव प्रतिभाति। ब्रह्मतत्त्वमिव गूढातिगूढं तद्रूपं कथमपि विज्ञातुमनुभवितुं वा न शक्यम्। पण्डितराजः कथयति—

न यत्साक्षाद्वेदैरपि गलितभेदैरवसितं
न यस्मिञ्जीवानां प्रसरति मनोवागवसरः।
निराकारं नित्यं निजमहिमनिर्वासिततमो
विशुद्धं यत्तत्त्वं सुरतटिनि! तत् त्वं न विषयः॥

विनयौदार्यविलसिता परमेश्वरभक्तिरपि भारतराष्ट्रस्य महती विशेषता। राष्ट्रेऽस्मिन् दुरभिमानगर्वाहङ्कारादिभावानां समादरो न केनापि कृतः। हिरण्यकशिपुरावणकंसादयो लोकशातका न कैश्चिदपि कविभिः प्रशंसिताः स्वकाव्यनायकीकृता वा। आजीवनं पापाचारताण्डवं कुर्वतामपि तेषामन्ते विनाश एव सञ्जातः। भारतीया संस्कृतिः शुनि श्वपाके च समानरूपेण परमेश्वरं पश्यति। कालिदासप्रभृतयः सर्वेऽपि कवयः परमेश्वरं प्रति विनता दृश्यन्ते। ईश्वरास्था खल्वस्माकं राष्ट्रियं चरित्रम्।

पण्डितराजस्य निरतिशया परमेश्वरभक्तिस्तु नास्तिकानामपि समवायमास्तिकीकर्तुं समर्था। स खलु मुक्तमनसाऽऽत्मानं सर्वविधदुष्कृतभाजनं मत्वा परमेश्वरं शरणं कामयते। तद्यथा—

विषीदता नाथ विषानलोपमे विषादभूमौ भवसागरे विभो!
परं प्रतीकारमपश्यताऽधुना ममायमात्मा भवते निवेदितः॥
अयि दीनतरं दयानिधे! दुःखस्थं सकलैः समुज्झितम्।
अधुनाऽपि न मां निभालयन् भजसे हा कथमश्मचित्तताम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नितरां विनयेन पृच्छ्यते सुविचार्योत्तरमत्र यच्छ मे।
करितो गिरितोऽप्यहं गुरुस्त्वरितो नोद्धरसे यदद्य माम्।।

क्षुधितस्य नहि त्रपास्ति मे प्रतिरथ्यं प्रतिगृह्णतः कणान्।
अकलङ्क! यशस्करं न ते भवदीयोऽपि यदन्यमृच्छति।।

वस्तुतः **करुणालहर्या** एकैकं पद्यमनन्तकरुणाविनयार्तिव्यथासमन्वितं परिलक्ष्यते। पद्याभिव्यक्ता सा व्यथा न तावत्काल्पनिकी। पण्डितराजो यवनीं परिणीय यथा स्वयुगीनेन असहृदयब्राह्मणासमाजेन सन्त्यक्तः समुपेक्षितः पदे पदे कदर्थितश्च—तत्सर्वं पुञ्जीभूय तत्काव्यप्रतिपाद्यतामुपगतम्। सैव प्रगाढा करुणा तत्कविताजीवातुभूता। कथयति सः—

अपि शैशवलालितः शिशुः प्रतिबुद्धो जनकेन ताड्यते।
न कदापि लालितस्त्वया किमु ताड्यो भगवन् कुकर्मभिः।।

न वदामि न दुष्कृतं मया कृतमित्युक्तिमिमां तु मे शृणु।
मम भीतिमनीवशाद् विभो! पतितोद्धारक! नाम तावकम्।।

आत्मदोषान् प्रख्याप्य पण्डितराजो गङ्गाजलमिव पवित्रतायाः परां कोटिमधिरोहति। समुद्घाटितपुस्तकमिव तज्जीवनं तत्कविताभिरेव सम्यगवगन्तुं शक्यते।

पण्डितराजो जगन्नाथो न किमपि पृथुलकलेवरं महाकाव्यं चकार। तदुपज्ञा रचनाः प्रायेण लहर्य एव सन्ति। सहस्रमितानि पद्यानि तु प्रकीर्णान्येव दृश्यन्ते। तथापि तत्प्रणीतं प्रत्येकं पद्यं घटनिबद्धं सागरसलिलमिव प्रभावकरं संलक्ष्यते। भारतराष्ट्रस्य प्रत्यभिज्ञानकरा ये ये मञ्जुभावास्ते सर्वेऽपि क्रमेण तेषु पद्येषु सयत्नं गुम्फिताः। यथोदात्तराघवे मायुराजप्रणीतमेकमेव पद्यं **'रामोऽस्मि सर्वं सहे'** इति समेषामेवाचार्याणां ध्यानं रुचिश्चाचकर्ष, तेनैव प्रकारेण पण्डितराजस्याप्येकमेव पद्यं महामहिमशालिरघुनन्दनस्य हृद्व्यथां साधु प्रकाशयति—

पापं हन्त मया हतेन विहितं सीताऽपि यद्यापिता
सा मामिन्दुमुखी विना बत वने किं जीवितं यास्यति?
आलोकेय कथं मुखं सुकृतिनां किन्ते वदिष्यन्ति मां
राज्यं यातु रसातलं पुनरिदं न प्राणितुं कामये।।
(शृङ्गार. पद्य १०७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पण्डितराजविरचितेष्वन्यापदेशेषु समग्रमेव मानवजीवनं विविधघटनाविवर्त-प्रदर्शनपुरस्सरं समवलोक्यते। पूर्वजन्मार्जिताः संस्कारा न कथमपि वारयितुं शक्याः। अवश्यमेव भोक्तव्यं कृतं कर्म शुभाऽशुभम्। यदिदं वेदपुराणदर्शनादि-चिन्तनं तदेव पण्डितराज एकेनैव पद्येन प्रस्तौति—

किं बान्धवेन हरिणा हरिणापि किं वा
लक्ष्म्याऽपि किं सरसिजोदरजन्मना वा?
एकस्य शुद्धचरितस्य सरोरुहस्य
नैषा तुषारजनिता शमिता विपत्तिः॥

विपत्तिकाले स्वार्थसिद्धिपरायणास्तु त्वरितमेव सङ्गं परित्यजन्ति; परन्तु परमार्थप्रणयावसक्ताः सहैव जीवन्ति, सहैव म्रियन्ते। अस्मिन् सन्दर्भे अब्दुर्रहीमखानखानाभिप्रायमनुवदतो जगन्नाथकवेः सुभाषितं पूर्वमेव मया समुद्धृतं वर्तते—आपेदिरेऽम्बरपथमिति।

खलास्तावत्तिलमात्रमपि स्वार्थविरोधं न सहन्ते। तेषां सौजन्यप्रदर्शनं तु स्वार्थसाधनान्तमेव; परन्तु सुमहान्तः पुण्यपुरुषाः सर्वथा पर्वता इव निश्चलास्तिष्ठन्ति। विश्वामित्रेण वसिष्ठस्य शतपुत्रा घातितास्तथापि ब्रह्मर्षिरसौ सर्वप्रतीकारसमर्थः सन्नपि क्षमाभावं न तत्याज। इदमेवास्ति भारतराष्ट्रस्य विशिष्टं चरित्रम्। पण्डितराजो लिखति कलमव्याजेन—

अस्मानवेहि कलमानलमाहतानां येषां प्रचण्डमुसलैरवदाततैव।
स्नेहं विमुच्य सहसा खलतां प्रयान्ति ये स्वल्पपीडनवशान्न वयं तिलास्ते॥

महापुरुषसङ्गेन सर्वेऽपि दोषाः प्रक्षाल्यन्ते। सकृत् सम्मानितो मानवो न पुनः कदर्थनां भजते। अत एवास्माभिः सत्साहचर्यमेवाश्रयणीयम्। पण्डितराजमुखेनैव—

भ्रातः काञ्चनलेपगोपितबहिस्ताम्राकृते! सर्वतः
मा भैषीः कलश! स्थिरो भव चिरं देवालयस्योपरि।
ताम्रत्वं गतमेव काञ्चनमयी कीर्तिः स्थिरा तेऽधुना
नान्तस्तत्त्वविचारणप्रणयिनो लोका बहिर्बुद्धयः॥

सिंहचन्दनकर्णधारकल्पद्रुमकस्तूरिकाकार्पासादिप्रतीकमुखेन महाकविजगन्नाथ एवमेव मानवजीवनस्य विविधान् उच्चावचान् घटनासङ्घातान् उपन्यस्यति यान् पाठं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाठं पाठकोऽसीमधैर्यं शक्तिं जिजीविषां च विन्दते। स्वार्थसिद्ध्यर्थं को न बन्धुतां प्रयाति; परन्तु विपत्तिदावानले प्रोत्थिते सति सर्वेऽपि दूरं पलायन्ते। सागरमुखेन निगदति कविः —

मह्यं श्रीरिति शार्ङ्गभृत् त्रिदशराट् चिन्तामणिर्मह्यमि-
त्यब्जो मह्यमितीश्वरः सुरगणो मह्यं सुधा चास्त्विति।
सर्वे सन्त्यपहर्तुमेव जलधेः सर्वस्वमेनं रुषा
हन्ताचामति तापसे न गदितुं कोऽप्यस्ति तन्मास्त्विति॥

स एव सागरः कदाचिन्निर्गुणस्सन् निन्दापात्रतामपि यांति। तद्यथा—

आस्तां तावदहो समुद्रमहिमा दूरे तु कर्णप्रिय
स्तीरे यस्य पिपासयैव मरणं प्राप्नोति शीघ्रं जनः।
तस्मादम्बुनिधेर्वरं लघुसरः कूपोऽथवा वापिका
यत्र स्वीयकरद्वयेन सलिलं पेपीयते स्वेच्छया॥

सत्पुरुषा अपि कदाचिद् दुष्टानतिसन्धानपरायणान् लालाटिकान् पुष्णन्ति स्वपक्षधरान् विहाय। तद्विषये कथयति पण्डितराजः—

येऽमी आमुकुलोद्गमात् प्रतिदिनं त्वामाश्रिताः षट्पदा-
स्ते भ्राम्यन्ति फलाद्बहिः कथमहो दृष्ट्वा न सम्भाषसे।
ये कीटास्तव दृक्पथं न च गतास्ते त्वत्फलाभ्यन्तरे
धिक्त्वां चूततरो! पराऽपरपरिज्ञानानभिज्ञो भवान्॥

समाजे विचित्रमेव दशावैपरीत्यं समवलोक्यते। गुणवन्तस्सीदन्ति, निर्गुणाश्च प्रसीदन्ति। सनातनीयं परिपाटी। गर्दभमवलम्ब्य व्यनक्ति कविः स्वकीयां वेदनाम्। तद्यथा—

यद्यपि का नो हानिः परकीयां चरति रासभे द्राक्षाम्।
असमञ्जसमिति मत्वा तथापि खलु खिद्यते चेतः॥

एभिः प्रमाणैः सर्वथा स्फारीभवति पण्डितराजस्य जीवनधारा। स खलु इस्लामधर्मछत्रच्छायामङ्गीकुर्वन्नपि स्वकीयां वैष्णवीं प्रवृत्तिं न कदापि तत्याज। सद्गुणकल्पद्रुमभूतान् जहाँगीरशाहजहानासफखानादीन् मुस्लिमसंरक्षकान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वकीयया निसर्गरम्यया कवितया मण्डयन्नपि आत्मपरितोषार्थमसौ नन्दनन्दनं कृष्णं, दशरथनन्दनं रामं, प्रलयङ्करं शिवं, प्रभविष्णुं विष्णुं, लोकप्रबोधकरं दिनकरं, देवनदीं मोक्षदात्रीं भगवतीं भागीरथीं, लक्ष्मीं, कालिन्दीं च परया भक्त्याऽऽनर्च।

वस्तुतस्तस्य काव्यमासीदुभयोर्धर्मयोः सङ्गमस्थलम्। तत्काव्यरसास्वादो **मुस्लिमभागवतानां** कृतेऽपि तथैव हृदयानन्दकर आसीद्यथा हिन्दुमतावलम्बिनां कृते। एतावन्मात्रेणाऽत्र विरम्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदानां व्याख्याने भाषावैज्ञानिकमुन्मीलनम्

डॉ. कपिलदेवपाण्डेयः

संस्कृतविभागाध्यक्षचरः

आर्यमहिलामहाविद्यालयस्य

वाराणसी

* * *

अशेषविश्वज्ञानविज्ञानराशिभूता वेदाः खलु भारतीयवाङ्मयेतिहासेऽनितरसाधारणं गौरवं बिभ्रति, प्राचीनतमत्वादपौरुषेयत्वाच्छाश्वतिकमूल्यवत्त्वाच्च तत्प्रतिपादिता अर्था नितरां दुरूहा इत्यत्र न कोऽपि संशयावसरः। अतिप्राक्तनत्वात् सन्दर्भसमन्वयः, भावगाम्भीर्यं, व्यवहारातीताया भाषाया दुर्बोधता च तदर्थावबोधे निरतिशयं काठिन्यमुपस्थापयन्ति। कस्यचिन्मन्त्रस्य किमस्ति वास्तविकं तात्पर्यमिति वेदार्थबोधविषयिण्याः समस्यायाः समाधानं वेदा एव प्रस्तुवन्ति। अतः एवं प्रतीयते यन्न केवलं प्रतिपाद्यविषयगतप्रामाण्य एव वेदानां स्वतः प्रामाण्यम्, अपि तु तेषां व्याख्यानेऽपि। वैदिकवाङ्मयस्य चतुर्ष्वपि भागेषु—संहितासु, ब्राह्मणेषु, आरण्यकेषु, उपनिषत्सु—वेदाङ्गानां चतुर्षु शिक्षायां, निरुक्ते, व्याकरणे, छन्दसि, प्रतिशाखं विद्यमानेषु प्रातिशाख्यग्रन्थेषु च न्यूनाधिकरूपेण सर्वत्र भाषावैज्ञानिकचिन्तनविषयिणी प्रवृत्तिर्लभ्यते। तत्र प्रतिपादितान् सिद्धान्तानुपेक्ष्य कापि वेदार्थव्याख्यानपद्धतिर्वेदार्थान् बोधयितुं न प्रभवति। वेदार्थबोधे रामायण-महाभारतयोरितिहासग्रन्थयोरपि भूयसी उपकारकता वर्तते। यथा चोक्तम्—

> इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
>
> बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरेदिति॥

मीमांसाशास्त्रन्तु सहस्राधिकैरधिकरणैर्न्यायैर्वाक्यभेदादिदोषैर्वेदवाक्यान्येव यथायथं बोधयति। वेदार्थबोधे मन्वादीनां स्मृतीनां पुराणानां च महती उपयोगिताऽनुभूयते वेदार्थं वेत्तुकामैः। अत एव कल्पतरुकारोक्तिः 'श्रुतिः लौकिकमुपायं न सहते' इति सङ्गच्छते। अतो भाषावैज्ञानिकदृशा वेदार्थं विचारयतो मम त्वियमेव धारणाऽस्ति यद् वेदानां वास्तविकं तात्पर्यं वैदिकैरेव भाषाविज्ञाननियमैः सम्यगवगन्तुं शक्यते। आधुनिकेन पाश्चात्त्येन भाषाविज्ञानविधिना वेदव्याख्यानं नोचितं यतो हि जर्मन [illegible] सार्धशतवर्षपूर्वमष्टादशशताब्द्यामभवत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इतिहासातीतात् प्राप्तेषु वेदमन्त्रेषु निहितान् निगूढान् अर्थान् प्रति आधुनिकभाषाविज्ञानस्य वराकस्य गतिरेव नास्ति। तत्तु वेदवाक्यानि ऐतिहासिकदृष्ट्या तुलनात्मकदृष्ट्या च वैज्ञानिकसामाजिकसन्दर्भान् मन्त्रतात्पर्यैः सह समन्वयितुं प्रवर्तते प्रयतते च। यदि भाषाविज्ञानं वस्तुतो विज्ञानमस्ति, तर्हि तद्विना कस्यचिदपि शब्दराशेर्व्याख्यानं नैव सम्भवति। अत एव मन्त्र-ब्राह्मणारण्यकोपनिषत्सु वेदाङ्गेषु च भाषातत्त्वविषयका ये सङ्केताः सङ्केतिताः सन्ति, तेऽपि भाषाविज्ञानपदेनैव व्यपदेश्याः। ते सङ्केताः, निरुक्तम्, पाणिनीयं व्याकरणम्, मीमांसाशास्त्रञ्च समेषां व्याख्यानानामुपजीव्यभूतानि। निरुक्तिपरा व्याख्यानपद्धतिर्भवतु, सायण-उव्वट-महीधरादीनां पद्धतिर्भवतु, दयानन्दीया पद्धतिर्भवतु, अरविन्दकृता वा पद्धतिर्भवतु, समासामुपकारकं भाषाविज्ञानमेव।

आधुनिकेन पाश्चात्त्यभाषाविज्ञानेन या व्याख्यानपद्धतिः प्रवर्तिता, तत्राप्यस्ति किमपि नावीन्यं, किमपि विज्ञानसम्मतं प्रामाण्यं, कापि युक्तियुक्तता। प्राचीनैर्भाष्यकारैः परम्परानुसारं यज्ञपरकाणि अध्यात्मपराणि च व्याख्यानानि विहितानि, यतो हि तदानीं समाजस्य प्रवृत्तिस्तादृशी आसीत्। और्णनाभो व्याचष्टे 'नासत्यौ' इति 'सत्यं च अनृतञ्च' इति, आग्रायणो व्याचष्टे—'सत्यस्य प्रणेतारौ' इति। यास्कानुसारेण तु 'नासिकाप्रभवौ' इति। एवंविधानि बहूनि उदाहरणानि सन्ति यत्र प्राचीना व्याख्यातार एकमतयो नावलोक्यन्ते। अत एव वेदानां भाषावैज्ञानिकव्याख्यातृषु अग्रगण्यः 'राथ'महोदयो व्याख्यानस्य नवीनां समीक्षात्मिकां पद्धतिं समुपस्थापितवान्। सूक्ष्मतया तुलनाद्वारा रूपतस्तत्त्वतश्च सदृशानां शब्दानां सङ्कलनेन सन्दर्भगतं, व्याकरणगतं, व्युत्पत्तिगतं चान्तःसाक्ष्यं समीक्ष्य, ऐतिहासिकं बाह्यसाक्ष्यं चानुपेक्ष्य अवेस्ताप्रभृतिभिर्भाषान्तरैः सह सम्बन्धं संयोज्य च व्याख्यानमुपक्रान्तं तेन। भारतीयभाष्यकाराणां तथ्यानां निष्कर्षणाञ्चावमूल्यनं विदधतस्तस्य व्याख्यानं वैयुत्पत्तिकं महत्त्वं सर्वातिशयेन बिभर्ति। परवर्तिषु भारतीयव्याख्याकारेषु प्रतिक्रियापि काचिज्जाता। तत्परिणामरूपेण तैर्भारतीयसभ्यतायाः संस्कृतेश्च उत्कर्षोऽपि अधिकतरं ख्यापितः। भाषावैज्ञानिकानां व्याख्याकाराणां कृते सौविध्यमिदमासीद्, यत् पारम्परिकी व्याख्यासमृद्धिस्तु सुलभैवासीत्, तुलनात्मिका ऐतिहासिकी शोधपद्धतिरपि सहायिकासीत्, या भारतीयव्याख्यातृणां कृते तिरोहितासीत्। तुलनात्मकेन भाषातत्त्वेन सह तुलनात्मकधर्मस्य तुलनात्मकपुराकथाशास्त्रस्य च उपलम्भावसर एव नासीत्।

आधुनिका व्याख्यातारो मन्यन्ते यद् वेदेषु देवानां दैत्यानां च प्रकाशान्धकारशक्त्योर्मानवीकरणम्। द्वादश आदित्या द्वादशमासरूपाः। तैः स्वच्छन्दतया भारतीयपरम्परामजानद्भिरानेकेषां पदानां भ्रान्तिपूर्णा व्याख्या कृता। यत्र क्वचित् पाठभेदस्यापि कल्पना कृता। ते न जानन्ति यद् वेदानां पाठा ऋषिभिर्बहुभिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयत्नैः स्वर-पदपाठ-विकृतिपाठादिभिर्यथावद् अद्य यावत् संरक्षिताः। तेषामर्थानुसन्धानविधौ बहुषु दोषेषु सत्स्वपि बहवो गुणा अपि सन्ति।

स्थालीपुलाकन्यायेनात्र भाषाविज्ञानविधिना विहितानि कानिचिद् व्याख्यानानि प्रस्तूयन्ते—

१. ऋग्वेदस्य प्रथममण्डलस्थे उषःसूक्ते उषसामेकं विशेषणपदं 'विश्वसुविदः' इति वर्तते। तत्र सायणो व्याचष्टे 'कृत्स्नस्य धनस्य सुष्ठु लम्भयित्र्यः' इति। समध्वनिलोपनियमम् (Haplology) अनुसृत्य ब्लूमफील्ड-जेल्डनरमहाभागौ तत्र 'विश्ववसुविदः' इति मत्वा व्याचक्षाते। तत्रैव 'सूनृताः' (प्रियहितवाचः) इत्यस्य व्युत्पत्तिं सन्दिग्धां मत्वा यथायथमर्थं स्वीकुर्वन्ति।

२. तस्मिन्नेव सूक्ते एकस्मिन् मन्त्रे 'उच्छात्' इति प्रयोगो वर्तते। अपरत्र 'उच्छत्' इति। उच्छात् = व्युच्छति प्रभातं करोतीति सायणः। अत्र विवासार्थकाद् 'उच्छी'-धातोः 'प्रभातं करोति' इति कथम्? भाषावैज्ञानिकाः √वस् to shine, इत्यतः Pres. subjund इति निर्दिशन्ति। उच्छत् इत्यत्र √वस् to shineinjund इति च। सायणस्तु 'उछी विवासे' इति धातोः 'लङि' रूपं मन्यते। अत्र उभावपि व्याख्यातारौ चिन्त्यौ। एवमेव 'व्युष्टौ' √वश् कान्तौ इति धातोः √वश् to shine desire इति अर्थयोः कथं सङ्गतिः। 'उश्मसि' इत्यत्र √वश् to wish इति ध्वनिसाम्यं नूनं ध्येयम्।

३. वरुणसूक्ते प्रयुक्तम् 'दृशेयम्' इति पदं पाणिनिः आशीर्लिङि शपं प्रबाध्य अङ्प्रत्ययं विधाय साधयति। भाषावैज्ञानिकास्तु 'अङ्'- महिम्ना a-qorist मूलं (base) परिकल्प्य विधिलिङि साधयन्ति। 'दृश्'धातुः 'पश्य'धातुश्च द्वावपि स्वतन्त्रधातू कल्पनीयौ। दृशः स्थाने सार्वधातुकलकारेषु 'पश्य' इति आदेशपरिकल्पनं नोचितम्। पादीनां स्थाने पिबादयः, हनादीनां स्थाने वधादीनामादेशा न कल्पनीयाः, अपि तु उभयानपि स्वतन्त्रधातून् मत्वा तेषां पृथक् पृथग् रूपस्थलभूताः प्रत्यया निर्धारणीयाः। यथा 'अस्तेर्भूः' इति व्यवस्थायां सत्यामपि अस्धातोः भूधातुः पृथग् इति अभ्युपगम्यत एव। 'हृग्रहोर्भश्छन्दसि' इति नियमेन हृधातोः भत्वविधानं व्यर्थमेव, यदि भूधातुः पृथगवर्तत एव। एवं वदन्ति भाषावैज्ञानिकाः।

४. Infinitive इति व्यपदेशभाजां तुमर्थप्रत्ययान्तानां चतुर्धा विभागः—
१. Dative—एतवे, कर्तवे, वातवे, इत्यै, स्तवध्यै।
२. Accusitive—(द्वितीयान्तप्रतिरूपक)-दातुम्, प्रष्टुम्, कर्तुम्, आरभम्।
३. Ablative genitive—(पञ्चम्यन्त-षष्ठ्यन्तप्रतिरूपक)-अतिस्कदः, कर्तोः, एतोः। ४. Locative—(सप्तम्यन्तप्रतिरूपक)-सन्दृशि, सञ्चक्षि, गृणीषणि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिनीये तन्त्रे एकस्मिन्नेव बहूनां गणना कृतास्ति, तुमर्थे सेसेनसेऽसेन् इत्यादौ। शेषाणां कृते अन्यान्यपि सूत्राणि यथावश्यकं सन्ति।

५. सार्वधातुकार्धधातुकविभागं विहाय भाषावैज्ञानिकैः क्रियारूपसंरचनायाश्चत्वारो विभागाः कृताः, यथा उत्सूत्राणां वैदिकप्रयोगाणां सङ्गतिरुपपाद्येत। ते विभागाः सन्ति—

१. Present Base (वर्तमानकालिक आधारः)
२. Perfect Base (लिडात्मक आधारः)
३. Aorist Base (लुङात्मक आधारः)
४. Future Base (भविष्यकालिक आधारः)

सर्वत्र अवस्थानां (Mood) व्यवस्था कृता। वर्तमानकालिकेन आधारेण लट्-लङ्-लोट्-लेट्-लिङ् (विधि)लकाराणां शतृशानचोश्च व्यवस्था वर्तते। लिडात्मके आधारेऽपि Injuctive mood लिङ्लकारस्य च व्यवस्था कल्पिता वर्तते (इन्द्रस्य नु वीर्याणि प्रवोचम्, बभूयात्)। क्वसु-कानचोरप्यत्रैव सन्निवेशोऽस्ति। (आवस्थिवांसौ, ईणानः)। Aorist आधारितक्रियापदानां सिद्धौ च्लेः सिच्, अङ्, चङ्-क्सप्रभृतिभ्य आदेशेभ्यस्त्राणमवाप्तुं ग्रीकव्याकरणानुसारेण नवीना विभागा विहिताः। तद्यथा—



भविष्याधारिते भेदे लृट्-लुटोः सन्निवेशो जातोऽस्ति। लुट्लकारस्य प्रयोगः ऋङ्मन्त्रेषु नोपलभ्यते। वेदेषु प्रयुक्तानां क्रियाणां लकारनिष्पन्नानां कृन्निष्पन्नानां च पाणिनिभिन्नविधिना भाषावैज्ञानिकैर्व्यधायि। तत्र क्वचित् क्वचित् स्खलितयः सन्ति। परन्तु तुलनात्मकदृष्ट्या समीक्षात्मकदृष्ट्या चाधुनिकभाषाविज्ञानविदां प्रयासोऽतितरां सार्थक्यमावहति। तेषां प्रयासस्यैव फलं यद् अद्य विश्वक्षितिजे समादरभावनया वैदिकं वाङ्मयमधीयमानं वर्तते। वेदाध्ययने काचिद् गतिरायाता।

इति शम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्राह्मणग्रन्थानां लोकदृष्टिः

डॉ. हरीश्वरदीक्षितः
उपाचार्यो विभागाध्यक्षश्च, संस्कृतविभागस्य,
राजाहरपालसिंहस्नातकोत्तरमहाविद्यालये,
सिगरामऊ, जौनपुरम्

***

मानवस्तु तस्या एव शक्तेरंशभूतो यया सम्पूर्णमिदं स्थावरजङ्गमात्मकं जगत् परिचाल्यते। इष्टस्य प्राप्तिः, अनिष्टस्य परिहार एव प्रधानं लक्ष्यं मानवजीवनस्य। अस्य लक्ष्यस्य प्राप्तये विश्वस्य प्राचीनतमे वाङ्मये वेदे विपुलं ज्ञानं प्राप्यते। वेदस्य निर्देशा उपदेशाश्च सन्ति मानवस्य जीवनसाफल्याय परं साधनम्। वेदोपदेशान् व्यवहारे आचरन् पुरुषो धर्मार्थकाममोक्षाणां पुरुषार्थानां प्राप्तये सुतरां समर्थो भवति। 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति वचनाद् ब्राह्मणभागोऽस्ति वेदस्यैको भागः। अत्र वेदस्य यज्ञपरकं व्याख्यानमुपलभ्यते। विधिनिषेधार्थवादेतिहासपुराणैश्च ब्राह्मणेषु यज्ञकर्मणां विविधानि फलानि निर्दिष्टानि। इत्थं ब्राह्मणानि पुरुषं सत्कर्मसु प्रेरयन्ति। इयमेव ब्राह्मणानां लोकदृष्टिः, या विविधेषूपदेशपरेषु वाक्येषु स्फुटीभवति।

ब्राह्मणेषु यज्ञस्यैव माहात्म्यं प्रतिपादितम्। तत्र स्पष्टमेवोक्तमस्ति—'यज्ञो वै श्रेष्ठतमं कर्म'[१]। काठकसंहितायामपि[२] वचनमिदं प्राप्यते। यज्ञस्तु प्रजापतेरेव रूपमित्यपि उद्घुष्टं ब्राह्मणेषु दृश्यते। शतपथब्राह्मणे कथितमेव 'एष वै प्रत्यक्षं यज्ञो यत्प्रजापतिः'[३]। अग्निहोत्रादारभ्याश्वमेधपर्यन्तं सर्वं कर्म प्रजापतेरेवाराधनम्। प्रजापतिरेव प्रजानां रक्षकः। यज्ञस्यापि पतिः स एव। अग्नये प्रदत्तं हविर्वायुना सह सूर्यं प्रति गच्छति, तदनन्तरं सम्पूर्णेऽन्तरिक्षे व्याप्तं भवति। सूर्यस्य प्रभावेण मेघमण्डलैः सह मिश्रीभूय हविरिदं वृष्टेः कारणं भवति, येनान्नस्योत्पत्तिर्भवति। अन्नेनैव प्रजानां रक्षणं पोषणञ्च भवति। हविषा पार्थिवानां पदार्थानामाकाशस्य वायोः सूर्यरश्मीनाञ्च शुद्धिर्जायते। हविषैव देवास्तृप्तिं यान्ति, तृप्ताश्च ते मानवस्य

१. शतपथब्रा., १।७।१।५; २. काठकसंहिता, ३०।१०।
३. शतपथब्रा., ४।३।४।३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्याणाय कल्पन्ते। यज्ञोद्भूतैः पुण्यैर्यज्ञकर्त्ता स्वर्गं प्राप्नोति। यज्ञैर्देवार्चनं कृत्वा पुरुषो मोक्षं विन्दते।

'सर्वस्मात् पाप्मनो निर्मुच्यते य एवं विद्वानग्निहोत्रं जुहोति'[१] इति शतपथब्राह्मणस्य वचनम्। अन्यत्रापि ब्राह्मणवाक्यमिदं प्राप्यते 'सर्वां ह वै पापकृत्यां सर्वां ब्रह्महत्यामपहन्ति योऽश्वमेधेन यजते'[२]। प्रथमतो मन्त्रपाठश्चित्तशुद्धिं जनयति। एतदतिरिक्तं यज्ञैर्मन्त्रपाठेन च वायुमण्डले परिवर्तनं भवति, निखिले विश्वे धर्मचक्रस्य प्रवर्तनञ्च भवति। समेषां पृथिव्याकाशमानवानां पावनं साधनमिदं यज्ञकर्म।

'अग्नेर्वै धूमो जायते, धूमादभ्रमभ्राद् वृष्टिः'[३] इति शतपथब्राह्मणस्य वचनम्। अग्नेः तापाद् वा धूम उत्पद्यते, धूममण्डलैर्भवति मेघानां निर्माणम्, मेघा वृष्टिप्रदायकाश्च। ऐतरेयब्राह्मणे[४] वचनमिदं प्राप्यते 'विद्युद्धीदं वृष्टिमन्नाद्यं सम्प्रयच्छति' इति। अस्यायमेवार्थो यद् विद्युतताप एव वृष्टेः कारणं भूत्वा अन्नादिखाद्यपदार्थान् मनुष्येभ्यो ददाति। तैत्तिरीयसंहितायां (२।४।९।१०), मैत्रायणीसंहितायां (२।४।८), काठकसंहितायां (११।१०) चायमेव सिद्धान्तः प्रतिपादितः। शतपथब्राह्मणानुसारं[५] वायोः प्रभावादेव मेघा जायन्ते। अत एव मरुत एव राजन्ते वृष्टेरिति तात्पर्यं ब्राह्मणस्यास्य—'मरुतो वै वर्षस्येशते'[६]। अत एव वायुमेवानुसरति वृष्टिः 'तस्माद्यां दिशां वायुरेति तां दिशां वृष्टिरन्वेति'[७]।

यज्ञैः शोधितं वृष्टिजलमन्यज्जलमन्नानि च पावयति। शुद्धेनान्नेन शुद्धेन च जलेन शरीरमपि शुद्धं स्वस्थञ्च भवति। अत एवोक्तं 'वृष्टिकामो यजेत'।

जीवने दृढेन निश्चयेन सहाक्लान्तं समुन्नतये पुरोगमनमेवोपदिष्टम् ऐतरेयब्राह्मणस्य गाथायामस्याम्—

चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम्।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरन् चरैवेति[८]॥

यथा सूर्यः सततं गतिशीलः सन् जगति पूज्यतां व्रजति, तथैव यः पुरुषो गतिशीलः स्वकार्येषु तन्द्रारहितः सततं यत्नशीलश्च स एव मधु कर्मणां मनोहरं फलं वा प्राप्नोति।

---

१. शतपथब्रा., २।३।१।६;
२. तदेव, १३।५।४।१।
३. ऐतरेयब्रा., १।४।३;
४. शतपथब्रा., ५।३।५।१७।
५. तदेव, १।८।३।१२;
६. तदेव, ९।१।२।५।
७. तदेव, ८।२।३।५;
८. ऐतरेयब्रा., ३३।३।१५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्गलोकस्य विषये ब्राह्मणानां वचनमिदम्—'सहस्राश्वीने वा इतः स्वर्गो लोकः'[१]। लोकोऽयं देवैर्यज्ञैः श्रमेण तपोभिराहुतिभिश्च प्राप्तः। 'देवा वै यज्ञेन श्रमेण तपसाऽऽहुतिभिः स्वर्गलोकमायन्'[२]। पुण्यकर्माण एव स्वर्गं प्राप्नुवन्ति—'ये हि जनाः पुण्यकृतस्ते स्वर्गं लोकं यन्ति'[३]। लोकानां विषये ब्राह्मणस्योक्तिरियमेव—'त्रयो वा इमे लोकाः[४], पृथिव्यन्तरिक्षं द्यौः'[५]। समेषामेषां लोकानां रक्षकः प्रजापतिः। 'प्रजापतिर्वा अमृतः'[६]। ब्राह्मणानां दृष्ट्या प्रजापतिरेव परमात्मा, अमरोऽनादिश्च। प्रजापतिरग्रे आसीत्, स एकाकी आसीत्, तस्मिन् सिसृक्षा समुत्पन्ना—'प्रजापतिर्वा इदमग्र आसीत्। एक एव सोऽकामयत'[७]। मनसैव मनुष्यस्तं प्रजापतिमाप्नोति। 'मनसैवैनमाप्नोति'[८]। वचनमिदमुपनिषत्सु बहुश उपदिष्टम्[९]।

मोक्षो मुक्तिर्वा जगति जन्ममरणबन्धनाद् मुक्तिरेव। यज्ञाग्निहोत्रमपि मुक्तये कल्पते। उक्तञ्च—'पुनर्मृत्युं मुच्यते य एवमेतामग्निहोत्रे मृत्योरतिमुक्तिं वेद'[१०]। एवमन्यत्राप्युपदिष्टमस्मिन् ब्राह्मणे यद् योऽग्निचयनं सम्पादयति, सः पुनर्मृत्युं जयति[११]। सः पुनर्मृत्युजयेन सह ब्रह्मात्मैक्यमपि प्राप्नोति—'पुनर्मृत्युं मुच्यते गच्छति ब्रह्मणः सात्मताम्'[१२]। अत्रैव इदमपि कथितं यदात्मन्येव सर्वे प्राणाः प्रतिष्ठिताः[१३]। वर्त्तमानकालिकानां शरीरशास्त्रिणां मते मनुष्यः प्रतिदिनं चतुर्विंशतिघटिकासु २१६०० वारं श्वासक्रियां करोति। शतपथब्राह्मणस्याप्येतादृशं मतम्[१४]।

'शतायुर्वै पुरुषः' इति कौषीतकिब्राह्मणवचनम्[१५]। शतपथब्राह्मणस्तु[१६] अतो दीर्घतरं कालं मनुते पुरुषजीवनस्य—'अपि हि भूयांसि शताद्वर्षेभ्यः पुरुषो जीवति। यः अग्निहोत्री सः पूर्णायुरभ्येति'[१७]। यः प्रतिदिनं वारद्वयं मिताहारेण वर्तते

---

१. ऐतरेयब्रा., २।१७; २. तदेव, ३।४२।
३. शतपथब्रा., ६।५।४।८; ४. तदेव, १।२।४।२०।
५. तदेव, ११।५।८।१; ६. तदेव, ६।३।१।१७।
७. तदेव, ६।१।३।१; ८. काठक., २९।६।
९. बृहदारण्यकोपनिषद्, ४।११, कठवल्ली, ४।११।
१०. शतपथब्रा., २।३।३।९; ११. तदेव, १०।१।४।१४।
१२. तदेव, ११।५।६।९; १३. तदेव, ११।२।१।२।
१४. तदेव, १२।३।२।८; १५. कौषीतकिब्रा. ११।७।
१६. शतपथब्रा., ...; १७. तदेव, २।१।४।९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोऽपि पूर्णायुः प्राप्नोति[१]। हिरण्यधारणादपि आयुषो वृद्धिर्भवतीत्यथर्ववेदस्य कथनम्[२]।

ब्राह्मणेषु व्याधीनामुत्पत्तीर्निर्दिश्य तेषां विनाशोपाया अपि वैज्ञानिकरीत्या प्रतिपादिता दृश्यन्ते[३]। कौषीतकिब्राह्मणे[४] गोपथब्राह्मणे[५] च व्याधीनामुत्पत्तिर्विशेषेण ऋतुसन्धिषु भवतीति वचनं प्राप्यते। रोगाणां कीटाणवो यज्ञियेनाग्निना नश्यन्तीत्यपि शतपथब्राह्मणस्योक्तिः[६]। हिरण्यन्तु सारभूतमग्नेः[७], कीटाणुविनाशकञ्च[८]। अनेनैव कारणेन आर्येषु कर्णयोः स्वर्णनिर्मितकुण्डलयोर्धारणं प्रचलितमासीत्। सूर्यस्य रश्मयः[९], वेदविदो विद्वांसः[१०], साममन्त्रपाठकाश्च[११] कीटाणुविनाशका भवन्तीति ब्राह्मणवचनम्। शुद्धं जलं रोगनाशकमिति तैत्तिरीयब्राह्मणस्योक्तिः[१२]।

स्त्रीणां विषये विविधा आचारा उपदिष्टाः सन्ति ब्राह्मणेषु। स्त्रीसमीपे पुरुषस्य, पुरुषस्य समक्षं स्त्रिया वा भोजनग्रहणं निषिद्धमस्ति[१३]। स्त्रीसमीपे भोजनग्रहणमकुर्वन् पुरुषो बलशालिनः पुत्रस्य जनको भवतीति शतपथब्राह्मणस्य कथनम्। पुत्रस्य महत्त्वं सर्वातिशायि वर्तते, यतो हि अपुत्रः स्वर्गलोकं पितृलोकं वा न भजते[१४]। वार्धके पुत्र एव पितू रक्षक आश्रयो वा भवति। अस्यामवस्थायां पुत्रस्य महत्त्वमनुभूयैव शतपथब्राह्मणेनोक्तम्—'तस्मादुत्तरवयसि पुत्रान् पितोपजीवति'[१५]। पिण्डदानक्रियार्थमपि पुत्र एव प्रथमोऽधिकारी भवति, अनेन हेतुनापि पुत्रस्य सर्वातिशायि महत्त्वमस्ति।

बहुश उल्लेखाः सन्ति ब्राह्मणेषु स्त्रीविषयकाणां नियमानाम्। सुन्दरी स्त्री प्रियेति शब्देन ख्याता। 'तस्माद् रूपिणी युवतिः प्रिया भावुका'[१६]। कीदृशी स्त्री सुन्दरी भवतीति विमर्शो दृश्यते शतपथब्राह्मणस्य वचनेऽस्मिन्—'पश्चाद् वरीयसी पृथुश्रोणिरिति वै योषां प्रशंसन्ति'[१७]।

१. शतपथब्रा., २।४।२।६;
२. मैत्रायणीसंहिता, १।९।५।
३. अथर्ववेदः, १।३५।२;
४. कौषीतकिब्रा., ५।१।
५. गोपथब्रा. उत्तरार्द्धे, १।१९;
६. शतपथब्रा., १।२।१।६।
७. तदेव, १४।१।३।२९;
८. तदेव, १४।१।३।२९।
९. तदेव, १।३।४।८;
१०. तदेव, १।१।४।६।
११. तदेव, ४।४।५।६;
१२. तैत्तिरीयब्रा., ३।२।३।१२।
१३. शतपथब्रा., १०।५।२।९, १।९।२।१२;
१४. नापुत्रस्य लोकोऽस्ति। (ऐतरेयब्रा. ७।१३)
१५. शतपथब्रा., १२।२।३।४;
१६. तदेव, १३।१।९।६।
१७. तदेव, ३।५।१।११।

CC-0.In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्रीसौन्दर्यविषये शतपथब्राह्मणस्योक्तिरियं ध्यातव्याऽस्ति—'एतद्वै योषायै समृद्धं रूपं यत् सुकपर्दा सुकुरीरा स्वौपशा'[१]। पत्नी वस्तुतस्तु भवत्यर्द्धाङ्गिनी। तैत्तिरीयब्राह्मणस्यात्र कथनमस्ति—'अथो अर्द्धो वा एष आत्मनो यत्पत्नी'[२]। पत्नीहीनस्य यज्ञकर्मस्वपि न भवत्यधिकारः[३]। लक्ष्मीरूपेण तिष्ठन्ति लोकेऽस्मिन् पत्न्य इति तैत्तिरीयब्राह्मणस्य कथनम्[४]। एवमेव स्त्रीषु ये दोषा दृश्यन्ते, तेषां निन्दाऽपि ब्राह्मणेष्ववलोक्यते। 'मोघसंहिता एव योषा तस्माद्य एव नृत्यति यो गायति तस्मिन्नेवैता निमिश्लतमा इव' इति शतपथब्राह्मणस्य वचनम्[५]। एतादृशं वचनं मैत्रायणीसंहितायामपि लभ्यते[६]। ऊर्णासूत्रनिर्माणं कार्पाससूत्रनिर्माणञ्चासीद् ब्राह्मणकाले स्त्रीणां कार्येषु महत्त्वपूर्णं कार्यमेकम्। उक्तञ्च—'तद्वा एतत्स्त्रीणां कर्म यदूर्णासूत्रम्'[७]। सत्यपि स्त्रीणां महत्त्वे पुरुषजीवने परिवारे समाजे वा कन्यायाः जन्माभिनन्दनीयं नासीदिति स्पष्टमेव दृश्यते मैत्रायणीसंहितायाम्[८]। सभासु पुरुषाणामेवोपस्थितिरनुमताऽपेक्षिता चासीत्, न तु कथमपि स्त्रीणाम्[९]। गृह एव आसीत् तासां प्रतिष्ठा. अत एव तासां गृहाद् बहिर्गमनं प्रतिषिद्धमासीत्। स्त्रीणां वधो निन्दितोऽस्ति ब्राह्मणेषु[१०]।

वैदिके धर्मे सत्यस्य सर्वातिशायि महत्त्वं सर्वत्र दृश्यते। सत्यभाषणं, सत्यसङ्कल्पः, सत्कर्मणामाचरणमित्येव सन्ति विषया वैदिकोपदेशानाम्। आर्याणां जीवने असत्यभाषणमासीत् सर्वाधिकं निन्दितं कर्म। शतपथब्राह्मणस्य वचनमिदम्—'अमेध्यो वै पुरुषो यदनृतं वदति'[११]। असत्यभाषणस्य कश्चिदपि प्रभावो न जायते। ताण्ड्यमहाब्राह्मणे असत्यविषये कथितमस्ति—'एतद्वाचश्छिद्रं यदनृतम्'[१२]। यो हि असत्यभाषणं करोति, तस्य श्रीः प्रतिदिनं क्षीणा भवति। तस्य पापानां भवत्यनुदिनं वृद्धिः। 'तस्य कनीयः कनीय एव तेजो भवति श्वः पापीयान् भवति तस्मादु सत्यमेव वदेत्'[१३]।

---

१. शतपथब्रा., ६।५।१।१०; २. तैत्तिरीयब्रा., ३।३।३।५।
३. अयज्ञो वा एष योऽपत्नीकः। (तैत्तिरीयब्रा., २।२।२।६)
४. श्रिया वा एतद्रूपं यत्पत्न्यः। (तैत्तिरीयब्रा., २।९।४।७)
५. शतपथब्रा., ३।२।४।६; ६. मैत्रायणीसंहिता, ३।७।३।
७. शतपथब्रा., १२।७।२।११; ८. मैत्रायणीसंहिता, ४।६।४।
९. तदेव, ४।७।४;
१०. न वै स्त्रियं घ्नन्ति। (शतपथब्रा. ११।४।३।२)
११. शतपथब्रा., ३।१।३।१८; १२. ताण्ड्यब्रा., ८।६।१३।
१३. शतपथब्रा., २।२।२।१९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यज्ञार्थं दीक्षिताय बहवो नियमा उपदिष्टा ब्राह्मणेषु। तेन तु केवलं सत्यमेव वेदितव्यम्। तस्य कृते मांसभक्षणं स्त्रीगमनञ्च सर्वथा वर्जितमस्ति[१]। सत्यमेव पुरुषं स्वर्गं गमयति[२]। त्रयो वेदा एव सत्यम्[३]। सततमजेयो भवति सत्यवादी[४]। मदपानं पतनस्य कारणमिति ब्राह्मणानां मतम्[५]। मैत्रायणीसंहितायां काठकसंहितायामपि मदपानं भृशं निन्दितमस्ति। रोगा अपि पाप्मनो लक्षणम्। काठकसंहिताया वचनमिदम्—'पाप्मनैव गृहीतो य आमयावी'[६]। परधनापहरणं लुण्ठनं वा घोरं पापम्[७]। अपशब्दभाषणैः कस्यचित्तिरस्कारोऽपि पापकर्म[८]। सर्वेषां पापकर्मणां प्रायश्चित्तान्युपदिष्टानि सन्ति। सर्वथाभिमानस्याहङ्कारस्य च त्यागः कर्तव्यः। शतपथब्राह्मणे वाक्यमिदं प्राप्यते—'तस्मान्नातिमन्येत पराभवस्य हैतन्मुखं यदतिमानः'[९]।

ब्राह्मणेषु ये उपदेशाः कृताः, ते सर्वे मानवस्योत्थानाय परमावश्यकाः सन्ति। शास्त्रेषु पुराणेषु च एतेषामुपदेशानामेव विस्तरो दृश्यते। न किञ्चिदपि विद्यते एतेषु विज्ञानविरुद्धं विवरणम्। ब्राह्मणेषु राज्ञां मुनीनाञ्च विषये अनेकानि आख्यानानि सन्ति, येषां विकासो विस्तरश्च पुराणेषु दृश्यते। वस्तुतस्तु ब्राह्मणग्रन्थाः सन्ति भारतीयायाः संस्कृतेः अक्षय्यः कोशः, अस्माकं प्राचीनस्य श्रेष्ठस्य च ज्ञानस्य चाद्वितीयो निधिः।

---

१. तैत्तिरीयसंहिता, २।५।५।३२; २. ताण्ड्यब्रा., १८।२।१९।
३. शतपथब्रा., ९।५।१।१८; ४. तदेव, ३।४।२।८।
५. मैत्रायणीसंहिता, २।४।२; काठकसंहिता, १२।१२।
६. काठकसंहिता, १३।६; ७. ऐतरेयब्रा., ८।११।
८. तदेव, ७।२७; ९. शतपथब्रा., ५।१।१।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोशब्दस्य यास्कीयनिर्वचनम्

डॉ. महेन्द्रपाण्डेयः
प्राध्यापकः, वेदविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

***

गच्छतीति गौरित्यत्र पशुवाचको गोशब्दः[१], सर्वत्र हि सञ्चरणाय गच्छतीति। गीयते स्तूयते वा। कर्तरि गमेर्डोस्प्रत्यये कृते गौरिति शब्दनिष्पत्तिः, अथवा गातेर्धातोः ओकारो नामार्थप्रत्ययः। बाहुलकाद् डोस्प्रत्यये कर्तरि अधिकरणे वा भवतीति। गमनक्रियायां हि सर्वप्राणिनामस्तित्वम्। गमनक्रियाभावाद् मृत्युमेतीति उद्घोषयन्ति पूर्वाचार्याः। यतो हि शरीरे पञ्चतत्त्वादितत्त्वाभावात् सञ्चरणस्याभावः, तस्माद् गच्छतीति गोनामधेयो भवति। यथा—आयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः[२]। तथा च अथर्ववेदे कथितमपि 'प्राणा अपाना इह ते रभन्ताम्'[३]। अतो यास्काचार्यो गमनक्रियामधिकृत्य प्रब्रवीति—'गौरिति पृथिव्या नामधेयमिति'। एवम् 'अथापि पशुनामेह भवति'[४]। यथा कारणमाह—यद् दूरङ्गता भवति। यच्चास्यां भूतानि गच्छन्ति। प्रथनादेव पृथिवी अर्थाद् अस्याः पृथिव्या अन्तो नोपलभ्यते। इयं दूरमध्वानं प्रति गता भवति। सर्वस्य जगतः पृथिवी एव आधारभूता, अतो गौरिति पदेन पृथिवी एव गृह्यते। अस्यां सर्वे जङ्गमादिप्राणिनो गच्छन्ति गायन्ति तिष्ठन्ति वेति। तथा च अमरकोषे—'गौः कुम्भिनी क्षमा'[५]। एवं रघुवंशमहाकाव्येऽपि—'दुदोह गां स यज्ञाय'[६]। इति पृथिव्यर्थे गोशब्दस्य प्रयोगा एवं लभ्यन्ते। तथा च तद्धितप्रयोगेऽपि गौरित्यस्य प्रयोगो भवति। अर्थाद् अस्यामेव पशुगवि तद्धितप्रत्ययकृतेन विशेषेण गोभिः = पयोभिः, इत्यर्थो भवति। तथा च मन्त्रः—

---

१. निरु. २।२ एवं 'गौर्नादित्ये बलीवर्दे किरणक्रतुभेदयोः' इति केशवः। तथा च 'जुगोप गोरूपधरामिवोर्वीम्' रघुवंशे - २।३।

२. शुक्लयजुर्वेदे - ३।६;

३. अथर्व. ८।१।१।

४. निरु. २।२;

५. अम. २।१।४।

६. रघु. १।६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'आ धावता सुहस्त्यः शुक्रा गृभ्णीत मन्थिना। गोभिः श्रृणीत मत्सरम्'[१]। अर्थाद् हे सुहस्त्यः = शोभनहस्ता ऋत्विजः, एभिर्ग्राविभिः संस्कृत एष सोम इति यूयम्, आधावता = अधावत् सपद्यागच्छत। गृभ्णीत = गृह्णीत, एतौ शुक्रा = शुक्रौ, मन्थिना = मन्थिनौ ग्रहौ। किञ्च गोभिः = गोविकारैः पयोभिरित्यर्थः, मत्सरम् = मदयितारं सोमम्, श्रीणीत = संस्फुरुत। अत्र मत्सरः सोमो मन्दते तृप्तिकर्मणः। इत्यत्र गोभिः श्रपणस्य गव्येन पयसेत्यर्थो गम्यते। विकारार्थे गोशब्दाज्जातस्य यत्प्रत्ययस्य लुक्।

अपि च गोरित्यधिषवणचर्मणो नाम भवति। अत्रापि गौः कृत्स्नवदभिधायकः। अर्थाद् गोरवयवभूतस्य चर्मण इति। यथा निगमः—

'ते सोमादौ हरी इन्द्रस्य निंसतेंशु दुहन्तो अध्यासते गवि।

'तेभिदुग्धं पपिवान्सोम्यं मध्विवेन्द्रो वर्धते प्रथते वृषायते'[१]।

निगमेऽस्मिन् सप्तम्यर्थे एतदवयवभूतस्य चर्मणो नाम। 'चर्म चरतेर्वा उच्चृतं भवतीति वा'[२]। अर्थात् चरतीति चर्म। सर्वस्मिन् शरीरे गतं संलग्नं भवति अथवा शरीरात् चर्मते पृथक् क्रियते। चर्म अत्र सोमाभिषवार्थे चर्मनिमित्तपात्रविशेषः।

मन्त्रार्थः—ते = एते ग्रावाणः, सोमादः = सोमभक्षयितारः इन्द्रस्य, हरी = अश्वौ, निसन्ते = चुम्बन्ति। अंशु = सोमासमभिषूय, दुहन्तः = प्रपूरयन्तः, ग्रहम्, अध्यासते = अधितिष्ठन्ति। स इन्द्रः, तेभिः = तैः दुग्धं सोम्यम् = सोममयम्। मधु = अमृतं पपिवान् = पीतवान् वर्धते वीर्येण, प्रथते = विस्तीर्णशरीरश्च भवति। 'पृथु विस्तारे'। ततश्च वृषायते = वृषे वा चरति। वर्षं प्रवर्तयतीत्यर्थः। गवि इत्यत्र चर्मणो नाम गोरवयवभूतस्य कृत्स्नवदभिधायकः।

एवमेव अन्यत्रापि गोशब्दोऽनेकार्थः प्रतिभाति, तद्यथा—'अथापि चर्म च श्लेष्मा च'[३] गृह्यते।

अत्र गवावयवे चर्मणि अस्य गोशब्दस्य विकारे श्लेष्मणि व्यवहारः। यथा—'वनस्पते विड्वङ्गो हि भूया अस्मसखा प्रतरणः सुवीरः। गोभिः सनद्धो असि वीडयस्व स्था ता ते जयतु जे त्वानि'[४]। इति रथास्य स्तुतिः। अत्र गोभिः

१. ऋ.सं. ७।१।३;
२. तदेव-१०।९४।९।
३. निरु. २।२;
४. तत्रैव।
५. ऋ.सं.स. ४।७।३५-१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यस्यार्थो श्लेष्मा भवति। रथः चर्मणावनद्धो भवति। तस्यारादयः श्लेष्मणा संश्लेषिता भवन्ति। एवं गोशब्देन 'स्नाव श्लेष्मा च भवति। अत्र स्नावन्शब्दात् स्नायुवचनो निरुक्तकारेणोक्तः। यथा—'सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सनद्धा प्रतति प्रसूता। यत्रानरः सं च वि च द्रवन्ति, तत्रास्मभ्यमिषवः शर्म यंसन'[1]।

मन्त्रोऽयं इषु - स्नुतौ प्रयुक्तः। इषु हि स्नावना वेष्टिता श्लेष्मा च संश्लेषिता भवति। अतो वेष्टिता श्लेष्मा च संश्लेषिता भवति। अतो मन्त्रेऽस्मिन् गोभिरित्यस्यार्थो गोविकारैश्चर्मभिः, सन्नद्धः = समन्ततः, नद्धो बद्धो गव्येन चर्मणा श्लेष्मणा चेति। तथा च गोशब्देन ज्यापि भवति। अत्र 'ज्या' इत्यर्थे गव्या इति तद्धितप्रयोगः। तथा हि गमयतीषूनिति गव्या = ज्या। तथा च अमरकोषे ज्याशब्देन पृथिवी गृह्यते। अत्र गोशब्देन पृथ्वी तथा च ज्यापि भवति. एवं ज्यापदेनापि पृथ्वी गृह्यते। अतः साम्यात् सुसङ्गत्युक्तो भवति। यथा—श्रोणिर्ज्या काश्यपीधिति'[2]।

तथा च अन्यद्रव्यमपि गोपदेन ग्राह्यं भवति। यथा—'वृक्षे वृक्षे नियतामीमयद्गौस्ततो वयः प्रपतान्पुरुषादः'[3]।

प्रसङ्गादत्र वृक्षे वृक्षे = सर्वस्मिन् वृक्षमये धनुषि धनुषि नियता = निबद्धा, गौः = गव्या अर्थाद् गोसम्बन्धिनी स्नायुमती मौर्वी गव्या वा गमयित्री शराणामिति। अमीमयत् = मीमयति = शब्दं करोति। अत्र मीमयति शब्दकर्मा इति निरुक्तकाराः वदन्ति। तथा च गोमतीनदिविशेषे गोशब्दस्य प्रयोगो जलार्थमपि भवति। यतो हि गोमती जलविशिष्टः प्रसिद्धः नदी इति। यथा—'अश्ववती गोमतीविश्वसुविदो' एवं 'प्र देवि गोमतीरिषः'[4]। एवं 'आदित्योऽपि गौरुच्यते'[5]। आदित्यो हि गमनशीलो भवति। तथा च गमयति ह्यसौ रसानात्मानं प्रति। एवं गच्छत्यन्तरिक्षे च। तदुदये हि चन्द्रादीनां प्रभानाशो भवति। सर्वतो हि गता भवति। गमनेनैव सर्वतो आवृतो भवतीत्यर्थः। यथा—'उतादः परुषे गवि'[6]।

मन्त्रेऽस्मिन् गवि गच्छतीति गौरादित्यः। अत्र निमित्ते सप्तमी भवति। 'निमित्तात्कर्मयोगे'[7]। इत्यनेन अदः = अमुस्मिन् आदित्यमण्डले, परुषे = परुष्मति

---

१. ऋ.सं. ५।१।२१;
२. अम. २।१।२।
३. ऋ.सं. ७।७।१९;
४. तदेव-१।९।४८-१५।
५. निरु. २।२;
६. ऋ.सं. ६।५६।३।
७. पा. २।३।३६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्ववति भास्वति इत्यौपमन्यवः कथयन्ति। अर्थाद् अहोरात्रादि पर्व तद्वति। गवि = गमनशीलः सूर्यः, नियतगमनवृत्तिना नित्यकालमीरयतीति। अत्र चन्द्रोऽपि गौरुच्यते'[१]।

आदित्यात् सुषुम्णो नाम एको रश्मिश्चन्द्रमसं प्रति गच्छति। सेयमस्य चन्द्रमसो दीप्तिभर्वतीति। यथा निगमः प्रमाणयति—'सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः'[२]।

अत्र सुषुम्णः = सुखयतीति सर्वाणि भूतानि नित्यमसौ। आदित्यान्निस्सृत्य रश्मिश्चन्द्रमसं प्रति गतः, अतोऽसौ चन्द्रमा गन्धर्व उच्यते। गन्धर्वः = गां धरतीति नैरुक्तवचनात्, अतः सुषुम्णो रश्मिरपि गौरुच्यते। अर्थाद् गोशब्दवाचकः सुषुम्णारश्मिर्वाच्या इत्यभिप्रायः। एवमत्र चैकदेशे कृत्स्नवन्निगमाच्चन्द्रमसोऽपि गोशब्दवाच्यतेति मन्त्रस्यार्थः।

तथा च नैरुक्ते 'सोऽपि गौरुच्यते'[३]। अर्थात् सुषुम्णो रश्मिरपि गौरुच्यत इत्यभिप्रायः, यथा—'अत्राहं गोरमन्वतेति'[४]। अर्थाद् अत्र गोः = सुषुम्णस्यैकस्य सूर्यरश्मिश्चन्द्रमण्डलेऽन्तःप्रविश्य सूर्यकिरणाः प्रतिफलन्ति। अर्थात् सूर्य इव चन्द्रेऽपि प्रविश्य सर्वं प्रकाशयति। यथा जलमध्ये सूर्यकिरणाः प्रतिफलन्ति।

'सर्वेऽपि रश्मयो गाव उच्यन्ते'[५]। अत्र गाव इति गोशब्दस्य प्रथमाबहुवचने प्रयोगः। गाव इति बहुवचनान्तपदस्य रश्मिरूपेणानुवादेन वैशिष्ट्यं द्योत्यते। रश्मयः तमांसि दूरयति, गच्छन्ति सर्वतस्तमो विहन्तुम्, सर्वतो हि परिगता भवन्ति, व्याप्नुवन्ति जगदित्यर्थः। यथा—

'तां वां वास्तन्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः।
अत्राह तदुरुगायस्य वृष्णः परं पदमवभाति भूरि'[६]॥

अत्र दम्पती अभिप्रेत्य द्विवचनं वां युवाभ्यामित्यर्थः। वस्तूनि = सुखनिवासयोग्यानि स्थानानि, उश्मसि = कामयामहे, यत्र = येषु स्थानेषु, गावः = रश्मयः, भूरिशृङ्गाः =बहुदीप्तयः, अयासः = सञ्चरणशीलः। अत्राह = येषु

---

१. निरु. २।२; २. य.सं. १८।४०।
३. निरु. २।२; ४. ऋ.सं. १।६।७।
५. निरु. २।२; ६. ऋ.सं. १।१५४।६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थानेषु, उरुगायस्य = उरुगमनस्य, भगवतो वृष्णः = विष्णोः परमं पदम् तादृशं तत् पदम्, अर्थाद् आदित्यस्य परमं पदं मस्थानं भूरि = अतिप्रभूतम्, अवभाति = दीप्यते। तथा च 'गोशब्द आदित्यवाचको भवति'[1]।

यतो हि गमयति हि रसानात्मानं प्रति, उपक्षयं वा गमयति, गच्छत्यन्तरिक्षे। स हि गतिक्रियया उदयाचलमस्ताचलं च प्रतिगच्छति। यथा—'सूर्यस्येव रश्मयो द्रावयित्नवो'[2]। तथा च द्यौरपि गौरुच्यते[3]।

यतो द्यौः पृथिव्या उपरि गता भवति। तथा च दिवि ग्रहनक्षत्रतारकादीनि गच्छन्ति तस्माद् गौः। अधिकरणेऽत्र गमेर्डो इति। तथा च सायणेनाप्युक्तम्—'गौर्मगमनशील इति'। यथा—'आयङ्गौः पृश्निरक्रमीत्'[4]। अत्र गच्छतीति गौः इति महीधराचार्यः। एवं गमनशीलः पृश्निः = प्राप्तवर्णः प्राप्ततेजा अयं सूर्यः (स्वर्गे सञ्चरन् पितरं च द्युलोकमपि) आक्रमीत् = आक्रान्तवान् प्राप्तवानिति भावः।

तथा च गोपदवाच्यः उस्त्रिया इति। उस्राविणोऽस्यां भोगाः उस्रेति च[5]।

यतो हि अस्यां = गवि क्षीरादयः ऊर्ध्वं स्रवन्ति गच्छन्ति। एवमेव उस्रा इति गोनाम भवति। क्षीरदधिनवनीतक्रमेणेति सेयमुस्रा। उस्रैव उस्त्रिया स्वार्थे 'घः' पृषोदरादित्वात्। यथा निगमः = 'वीतं पातं पयस उस्त्रियायाः'[6]। अर्थाद् हे मित्रावरुणौ, उस्त्रियायाः = गोः, पयसः =गोदुग्धेन निष्पन्नस्य, वीतम् = अश्नीतम्, पातम् = पिबतञ्च इत्यर्थः। अपि च गौरिति माध्यमिकाया वाचः[7]। मेघो व्रजत्यन्तरिक्षे गर्जतीति च। अन्तरिक्षे मेघः प्रजाहितमभिलक्ष्य वर्षणाचिह्नरूपं गर्जनशब्दं करोतीत्यर्थः। अतो वाग् एव गोशब्दाभिधेया मध्यस्थानीया देवता। यथा मन्त्रः—अलातणो बलः इन्द्रव्रजो गोः'[8]। अत्र गो इति माध्यमिकायां वाचः। तथा च सायणः—गौर्धेनुः वत्समनुप्राप्य हिङ्कारशब्दं करोति। अतो वागिति गोः नाम।

तथा च निगमः—गौरमीमेदनुवत्सं मिषन्तं मूर्धनं हिङ्ङणोन्मातवाउ'[9]।

अत्रापि गौः माध्यमिका वागुच्यते। एवं रघुवंशकाव्येऽपि वागेव[10]। तथा च अघ्न्या अपि गौः भवति। यतो हि गाव एव प्रकृष्टधनमिति। अतः सा अहन्तव्या

१. निरु. २।४;
२. ऋ.सं. १।४।७।३।
३. निरु. २।४;
४. य.सं. ३।६।
५. निरु. ४।३;
६. ऋ.सं. १।५३।४।
७. निरु. ६।१;
८. ऋ.सं. ३।३०।१०।
९. ऋ.सं. १।१६४।२८;
१०. 'रघोरुदारामपि गां निशम्य' (५।१२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति। अथवा अघं पापं हन्तीति दानेन। यदि वाग् गौरुभयथापि अघ्न्या = अहन्तव्या भवति। तथा चोभयार्थे निगमः—'अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती'[४]।

एवं 'अघ्न्येयं सा वर्धतां महते सौभगाय'[५]। तथा च 'गौः तनूरुच्यते'[६]।

यतो हि अस्यां गवि क्षीरदध्यादयो भोगा विस्तृता भवन्ति। अत्र 'तनू विस्तारे' अधिकरणे ऊः प्रत्ययः। यथा—गोः पयो जायते, अतो गोः पुत्रः पयः पयसश्च आज्यं जायते, अत एव अनन्तराया आगमनत्वाद् गौरित्यनेन तनूरुच्यते'। यथा निगमः—

'तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन् स्वदया सुजिह्व'[७]।

अस्मिन् मन्त्रे तनूनपादिति काथक्यमतानुसारेण आज्यं भवति। अग्निरिति शाकपूणिः, यतो हि अद्भ्यः ओषधयो वनस्पतयश्च जायन्ते।

एतावता गमनशीलक्रियाधारमभिलक्ष्य पृथिव्याद्यनेकार्थेषु गोपदप्रयोगो यास्केन निरुक्तशास्त्रे भूरिशः कृतः। तथा च वैज्ञानिकं रहस्यमपि गोपदप्रयोगविषय उद्घाटितम्। तथा चार्थदृष्ट्या गोपदानुशीलस्य अनेके पक्षा अपि प्रस्तुताः। यतो हि अर्थो हि प्रधानस्तद्गुणशब्दः। वेदशब्दार्थनिबन्धनपरिज्ञानं निरुक्तादेव भवतीति तत् कृतिर्यास्कस्यैव। निरुक्तमाधुनिकभाषाविज्ञानस्य मेरुदण्डमस्ति। निरुक्तग्रन्थे यास्को वैज्ञानिकमतस्योदाहरणं युक्तिपूर्वकं कृतवान्। कस्यापि वस्तुनः क्रियानुसारेण नामकरणेनानेकानां वस्तूनामेकक्रियात्वेनानेकानामेकनाम भवितुं शक्नोति। कस्यापि शब्दस्य स्वभाव एक एवास्ति यत् कयापि क्रियया कस्याप्येकस्यैव वस्तुनो बोधो भवति। वस्तुना सह बहुक्रियाणां योगेऽपि एकैव क्रियानुसारेण तस्य नाम भवत्यथात्र गौरित्यस्य क्रियया वैशिष्ट्येन नामकरणमभूत्।

●

---

१. ऋ.सं. १।१६४।४०; २. ऋ.सं. १।१६४।२७।
३. निरु. ८।२; ४. ऋ.सं. १०।११०।२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मनि प्रमाणम्

(न्यायवैशेषिकदर्शनानुसारेण)

डॉ. सर्वेश्वरराजहंसः
उपाचार्यः, न्यायवैशेषिकविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

* * *

बहुभिर्विपश्चिद्भिः प्रत्यक्षोपलब्धियोग्यताविरहाद् आत्मनोऽप्रत्यक्षतया तस्य सिद्ध्यर्थमनुमानप्रमाणं शब्दप्रमाणञ्चोपस्थाप्यते। यथोक्तं प्रशस्तपादभाष्ये—''तस्य सौक्ष्म्यादप्रत्यक्षत्वे सति करणैः शब्दाद्युपलब्ध्यनुमितैः श्रोत्रादिभिः समधिगमः क्रियते''[१]।

अयमाशयः—आत्मनः सौक्ष्म्यं प्रत्यक्षोपलब्धियोग्यताविरहः, स चाऽहं सुखी, अहं दुःखी इत्यादिप्रत्ययस्य देहादिभिन्नविशेष्यकत्वसाधकप्रत्यक्ष-राहित्यम्, तस्यानुमानैकवेद्यत्वात्। अनुमानं चाऽहं सुखीत्यादिज्ञानं देहादिभिन्न-विशेष्यकं देहाद्यवृत्तिसुखादिप्रकारकप्रमात्वात्। न च सुखादौ देहाद्यवृत्तित्वम-प्रामाणिकमिति वाच्यम्, सुखादयो देहाद्यवृत्तयोऽभावद्रव्यभाविविशेषगुणत्वात्। तदीयविशेषगुणानां रूपादीनां यावद् द्रव्यभावित्वाद् इत्यनुमानस्य तत्र प्रमाणत्वात्।

श्रोत्रादिभिरात्मसमधिगमप्रकारस्तावदित्थम्—तथा हि शब्दादीनामुप-लब्धयोऽनुव्यवसायात्मकमानसप्रत्यक्षसाक्षिकतयाऽपलपितुमनर्हाः। क्रियायाः सकरणत्वनियमेन शब्दाद्युपलब्ध्यात्मक्रियाकरणतया श्रोत्रादयोऽनुमेयाः।

अनुमानप्रयोगस्तावदित्थम्—शब्दादीनामुपलब्धयः सकरणिकाः, क्रियात्वात्, वास्यादिकरणकच्छिदिक्रियावत्। तदनन्तरं श्रोत्रादीनामधिष्ठातृत्वेनात्मा अनुमेयः। अनुमानप्रयोग इत्थम्—श्रोत्रादीनि कर्त्तृप्रयोज्यानि अचेतनत्वात् करणत्वाद् वा, बार्धकिप्रयोज्यकुठारादिवत्। तदेवमात्मा श्रोत्रादीनामधिष्ठातृतया अनुमानसाक्षिकत्वेन नूनमभ्युपेयः। अप्रत्यक्षत्वेऽप्यनुमानसिद्धतयाऽऽत्मनः स्वीकारो दुर्निवारः।

---

१. प्रशस्तपादभाष्यम् (आत्मनिरूपणम्)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रोत्राद्यधिष्ठातृत्वं श्रोत्रादिनिष्ठमनस्संयोगानुकूलप्रयत्नाश्रयत्वम्। श्रोत्रादिषु कर्त्तृप्रयोज्यत्वञ्च कर्त्तृगतप्रयत्नप्रयोज्यमनस्संयोगाश्रयत्वम्। यदा आत्मनः श्रोतुं द्रष्टुं वा इच्छा भवति, तदा स स्वप्रयत्नेन स्वमनसि क्रियां जनयित्वा तत् श्रोत्रादिना संयुनक्ति, मनसा संयुक्तं श्रोत्रादिकं शब्दाद्युपलब्धिं जनयति। तत्तदिन्द्रियजन्योपलब्धिं प्रति तत्तदिन्द्रियमनःसंयोगस्य कारणतया तदावश्यकत्वात्।

न्यायसूत्रभाष्यकारेण महर्षिवात्स्यायनेन आत्मनोऽप्रत्यक्षत्वविषये प्रतिपादितं यत्—"आत्मा तावत् प्रत्यक्षतो न गृह्यते। स किमाप्तोपदेशमात्रादेव प्रतिपद्यत इति? नेत्युच्यते, अनुमानाच्च प्रतिपत्तव्य इति। अत एव सूत्रकारेण महर्षिगौतमेन इच्छादिगुणानामात्मनो लिङ्गत्वमुक्तम्। यथा "इच्छाद्वेषप्रयत्नधर्माधर्मसुख-दुःखज्ञानान्यात्मनो लिङ्गम्"[1]। एतदभिप्रायमनुसरन्नेव भाष्यकारेण इत्थं प्रत्यपादि "यज्जातीयार्थस्य सन्निकर्षात् सुखमात्मोपलब्धवान्, तज्जातीयमेवार्थं पश्यन्नुपादातुमिच्छति, सेयमुपादातुमिच्छा एकस्यानेकदर्शिनो दर्शनप्रतिसन्धाना भवन्ती लिङ्गमात्मनः। नियतविषये हि बुद्धिभेदमात्रे न सम्भवति देहान्तरवदिति"[2]।

अयं भावः—इदं दृश्यते यन्मनुष्यः इन्द्रियसन्निकृष्टाद् यज्जातीयाद् वस्तुनः सुखं लभते। कालान्तरे यदि तज्जातीयेनान्यवस्तुना तस्येन्द्रियसन्निकर्षो जायते, तदा तस्य एतज्जातीयं वस्तु सुखजनकमिति स्मरणं भवति। सन्निकृष्टञ्च वस्तु सुखजनकजातीयतयाऽवधारितमुपादातुं चेष्टते। एषा स्थितिस्तदैव सम्भवति यदि पूर्वकाले तज्जातीयवस्तुनि सुखजनकत्वस्यानुभविता उत्तरकाले च तज्जातीये वस्तुनि सुखजनकत्वस्य स्मर्ता एको भवेत्। उभयोरन्यत्वे नैषा स्थितिरुपपद्यते, स्मरणानुभवयोः सामानाधिकरण्यनियमात्। यो यदनुभवति स एव कालान्तरे तदनुभवजन्यसंस्कारस्योद्बोधे सति तत् स्मरति, नान्यः।

सुस्पष्टमिदं लोके यत्—चैत्रेणानुभूतं स्वाननुभूतं वस्तु मैत्रो न स्मरतीति। तथा चैकेन देहेनानुभूतस्य स्मरणं न भवति, तथैव यदि देह एव ज्ञानाश्रयो भवेत्, तदा बालवृद्धशरीरयोर्भेदेन बाल्येऽनुभूतस्य स्मरणं वार्द्धक्ये न स्यात्। अनुभवितुः बालदेहस्य वृद्धावस्थायामसत्त्वात्। तथा च पूर्वं सुखजनकतया यज्जातीयं वस्तु अनुभूतम्, उत्तरकाले तज्जातीयस्य वस्तुनो दर्शने सत्यपि न स्मर्येत।

१. न्यायसूत्रम् (अ. १ आ. १ सू. १०)।
२. वात्स्यायनभाष्यम् (आत्मनिरूपणम्)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वकालिकस्यानुभवितुरुत्तरकालेऽसत्त्वात्। तथा च सुखजनकतयाऽनुभूतवस्तुसजातीयं वस्त्वन्तरमुपादातुं तद्दर्शिन इच्छाया असम्भवेन तदुपादानाय चेष्टा न स्यात्। चेष्टां प्रति इच्छायाः, इच्छां प्रति च सुखादीष्टसाधनताज्ञानस्य कारणत्वात्। तदेवमुक्तरीत्या जायमाना इच्छा पूर्वोत्तरकालिकयोर्देहयोर्भेदेन देहेऽघटमाना स्वाश्रयस्य पूर्वोत्तरकालयोरभिन्नतां व्यवस्थापयति।

अतो विस्पष्टमिदं यद् बौद्धाभिमता क्षणिकविज्ञानात्मिका बुद्धिः, चार्वाकानुगामिभिः आत्मस्थानीयतया मन्यमानो देहो वा आत्मा इच्छाश्रयो न भवितुमर्हति। इच्छाया अतिरिक्तात्मानुमानप्रकारश्चेत्थम्—इच्छा क्वचिदाश्रिता गुणत्वात्, रूपादिवत्। उक्तरीत्या तत्र देहाद्याश्रितत्वबाधेन तत्सहकृतं गुणत्वलिङ्गकं क्वचिदाश्रितत्वसाधकानुमानमेव इच्छायां देहादिभिन्नाश्रितत्वं साधयति। देहादिभिन्नतया इच्छाश्रयत्वेन सिध्यद् द्रव्यमेवात्मा।

महर्षिकणादेन वैशेषिकसूत्रे इन्द्रियार्थप्रसिद्धौ आत्मनो लिङ्गत्वं प्रतिपादितम्। तद्यथा—"इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः"[1] इति। अत्र हेतुशब्देन ज्ञापको हेतुः लिङ्गरूपो विवक्षितः, न तु कारको हेतुः। आत्मनो नित्यत्वे तत्र कारकस्य हेतोरपेक्षणात्। इन्द्रियार्थप्रसिद्धिशब्देन इन्द्रियैः जायमाना अर्थस्य प्रत्यक्षात्मिका उपलब्धयो विवक्षिताः। ताश्च चाक्षुष-स्पार्शन-घ्राणज-रासन-श्रावण-मानसप्रत्यक्षरूपाः। चाक्षुषप्रत्यक्षं रूपादीनाम्। श्रावणं शब्दादीनाम्। मानसं सुखादीनाम्। रासनं रसादीनाम्। स्पार्शनं स्पर्शादीनाम्। इमानि प्रत्यक्षज्ञानानि प्रत्यक्षसिद्धतया भवन्ति। लिङ्गानि इन्द्रियेभ्यः अर्थेभ्यश्च भिन्नस्य आत्मनोऽस्तित्वसाधने। रूपाद्युपलब्धिभिः सम्पाद्यमान आत्मानुमानप्रकारस्तावदित्थम्—

"रूपाद्युपलब्धिः द्रव्याश्रिता गुणत्वाद् रूपवत्। एतादृशानुमानप्रयोगेण उपन्यस्यमानं गुणत्वहेतुकद्रव्याश्रितत्वसाध्यकतादृशोपलब्धिपक्षकमनुमानं पृथिव्याद्याश्रितत्वबाधसहकारेण पृथिव्यादिभिन्न आत्मसंज्ञकनवमद्रव्याश्रितत्वसिद्धौ पर्यवस्यति। पृथिव्याश्रितत्वाभावश्च तादृशोपलब्धौ नासिद्धः। उपलब्धिः पृथिव्यादिषु अनाश्रिता अयावद्द्रव्यभाविविशेषगुणत्वात्। पृथिव्यादीनां विशेषगुणा यावद्द्रव्यभाविनः, ते हि स्वाश्रयद्रव्यस्थितिं यावत्तिष्ठन्ति। न ते स्वाश्रये द्रव्ये जीवति विनश्यन्ति। न च पृथिव्यां रूपादीनां पाकजतया तेषां यावद्

१. वैशेषिकसूत्रम् (अ. ३ आ. १ सूत्रम् २)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रव्यभावित्वमसिद्धमिति वाच्यम्। स्वाश्रयनाशजन्यनाशप्रतियोगिविशेषगुणसमवेत-गुणत्वव्याप्यजातिमत्त्वस्य यावद्द्रव्यभाविविशेषगुणतयाऽभिमतत्वात्। ये गन्धादयः स्वाश्रयनाशादेव नश्यन्ति, तत्र समवेतो गुणत्वव्याप्याः गन्धत्वादिजातयः सर्वेषु गन्धादिषु सन्तीति सर्वे गन्धादयो यावद्द्रव्यभाविनो भवन्ति। आत्मनो विशेषगुणेषु न कोऽपि स्वाश्रयनाशजन्यनाशप्रतियोगी, अत आत्मन आकाशस्य च विशेषगुणा न यावद्द्रव्यभाविनः। तथा च पृथिव्यादीनां यावद्द्रव्यभाविविशेषगुणेभ्यो विजातीयतया सुखादयो भवन्ति पृथिव्या अनाश्रिताः।

इन्द्रियार्थप्रसिद्धिशब्देन न केवलं प्रसिद्धेरेवात्मलिङ्गत्वं विवक्षितम्। किन्तु इन्द्रियाणामर्थानाञ्चाप्यात्मलिङ्गत्वमभीप्सितम्। तथा हि—"इन्द्रियाणि कर्त्तृप्रयोज्यानि करणत्वाद् बार्धकिप्रयोज्यकुठारादिवद्" इत्यनुमानेन चक्षुरादीन्द्रियप्रयोजक-कर्त्तृतयाऽप्यात्मा सिद्ध्यति। अर्थेभ्योऽप्यात्मा सिद्ध्यति। यथा—रूपादयः कस्यचिद् भोग्याः, जन्यत्वात्। यो न भोग्यः, स न जन्यः, व्योमवत्। भोगश्च सुख- दुःखान्यतरविषयकः साक्षात्कारः। भोग्यत्वञ्च प्रकृते भोगविषयोत्पादकत्वम्। रूपादयो हि इन्द्रियेण सन्निकृष्टाः सन्तः स्वानुभवेन भोगविषयं सुखदुःखं वा जनयन्तीति भवन्ति भोग्याः। यस्य चैते भोग्याः, स पृथिव्यादिभ्यो भिन्न आत्मैव, तेषां जडतया भोक्तृत्वासम्भवात्।

न चोक्तेष्वनुमानेषु प्रसिद्धिः, इन्द्रियाणि, अर्थाश्च पक्षभावेनैव तदुपयोगिन इति तेषां सूत्रोक्तं हेतुत्वमनुपपन्नमिति वाच्यम्, हेतुशब्देनानुमिति-कारणीभूतसाध्यव्याप्यहेतुप्रकारकनिश्चयविशेष्यस्य विवक्षितत्वात्। यथोक्तं शङ्कर-मिश्रेणोक्तसूत्रस्य स्वकीयायामुपस्काराख्यव्याख्यायाम्—"हेतुपदमत्रानुमितिजनक-परामर्शविशेष्यपरमिति न किञ्चिदनुपपन्नम्। तथा हि अनुमितिजनकः साध्यव्याप्यहेतुप्रकारकनिश्चयः "पक्षः साध्यव्याप्यहेतुमान्" इत्याकारकः। तदीयविशेष्यतायाः पक्षवृत्तित्वेन सूपपद्यते पक्षभावेनानुमितावुपयुज्यमानस्य पक्षस्योक्तं हेतुत्वम्। उक्तरीत्या इन्द्रियाणामर्थानाञ्च आत्मनोऽनुमापकत्वस्य सम्भवेनोक्तसूत्रोत्तरसूत्रस्य चन्द्रकान्तीये भाष्ये—"इन्द्रियेणार्थेन च न खल्वात्माऽपदेष्टुं शक्यः" इत्येवमुपलभ्यमानं वचनं न युज्यत इत्यवधेयम्।

न चेन्द्रियार्थप्रसिद्धेः इन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुत्वोक्तिर्न सङ्गता। तस्या इन्द्रियार्थहेतुकतया तदाश्रितत्वस्यैव न्याय्यत्वाद् इति वाच्यम्। प्रसिद्धौ करणविधया इन्द्रियस्य विषयविधयाऽर्थस्य च जनकत्वेऽपि तयोस्तस्या आश्रयत्वे मानाभावात्। भवेद् यदि यद् यस्य कार्यं तत् तदाश्रितमिति नियमः सम्भवेदपि तदा तद्बलेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसिद्धेः इन्द्रियार्थकार्यतया तदाश्रितत्वम्। परं स एव नास्ति। देहकार्ये देहानाश्रिते घटादौ तत्कार्यत्वस्य तदाश्रितत्वव्यभिचारित्वात्।

ननु तथापि प्रत्यक्षसिद्धौ देह एवास्तु इन्द्रियार्थप्रसिद्धेराश्रयः, किं तदतिरिक्तस्याऽऽत्मनः कल्पनयेति चेन्न, प्रसिद्धेः ज्ञानापरपर्यायाया विशेषगुणतया देहे उत्पत्त्यसम्भवात्। अयं भावः—देहस्य रूपादयो विशेषगुणास्तत्र अवयवगतेभ्यः सजातीयगुणेभ्यो जायन्ते। अतो ज्ञानं तत्र तदेवोत्पत्तुमर्हति, यदि देहावयवेषु करचरणादिष्वपि तत्स्यात्। न च तत्तेषूपलभ्यते। किञ्च तेष्वपि तदुत्पत्तये परम्परया तदारम्भकेषु परमाणुष्वपि रूपादेरिव तस्य सत्त्वमापद्येत। परमाणुषु च ज्ञानस्वीकारे तेभ्यः कदाचिदुत्पद्यमानेषु घटादिष्वपि तदुत्पत्तिर्दुर्वारतां व्रजेत।

किञ्च यदि देहावयवाः करचरणादयोऽपि ज्ञानवन्तः स्युः, तदा एकस्य देहस्यानेकचेतनवत्तया तेषां चैकमत्यासम्भवेन तैरेककाले मतभेदेन विभिन्नासु दिक्षु देहस्याकर्षणसम्भवेन देहस्याकालमेवोन्मथनमापद्येत। देहावयवानां ज्ञानवत्त्वे च हस्तानुभूतस्य हस्तनाशे स्मरणं नोपपद्येत, "नान्यदृष्टं स्मरत्यन्यः" इति नियमात्। देहनाशे देहकृतकर्मणां नैष्फल्यमपि दुर्वारम्। देहस्य सर्वथा नूतनतया तेन पूर्व-कर्मणामकृततया भोग्यानुपपत्तिरपि दुष्परिहरा। तदेवं देहस्य ज्ञानवत्त्वे कृतहानमकृताभ्यागमश्च परिहर्त्तुं नैव शक्येते।

ज्ञानं न देहस्य विशेषगुणः, अपाकजत्वे सति अकारणगुणपूर्वकत्वात् शब्दवद् इत्यनुमानेन ज्ञानस्य देहविशेषगुणत्वसिद्धेर्बाधोऽपि दुर्निवारः। न च तर्हि ज्ञानं देहस्य सामान्यगुण एवास्तु, देहसामान्यगुणस्य पाकजन्यतायाः कारणगुणपूर्वकतायाश्चानियमेन ज्ञानस्य तत्सामान्यगुणत्वसिद्धौ बाधकाभावादिति वाच्यम्, तस्य देहमात्रगतत्वेन एकत्वैकपृथक्त्वपरिमाणवद् अवयवगुणपूर्वकत्वस्य परत्वापरत्वयोरिव सावधित्वस्य द्रवत्वस्येव नैमित्तिकत्वस्य वेगस्येव कर्मजन्यत्वस्य चापत्तेः।

वैशेषिकदर्शने तृतीयाध्याये द्वितीयाह्निके चतुर्थसूत्रेण इन्द्रियार्थप्रसिद्धिभिन्नान्यपि कतिपयान्यात्मनो लिङ्गानि निर्दिष्टानि। यथा—"प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियविकाराः सुखदुःखेच्छाद्वेषप्रयत्नश्चात्मनो लिङ्गानि" इति। प्राणो नाम शरीराभ्यन्तरे ऊर्ध्वसञ्चरणशीलो वायुः। अपानश्च अधःसञ्चरणशीलो वायुः, स चैक एवोर्ध्वाधोगमनलक्षणकार्यवशात् प्राणापानेति नामभ्यां व्यपदिश्यते। वायुश्च स्वभावतः तिर्य्यग्गमनशीलः। अतः स्वाभाविकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिर्य्यग्गमनमकृत्वा वायोः प्राणाख्याप्रयोजकमूर्ध्वगमनम्। अपानाख्याप्रयोजकमधोगमनं कस्यचित् प्रयत्नाज्जायत इति मुसलादीनामुत्क्षेपणावक्षेपणकर्मदृष्टान्तेन नूनमभ्युपेयम्। यस्य च प्रयत्नाद् देहान्तर्वर्तमानस्य वायोरुक्तमस्वाभाविकं गमनं जायते, स आत्मैव नान्यः।

न च विरुद्धयोर्दिशोः सक्रिययोर्जलप्रवाहयोस्तिर्यक्प्रवर्तमानयोरपि यथा ऊर्ध्वगतिः प्रयत्नं विनैव जायते, तथैव देहान्तरसञ्चारिवायोरपि भवितुमर्हतीति तस्य प्रयत्नजन्यत्वकल्पनमयौक्तिकमिति वाच्यम्, कथितजलप्रवाहयोरूर्ध्वगतिवद् देहान्तर्गतवायोर्गतिकल्पने तस्यापि केवलमूर्ध्वमेव अध एव वा गतिर्भवेत्, न तु कदाचिदूर्ध्वं कदाचिच्च अधः। एवम्भूतो गतिभेदो यत्नं विना नैवोपपद्यते। एतत्प्रयत्नसाधकमनुमानं चेत्थम्—

"प्राणापानयोरूर्ध्वाधोगती प्रयत्नजन्ये, अस्वाभाविकानियतगतित्वात्, मुसलगतोत्क्षेपणापक्षेपणगतिवत्"। या गतिर्न प्रयत्नजन्या सा नास्वाभाविकानियतगतिः, यथा वायोस्तिर्यग्गतिः, अग्नेरूर्ध्वज्वलनात्मिका गतिः। जलस्य निम्नदेशाभिमुखी गतिः, विरुद्धदिक्क्रिययोर्जलप्रवाहयोरूर्ध्वगतिर्वा।

न चोक्तगतिप्रयत्नयोर्वैयधिकरण्येनोक्तगत्योः प्रयत्नजन्यत्वस्य बाधेनोक्तमनुमानं दुर्घटम्। किं वा जन्यजनकभावानुरोधेन तयोः सामानाधिकरण्यस्यैव स्वीकर्त्तव्यतया तादृशप्रयत्नाश्रयतयाऽऽत्मनः सिद्धिरसम्भवेति वाच्यम्, प्रयत्नस्य ज्ञानेच्छाजन्यतया ज्ञानेच्छयोश्च भूतद्रव्यसमवेतत्वबाधेन ज्ञानेच्छाजन्यप्रयत्नस्य गतिसामानाधिकरण्यासम्भवात्। यच्च गत्योर्व्यधिकरणप्रयत्नेन जन्यताया दुर्घटत्वमुक्तं तस्य गतिं प्रति स्वाश्रयसंयोगेन प्रयत्नस्य हेतुत्वाभ्युपगमेन परिहारसम्भवात्।

न च तयोः प्रयत्नजन्यत्वे निद्रायां तयोरनुपपत्तिः, तदानीं ज्ञानेच्छयोरभावेन तदधीनस्य प्रयत्नस्याभावादिति वाच्यम्, निद्रायामपि ज्ञानेच्छानपेक्षस्य जीवनादृष्टमात्रसाध्यस्य जीवनयोनिनाम्नः प्रयत्नस्य सत्त्वेन तमादायैव निद्राकालीनप्राणापानगत्योः प्रयत्नजन्यत्वसम्भवात्।

उन्मेषनिमेषकर्मभ्यामपि प्रयत्नवानात्मा साधयितुं शक्यते। तथा हि—उन्मेषो नाम उन्मीलनं तच्च अक्षिपक्ष्मणोर्विभागजनककर्मरूपम्। एवं निमेषो नाम निमीलनं तद्धि अक्षिपक्ष्मणोः संयोगजनककर्मरूपम्। अनयोः कर्मणोरपि प्रयत्नजन्यत्वाभ्युपगम आवश्यकः। वेगं वेगवद्द्रव्याभिघातं चान्तरेण जायमानत्वाद् विभिन्नफलकतया अस्वाभाविकत्वाच्च। उन्मेषेच्छया जनितस्य प्रयत्नस्याश्रयतां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भजत आत्मनः संयोगेनोन्मेषस्य निमेषेच्छाजनितप्रयत्नाश्रयीभूतात्मसंयोगेन निमेषस्य च प्रयत्नसाध्यताया औचित्यस्याऽक्षुण्णत्वात्। अनुमानप्रयोगश्चेत्थम्—

"उन्मेषनिमेषनामके कर्मणी प्रयत्नजन्ये, वेगतदाश्रयद्रव्यसंयोगं विना जायमानत्वात्, देहावयवगतकर्मवत् काष्ठपुत्तलिकानर्त्तनवद् वा"। न च प्रयत्नजन्यत्वे तयोश्चेष्टात्वापत्तिः, हिताहितप्राप्तिपरिहारानुगुण्येन तयोश्चेष्टात्मकताया इष्टत्वात्। चेष्टावत्त्वे पक्ष्मणोर्देहाङ्गत्वापत्तिरपीष्टैव, तदभ्युपगमस्यापत्यानाधायकत्वात्। पक्ष्मच्छेदे खण्डशरीरोत्पत्तेः स्वीकार-सम्भवात्।

जीवनात्—जीवनकार्यादप्यात्मा सिद्ध्यति। तथा हि—जीवनकार्यं देहस्य वृद्धिः, देहावयवेषु भग्नेषु क्षतेषु च तेषां संरोहणम्। अनयोर्जीवनकार्यत्वं जीवत्येव देहे जायमानत्वेन निर्विवादम्। एवञ्च जीवनकार्यं देहाधिष्ठातृप्रयत्नादेवोपपद्यते नान्यथा। स्पष्टमेवैतद् यद् वृद्धिभग्नक्षतसंरोहणवद् भवति, तत् प्रयत्नवताऽधिष्ठितं भवति। यथा गृहं वृद्धिभग्नक्षतसंरोहणयोर्भाजनतया भवति। तदनुगुणयत्नशालिना स्व-स्वामिना अधिष्ठितम्। तथा च यथा गृहस्वामी गृहस्य लघुत्वे प्रयोजनानुसारेण तस्य वृद्धिं करोति, भग्ने क्षते च जाते तन्नवनिर्माणात्मकं संरोहणं निवर्तयति, तथैवेदमप्युपेयं यदस्ति कश्चिद् देहस्वामी यः स्वप्रयत्नेन आहारादिप्रबन्धं विधाय देहस्य वृद्धिं तदीयस्य कस्यचिदङ्गस्य भङ्गे क्षते वा जाते औषधाद्युपचारविधानेन तत्संरोहणं कुरुते। अनुमानप्रयोगश्चेत्थम्—"देहः, ज्ञानेच्छाप्रयत्नभाजा केनाप्यधिष्ठितः, वृद्धिभग्नक्षतसंरोहणवत्त्वात्, गृहपत्यधिष्ठितगृहवत्"।

जीवनकार्यादिव जीवनादपि आत्मा सिद्ध्यति। तथा हि—जीवनं नाम देहाभ्यन्तरभागे प्राणवायोः संयोगः। अयं नूनं चेतनसंयोगप्रयोज्यो मन्तव्यः, अन्यथा पाषाणादावपि प्रसज्येत। यत्र चेतनस्य विजातीयः संयोगस्तत्र प्राणवायुसंयोग इत्येष नियमोऽवश्यमभ्युपेयः। अत एव तादृशचेतनसंयोगशून्ये पाषाणादौ न प्राणसंयोगः। न च प्राण एव चेतनः, स एव येन संयुक्तो बुभूषति तेन संयुज्यते, नातः प्राणसंयोगेन देहे प्राणभिन्नचेतनस्य संयोगः साधयितुं शक्यः। सति चैवं कथं जीवनस्यात्मसाधकतेति शङ्क्यम्। प्राणस्य वायुरूपतया बहिर्द्रव्यत्वेन तत्र मनोरूपान्तरिन्द्रियवेद्यचैतन्यस्य कल्पयितुमशक्यत्वात्। किञ्च प्राणो यद्यनित्यस्तदा तस्य चेतनत्वाभ्युपगमे चैतन्यजन्यपापपुण्ययोरपि तत्रैवाभ्युपेयतया प्राणनाशे तयोरपि नाशेन कृतहानाकृताभ्यागमापत्तिर्दुर्निवारा। यदि च नित्यस्तदा स आत्मशब्देन व्यपदिश्येत प्राणशब्देन वा, न तत्र विवादो

CC-0. In Public Domain. Gurukul Kangri C...

Digitized by Arya Samaj Foundation Chennai and eGangotri

नित्यचेतनस्य सिषाधयिषितस्याङ्गीकारात्। जीवनस्यात्मसाधकत्वं चन्द्रकान्तेनात्मनः प्रस्तुतसूत्रभाष्ये स्पष्टमेव प्रण्यगादि। यथा—"[१]जीवनमाध्यात्मिकवायुसम्बन्धो नियतसहभावादात्मनो हेतुः। न खल्वन्यत्र शिलादौ तदुपलब्धिरिति"।

मनोगत्यापि आत्मा सिद्ध्यति। मनः खलु ज्ञानायौगपद्योपपत्तयेऽणुतया सिद्धम्। तत्तदिन्द्रियजन्यप्रत्यक्षसिद्धये च देहस्थैस्तत्तदिन्द्रियैस्तत्संयोगोऽपेक्षितः। स च तत्तत्स्थाने स्थिरैरिन्द्रियैर्मनसो गत्यैव सम्भवति। मनोगतिश्च मनसः प्रेरयितुः प्रयत्नवतः कस्यचित् सत्त्व एव घटते। तथा च यो मनः प्रेरयति, तत्र तत्तदिन्द्रियसंयोगानुकूलां गतिं जनयति, स आत्मैव नान्यः। न खलु मनसश्चैतन्यमुपेत्य तत्र तदिच्छया गतिमत्त्वं स्वीकर्त्तुं शक्यम्, मनसोऽणुतया ज्ञानादीनां तदाश्रितत्वोपगमेऽप्रत्यक्षत्वापत्तेः। धर्मप्रत्यक्षे धर्मिगतमहत्त्वस्य कारणत्वात्। इन्द्रियाणि एव चेतनानि, तान्येव यदा यमर्थमुपलब्धुं कामयन्ते, तदा तदर्थोपलब्धिं जनयन्ति। न तानि युगपद् विभिन्नान् अर्थान् अनुभवितुमभिलषन्ति। अतो न तेषां यौगपद्यमित्यपि न वक्तुं शक्यम्, तथा सति देहस्यानेकचेतनवत्तया तेषु युगपदेव विभिन्नासु दिक्षु गत्युन्मुखत्वे देहस्योन्मथनापत्तेः। चक्षुरादीनां नाशे तदनुभूतार्थस्य स्मरणानुपपत्तेश्चेति तेषां चैतन्यकल्पनायां विस्पष्टं दूषणग्रासः।

इन्द्रियान्तरविकारादपि आत्मा सिद्ध्यति। तथा हि—यस्याम्लद्रव्यस्य रसः कदाचिदनुभूतः, तादृशं द्रव्यं यदा कालान्तरे चक्षुषा दृश्यते, तदा तद्दर्शनमात्रादेव तदीयरसस्य स्मृत्या तदा स्वादेच्छा जायते। सा चेयमिन्द्रियाणां चैतन्ये नोपपद्यते। यत इन्द्रियचैतन्यपक्षे रसानुभवो रसनस्यैव न चक्षुषः। पूर्वानुभूतरसवतो द्रव्यस्य च दर्शनं चक्षुषो न रसनस्य, तथा च चक्षुर्जन्यपूर्वानुभूतरसवद्द्रव्यदर्शनात् कथं रसनस्य पुनस्तद्रसास्वादाभिलाषो भवेत्। अतो नूनमिदमभ्युपेयं यदस्ति कश्चिद् देहेऽन्यश्चेतनो यस्तत्तदिन्द्रियैर्विषयमनुभवति। तस्यैवोपकरणभूतानि सर्वाणि इन्द्रियाणि। अतः स रसनया रसमनुभवति। तदनुभवजन्यं संस्कारं स्वस्मिन् दधाति। स एव पूर्वानुभूतरसवद्द्रव्यं चक्षुषा दृष्ट्वा तादृशदर्शनोद्बुद्धसंस्काराद् रसं स्मरति, स्मृत्वा च तमास्वादयितुमिच्छति। तदिच्छया च तस्य दन्तेषूदकं सम्प्लवते। तदेवं चाक्षुषदर्शनप्रभवो रासनो विकारो विभिन्नेन्द्रियोपकरणवतोऽतिरिक्तस्यात्मनः साधक इति सुस्पष्टम्। सुखादयश्च गुणतया स्वाश्रयमनुमापयन्तोऽन्यत्र तदाश्रयत्वस्य बाधेन देहादिव्यतिरिक्तं स्वाश्रयं चेतनद्रव्यं साधयन्ति। अतस्तेषामपि सूत्रोक्त-मात्मलिङ्गत्वं निर्विवादम्।

---

१. चन्द्रकान्तीयभाष्यम् (आत्मनिरूपणम्)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मत्पदादपि आत्मा सिद्ध्यति। तथा हि अस्मत्पदमुच्चारणकर्त्तरि शक्तम्, योऽस्मत्पदमुच्चारयति, स एव तेनावबोध्यते। न हि 'अहं गच्छामि', 'अहं जानामि' इत्यादिवाक्यघटकेन देवदत्तोच्चरितेन इमाकारास्मत्पदेन यज्ञदत्तो बोध्यते। उच्चारणकर्तृत्वञ्च न देहे, न वा वाचि, देहस्य निष्प्राणत्वे उच्चारणाभावात्। यदि देह एव उच्चारयेद्, वागैव उच्चारयेत्तदापि देहवाचः सत्त्वेन उच्चारणं जायेत। अतो निश्चितमिदं यद् देहसम्बद्ध आत्मैव उच्चारणं करोति। अत उच्चारणकर्तृशक्तमस्मत्पदमात्मनि लिङ्गम्।

किञ्च अहमर्थपराद् आत्मपदादपि आत्मा सिद्ध्यति। तथा हि आत्मपदं साभिधेयं साधुपदत्वात्, गवादिपदवद् यश्चात्मपदाभिधेयः, स देहादिभ्यो भिन्न एव द्रव्यरूपः। न चाहमात्मानं जानामीति प्रत्यये अहमर्थस्य ज्ञानकर्तृतया आत्मशब्दार्थस्य च ज्ञानकर्मतया भानात्तयोर्भेदः स्वीकार्यः। ''चैत्रो घटं जानाति'' इत्यादौ भिन्ननिष्ठतया कर्मकर्त्तृभावस्य सिद्धत्वेनैकव्यक्तौ तदयोगात्। तथा च अस्मदात्मपदाभ्यामुभाभ्यामात्मनः प्रतिपत्तिर्भवतीति कथनमसङ्गतमिति चेन्न, ज्ञानाश्रयतया ज्ञानकर्त्तृत्वस्य ज्ञानविषयतया च ज्ञानकर्मत्वस्यैकत्रापि स्वीकारे बाधकाभावात्। यत्र हि क्रियायाः कर्त्तृत्वं कर्मत्वं चैकत्र बाधितं तत्रैव क्रियायाः कर्त्तृकर्मभावस्य भिन्नाश्रितत्वनियमात्।

'ननु देवदत्तो गच्छति' इति प्रतीत्यनुरोधेन देवदत्तादिपदस्य शरीरपरत्वमेव मन्तव्यं नात्मपरत्वं तत्र गतेरभावात्। भवति च प्रतीतिर्देवदत्तोऽहमित्याकारिका, अतोऽहमर्थस्य शरीररूपत्वमेव न्याय्यमिति अहमर्थतयाऽऽत्मनः सिद्धिकथनं कथं सङ्गच्छत इति चेत् न, देवदत्तो जानाति, देवदत्तः सुखी, देवदत्तो दुःखीत्यादयोऽपि जायन्ते। अतो देवदत्तपदं शरीरार्थकमात्मार्थकं वेति सन्दिग्धतया विचारोऽपेक्षीयतामापद्यते। विचारश्च प्रवर्तमानो देवदत्तादिपदस्य आत्मपरत्वमेव अवधारयति। 'देवदत्तो जानाति' इत्यादिभूरिप्रयोगजातस्य देवदत्तपदस्य आत्मपरत्व एव सम्भवात्। 'देवदत्तो गच्छति' इति प्रत्ययोऽपि देवदत्तपदस्यात्मरूपत्वे शक्य-निर्वाहः, आख्यातस्य यत्नार्थकत्वात्। तत्राश्रयत्वमेव आख्यातार्थ इति प्रमाणयितुमशक्यत्वात्। अतो देवदत्तादिपदं देवदत्तादिशरीरावच्छिन्नात्मनि एव शक्तमित्येव न्याय्यम्। शरीरगतदेवदत्तत्वादिकं स्वाश्रयावच्छेद्यत्वसम्बन्धेन देवदत्तादिपदप्रवृत्तिनिमित्तम्। तच्च स्वाश्रयारम्भकादृष्टवत्त्वम्।

किञ्चाहमिति प्रत्यय आत्मविषयक एव, आत्मभिन्ने तस्याभावात्। स च देवदत्तादिविषयकोऽपि भवति, देवदत्तोऽहमित्यनुभवस्य सर्वमान्यत्वात्।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतोऽहम्पदसामानाधिकरण्यानुरोधेन देवदत्तपदस्य आत्मपरत्वमेव युक्तम्। न च 'अहं स्थूलः', 'अहं कृशः' इत्यादिप्रत्ययेषु स्थौल्यादिना देहोऽप्यहमर्थतया भासत एवेति वाच्यम्, तत्प्रत्ययानामौपचारिकत्वात्। अन्यथा 'अहमन्धः', 'अहं बधिरः', 'अहं पङ्गुः' इत्यादिप्रत्ययानुरोधेनाहमर्थस्य चक्षुराद्यात्मकत्वमपि मान्यतया आपद्येत। अत इदमेव न्याय्यं यद् "अहं जानामि, द्वेष्मि, करोमि, सुखी" इत्यादि-प्रत्ययमहिम्ना अहमर्थ आत्मैव। एतादृशप्रतीतिभिरात्मनोऽहमर्थकस्य सिद्ध्या अहमिति शब्दघटितवाक्यैरभिलष्यमाना अन्ये प्रत्यया औपचारिकाः।

किञ्च "मम शरीरं, मम चक्षुः, मम पादौ" इत्यादिप्रत्ययाः स्पष्टमेव शरीरादीनामहमर्थभिन्नत्वं साधयन्ति। अहमर्थस्य शरीरादिरूपत्वे भेदनियतसम्बन्धावगाहिनामुक्तप्रत्ययानामुत्पत्त्यसम्भवात्। न च "ममात्मा" इति प्रत्ययोऽपि जायते, अतोऽहमर्थाद् आत्मनोऽन्यत्वमपि प्रसज्यत इति वाच्यम्, तत्रात्मपदस्य मनःपरत्वात्, मनसि आत्मपदस्य बहुलं प्रयोगात्। तदेवं वैशेषिकदृशा आत्मोभयथा सिद्धः, मानसप्रत्यक्षविषयतया अनुमेयतया चेति निर्विवादम्।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जगदीशगदाधरयोर्मतभेदसमीक्षा

डॉ. रामलालशर्मा
प्रवाचकः, न्यायविभागस्य
राष्ट्रियसंस्कृतविद्यापीठे, तिरुपतिः

***

आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः।।
परं वादिजये शक्तिर्यस्य स्यात् तद्गतिं शृणु।
स एव श्रेष्ठतां याति पाठकानां शतादपि।।
काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्।।

इत्यादीनि स्मृति-पुराणाभाणकानि न्यायशास्त्रप्राशस्त्यमभिवर्णयन्ति।

तत्र गौतमादिगङ्गेशपूर्ववर्तिनां ग्रन्थानां प्राचीनन्यायव्यपदेशः, एतच्च गङ्गेशोपाध्यायैस्तत्र तत्र जरन्नैयायिकप्रयोगाद् अस्माभिर्ज्ञायते। गङ्गेशप्रभृति-वर्तमानन्यायशास्त्रस्य नवीनव्यपदेशो वर्तते। अधुनातनपाठ्यक्रमे परममूलत्वेन चिन्तामणेः स्थानमेव गङ्गेशस्य आधिक्यं प्रकटयति। यथा अलङ्कारग्रन्थेषु काव्यप्रकाशिकाया बहुव्याख्यानवत्त्वं तथा मणिग्रन्थस्यैव व्याख्यानबाहुल्यं वर्तते। सत्स्वप्यनेकव्याख्यानेषु रघुनाथशिरोमणेर्दीधितिव्याख्या अनितरसाधारणी इत्यत्र पाठ्यक्रम एव साक्षीभूतो विद्यते। दीधितिव्याख्यानेष्वपि बहुषु जगदीश-गदाधर-व्याख्याने एव प्रसिद्धे। यतस्ते एव प्रसिद्धतया पठनपाठनयोर्वर्तेते।

एतावुभावपि क्रीस्तोः परं सप्तदशशताब्द्यां वङ्गदेशे स्थिताविति चरित्रकारैः स्पष्टीकृतम्। गदाधरो जगदीशात् किञ्चिद् अर्वाचीन इति च तैरेव स्पष्टीकृतम्।

दीधितिव्याख्यानावसरे जगदीशगदाधरयोस्तत्र तत्र मतभेदो वर्तते। तथा हि—तत्र पञ्चलक्षण्यां 'साध्याभाववदवृत्तित्व'[१] रूपप्रथमलक्षणे अव्याप्यवृत्ति-साध्यकसद्धेतौ कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्याप्तिः। तथा हि—साध्याभावः कपिसंयोगाभावस्तदधिकरणम् 'अग्रे वृक्षः कपिसंयोगी मूले न' इति प्रतीत्या प्रतीतिव्यवहाराभ्यां पदार्थसिद्ध्या वृक्षः, तन्निरूपितवृत्तित्वमेव एतद्वृक्षत्वे न तु

१. जा. व्या. पं., पृ. ४९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृत्तित्वाभाव इत्यव्याप्तिः। अतः 'साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम्'[१] इति द्वितीयलक्षणं स्वीकृतम्। तथा च नाव्याप्तिः। अग्रे वृक्षः कपिसंयोगी मूले न इति प्रतीतिवद् वृक्षः कपिसंयोगवान्न इति प्रतीतेरभावाद् भेदस्य व्याप्यवृत्तित्वेन साध्यवद्भिन्नः कपिसंयोगवद्भिन्नः कपिसंयोगाभाववान् वृक्षो न भवति; परन्तु गुणादिरेव तद्वृत्तित्वस्य एतद्वृक्षत्वे अभावाल्लक्षणसमन्वयान्नव्याप्तिः।

साध्यवद्भिन्नश्चासौ साध्याभाववाँश्चेति कर्मधारयसमासस्वीकारे साध्यवद्भिन्नावृत्तित्वस्यैव सम्यक्त्वेन साध्याभाववत्पदस्य वैयर्थ्यापत्तिः। तादृशविशेषणघटिताया व्याप्तेर्व्याप्यहेतव इतरभिन्नाः साध्यवद्भिन्नसाध्याभाववदवृत्तित्वादिति इतरभेदसाधकानुमाने साध्यवद्भिन्नसाध्याभाववदवृत्तित्वाभावत्वसमानाधिकरणस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकसाध्यवद्भिन्ननिरूपितवृत्तितात्वावच्छिन्नप्रतियोगिताकाभावत्वघटितत्वेन व्याप्यतावच्छेदकत्वासम्भवात्। अयञ्च हेतुर्व्याप्यत्वासिद्धो भवेत्। यथा पर्वतो वह्निमान् नीलधूमादित्यत्र नीलधूमत्वसमानाधिकरणनीलधूमत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकधूमत्वघटितत्वेन नीलधूमस्य व्यर्थविशेषणघटितत्वं तद्वत्। व्यर्थविशेषणघटितलक्षणस्य वस्तुतोऽसम्भव एव। इदञ्च गोलोकनाथैः सामान्यनिरुक्तिविवेचिन्यां साक्षात्कारघटितकल्पे स्पष्टीकृतम्। साध्यवद्भिन्ने साध्याभाव इति सप्तमीतत्पुरुषाश्रयणे तु साध्यवद्भिन्नवृत्तित्वस्य साध्याभावे अन्वयेन साध्यवद्भिन्नवृत्तिर्यः साध्याभाव इत्यर्थलाभेन तत्र साध्यवद्भिन्नावृत्तित्वस्याघटकत्वान्न, साध्याभाववत्पदस्य वैयर्थ्यशङ्कावकाशः।

तथा च साध्यवद्भिन्नवृत्तिर्यः साध्याभावस्तद्वदवृत्तित्वमिति लक्षणस्य स्वरूपं पर्यवसन्नम्। साध्याभावे साध्यवद्भिन्नवृत्तित्वविशेषणं तु कपिसंयोगी एतद्वृक्षत्वादित्यादौ अव्याप्तिवारणार्थमेव। साध्याभावपदानिवेशे साध्यवद्भिन्नवृत्तिर्यस्तद्वदवृत्तित्वमात्रोक्तौ वह्निमान् धूमादित्यादौ वह्निमद्भिन्नह्रदवृत्तिद्रव्यत्वादिमति पर्वतादौ धूमस्य सत्त्वादव्याप्तिः। अतः साध्याभावपदनिवेशः।

साध्यपदानिवेशे वह्निमान् धूमादित्यत्र अव्याप्तिः। तथा हि—साध्यवद्भिन्नह्रदवृत्तिर्योऽभावो घटाभावः, तदधिकरणं यथा ह्रदादि तथा पर्वतादिः, तत्र घटस्याभावात्, तद्वृत्तित्वमेव धूमे इत्यव्याप्तिः। अतः साध्यपदनिवेशः। तथा च नाव्याप्तिः। ह्रदवृत्तिर्यः साध्याभावो घटाभावो न भवति, घटाभावस्य साध्याभावानात्मकत्वात्; परन्तु वह्न्यभावतदधिकरणं न पर्वतादिः; परन्तु ह्रदादिरेव तद्वृत्तित्वाभावस्य धूमे सत्त्वान्नाव्याप्तिः।

---

१. जा. व्या. पं., पृ. ५०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतल्लक्षणे अधिकरणभेदेनाभावभेदोऽवश्यमङ्गीकर्तव्यः, अन्यथा कपिसंयोगी एतद्वृक्षत्वादित्यत्र अव्याप्तिरेव। तथा हि—साध्यवद्भिन्नो गुणादिः, तद्वृत्तिर्यः साध्याभावः कपिसंयोगाभावस्तदधिकरणं पुनः वृक्षादिः, तद्वृत्तित्वस्यैव हेतौ सत्त्वेन अव्याप्तिः। अधिकरणभेदेन अभावभेदस्वीकारे तु गुणवृत्तिकपिसंयोगाभावस्य वृक्षवृत्तिकपिसंयोगाभावस्य च भिन्नत्वेन साध्यवद्भिन्नगुणवृत्तिकपिसंयोगाभावाधिकरणं गुणादिरेव न तु वृक्षादिः, अतो नाव्याप्तिः। तथा चाधिकरणभेदेनाभावभेदस्वीकारे साध्यपदस्य वैयर्थ्यापत्तिः। तथा हि, साध्यपदाभावे घटाभावादिकमादाय वह्निमान् धूमादित्यत्र अव्याप्तिर्दत्ता, अधिकरणभेदेन अभावभेदस्वीकाराद् ह्रदवृत्तिघटाभावाधिकरणं ह्रदादिरेव न तु पर्वतादिः, पर्वतवृत्तिघटाभावस्य ह्रदवृत्तिघटाभावापेक्षयाभेदात्, तादृशह्रदनिरूपितवृत्तित्वाभावस्य धूमे सत्त्वान्नाव्याप्तिः। अतः साध्यपदस्य वैयर्थ्यापत्तिरिति प्राप्तौ—

अत्र जगदीशतर्कालङ्कारैरभावसामान्यस्याधिकरणभेदेन भेदमङ्गीकृत्य एवमुक्तम्—'स्वप्रतियोगितावच्छेदकसम्बन्धेन साध्यवद्भिन्ने वर्तते यः साध्यतावच्छेदकसम्बन्धेन साध्यीयोऽभावतद्वदवृत्तित्वमर्थः'[1]। अत्र लक्षणे साध्यतावच्छेदकसम्बन्धेन साध्यीयत्वार्थकसाध्यपदानुपादाने स्वप्रतियोगितावच्छेदकीभूतसमवायादिसम्बन्धेन वह्निमद्भिन्ने वर्तते योऽभावः समवायेन वह्न्यभावस्तद्वदवृत्तित्वस्य धूमादावभावाद् अव्याप्तिः। साध्यतावच्छेदकसम्बन्धेन साध्यीयत्वार्थकसाध्यपदनिवेशे स्वप्रतियोगितावच्छेदकसंयोगसम्बन्धेन साध्यवद्भिन्ने ह्रदादौ वृत्तिः, यः साध्यतावच्छेदकसम्बन्धेन वह्न्यभावस्तद्वान् ह्रद एव, तद्वृत्तित्वाभावस्य धूमे सत्त्वान्नाव्याप्तिः। अतः साध्यपदं न व्यर्थमिति।

गदाधरभट्टाचार्यास्तु अभावसामान्यस्य अधिकरणभेदेन भेदं नाङ्गीकुर्वन्ति; परन्तु कपिसंयोगाद्यभावानामेव भेदमङ्गीकुर्वन्ति। तेषामयमाशयः—'द्रव्ये संयोगसामान्याभावे संयोगसामानाधिकरण्यं न तु गुणे' इति। प्रतीतिसत्त्वात् संयोगाभावे प्रतियोगिसामानाधिकरण्यवैयधिकरण्यरूपविरुद्धधर्मद्वयसमावेशात् तादृशाभावस्यैवाधिकरणभेदेन भेदः, न तु अभावसामान्यस्य तथा च घटाभावादीनां भेदाभावाद् ह्रदवृत्तिघटाभावः पर्वतेऽपि वर्तते तथा च साध्यवद्भिन्नह्रदवृत्तिघटाभावाधिकरणपर्वतनिरूपितवृत्तित्वस्यैव धूमे सत्त्वादव्याप्तिः, अतः साध्यपदम्। तथा च नाव्याप्तिः। ह्रदवृत्तिः साध्याभावो वह्न्यभावस्तदधिकरणं ह्रदाद्येव तद्वृत्तित्वाभावस्य धूमे सत्त्वान्नाव्याप्तिरिति।

१. जा. व्या. पं., पृ. ५६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र उभयोः लक्षणकर्त्रोरभिप्रायप्रकटनविषये मतभेद इदानीं स्पष्टः। अभावसामान्यस्य अधिकरणभेदेन भेद इति जगदीशाभिप्रायः। अव्याप्यवृत्तिप्रतियोगिकाभावस्य व्याप्यवृत्तित्वाव्याप्यवृत्तित्वरूपविरुद्धधर्माध्यासात् तादृशाभावस्यैवाधिकरणभेदेन भेदः, तथा च कपिसंयोगाद्यभावस्यैवाधिकरणभेदेन भेद इति भट्टाचार्याणां मतम्।

अत्र विचार्यमाणे गदाधराभिप्राय एव साधीयानित्यवगम्यते। तथा हि—प्रथमं जगदीशमतं विचारयामः। अभावभेदे युक्तिः प्रदर्शनीया 'द्रव्ये गगनाभावे द्रव्यत्वसामानाधिकरण्यं न तु गुणे' इति प्रतीत्या गगनाभावेऽपि द्रव्यत्वसामानाधिकरण्यवैयधिकरण्यरूपविरुद्धधर्मसमावेशः प्रदर्शितः। तथापि तन्न शोभनम्, तथा सति द्रव्ये प्रमेयत्वसत्त्वे द्रव्यत्वसामानाधिकरण्यं न तु गुणे इति प्रतीत्या प्रमेयत्वस्यापि अधिकरणभेदेन भेदः सिद्ध्येत्। इष्टापत्तौ च प्रमेयत्वस्य केवलान्वयित्वानुपपत्तिः। अपि च जगदीशमते साध्यपदस्य वैयर्थ्यमेव, साध्यपदाभावे वह्निमान् धूमादित्यत्र अव्याप्तिर्दत्ता, सा च साध्यवद्भिन्नेत्यत्र भेदीयप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविशेषणेन, प्रतियोगितायां साध्यावच्छिन्नत्वविशेषणदानेनैव वार्यते। तथा हि संयोग-सम्बन्धावच्छिन्नवह्निमत्त्वावच्छिन्नवह्निमन्निष्ठप्रतियोगिताकभेदः संयोगेन वह्निमान् न इति भेदस्तदधिकरणं न पर्वतादिः, परन्तु ह्रदादिः, तद्वृत्त्यभावः समवायेन वह्न्यभावस्तदधिकरणं ह्रदाद्येव न तु पर्वतादिः, अधिकरणभेदेन अभावभेदात् तद्वृत्त्यभावस्य धूमे सत्त्वान्नाव्याप्तिः, अतः साध्यपदं व्यर्थम्।

अपि च द्वितीयलक्षणपरित्यागबीजभूतदीधितिरेवं वर्तते—'कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावादाह साध्यवत्प्रतियोगिकेति'[1] इति, अत्र कर्मादौ संयोगाद्यभावस्य भिन्नत्वे इत्यनेन कपिसंयोगाद्यभावस्यैवाधिकरणभेदेन भेदो लक्षणकर्तुरिष्ट इति ज्ञायते। यदि अभावसामान्यस्य भेद इष्टः, तदा दीधितिकारोऽधिकरणभेदेनाभावभेदे मानाभावादाह साध्यवत्प्रतियोगिकेति इत्यवक्ष्यत्। कर्मादौ संयोगाद्यभावस्येति विशेषनिर्देशेन कपिसंयोगाद्यभावस्यैवाधिकरणभेदेन भेद इति ज्ञायते।

एवमधिकरणभेदेनाभावभेदविषये मतद्वयं प्रदर्श्य तत्र जगदीशमतदृष्ट्या गदाधरमतस्य स्वीकरणीयत्वं सयुक्तिकं प्रतिभातीति।

●

१. जा. व्या. पं. पृ. ५६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगदर्शने ईश्वरस्य महत्त्वम्

डॉ. वीना श्रीवास्तवा
वरिष्ठ-प्राध्यापिका
संस्कृतविद्याविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

***

महर्षि: पतञ्जलिर्भक्तानां सन्तोषप्रदानार्थमीश्वरं योगदर्शने स्वीकरोति। ईश्वर: स्वकृपया उपासकानां दोषान् दूरीकृत्य तेभ्यो योगं सुगमं करोति[१]। उपासका: परमपितुरीश्वरस्य सर्वोच्चविभूतिं, हृदयस्य शुद्धतां, बुद्धे: प्रकाशञ्च प्राप्नुवन्ति। ईश्वर: स्वभक्त्या प्रसन्नो भूत्वा भक्तस्य मार्गात् सर्वान् विघ्नान् निवारयति। साधकस्य विक्षिप्तं चित्तं क्रमश एकाग्रतां लभते। साधकस्य ईश्वरचिन्तनाय उत्तरोत्तरं प्रवृत्तिर्जायते। ईश्वरस्य ध्यानाभ्यासेन यदा चित्तमेकाग्रताया उत्कृष्टावस्थां प्राप्नोति, तदा साधकभक्तस्य स्वरूपानुभूतिर्भवति।

महर्षिपतञ्जलिमतानुसारेण ईश्वरप्रणिधानात् समाधिसिद्धिर्भवति। यथोक्तं योगसूत्रे—'समाधिसिद्धिरीश्वरप्रणिधानात्'[२]। व्यासभाष्ये इदं कथितमस्ति यत् 'तदभिध्यानमात्रादपि योगिन: आसन्नतर: समाधिलाभ: समाधिफलं च भवतीति'[३]। श्रीवाचस्पतिमतेनापि इदं स्पष्टमस्ति यद् ईश्वर: समाधितत्फललाभेन योगिनमनुगृह्णाति। प्रेमात्मकभक्तिस्वरूपप्रणिधानेन ईश्वरो योगिनामुपरि अनुग्रहं करोति, यस्माद् योगिन: कैवल्यञ्च शीघ्रतया प्राप्नुवन्ति।

---

१. "..........this path is the easiest most simple and pleasant of all."—Rai Bahadur Shri Chandra Vasu—'The Yoga-Sutra', p. 32.

२. योगसूत्रम्—२।४५।

३. व्यासभाष्यम्—१।२३, योगसूत्रम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जगतो निमित्तकारणत्वेनापि ईश्वरस्य महत्त्वमस्ति। प्रकृतित एव जगतः सृष्टिप्रवृत्त्योर्विकासो जायते, यदा प्रकृतिपुरुषयोः संयोगो जायते, तदैव जगतः सृष्टिर्भवति। परस्परभिन्नयोः प्रकृतिपुरुषयोः संयोगे ईश्वरः सहायको भवति। ईश्वरः जगतो निमित्तकारणमस्तीत्यस्य पुष्टिर्वाचस्पतिमिश्रेण विज्ञानभिक्षुणा च कृता वर्तते। भोजदेवोऽपि प्रकृतिपुरुषयोः संयोगवियोगकर्त्ता ईश्वरोऽस्तीत्यङ्गीकरोति। ईश्वरः स्वप्रयोजनाभावेऽपि भूतानुग्रहार्थमेव प्रकृतिपुरुषयोः संयोगवियोगौ कारयति। भोजवृत्तिकारेणापीदं[१] स्पष्टीकृतम्। तत्त्ववैशारदीकारवाचस्पतिमिश्रानुसारं प्रकृतिरीश्वरेणाधिष्ठिता भूत्वा सृष्टेर्विकासप्रक्रियायाः प्रलयस्य (तिरोभावस्य) च कार्यं सम्पादयति[२]। विज्ञानभिक्षुमतेनेश्वरः प्रकृतेः साम्यावस्थायां क्षोभकर्तृत्वात् सृष्ट्युद्बोधकोऽस्ति। विज्ञानभिक्षुः स्पष्टतः कथयति यत् स क्षोभ ईश्वरेच्छयैव उत्पन्नो भवति[३]। विष्णुपुराणेऽपीदं प्रोक्तम्—

'प्रकृतिं पुरुषं चैव प्रविश्यात्मेच्छया हरिः।
क्षोभयामास सम्प्राप्ते सर्गकाले व्ययाव्ययौ'।।

योगदर्शने परमगुरो रूपे ईश्वरस्य महत्त्वमपरिहार्यं वर्तते[४]। 'स सर्वेषामपि गुरुः कालेनानवच्छेदात्' इति योगसूत्रमस्ति[५]। व्यासभाष्येऽपीदं वर्णितं वर्तते यत्—'पूर्वे हि गुरवः कालेनावच्छिद्यन्ते यत्रावच्छेद्यार्थेन कालो नोपवर्तते, स एव पूर्वेषामपि गुरुः'। (यो.सू. १।२६) स्वामी आत्मानन्दोऽपि परमगुरो रूपे ईश्वरस्य महत्त्वमङ्गीकरोति। ईश्वर एव ज्ञानस्य पराकाष्ठा वर्तते। 'तत्र निरतिशयं सर्वज्ञबीजम्' (योगसूत्रम्-१।२४)। अस्मादेव स सर्वज्ञोऽस्ति। सर्वज्ञत्वात् स गुरूणामपि गुरुर्वर्तते। ऋषीणां कृतेऽपि मन्त्राणां शिक्षां ददाति (योगवार्त्तिके-

---

१. 'तस्याऽऽत्मानुग्रहाभावेऽपि भूतानुग्रहः प्रयोजनम्। (भोजवृत्तिः, १।२५, योगसूत्रम्)
२. अनादौ तु सर्गसंहारप्रबन्धे सर्गान्तरसमुत्पन्नसंजिहीर्षावधिसमये पूर्णे मया सत्त्वप्रकर्ष उपादेय इति प्रणिधानं कृत्वा भगवाञ्जगत्संजहार। (तत्त्ववैशारदी, १।२४)
३. 'प्रकृतिवैषम्यहेतुः क्षोभोऽपि ईश्वरेच्छात एव'। (योगवर्त्तिके, १।२४)
४. 'As the first teacher I & wara is indispensable but devotion to him is just one of many alternative ways of attaining samadhi'. —R.K. Tripathi, 'The problems of Philosophy and Religion'.
५. 'योगसूत्रम्'-१।२६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१।२६)। अपि ईश्वरः पूर्वपूर्वसर्गाद्युत्पन्नानां ब्रह्मविष्णुमहेश्वरादीनामपि गुरुः पिता च वर्तते।

ईश्वरो वैदिकमन्त्राणां प्रवर्त्तक इति स्वीक्रियते। तेषां माध्यमेन ऋषिभिर्वैदिकमन्त्राणामुद्धृतिः क्रियते। शुद्धसत्त्वगुणेनैव स (ईश्वरः) अधिपतिरस्ति। येषु जीवेषु सत्त्वगुणस्य प्राधान्यं भवति, ते ज्ञानिनो गुरवो महात्मानश्च कथ्यन्ते। ते लोकोत्तराः पुरुषा भवन्ति; परन्तु जीवे सत्त्वगुणस्य प्राधान्येऽपि रूपान्तरेण रजोगुणतमोगुणानामपि अंशा वर्तमाना भवन्ति। अस्मादेव जीवा अपि ईश्वराभिमुखा भवन्ति; परन्तु स्वयमीश्वरस्वरूपा न भवन्ति। ईश्वरे तु शुद्धं सत्त्वं विद्यते। तस्मिन् रजस्तमसोः लेशमात्रमपि नास्ति। शुद्धसत्त्वादेव स ईश्वरोऽस्ति।

योगदर्शने ईश्वरभावनया प्रत्यक्चेतनस्य साक्षात्कारो भवति। ईश्वरः प्रसन्नो भूत्वा व्याध्यादिविघ्नान् दूरीकरोति। 'ततः प्रत्यक्चेतनाधिगमोऽन्तरायाभावश्च' इति योगसूत्रम् (१।२९)। ईश्वरभावनया प्रत्यक्चेतनस्य साक्षात्कारो भवति। अत्रेयं शङ्का जायते यद् यस्य भावना क्रियते तस्यैव प्रत्यक्षं जायते। ईदृशो नियमोऽस्ति। अत ईश्वरविषयकचिन्तनादीश्वरस्य साक्षात्कारो भवतु, कथं प्रत्यग्भूतस्य जीवात्मनः साक्षात्कारः? अस्याः शङ्कायाः समाधानं चेत्थं वर्तते यत् पुरुषविशेष ईश्वरोऽस्ति। पुरुषत्वेन ईश्वरतुल्यतया जीवात्मनोऽपि साक्षात्कारो भवति। योगवार्तिके (१।२९) उक्तमस्ति यद् ईश्वरप्रणिधानात् तत्साक्षात्कारद्वारा तद्दृष्टान्तेन जीवतत्त्वमपि अनायासेन पूर्णतया साक्षात् क्रियते।

ईश्वरभावनया अन्तरायाणामपि अभावो भवति। अन्तरं विवरं विच्छेदं कुर्वन्त आयान्तीत्यन्तराया इति व्युत्पत्त्या ये चित्तस्य ध्येयाकारताविच्छेदरूपविघ्नान् उत्पादयन्ति ते विघ्ना एव अन्तरायपदवाच्या भवन्ति।

ईश्वरभावनया व्याध्यादिविघ्नानामभावो भवति। अतोऽत्र स्वाभाविकः प्रश्नो जायते यत् चित्तस्य विक्षेपकारकाः के सन्ति? अस्योत्तररूपेणेदमायाति— 'व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः'।

इमे व्याध्यादयश्चित्तं योगपक्षाद् विक्षिपन्ति। अत इमे 'विक्षेपाः' कथ्यन्ते। तत्त्ववैशारदीकारोऽपि कथयति यच्चित्तस्य विक्षेपाः—चित्तं खल्वमी व्याध्यादयो

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगाद्विक्षपयन्ति अपनयन्तीति विक्षेपाः। इत्थमिमानि योगान्तरायाण्यपि सन्ति— व्याधिः, स्त्यानम्, संशयः, प्रमादः, आलस्यम्, अविरतिः, भ्रान्तिदर्शनम्, अलब्धभूमिकत्वम्, अनवस्थितत्वम्, श्वासप्रश्वासाः।

शरीरधारकधातुरसकरणानां वैषम्येन शरीरगठने उत्पन्ना अव्यवस्था 'व्याधि'पदवाच्या भवति। वातपित्तकफधातूनां परिणामे अनावश्यकी वृद्धिर्ह्रासश्च धातुवैषम्यं भवति। भुक्तस्यान्नस्य, पीतस्य जलादेः सम्यक्परिपाकाभाव एव रसवैषम्यमस्ति। चक्षुरादीन्द्रियाणां शक्तिक्षयः करणवैषम्यमुच्यते। अनारोग्येण साधकस्य कृते योगसाधनायां बाधा जायते।

यस्य चित्तं योगानुष्ठाने असमर्थं जायते, तदा योगसाधनायां स क्षमो न भवति। इयमेव मानसिकी असमर्थता 'स्त्यान'पदवाच्या भवति।

यदि साधकस्य कृते गुरूपदिष्टसाधनमार्गे 'अयं मार्गो दोषरहितोऽथवा दोषपूर्णोऽस्तीति' संशयो भवति अथवा योगसाधना मया कर्त्तुं शक्यते, न वेत्याकारिका उभयकोटिकसंशयात्मकचित्तवृत्तिर्जायते, सा 'वृत्तिः' इति कथ्यते। अतः संशयचित्तः साधकः कदापि एकाग्रचित्तेन मनसा योगसाधनां न कर्तुं शक्नोति। उत्साहपूर्वकं योगाभ्यासाकरणं प्रमादः। उत्साहरहितो व्यक्तिः कदापि प्रयत्नशीलो न भवितुमर्हति।

तमोगुणाधिक्येन शरीरचित्तयोर्गुरुत्वानुभव एव तत्फलस्वरूपसाधने प्रवृत्त्यभावः 'आलस्यं' जायते।

'अविरतिः' योगस्य प्रमुखशत्रुर्भवति। विषयासक्तं चित्तं योगसाधनाय प्रयत्नशीलं न भवितुमर्हति।

'योगः' समाधेः साधको नास्तीति विपरीतदर्शनं (ज्ञानं) भ्रान्तिदर्शन-पदवाच्यं भवति। ईदृशी भ्रमात्मिका बुद्धिः साधकं योगमार्गान्निवर्तयति।

यदा साधने कृतेऽपि योगी योगभूमिं न प्राप्नोति, तदा 'अलब्धभूमिकत्वं' भवति।

मधुमत्यादिभूमिषु मध्ये यदि एकस्या अधिभूमेर्यथावस्थितिर्भवति तथा तत्प्राप्त्यनन्तरं योगाभ्यासी स्वस्य कृतकृत्यतां स्वीकरोति, तदा स समाधिं न प्राप्नोति, अपि तु तस्य प्राप्तभूमिरपि नष्टा भवति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुःखं त्रिविधं भवति—आध्यात्मिकाधिभौतिकाधिदैविकभेदात्। इच्छायाः पूर्त्यभावान्मनसि जायमानः क्षोभो दौर्मनस्यमिति कथ्यते। शरीराङ्गेषु कम्पनम् अङ्गमेजयत्वं भवति। शरीरस्य कम्पनेन आसनानि न सिद्ध्यन्ति।

इच्छाया अभावेऽपि बहिर्देशाद् अन्तःप्रवेशः श्वासो भवति। इच्छा-मन्तरेण अन्तःप्रदेशाद् वायोर्बहिर्निष्क्रमणं प्रश्वासो भवति। अनेन प्रकारेण श्वासप्रश्वासयोः क्रियाः समाध्यङ्गभूतप्राणायामविरोधिन्यः सन्ति।

निष्कर्षः —

इयं आलोचना क्रियते यद् योगदर्शने ईश्वरप्रतिपादकसूत्राणि प्रक्षिप्तानि सन्ति, पुस्तकस्य चावशिष्टभागेन सह असम्बद्धानि वर्तन्ते[१]; परन्तु अस्योपरि यदि गाम्भीर्येण विचारः क्रियते तदा स्पष्टमिदं भवति यद् आपत्तिरियं युक्तिसङ्गता नास्ति। यतः सर्वप्रथमं मनसि विचारा आयान्ति यद् ईश्वरात्मकं तत्त्वं किमस्ति? अस्य किं स्वरूपम्? यस्य ध्यानं मया कार्यम्।

ईश्वरप्रणिधानस्यैव यदि पुस्तकेन सहासम्बद्धत्वं स्वीक्रियते, तदा योगशास्त्रस्य अष्टाङ्गयोगे आपत्तिरायाति।

इदमपि ध्यातव्यं यन्नियमान्तर्गत[२] एव ईश्वरप्रणिधानस्याप्युल्लेखो वर्तते।

वस्तुतः साधनामार्गे भक्तेर्विशेषस्थानं वर्तते। अत ईश्वरस्य व्यावहारिकमहत्त्वमधिकमस्ति। योगदर्शने ईश्वरप्रणिधानेन भक्तियोगस्य स्थापना क्रियते। यदि केनचिदिदं स्वीक्रियते यद् योगदर्शने ईश्वरप्रणिधानरूपभक्त्युपरि विशेषविचारो दृश्यते, न तु ईश्वरविषयको

१. (क) 'The idea of God far from being organically inter-woven in the Yoga system is only loosely inserted. In the Yoga Sutras the passages that treat of God stand disconnected and are indeed in direct contradiction to the contents and aim of the system'

—James Hastings 'Encyclopaedia of Religion and Ethics', Vol. XII, p. 83.

(ख) डॉ. राधाकृष्णन्—'भारतीयदर्शनम्', भागः २।

२. 'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः'। (योगसूत्रम्, २।३२)

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

विचार:, तदा प्रश्नोऽयमुपस्थितो भवति यत् कस्य भक्ति: कर्त्तव्या? तत्पश्चाद् अस्योत्तररूपे ईश्वरस्य नाम आयाति।

इत्थम्, उपर्युक्तदृष्ट्या योगदर्शने ईश्वरस्य महत्त्वं नूनमेव वर्तते। वस्तुत ईश्वरभक्ते:, ईश्वरस्य च समावेशाद् योगदर्शनं सरसं भवतीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सविकल्पकप्रत्यक्षमयाः प्राणाः

डॉ. कमलेशमिश्रः
उपाचार्यः, स्नातकोत्तरन्यायदर्शनविभागस्य
श्रीजगन्नाथसंस्कृतविश्वविद्यालये
श्रीविहारः, पुरी

❋❋❋

लोके प्रत्यक्षशब्दस्य व्यवहारोऽर्थत्रये प्रसिद्धः प्रत्यक्षप्रमाण-प्रत्यक्ष-प्रमाणोत्पन्नज्ञान-प्रत्यक्षज्ञानविषयभेदेन। तत्र प्रतिगतमक्षम् (विषयं प्रतिगतमक्षम् = इन्द्रियम्) प्रत्यक्षमिति व्युत्पत्त्या विषयसन्निकृष्टेन्द्रियमेव प्रत्यक्षप्रमाणमिति स्पष्टम्। न्यायभाष्येऽपि—अक्षस्य अक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षमिति व्युत्पत्तिः[1]।

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति[2] सूत्रेण प्रत्यक्षप्रमार्थे प्रत्यक्षशब्दप्रयोगः सिद्धः।

'आत्मा प्रत्यक्ष' इत्यत्र ज्ञानविषयकार्थे प्रत्यक्षशब्दः सुप्रयुक्तः। व्युत्पत्तिश्चात्र 'प्रत्यक्षमस्यास्तीति'।

एतेन प्रत्यक्षशब्दप्रयोगः 'इन्द्रियजन्यप्रमायां, तत्करणे इन्द्रियजन्य-प्रमाविषयभूतपदार्थे च' इत्युपपत्तिः।

तत्र प्रत्यक्षानुभवप्रमाणभूतानामिन्द्रियाणां षड्विधत्वाङ्गीकाराद्[3] घ्राणज-रासन-चाक्षुष-स्पार्शन-श्रावण-मानसभेदेनाभिमतं प्रत्यक्षं प्रत्येकं द्विविधं निर्विल्पकसविकल्पकभेदात्।

परन्तु न्यायसूत्रे न क्वापि निर्विकल्पकसविकल्पकशब्दाभ्यां प्रत्यक्षविभागो विहितः। तात्पर्यटीकाकारेण तु निर्विकल्पकसविकल्पकभेदः स्पष्टतया प्रदर्शितः।

---

१. 'अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्। वृत्तिस्तु सन्निकर्षो ज्ञानं वा'। (न्या.भा., १।१।३)

२. न्या.सू., १।१।४।

३. 'घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि षडिति'। (प्र.पा.भा., पृ. ४४२)

CC-0. In Public Domain. Gurukul Kangri Coll...

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा हि—'इह द्वयी प्रत्यक्षजातिरविकल्पिका सविकल्पिका चेति। तत्रोभयी इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारीति लक्षणेन सङ्गृहीतापि स्वशब्देन उपात्ता। तत्र विप्रतिपत्तेस्तत्राविकल्पिकायाः पदमव्यपदेश्यमिति सविकल्पिकायाश्च व्यवसायात्मकमिति[1]।

जयन्तभट्टेन न्यायमञ्जर्यां निर्विकल्पकं सविकल्पकञ्चेति प्रत्यक्षद्वयं व्याख्यातम्। न्यायभूषणकारेण अव्यपदेश्यपदेन[2] निर्विकल्पकस्य व्यवसायात्मक-पदेन च सविकल्पकस्य ग्रहणमिति सयुक्तिकं प्रतिपादितम्।

'सविकल्पकञ्च विशिष्टस्य ग्रहणम्'[3] इति सप्तपदार्थीकारेण। सप्रकारकं ज्ञानमिति अन्नम्भट्टेन च तर्कसङ्ग्रहे निगदितम्। वैशिष्ट्यविषयकं विशेषणविशिष्टं सप्रकारकं वा ज्ञानं सविकल्पकं[4] भवति। वैशिष्ट्यं च विशेष्यविशेषणसम्बन्ध इति नामजात्यादिविशेषणविशेष्यसम्बन्धावगाहिज्ञानमेव सविकल्पकमिति[5] दीपिकायां स्पष्टम्। तथा च नामादिभिर्विशिष्टार्थविषयं सविकल्पकमिति तार्किकरक्षायाम्। यस्मिन् ज्ञाने विशेषणं विशेष्यं तदुभयसम्बन्धश्च विषयत्वेन भासन्ते, तत् सविकल्पकमिति सिद्धम्। तत्त्वचिन्तामणौ सविकल्पकञ्च[6] विशिष्टज्ञानमिति सूपपादितम्। यथा घटोऽयमिति घटघटत्वयोर्वैशिष्ट्यावगाहिज्ञानम्। अत्र घटनिष्ठा विशेष्यता घटत्वनिष्ठा विशेषणता समवायनिष्ठा संसर्गता च भासन्ते। डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयमित्यादिकमपि विशेष्यविशेषणसम्बन्धावगाहिज्ञानम्। डित्थपदेन नाम्नो ब्राह्मणपदेन जातेः श्यामपदेन गुणस्य च ग्रहणम्। एतानि सर्वाणि तत्तद्विशेष्यैः सह सम्बद्धानि ज्ञानविषयीभवन्तीति तत्तज्ज्ञानं सविकल्पकमेव। इदं सविकल्पकज्ञानं व्यवसायात्मकपदेन व्यपदिश्यते। 'घटमहं जानामि' इत्यादिना अनुव्यवसायात्मकज्ञानेन व्यवसायात्मकज्ञानस्य प्रत्यक्षत्वम्।

बौद्धा निर्विकल्पकमेव प्रत्यक्षं स्वीकुर्वन्ति, न तु सविकल्पकम्, ज्ञानस्य स्वलक्षणमात्रविषयकस्यैव प्रमात्वात्। प्रथमाक्षपातसमनन्तरं यज्ज्ञानं प्राथमिकं तत्

---

१. ता.टी., १।१।४; २. न्या.भू., पृ. ९९।

३. विशिष्टस्य ग्रहणं सविकल्पकम्। (स.प., पृ. १२६)

४. त.सं., पृ. ४३; ५. दीपि., पृ. २३८।

६. सविकल्पकञ्च विशिष्टज्ञानं यथा गौरयमिति। तच्च सामान्यादीनां परमार्थसत्त्वेनार्थ-जत्वादिन्द्रियजत्वाच्च प्रत्यक्षम्। (त.चि.म., प्रत्यक्षखण्डे, सविकल्पकवादे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वलक्षणमात्रविषयकं निर्विकल्पकप्रमाणम्। अविसंवादकत्वं प्रमाणसामान्यलक्षणं **प्रमाणवार्त्तिके धर्मकीर्त्तिना** प्रोक्तम्। तदुक्तम्—प्रमाणमविसंवादिज्ञानमिति[1]।

अविसंवादकत्वञ्च प्रापकत्वम्। अर्थस्य क्षणिकत्वेन प्राप्तिकाले दृष्टस्य नष्टत्वेन दृष्टवस्तुन: प्राप्त्यसम्भवेऽपि तत्सन्तानघटकवस्तुप्राप्तेरेकसन्तान-विषयकाध्यवसायजननेनैव प्रापकत्वम्। अनुमानन्तु आरोपितार्थविषय:, तथापि मूलभूतवस्तुक्षणपारम्पर्यप्रभवत्वान्मणिप्रभामणिबुद्धिवत् तत्प्राप्त्या प्रापकत्वमिति। बौद्धनये धर्मधर्मिरूपवस्तुद्वयं नास्ति। वस्तुस्वरूपं धर्मधर्मिभावादिकल्पनाहीनत्वात् स्वलक्षणमित्युच्यते। वासनाया आकारा: कल्प्यन्ते। आकाराश्च मिथ्यावासनाधीनत्वात्, तद्विषयत्वाच्च सविकल्पकमप्रमाणम्। स्वलक्षणस्य स्वं सर्वतो व्यावृतं लक्षणं वस्तुरूपं यस्य तदिति व्युत्पत्ति:।

नैयायिका इदं न सहन्ते। अनुमाने प्रदर्शनमेव न वर्त्तते का कथा तस्य प्रापणस्य इति। प्रत्यक्षे प्रदर्शनं वर्त्तत इति सत्यं किन्तु यत् प्रदर्शितं तन्न प्राप्यते क्षणिकत्वेनातिक्रान्तत्वात्। न च सन्तानप्राप्त्या तत्प्राप्तिरिति सन्तानस्य भेदाभेदविकल्पाभ्यामनुपपन्नत्वात्[2]। बौद्धमतं न्यायकन्दलीकारेण तथा शङ्करमिश्रेण स्वस्वग्रन्थे खण्डितमेव। तत्त्वचिन्तामणिकारेण तत्त्वचिन्तामणौ सविकल्पकवादे प्रत्यभिज्ञापि सविकल्पकरूपेति प्रतिपादितम्। सोऽयं देवदत्त इत्यत्र देवदत्ते तत्तांश इदत्वञ्च भासेते इति निरूपितम्।

सविकल्पकप्रत्यक्षं लौकिकालौकिकभेदेन द्विविधम्। लौकिके षोढा सन्निकर्षा:। अलौकिके त्रिविधा: सन्निकर्षा: स्वीकृता:।

न्यायशास्त्रे जन्यसविकल्पकस्य यथार्थायथार्थभेदेन भेदद्वयं सुप्रसिद्धम्। किन्तु ईश्वरप्रत्यक्षं नित्यम्। इदमपि सविकल्पकविशिष्टज्ञानात्मकं यथार्थञ्च।

सविकल्पकज्ञानस्य केचन भेदा वर्त्तन्ते ये विषयतासम्बन्धे ज्ञातव्या:, यथा—एकत्र एकावगाहि, एकत्र द्व्यवगाहि, उभयत्र एकावगाहि, समूहालम्बनम्, विशिष्टवैशिष्ट्यावगाहि, उपलक्षितवैशिष्ट्यावगाहि चेति।

---

१. न्यायमञ्जर्य्यामुल्लिखितम्, प्रथमाह्निके प्रमाणलक्षणप्रकरणे।

२. न्या.म., पृ. ६४।

CC-0. In Public Domain. Guru...

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकत्र एकावगाहि

यज्ज्ञानमेकस्मिन् धर्मिणि कमपि धर्ममेकं विषयं करोति, तदेकत्रावगाहीति उच्यते। यथा भूतलं घटवदिति ज्ञानमेकस्मिन् धर्मिणि भूतले धर्ममेकं घटं विषयं करोति। अत्र भूतले घटनिष्ठप्रकारतानिरूपितविशेष्यता एका, घटे च भूतलनिष्ठविशेष्यतानिरूपितप्रकारता एका। ज्ञाने च घटनिष्ठप्रकारता-निरूपितप्रकारिता भूतलनिष्ठविशेष्यतानिरूपितविशेष्यता एकविशिष्टज्ञानत्वात्, विशेष्यविशेषणसम्बन्धस्यापि विशिष्टज्ञानविषयत्वात्। तथा च ज्ञानेऽस्मिन् घटभूतलसंयोगस्यापि विषयता संसर्गताख्या। संसर्गतायाश्च निरूप्यनिरूपकभावः प्रकारताविशेष्यताभ्याम्। ज्ञाने संसर्गतानिरूपिता संसर्गिता। ययोर्विषयतयो-र्निरूप्यनिरूपकभावः, तन्निरूपितविषयतयोरवच्छेद्यावच्छेदकभावः। तथा च प्रकारतासंसर्गताविशेष्यतासु निरूप्यनिरूपकभावत्वात् प्रकारितासंसर्गिता-विशेष्यितासु अवच्छेद्यावच्छेदकभावः। अतः संयोगसम्बन्धावच्छिन्नसंयोगनिष्ठ-संसर्गतानिरूपितघटनिष्ठप्रकारतानिरूपितभूतलनिष्ठविशेष्यताशालिज्ञानमिति विषय-तया ज्ञानम्, संयोगनिरूपितसंसर्गित्वावच्छिन्नघटनिरूपितप्रकारित्वावच्छिन्न-भूतलनिरूपितविशेष्यिताश्रयज्ञानमिति विषयितया ज्ञानञ्चेति।

द्व्यवगाहिज्ञानम्

यज्ज्ञानमेकस्मिन् धर्मिणि एकत्र स्वतन्त्ररूपेण धर्मद्वयं विषयं करोति, तदेव ज्ञानमिति। तथा भूतलं घटपटवत्। अत्र घटनिष्ठप्रकारता पटनिष्ठप्रकारता चेति प्रकारताद्वयेन निरूपिता एका विशेष्यता भूतले।

न च भूतलं घटपटोभयवत्, अथवा भूतलं घटविशिष्टपटवद् इत्यादावेकत्र द्व्यवगाहिज्ञानमिति वाच्यम्, एकधर्मिणि घटपटयोः स्वतन्त्रतया अविषयाद् एकविशिष्टापररूपेण विषयाङ्गीकारात्।

उभयत्र एकावगाहि

यज्ज्ञानं स्वतन्त्रतया धर्मिद्वये धर्ममेकं विषयं करोति, तदुभयत्र एकावगाहीति। यथा 'घटः पटश्च द्रव्यम्'। अत्र घटनिष्ठविशेष्यता-पटनिष्ठविशेष्यतानिरूपिता एका प्रकारता द्रव्यत्वे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समूहालम्बनम्

यज्ज्ञानमेकधर्मविशिष्टधर्मिणि अनेकधर्मान् अथवा विभिन्नधर्मविशिष्टविभिन्नधर्मिणि अनकेधर्मान् विषयान् करोति, तत् समूहस्य विषयकरणात् समूहालम्बनमिति। यथा भूतलं घटवत् पटवच्च। अत्रेदं ज्ञानमेकधर्मभूतलत्वविशिष्टभूतलधर्मिणि घटपटानेकधर्मान् विषयान् करोति। 'भूतलं घटवत्, महानसञ्च वह्निमत्' इति ज्ञानं भूतलत्वविशिष्टभूतले महानसत्वविशिष्टमहानसे घटवह्निरूपानेकधर्मान् विषयान् करोति। समूहालम्बने प्रकारताया भेदेन विशेष्यताया भेदोपगमात्। यस्मिन् ज्ञाने एकाधिकमुख्यविशेष्यता वर्त्तते तज्ज्ञानं समूहालम्बनं वेत्युच्यते। मुख्यविशेष्यता च प्रकारतानवच्छिन्ना।

विशिष्टवैशिष्ट्यावगाहि

यज्ज्ञानं धर्मिणि केनापि धर्मेण विशिष्टस्य वैशिष्ट्यसम्बन्धं विषयं करोति तदेव। यथा—'रक्तो दण्ड:' इति ज्ञानोत्पन्नं 'रक्तदण्डवान् पुरुष:' इति ज्ञानं 'रक्तो दण्ड:' इति ज्ञानेन गृहीतस्य रक्तत्वविशिष्टदण्डस्य संयोगं विषयं करोति। तेन च रक्तत्वविशिष्टदण्डवैशिष्ट्यावगाहीत्युच्यते। न चात्र ज्ञाने पुरुषेण सह रक्तदण्डस्य संयोगभानं सामान्यसंयोगरूपेण किन्तु रक्तदण्डप्रतियोगिकसंयोगत्वरूपेण। अतोऽस्य ज्ञानस्य संयोगनिष्ठसंसर्गता रक्तदण्डप्रतियोगिकत्वावच्छिन्ना। दण्डनिष्ठप्रकारता रक्तत्वावच्छिन्ना। तथा च रक्तदण्डप्रतियोगितावच्छिन्नसंयोगनिष्ठसंसर्गतानिरूपितरक्तदण्डनिष्ठप्रकारतानिरूपितपुरुषनिष्ठविशेष्यताशालिज्ञानरूपेण अथवा संयोगनिष्ठसंसर्गतानिरूपितरक्तत्वावच्छिन्नदण्डनिष्ठप्रकारतानिरूपितपुरुषनिष्ठविशेष्यताशालिज्ञानरूपेण एतज्ज्ञानस्य परिचिति:। इदञ्च ज्ञानं रक्तदण्डाभाववान् पुरुष इति ज्ञानस्य प्रतिबन्धकम्।

यज्ज्ञानं विशेष्ये विशेषणं विशेषणे विशेषणान्तरञ्च विषयं करोति तद् द्वितीयविशेषणेन उपलक्षितप्रथमविशेषणवैशिष्ट्यग्राहकज्ञानमिति व्यपदिश्यते। यथा रक्तदण्डवान् पुरुष इति ज्ञानं पुरुषे रक्तत्वविशिष्टदण्डस्य सम्बन्धं न विषयं करोति किन्तु पुरुषे दण्डसम्बन्धं दण्डे च रक्तत्वसम्बन्धं विषयं कृत्वा रक्तत्वोपक्षितदण्डवैशिष्ट्यग्राहकं भवति। अत्र संयोगनिष्ठसंसर्गतावच्छेदकं संयोगत्वमात्रम्, न तु रक्तत्वविशिष्टदण्डप्रतियोगिकत्वम्। किञ्च दण्डनिष्ठप्रकारताया

CC-0. In Public Domain. Gurukul K...

Digitized by Arya Samaj Foundation Chennai and eGangotri

अप्यवच्छेदकं दण्डत्वमात्रम्, न तु रक्तत्वमिति। तथा च रक्तदण्डनिष्ठ-प्रकारतानिरूपितसंयोगत्वमात्रावच्छिन्नसंसर्गतानिरूपितपुरुषनिष्ठविशेष्यताशालि-ज्ञानरूपेण अथवा रक्तत्वनिष्ठप्रकारतानिरूपितविशेष्यत्वावच्छिन्नदण्डनिष्ठप्रकारता-निरूपितविशेष्यताशालिज्ञानरूपेणास्य परिचितिः। इदञ्च ज्ञानं 'रक्तदण्डाभाववान् पुरुषः' इति ज्ञानस्य न प्रतिबन्धकं न वा अनेनापि प्रतिबध्यमिति।

वस्तुतः सविकल्पकज्ञानं निर्विकल्पकपूर्वकम्। निर्विकल्पकज्ञानेन सर्वव्यवहारो नैव सम्भवति, किन्तु सविकल्पकज्ञानेन। सविकल्पकज्ञानं विना लोकयात्रानिर्वाहो नैव सुकरः। अत एव **जयन्तभट्टेन** न्यायमञ्जर्यां यथार्थतया **'नैयायिकानाञ्च सविकल्पकप्रत्यक्षमयाः प्राणाः'** इति प्रत्यपादीति।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवधिः पञ्चम्यर्थः

डॉ. राममनोहरमिश्रः
व्याकरणविभागः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

❋❋❋

'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सूत्रे पाणिनिना निर्दिष्टानामेकविंशतिभेदेन भिन्नानां सुपां त्रीणि त्रीणि प्रथमादयः संज्ञाः प्राचामनुरोधेन पाणिनिव्याकरणेऽपि स्वीकृताः सन्ति। तेषामर्थानां कारकत्वाकारकत्वविषये च बहवो विचाराः कृताः सन्ति तत्तदाकरग्रन्थेषु। तत्र पञ्चमीविभक्त्यर्थविषये तदर्थस्य कारकत्वविषये च वादिनां विवादं दृष्ट्वा पञ्चम्यर्थो मया यथामति विचार्यते। सुपामर्थनिरूपणावसरे कौण्डभट्टेन कारिका उपन्यस्ता वैयाकरणभूषणसाराख्ये ग्रन्थे[1]—

आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा।
यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः।।

उक्तेष्वर्थेषु पञ्चम्यर्थोऽवधिः। यद्यपि[2] 'अपादाने पञ्चमी' इति सूत्रेणापादाने पञ्चमीविधानात् पञ्चम्यर्थोऽपादानमेव लभ्यते, यस्मिन्नर्थे प्रत्ययः प्रत्ययस्यापि तदेवार्थ इति नियमात्। तथापि अपादानमवधिरूपमेव ध्रुवमपायेऽपादानमिति नियमात्।

विश्लेषजनकक्रियायामवधिभूतं कारकमपादानसंज्ञकं भवतीति तत्सूत्रार्थात्। तस्मादवधिरेव पञ्चम्यर्थ इति वैयाकरणानां सिद्धान्तः। तथा चोक्तम्—'अवधिः पञ्चम्यर्थः'।[4] 'पञ्चम्यर्थोऽवधिः'[5] इति नागेशेनापि प्रतिपादितत्वात्।

---

१. वै.भू.सा. सुबर्थनिर्णयः, कारि. २४;
२. पा.सू. २/३/२८।
३. पा.सू. १/४/२४;
४. वै.भू.सा. सुबर्थनिर्णयः, पृ. २०५।
५. परमलघुमञ्जूषा, कारकविचारः, पृ. १०४।

CC-0. In Public Domain. Gurukul ...

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवञ्चावधित्वमेव पञ्चम्यर्थ इत्यत्र प्राचीननव्ययोर्नास्ति कश्चन विवादः; किन्त्ववधित्व(ध्रुवत्व)स्वरूपे विवादो दृश्यते तत्तद्ग्रन्थेषु।

कौण्डभट्टमतम्

प्राचीनवैयाकरणाः कौण्डभट्टादयस्तु प्रकृतधात्वर्थप्रधानीभूतव्यापारानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वं ध्रुवत्वमिति स्वीकुर्वन्ति। तथा चोक्तं भर्तृहरिणाऽपि—

अपाये[1] यदुदासीनं चलं वा यदि वाचलम्।
ध्रुवमेवातदावेशात् तदपादानमुच्यते॥
पततो ध्रुव एवाश्वो यस्मादश्वात् पतत्यसौ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते॥

तद्व्याख्यानं कुर्वता कौण्डभट्टेन भणितम्—'अपाये'[2] विश्लेषहेतु-क्रियायामुदासीनमनाश्रयः, अतदावेशात् तत्क्रियानाश्रयत्वात्। एवञ्च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वं फलितम्।

एवञ्चावधिभूतो ध्रुवो द्विविधो भवति, सक्रियः, निष्क्रियश्चेति प्रतिपादितम्, चलं वा यदि वाचलमित्युक्त्या। तत्र सक्रियोऽवधिः 'धावतोऽश्वात् पतति' इत्यत्राश्वे, निष्क्रियश्च ग्रामादायाति, वृक्षात् पत्राणि पतन्तीत्यादौ ग्रामादीनां बोध्यः।

ननु 'कुड्यात् पततोऽश्वात् पतति चैत्रः' इत्यत्राश्वस्यावधित्वं न स्यात्, विश्लेषहेतुपतनक्रियाश्रयत्वादिति चेदुच्यते—लक्षणे विश्लेषसामान्यं नापेक्ष्यतेऽपि तु तद्व्यक्तित्वेनैव। अर्थात् तद्विश्लेषहेतुक्रियानाश्रयत्वे सति, तद्विश्लेषाश्रयत्वमिति लक्षणं ध्रुवस्य। एवञ्च यन्निरूपितमवधित्वं चिकीर्षितं तत्क्रियानाश्रयत्वमपेक्ष्यते। तथा च 'पतंतोऽश्वात् पतति चैत्रः' अत्र चैत्रनिष्ठविश्लेषजनक-पतनक्रियानिरूपितावधित्वमश्वे चिकीर्षितं, तत्क्रियानाश्रयत्वमश्वे विद्यत एव, तत् क्रियायाश्चैत्रादिनिष्ठत्वात्। एवमश्वनिष्ठा या पतनक्रिया, तन्निरूपिताऽवधित्वं कुड्ये, तस्मादश्वकुड्ययोरुभयोरपि ध्रुवत्वं निर्विवादमेव। एवञ्च कुड्यावधिकपतनाश्रयो योऽश्वस्तदवधिकं चैत्रनिष्ठं पतनमिति बोधः।

---

१. यद्यपीदं कारिकाद्वयमपि इदानीमुपलब्धे मुद्रितवाक्यपदीये न दृश्यते, किन्तु सर्वेष्वेव प्रायोऽपादानप्रतिपादकग्रन्थेषु प्रमाणत्वेनोपन्यस्तम्। अत एव वैयाकरणभूषणसारस्य सुबर्थनिर्णये कौण्डभट्टेनापि उपन्यस्तम्, पृ. २०५-२०६।

२. वै.भू.सा. सुबर्थनिर्णयः पृ. २०६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चम्यर्थेऽवधौ प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम्, प्रत्ययार्थस्तु पतनक्रियायां निरूपकत्वसम्बन्धेन विशेषणम्। अत्र प्रत्ययार्थोऽवधिरूपो धर्मी, न तु धर्ममात्रम्, ओदनकर्मकोद्धरणावधिभूतस्थालीत्यर्थकोद्धृतौदना स्थालीति वाक्ये सामानाधिकरण्यदर्शनात्। तथा चोक्तम्—'प्रत्यायार्थस्तु क्रियायां, स च धर्मी, न तु धर्ममात्रम्। विभक्त्यर्थे विहितस्य बहुव्रीहेर्धर्मिपरताया निर्विवादत्वात्' उद्धृतौदना स्थालीत्यत्र हि ओदनकर्मकोद्धरणावधिभूतेत्यर्थः।

नन्वेवमपि 'परस्परान्मेषावपसरतः' इत्यादौ यत्र विश्लेषणजनकक्रियाद्वयजन्यो मेषद्वयनिष्ठ एक एव विभागः, तत्र विश्लेषजनकक्रियाश्रयत्वादुभयोर्मेषयोरपादानत्वं न स्यादिति चेदुच्यते—एकस्मिन्नेव विभागे, तद्विभागजनकक्रिया व्यक्तिभेदाद् भिन्ना। एवञ्चैतन्मेषनिष्ठक्रियाया मेषान्तरेऽभावेनोभयोरपादानत्वं सम्भवति। एवञ्चैतन्मेषनिष्ठा या तद्व्यक्तिरूपा विश्लेषजनकक्रिया, मेषान्तरस्य तदनाश्रयत्वेऽपादानत्वं, स्वनिष्ठ-तत्क्रियाव्यक्त्याश्रयत्वेन च कर्तृत्वं सिद्ध्यति। उक्तञ्च भर्तृहरिणा—

मेषान्तरक्रियापेक्षमवधित्वं[1] पृथक् पृथक्।
मेषयोः स्वक्रियापेक्षं कर्तृत्वञ्च पृथक् पृथक्।।

कौण्डभट्टैरपि भणितम्—यथा[2] निश्चलमेषादपसरद् द्वितीयमेषस्थले निश्चलमेषस्यापसरन्मेषक्रियामादाय ध्रुवत्वम्, तथात्रापि विभागैक्येऽपि क्रियाभेदादेकक्रियामादाय परस्य ध्रुवत्वम्। तथा च विश्लेषाश्रयत्वे सति तत्क्रियायामपादानत्वं तज्जनकं वाच्यम्।

'परस्परान्मेषावपसरतः' इत्यत्रापादानत्वसिद्धय इयमेव युक्तिराश्रिता भट्टोजिदीक्षितेनापि। तथा चोक्तम्—'परस्परान्[3] मेषावपसरतः' इत्यत्र तु सृधातुना गतिद्वयस्याप्युपादानादेकनिष्ठां गतिं प्रतीतरस्यापादानत्वं न विरुध्येत्।

वस्तुतस्तु—अपसरणं विभागपूर्वकपृष्ठतो गमनम्। तस्य मेषद्वयनिष्ठत्वादाश्रयभेदेन भिन्नत्वेऽपि सृधातुना निवृत्तभेदस्यैवापसरणस्य प्रतीतिः। तथा चोक्तं कैयटेन 'आख्यातवाच्या[4] क्रिया सर्वैव निवृत्तभेदा प्रतीयते। भवद्भिरास्यतम्' इत्यादौ वस्तुस्थित्या कर्तृभेदाद् भेदेऽपि तिङन्ताद्

---

१. प्रौढमनोरमा (कारके, पञ्चमीप्रकरणम्), पृ. ९२१।
२. वाक्यपदीयम्, तृतीयकाण्डः, साधनसमुदेशः, कारिका-१४१।
३. वै.भू.सा., सुबर्थनिर्णयः, पृ. २०८।
४. प्रौढमनोरमा, पृ. ११९।

CC-0. In Public Domain. Gurukul K...

Digitized by Arya Samaj Foundation Chennai and eGangotri

भेदस्यानवगमात्। एवञ्चाश्रयगतभेदारोपेण द्विवचनाद्युत्पत्तेरुभयोरपि तत्क्रिया श्रयत्वेन कर्तृत्वमेव स्यान्नापादानत्वम्। अत एवोक्तं भाष्ये—'न तिङन्तान्येकशेषारम्भं[1] प्रयोजयन्ति, किं कारणम्? एका हि क्रिया' इति। तस्मात् क्रियाभेदमादाय कर्तृत्वापादानत्वप्रतिपादनपरं भर्तृहरि-कौण्डभट्ट-भट्टोजिदीक्षितानां मतमसमीचीनमेव, भाष्यविरुद्धत्वात्। अतः 'न सोऽस्ति[1] प्रत्ययो लोके यः शब्दानुगमादृते' इति हर्युक्त्या शब्दालिङ्गितस्यैवार्थस्य सर्वज्ञानविषयताया वैयाकरणसम्मतत्वात्, तादृशशब्दभेदादेवात्र कर्तृत्वमपादानत्वञ्चोपपादनीयम्। एवञ्च मेषपदोपात्तयोरेव क्रियाश्रयत्वात्कर्तृत्वं, परस्परपदोपात्तयो-र्विभागाश्रयत्वादपादानत्वं भविष्यति। अत एव देवदत्तयज्ञदत्तावन्योन्यमाश्लिष्यत इत्यत्र देवदत्तयज्ञदत्तयोः कर्मत्वं सिद्ध्यति, अन्यथा तु तत्रापि परत्वात् कर्तृसंज्ञैव स्यात्। शब्दरूपोपाधिकृतभेदमादायैव, चैत्रः आत्मानं हन्तीत्यादावेकस्यैव कर्तृत्वकर्मत्वोपपत्तिः।

एवञ्च 'परस्परान्मेषावपसरतः' इत्यत्रापि शब्दरूपोपाधिकृतभेदमादायैव कर्तृत्वापादनत्वोपपत्तिः युक्ता। प्रतिपादितञ्चैतत् नागेशेनापि—'किञ्च[2] मेषपदवाच्ययोः पशुविशेषयोः क्रियाश्रयत्वविवक्षा, परस्परपदवाच्ययोस्तयोस्तु विभागाश्रयत्वविवक्षेत्यौपाधिकस्तयोर्भेदः। शब्दस्वरूपोपाधिकृतभेदोऽप्यर्थे गृह्यते। यथाऽऽत्मानमात्मना वेत्तीत्यादौ शरीरावच्छिन्नं कर्तृ, अन्तःकरणावच्छिन्नं करणं, निरवच्छिन्नं निरीहं कर्म, एकस्यैव शब्दभेदाद् भेदः, शब्दालिङ्गितस्यैव सर्वत्र भानात्।

नागेशमतम्

नागेशास्तु कौण्डाभिमते विश्लेषहेतुक्रियानाश्रयत्वे सति, विश्लेषाश्रयत्वरूपेऽपादानत्वे भाष्यविरोधमुपवर्णयन्ति। तथा हि—धावतः पतित इत्यादौ ध्रुवत्वाभावादपादानत्वं न स्यादित्याशङ्कितं भाष्ये।[3] इत्थमाशङ्क्य च 'न वाऽध्रौव्यस्याविवक्षितत्वादित्येव।[4] कथं पुनः सतो नामाविवक्षा स्यात्? सतोऽप्यविवक्षा भवतीति' समाहितं तत्रैव भाष्ये। एवञ्चात्राश्वे विश्लेषहेतुमद्धात्वर्थ-

१. महाभाष्यप्रदीपः, १/२/६४, पृ. ८२।
२. वाक्यपदीयम्, काण्डः १, कारिका-१२४।
३. परमलघुमञ्जूषा, कारकविचारः, पृ. १०२।
४. ये त्वेतेऽत्यन्तगतियुक्तास्तत्र कथं धावतः पतितस्त्वरमाणात्पतित इति। (म.भा. १/३/२४, पृ. २४९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियानाश्रयत्वेनाध्रुवत्वस्यासत्त्वाद् 'अध्रौव्यस्याविवक्षा स्यात्, सतोऽप्यविवक्षा भवति' इति भाष्याद् विरोधः स्पष्ट एव कौण्डभट्टमते। तस्माद् गतिविशेषे सति यद् ध्रुवमवधित्वेन विवक्षितत्वे सति तदतिरिक्तस्यावधित्वोपयोगिव्यापारस्यानाश्रयं तदपादानमिति ध्रुवमपायेऽपादानमिति सूत्रस्यार्थं वर्णयन्ति। तथा चोक्तम्—यस्मादपाये[1] गतिविशेषे सति यद्ध्रुवमवधिभावोपगमाश्रयत्वे सति तदतिरिक्तस्यावधित्वोपयोगिव्यापारस्यानाश्रयं तदपादानमिति सूत्रार्थः। एवञ्चास्मिन् मते न भाष्यविरोधः। त्रस्तात् पतितः, धावतः पतित इत्यादौ त्रासादीनामवधित्वोपयोगित्वमस्तीति स्वीकृत्य प्रश्नः, उत्तरस्य तु न तेषामवधित्वोपयोगित्वमित्याशयात्। तथा चोक्तम् उद्द्योते—त्रासादीनामवधित्वोपयोगितां मन्यमानस्य प्रश्नः, उत्तराशयस्तु न तदवधित्वोपयोगि, अश्वात् पतितः, वृक्षात् पतित इत्यादावभावात्।

कौण्डभट्टाभिमतेऽपादानत्वे भाष्यविरोधमुपपाद्येदृशं व्याख्यानं कुर्वता नागेशेन परमलघुमञ्जूषायामित्थमपादानत्वस्य स्वरूपं प्रत्यपादि—'तत्तत्कर्तृसमवेत[2]-तत्तत्क्रियाजन्यप्रकृतधात्ववाच्यविभागाश्रयत्वमपादानत्वं, तदेवावधित्वम्' इति।

अत्रेदं विचारणीयम्—एतादृशापादानत्वस्वीकार उक्तभाष्यविरोधोऽस्ति न वेति? तत्र भाष्यविरोध एव प्रतीयते। धावतः पतितः चैत्र इत्यादौ चैत्रसमवेतपतधात्वर्थक्रियाजन्यप्रकृतधात्ववाच्यविभागस्य धावत्यश्वेऽपि विद्यमानत्वेन ध्रुवत्वाभावादपादानत्वाभाव इति शङ्कापरं भाष्यं, तत्समाधानपरञ्च भाष्यं विरुध्यत एव। तादृशावधित्वं[3] गतिमत्यश्वे स्वयमेव स्वीकृतं नागेशेनैव। तथा हि[4] पर्वतात्पततोऽश्वात् पतत्यश्ववाह इत्यादावश्वस्यापादानत्वाय तत्स्वीकारात्। एवञ्च नागेशस्यैव लघुशब्देन्दुशेखरे भिन्नं, परमलघुमञ्जूषायाञ्च भिन्नमेव मतं दृश्यते।

अन्योऽपि विरोधो दृश्यते द्वयोर्ग्रन्थयोः प्रतिपादिते सिद्धान्ते। तथा हि—प्रकृतधात्वर्थविभागाश्रयत्वापादानत्वशक्तेश्च सामानाधिकरण्यादपादानसमभिव्याहारे विभागोऽपि धात्वर्थः प्रतिपादितो लघुशब्देन्दुशेखरे। एवञ्च वृक्षाद् भूमिं पततीत्यादौ वृक्षापादानकविभागपूर्वकभूमिनिष्ठसंयोगानुकूलो व्यापार इति बोधो भवति। तथा चोक्तम्—'अपादानत्वशक्तिश्च[5] प्रकृतधात्वर्थविभागाश्रयत्वसमानाधिकरणेत्यपादानसमभिव्याहारे विभागोऽपि धात्वर्थ इति बोद्धयम्' इति।

---

१. महाभाष्योद्द्योतः, १/४/२४, पृ. २४८।
२. परमलघुमञ्जूषा, कारकविचारः, पृ. १०२।
३. परमलघुमञ्जूषा, कारकविचारः, पृ. ९, १०३।
४. ल.श.शे., कारकप्रकरणम्, पृ. ४०७।
५. महाभाष्योद्द्योतः, १।४।२४, पृ. २४७।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रेदं विचारणीयम्—यदि विभागस्यापि धात्वर्थत्वं स्वीक्रियते, तदा परमलघुमञ्जूषायां प्रतिपादितमपादानत्वं वृक्षात् पर्णं पततीत्यादौ वृक्षस्य न स्यात्, तस्य प्रकृतधातुवाच्यविभागाश्रयत्वात्। यथा वृक्षं त्यजतीत्यत्र प्रकृतधातुवाच्यविभागाश्रयत्वाद् वृक्षस्यापादानसंज्ञा न भवति, तद्वत्।

एवञ्चात्र विविधेषु ग्रन्थेषु प्राच्यनव्यैः प्रतिपादितानां सिद्धान्तानां समालोचने विश्लेषजनकक्रियायामवधित्वेन विवक्षितत्वे सति तदन्यस्यावधित्वोपयोगिव्यापारस्यानाश्रयत्वमेव ध्रुवत्वं ध्रुवमपायेऽपादानमिति सूत्रे सिद्धान्तभूतमिति मे मतिः।

अपायस्त्वत्र विभागजसंयोगानुकूलोऽवधिसाकाङ्क्षो गतिविशेष इति प्रतिपादितमुद्द्योते[१]। एवञ्च यदा गतावधेरुल्लेखो भविष्यति, तदैव तत्रापायो स्वीक्रियते, नान्यथा। तथा चोक्तं कैयटेन—सति ह्यवधौ[२] गतिरपायो भवति, नान्यथा, गतिविशेषत्वादपायस्य इति। तस्मात् पर्णस्य पतनक्रियायां यदि वृक्षस्यावधित्वेन विवक्षा भवति, तदैव तस्यापादानसंज्ञा वृक्षात् पर्णं पततीत्यत्र। यदा तु वृक्षस्यावधित्वं न विवक्ष्यते, तत्र पर्णसम्बन्धविवक्षायां वृक्षस्य पर्णं पततीत्यत्र सम्बन्धसामान्ये षष्ठ्येव। प्रतिपादितञ्चैतद् भर्तृहरिणा—

गतिर्विना त्ववधिना[३] नापाय इति गम्यते।
वृक्षस्य पर्णं पततीत्येव भाष्ये निदर्शितम्।।

अपायस्याविवक्षितत्वात्। नात्रापायो विवक्षितः। किं तर्हि? सम्बन्ध इति।

माधवाचार्येणाप्युक्तम्—वृक्षस्य पर्णं पततीत्यत्र तु सन्नप्यपायो न विवक्षित इति षष्ठी।

एवञ्चावधौ सत्यामेवापायो भविष्यति[४], न तु विश्लेषक्रियाकथनमात्रेण। तत्र यद्यप्यपायेन सह ध्रुवत्वेनावश्यमेव भाव्यम्, तथापि ध्रुवपदार्थस्यावश्यमेव कृतोल्लेखोऽपादानसंज्ञायां प्रयोजकः। अत एव 'ध्रुवमपायेऽपादानम्'[५] इति सूत्रे पाणिनिनोभयोर्निर्देशः कृतः, अन्यथा त्वपायनिर्देशेनैव ध्रुवस्य प्रतीतौ तन्निर्देशोऽसङ्गत एव स्यात्।

---

१. महाभाष्यप्रदीपः, १।४।२३, पृ. २४१।
२. वाक्यपदीयम्, तृतीयकाण्डे साधनसमुद्देशः, कारिका-१४३।
३. महाभाष्यम्-१।४।२३, पृ. २४१।
४. माधवविवरणटीका (सारस्वतम्), पृ. १५४।
५. पा.सू. १।४।२४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपादानं चेदं न केवलं वास्तविकमपि तु बुद्धिकृतकाल्पनिकमपि भवति। यथा वृक्षात् पर्णं पततीत्यत्र वास्तविकमपादानं, तथैवाधर्माद् विरमतीत्यत्र बुद्धिकृतकाल्पनिकम्। बौद्धापादानं स्वीकृत्यैव 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्' इति वार्तिकं प्रत्याख्यातं भाष्ये। तथा हि अपादानसंज्ञाप्रतिपादके सूत्रे भाष्ये जुगुप्सेति वार्तिकस्य प्रयोजनमभिधायोक्तम्, तत्तर्हीदं बहु वक्तव्यम्? न वक्तव्यम्। इह तावद् अधर्माज्जुगुप्सते, अधर्माद् वीभत्सते इति। य एष मनुष्यः प्रेक्षापूर्वकारी भवति, स पश्यति, दुःखोऽधर्मो नानेन कृत्यमस्तीति। स बुद्ध्या सम्प्राप्य निवर्तते। तत्र ध्रुवमपायेऽपादानमित्येव सिद्धम्। इह धर्माद् विरमति, धर्मान्निवर्तत इति। धर्मात् प्रमाद्यति, धर्मान्मुह्यतीति। इह य एष मनुष्यः सम्भिन्नबुद्धिर्भवति स पश्यति नेदं किञ्चिद् धर्मो नाम, नैनं करिष्यामीति स बुद्ध्या सम्प्राप्य निवर्तते। तत्र ध्रुवमपायेऽपादानमित्येव सिद्धम्। अयम्भावः—अधर्माद् विरमति, अधर्माज्जुगुप्सते इत्यादौ विरामादिक्रियां प्रत्यधर्मस्यापि ध्रुवत्वेनापादानसंज्ञा। तत्तु बौद्धमेव, न तु वास्तविकम्। प्रेक्षापूर्वकारी मनुष्योऽधर्मः कष्टदायक इति कृत्वाऽधर्मान्निवर्तते। अतस्तत्रापि मनुष्यस्य बुद्धिकृतो विश्लेषो भवत्येव। अतस्तस्यापि युज्यतेऽपादानत्वम्। तथा चोक्तं कैयटेन—'स्वरितेनाधिकारः, इत्यधिकः कारोऽधिकार इत्यस्यार्थस्याश्रयणेन च बुद्धिव्यवस्थितापायाश्रयापादानं संज्ञा प्रवर्तते'[२]।

बुद्धिपरिकल्पितापायस्य सत्ता माधवाचार्येणापि स्वीकृताऽस्ति। तथा चोक्तं तेन—'चौराद्बिभेति[३], भीत्या निवर्तते, चौरात् त्रायते चौरकृताद् वधादेस्त्राणेन निवर्तयतीति भयादिपूर्विकायां निवृत्तौ भयादीनां प्रवृत्तौ सर्वत्रात्र बुद्धिपरिकल्पितो विश्लेषोऽस्तीति विश्लेषावधावेव पञ्चमी सिद्धेति न तदर्थं यत्नान्तरं कृतं सूत्रकृता। एवं पापात् पराजयते इत्यादावपि पराजेर्न्यूनाभावे पूर्वनिवृत्तौ वृत्तिविश्लेषो बोद्धव्यः।

एवमेव बुद्धिपरिकल्पितापायं स्वीकृत्य 'ल्यब्लोपे कर्मण्यधिकरणे च' इति वार्तिकस्यापि खण्डनं कृतं भाष्यकृता। तत्र ल्यब्लोप इति वार्तिकस्य प्रयोजनमुक्त्वा समाहितम्—'न वक्तव्यम्[४]। अपादाने इत्येव सिद्धम्। इह तावत्प्रासादात्प्रेक्षते, शयनात्प्रेक्षते इति, अपक्रामति तत्तस्यादर्शनम्। यद्यपक्रामति किं नात्यन्तायापक्रामति? सन्तत्वात्। अथवान्यान्यप्रादुर्भावात्। अन्या चान्या च प्रादुर्भवतीति।

---

१. महाभाष्यम्-१।४।२४, पृ. २४८।
२. महाभाष्यप्रदीपः-१।४।२४, पृ. २४८।
३. माधवविवरणटीका, पृ. १५४।
४. महाभाष्यम्-२।३।२८, पृ. ५०५।

CC-0. In Public Domain. Gurukul Kangri C...

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयम्भाव:—प्रेक्षणक्रियायामपि दर्शनक्रियास्थानात् स्थानान्तरं गच्छति। अतोऽपायस्तत्र सुतरां सिद्ध्यति। तस्यापायस्य च प्रासादादीनामवधित्वविवक्षणाद् ध्रुवमपायेऽपादानमिति सूत्रेणैवापादानसंज्ञा सिद्धा, तदर्थं वार्तिकं न कर्तव्यमिति भाष्याशय:। एवञ्च बौद्धापादानं स्वीकृत्य भाष्ये वार्तिकाणां प्रत्याख्यानदर्शनात् तदवश्यमेव स्वीकार्यम्।

अत एव नागेशेनापि तस्य सत्ता प्रतिपादिताऽस्ति। तथा चोक्तम्—[1]'विभागश्च न वास्तवसम्बन्धपूर्वको वास्तव एव, किन्तु बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धिपरिकल्पितोऽपि। माथुरा: पाटलिपुत्रकेभ्य आढ्यतरा:' इत्यादौ बुद्धिपरिकल्पितापायाश्रयणेनैव भाष्ये पञ्चमीसाधनात्। एवञ्च बौद्धमिदमपादानं सर्वैरेव स्वीकृतम्।

कौण्डभट्टैरपि 'रूपं रसात् पृथक्' इत्यत्रापादानत्वं बौद्धमेव स्वीकृतम्। अभिहितञ्च तै:—रूपं रसाद्[2] इत्यत्र तु बुद्धिपरिकल्पितमपादानत्वं द्रष्टव्यम्, पृथग्विनेति पञ्चमी वा। यद्यपि पृथग्विनेति पक्षान्तरोपन्यासेन बुद्धिपरिकल्पने गौरवमिति तेषामाशयो वर्णित: प्रभाकृता तत्रैव, किन्तु तन्न युक्तम्, बौद्धापादानस्य भाष्यसम्मतत्वात्। तत्र गौरवमिति नाशयो कौण्डभट्टस्यापि तु पक्षान्तरोपन्यास:, उपायस्योपायान्तरादूषकत्वादिति बुद्ध्यैवेति मे मति:।

मीमांसकमतम्

मीमांसकास्त्वपादानत्वमखण्डोपाधिरूपमेव स्वीकुर्वन्ति। तत्रैव च पञ्चम्या शक्तिं वर्णयन्ति; किन्तु अवधित्वस्य पञ्चम्यर्थत्वेऽपि न तेषां कश्चन विरोध:। अत एव भाट्टतन्त्ररहस्ये पञ्चम्यर्थनिरूपणप्रसङ्गे विभाग:, परसमवेतत्वञ्च पञ्चम्या: शक्यमिति मतान्तरमुपन्यस्य मीमांसकसिद्धान्तं वर्णयन् खण्डदेव आह—[3]वस्तुतस्तु गुरुभूतशक्यतावच्छेदकभेदेनानेकशक्तिकल्पनापेक्षया प्रकृत्यर्थस्य पञ्चम्यर्थद्वयान्वये व्युत्पत्तिद्वयम्, पञ्चम्यर्थस्य च धात्वर्थद्वयान्वयव्युत्पत्तिद्वयमिति कल्पनापेक्षया चानुगतव्यवहारसाक्षिकतयाऽपादानत्वमखण्डोपाधिरूपमेकं धर्मं निरुक्तापादानत्वसमव्यापकं कल्पयित्वा, तत्रैव पञ्चम्या: शक्तिं कल्पयित्वा तस्मिंश्च प्रकृत्यर्थान्वयायैकाम्, तस्य चाख्यातार्थान्वयायैकां व्युत्पत्तिं कल्पयितुमुचितमिति।

---

१. परमलघुमञ्जूषा, कारकविचार:, पृ. १०२।

२. वै.भू.सा., सुबर्थनिर्णय:, पृ. २११-२१२।

३. भाट्टतन्त्ररहस्यम्, पृ. १२९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्रे चावधित्वस्य पञ्चम्यर्थे स्वविरोधाभावं प्रकटयतोक्तं खण्डदेवेन सर्वेष्वपि पूर्वोक्तेषु अवधित्वमेव पञ्चम्यर्थः। तस्य च क्वचिद् धात्वर्थजन्य-विभागद्वारकोऽन्वयः, क्वचिद् धात्वर्थद्वारक इत्यपि वा सुवचम्।

एवञ्चावधित्वमेव पञ्चम्यर्थः। तत्तु अपाये सत्येव। अपायस्तु वास्तविकः, बुद्धिपरिकल्पितश्चेति सिद्धान्तः।

अपादानभेदः

अपादानस्य द्वौ भेदौ, सक्रियं निष्क्रियञ्चेति पूर्वमेव प्रतिपादितम्, 'चलं वा यदि वाचलम्' इति हर्युक्तेः। कारकोल्लासेऽपि भेदाविमौ सोदाहरणं वर्णितौ। तथा हि—

पर्वतादवतीर्णोऽसौ धावतोऽश्वात् पतत्यसौ।

कौण्डभट्टैस्तु अपादानस्य त्रैविध्यं स्वीकृतम्—निर्दिष्टविषयम्, उपात्तविषयम्, अपेक्षितक्रियञ्चेति।

निर्दिष्टविषयम्—यत्र निरूपकोऽर्थः साक्षाद् धातुना निर्दिश्यते, तत् निर्दिष्टविषयमपादानम्। यथा अश्वात् पतति। अत्राऽपादानत्वस्य निरूपिका विभाजनकपतनक्रिया साक्षात् पतति इत्यनेन निर्देश्यते, अत इदं निर्दिष्टविषयम्।

उपात्तविषयम्—यत्र धातुना धात्वन्तरार्थगर्भितोऽर्थ उपस्थाप्यते, तत्रोपात्तविषयमपादानम्। यथा—वलाहकाद् विद्योतते। अत्र निस्सरणाङ्गं विद्योतनं द्युतिधात्वर्थः।

अपेक्षितक्रियम्—यत्र धातोरप्रयुक्तत्वेन कारकत्वप्रयोजिका गमनादि-क्रियाऽपेक्ष्यते तदपेक्षितक्रियमपादानम्। यथा कुतो भवान्, पाटलिपुत्रात्। अत्र उभयोर्वाक्ययोरागमनादिक्रियाऽध्याहृत्यैवान्वेति, न तु धातोः प्रतीयते। एवञ्चैतत् सर्वं प्रतिपादयता कौण्डभट्टेनाऽपि भणितम्—यत्र साक्षाद् धातुना गतिर्निर्दिश्यते, तन्निर्दिष्टविषयम्। यथा—अश्वात् पतति। यत्र धात्वन्तरार्थाङ्गं स्वार्थं धातुराह, तदुपात्तविषयम्। यथा—बलाहकाद् विद्योतते। अत्र निःसरणाङ्गे विद्योतने

---

१. भाट्टतन्त्ररहस्ये, पृ. १३०।
२. कारकोल्लासः, श्लो. ७६।
३. वै.भू.सा. सुबर्थनिर्णयः, पृ. २१२।
४. वाक्यपदीयम्, तृतीयकाण्डः, साधनसमुद्देशः, कारिका-१३६।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्युतिर्वर्तते। अपेक्षिता क्रिया यत्र तदन्त्यम्। यथा—कुतो भवान्, पाटलिपुत्रात्। अत्रागमनमर्थमध्याहृत्यान्वयः कार्यः। भेदत्रयमिदं भर्तृहरिणाऽपि स्वीकृतम् —

निर्दिष्टविषयं किञ्चिद् उपात्तविषयं तथा।
अपेक्षितक्रियञ्चेति त्रिधापादानमुच्यते[1]॥

भेदत्रयेऽस्मिन् स्वाभिमतं मतं प्रकटयता दण्डनाथेनाऽपि स्पष्टतरं सोदाहरणं व्याख्यातं भेदत्रयमिदम्। तथा चोक्तम्—यत्र धातुनाऽपायलक्षणो विषयो निर्दिष्टस्तत् निर्दिष्टविषयम्, यथा—पर्वतादवरोहति। यत्र तु धातुर्धात्वन्तरार्थाङ्गं स्वार्थमाह तदुपात्तविषयम्, यथा—कुसूलात् पचति। अत्राऽऽदानाङ्गे पाके पचिर्वर्तते। यत्र क्रियावाचि पदं न श्रूयते, केवलं प्रतीयते, तदपेक्षितक्रियम्, यथा—सांकाश्यकेभ्यः पाटलिपुत्रका अभिन्नरूपतरा इति।

एवञ्चापादानभेदविषये तद्भेदस्वरूपविषये च प्रायो मतैक्यमेवाचार्याणाम्।

सम्प्रदानापादानयोः कारकत्वाकारकत्वविचारः

सम्प्रदानापादानयोरकारकत्ववादिन इत्थमुद्घोषयन्ति यत् सम्प्रदानापादानयोः कृधातुघटितत्वाभावात् कारकत्वं नास्ति। यथा कर्तृकर्मकरणाधिकरणानि कृधातुघटितानि, तथा नेमाविति हेतोस्तयोर्न कारकत्वम्। तथा चोक्तं रामाज्ञापाण्डेयैः—'अपि च यथा कर्तृकर्मकरणाधिकरणेषु कृधातुरनुस्यूतोऽस्ति, नहि तथा सम्प्रदानापादानशब्दयोः। एतेनापि न तयोः कारकत्वं युक्तियुक्तम्'[2] इति।

अपि च यथा कर्मकरणाधिकरणानां स्वस्वव्यापारे स्वातन्त्र्यविवक्षया कर्तृत्वं भवति, ओदनः पच्यते, असिः छिनत्ति, स्थाली पचति इत्यादौ, न तथा सम्प्रदानापादानयोः। वस्तुतः सर्वेषां कारकाणां येन केनापि रूपेण स्व-स्वव्यापारे स्वातन्त्र्यविवक्षायां कर्तृत्वं भवति, किन्तु सम्प्रदानापादानयोर्न कदापि स्वातन्त्र्यविवक्षा लोके दृश्यते। अतो रामाय ददाति इत्यत्र रामो ददाति इति न प्रयोगः, न वा वृक्षः पतति इति प्रयोगः। सम्प्रदानापादानयोः स्वातन्त्र्येण विवक्षाभावो हेलाराजेनाऽपि प्रतिपादितः[3]। तथा चोक्तम्—सम्प्रदानापादानयोः स्वस्वव्यापारे स्वातन्त्र्यविवक्षा नास्ति, द्वितीयस्य दातुरपगन्तुश्चापेक्षणात्[4]।

---

१. सरस्वतीकण्ठाभरणवृत्तिः, १।१।६५।
२. व्याकरणदर्शनभूमिका, पृ. २०९।
३. हेलाराजटीका (वाक्यपदीयम्), साधनसमुद्देशः, कारि. १८।
४. व्याकरणदर्शनभूमिका, पृ. २०८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतः स्वस्वव्यापारे स्वातन्त्र्येण विवक्षाभावान्न तयोः कारकत्वमिति प्रतिपादितम्। तथा हि—'यत् कारकं भवति, तदवश्यमेव कर्ता भवेत्। यथा कर्मकरणाधिकरणानि अविवक्षया ओदनः स्वयमेव पच्यते, असिः च्छिनत्ति, स्थाली पचतीत्यादौ कर्तृत्वं भजन्ते, नैव सम्प्रदानापादाने क्वचिदपि अविवक्षया रामो ददाति, पर्वतः पततीत्यादिरूपेण कर्तृत्वमासादयत इति। एवञ्च सम्प्रदानापादानयोः कारकत्वं न सम्भवतीति महता समारम्भेण खण्डितं तयोः कारकत्वं रामाज्ञापाण्डेयमहोदयैः।

अत्रोच्यतेऽस्माभिः—रामाज्ञापाण्डेयमहोदयैः सम्प्रदानापादानयोः कारकत्वाभावाय या युक्तयः प्रदर्शितास्ताः सर्वा अविचारितरमणीया एव प्रतिभान्ति। यतो हि न हि कृधातुघटितत्वं कारकत्वं, न वा कदाचित् स्वातन्त्र्येण विवक्षितत्वं वा कारकत्वं कैश्चिदपि स्वीकृतं व्याकरणनिकाये, दर्शनान्तरेषु वा। अपि तु क्रियान्वयित्वं, क्रियाजनकत्वं चेति पक्षद्वयमेवोपलभ्यते कारकत्वस्वरूपविषये, इति नाविदितं विदितवेदितव्यानाम्। तत्र करोतीति कारकम् इति भाष्यानुरोधात् क्रियाजनकत्वमेव कारकत्वमिति नव्यवैयाकरणानां सम्मतिः।

एवञ्च सम्प्रदानापादानयोः क्रियाजनकत्वं सर्वैरेव स्वीकृतम्। तथा चोक्तं नागेशेन—'सम्प्रदानादीनामपि स्वज्ञानद्वारा जनकत्वं बोध्यम्'। एवञ्च कैयटेनापि सम्प्रदानापादानयोः कारकत्वं स्वीकृतम्—'वस्तुतस्त्वपादानस्यावधित्वभावेनावस्थानं व्यापारोऽस्ति, सम्प्रदानस्यापि अनुमननादिलक्षणं प्रतीयमानोऽपि व्यापारः कारकव्यपदेशनिबन्धनम्। यथा प्रविश पिण्डीमिति'[१]।

किञ्च सम्प्रदानापादानसंज्ञाविधायके सूत्रद्वयेऽपि कारके इत्यधिकारात् कारकमिति सम्बध्यते। अतो दानक्रिया कर्मणाऽभीप्सितं कारकसंज्ञं सम्प्रदानसंज्ञं च भवति, एवमेव विश्लेषहेतुक्रियायां ध्रुवत्वेन विवक्षितं यत्, तत् कारकसंज्ञमपादानसंज्ञं च भवतीति सम्प्रदानापादानसंज्ञाविधायकस्य सूत्रद्वयस्य सर्वसम्मतार्थत्वाद् यत् सम्प्रदानमपादानञ्च भवति, तत् कारकमवश्यमेव भवति।

अत एवैकसंज्ञाधिकाराद् एकस्मिन् कारकापादानसंज्ञयोः समावेशो न भवतीत्याशङ्क्य योगविभागेन समाहितं कैयटेन। तथा चोक्तम्—'नैष दोषः'[२]। ध्रुवमपाय इति योगविभागेन कारकसंज्ञा क्रियते, ततोऽपादानमित्यत्र

१. महाभाष्यप्रदीपः, १।४।२३, पृ. २४४।
२. महाभाष्यप्रदीपः, १।४।२३, पृ. २४०।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारकग्रहणमनुवर्तते ध्रुवमपाय इति च, तेन कारकं सदपादानसंज्ञकमित्येवं समावेशः सिद्धयति। एवञ्चानेन कैयटव्याख्यानेन सम्प्रदानापादानत्वं कारकत्वव्याप्यमेव। अतस्तयोः कारकत्वाभाववादिनां मतं भाष्यासम्मतत्वाद् उपेक्ष्यमेवेति मे मतिः।

अत्रेत्थमाशङ्क्यते यद् यदि सम्प्रदानादीनां कारकत्वं सम्भवति, तर्हि सम्बन्धस्यापि कारकत्वं स्यादिति कैश्चित्, तस्य समाधानं कुर्वता जगदीशतर्कालङ्कारेणोक्तम्—'षष्ठ्यर्थस्तु सम्बन्धो न धात्वर्थे प्रकारीभूय भासते, तण्डुलस्य पचतीत्याद्यप्रयोगात्, अतः सम्बन्धो न कारकम्'[१] इति।

षष्ठ्या कारकत्वाभावो नागेशेनापि प्रतिपादितः। ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ ब्राह्मणस्य न कारकत्वं, पुत्रेणान्यथासिद्धया तत्त्वाभावात्[२]। तस्मात् षष्ठ्या कारकत्वाभाव एव सर्वसम्मत इति।

❖

१. शब्दशक्तिप्रकाशिका, श्लोकः ६७।
२. ल.श.शे. कारकप्रकरणम्, पृ. ४३४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियाविशेषणविमर्शः

डॉ. हरिवंशकुमारपाण्डेयः
ईक्ष्यशोधकः, प्रकाशन-संस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी

❋❋❋

अथेयं प्रस्तूयते क्रियाविशेषणवाचकपदविषये विचारणा काचन साम्प्रतम्। सर्वत्र हि शास्त्रेषु क्रियाविशेषणवाचकपदानां द्वितीयान्तत्वं क्लीबत्वञ्च परिदृश्येते। त इमे क्रियाविशेषणवाचकपदानां द्वितीयान्तताक्लीबते केन व्याकरणानुशासनेन कथं वा सम्पद्येते? केन वा सम्बन्धेन क्रियाविशेषणस्य क्रियायामन्वयश्चेत्यादि-विषयाणां विविदिषा प्रायो भूयसामेव विपश्चित्प्रवराणां मनांसि समाकुलीकरोतीति तद्विषयिणी काचिन्मीमांसा मन्ये न निष्प्रयोजनतां समालम्बेत। क्रियाविशेषण-वाचकपदानां क्लीबत्वे क्रियाविशेषणस्याभेदसम्बन्धेन क्रियायामन्वये च यद्यपि नास्ति तादृशं मतविभिन्नत्वं मिथः शास्त्रकाराणां तथापि द्वितीयान्तत्वविषये तेषां परस्परं विवदन्ते भृशं ग्रन्थकृतः।

तथा हि क्रियाविशेषणवाचकपदे कर्मण्येव द्वितीया भवतीति कैश्चन प्रतिपाद्यते, मुख्यकर्मत्वस्य तत्राभावेऽपि आतिदेशिकस्य तस्य तत्र स्वीकारे बाधाभावात्। तथा च 'कर्मणि द्वितीया'[1] इत्यनेन सूत्रेण तत्र द्वितीयाप्राप्तौ न किञ्चनापि समुदेति प्रतिबन्धकमिति। अपरैस्तु समभिधीयते यदत्र या द्वितीया-विभक्तिर्न सा कारकविभक्तिः, किन्तूपपदविभक्तिरेव। आतिदेशिककर्मत्वस्य स्वीकारापेक्षया आतिदेशिक्या द्वितीयाया एव तत्र स्वीकारे लाघवादिति। अन्यैः पुनरत्र द्वितीयान्तत्वमेव नाङ्गीक्रियते, किन्तु **'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'**[2] इत्यनेन प्रथमान्ततैव युक्तेति प्रणिगद्यते।

परे पुनरत्र प्रतिपादयन्ति यत् क्रियाविशेषणानां मुख्यमेव कर्मत्वम्, न त्वातिदेशिकम्, ततश्च मुख्य एव कर्मणि तत्र तण्डुलं पचतीतिवत् **'कर्मणि**

१. पा.सू. २।३।२; २. तदेव-२।३।४६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीया' इति पाणिनीयानुशासनेन द्वितीयेति। एतेषु चतुर्षु मतेषु प्रथमं मतं परिपुष्णन्ति व्युत्पत्तिवादप्रणेतारो नव्यनैय्यायिकमूर्द्धन्यमणयो गदाधर-भट्टाचार्यास्तदनुयायिनश्च। द्वितीयं सिद्धान्तं समर्थयन्ते शब्दशक्तिप्रकाशिकाकार-जगदीशतर्कालङ्कारप्रमुखा नैय्यायिकशिरोमणयो नव्यमीमांसकधुरन्धरा भाट्टरहस्यादि-प्रणेतृखण्डदेवादयश्च। तृतीयो राद्धान्तस्तु वरीवृत्यते नवीनशाब्दिकचक्रचूडामणेः श्रीनागेशभट्टस्य। चतुर्थञ्च मतं विराजते महाभाष्यकारादीनां सर्वेषां वैय्याकरण-तल्लजानाम्। एषु च मतेषु कतमन्मतं युक्ततममिति विधीयमानायां विवेचनायां महाभाष्यकारादीनां वैय्याकरणानामेव मतं लाघवात् सर्वश्रेष्ठमिति सुनिर्भरं वक्तुं शक्यते। पदविषये च पदशास्त्रपारावारपारीणानामेव दर्शनस्य युज्येत ग्राह्यत्वं न वाक्यविदां मीमांसकानां न वा प्रमाणज्ञानां नैय्यायिकानामिति निबन्धेऽस्मिन् पूर्वं नैय्यायिकमीमांसकादीनां मतानि यथाशास्त्रं पूर्वपक्षरूपेणोपदर्श्य शाब्दिक-शिरोमणीनामेव मतस्य परमरमणीयता प्रतिपादयिष्यतेऽस्माभिः।

तत्र तावदियं पुरः प्रस्फुरति विप्रतिपत्तिः—'ननु मृदुमोदनं पचति, स्तोकमोदनं पचतीत्यादौ, अथवा कटोऽपि कर्म, भीष्मादयोऽपि, तत्र कर्मणीत्येव सिद्धम्, अथवा कट एव कर्म तत्सामानाधिकरण्याद् भीष्मादिभ्यो द्वितीया भविष्यती'त्यनभिहितसूत्रस्थभाष्यरीत्या कर्मकारकविशेषणमृदुस्तोकादिभ्यो द्वितीयोपपत्तावपि मृदु पचति स्तोकं पचतीत्यादिक्रियाविशेषणस्थले मृदुस्तोकादीनां क्रियाविशेषणत्वेन क्रियायामभेदसम्बन्धेन अन्वयस्य स्वीकारेऽपि तद्वाचकपदेभ्यो द्वितीयोत्पत्तौ प्रमाणविरहः, तादृशार्थप्रतिपादकस्य सूत्रस्य क्वाप्यनुपलम्भात्। न च तत्र साधुत्वार्थमेव द्वितीयोररीकरणीयेति वाच्यम्, चतुर्थ्यादीनामपि तत्रातिप्रसङ्गात्, प्रथमाया अतिक्रमणे हेतुविरहेण प्रथमाया एवातिप्रसक्तेश्च।

न च 'कर्मणि द्वितीया'[1] इति सूत्रेण तत्र द्वितीयेति वक्तव्यम्, धात्वर्थतावच्छेदकफलशालित्वरूपकर्मत्वस्य तत्र स्तोकादौ बाधात्। किञ्चैवं सुखमोदनं पचतीत्यादौ द्विकर्मकतापत्तिः 'सुखं स्वपिति, सुखमास्ते' इत्यादावकर्मकाणां स्वप्यादीनां कर्मत्वस्यानुक्तिसहत्वम्, सुखादेः कर्मतास्वीकारे सुखमोदनः पच्यते स्तोकमोदनः पच्यत इत्यादौ सुखमिति द्वितीयानापत्तिः सुखमोदनस्य पक्ता इत्यादौ कृद्योग ओदनस्येव सुखस्येति षष्ठ्यापत्तिः, सुखमिति द्वितीयानापत्तिश्चेति शतं दोषाः स्युः। तस्मात् क्रियाविशेषणस्थले स्तोकं पचतीत्यादौ द्वितीया सर्वथा कूर्मक्षीरायितेत्यगत्या सर्वैरपि प्रतिपत्तव्यमिति।

---

१. पा.सू. २।३।२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रैवं समाधीयते व्युत्पत्तिवादकृद्भिर्गदाधरभट्टाचार्यैर्गूढार्थतत्त्वालोकादितद्व्याख्याकारैश्च—यद्यपि स्तोकादिषु धात्वर्थतावच्छेदकफलशालित्वरूपं मुख्यं कर्मत्वं नास्ति, ततश्च 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया तत्र दुःसम्पादा, तथापि 'क्रियाविशेषणानां कर्मत्वम्' इत्यनुशासनबलादतिदिष्टं कर्मत्वमादाय 'कर्मणि द्वितीया'[१] इति सूत्रेण द्वितीयायाः सम्प्रवृत्तौ न किमपि बाधकम्। तथा चोक्तं व्युत्पत्तिवादे प्रथमाविभक्तिप्रकरणे गदाधरभट्टाचार्यैः—'क्रियाविशेषणानां कर्मत्वमित्यनुशासनेन तत्र कर्मत्वातिदेशात्' इति। न च तादात्म्यफलतावच्छेदकान्यतरसम्बन्धेन धात्वर्थतावच्छेदकफलशालित्वमेवास्तां कर्मत्वम्, तच्च विद्यते स्तोकादिष्वपीति मुख्यकर्मत्वस्यैवोपपत्तौ विफलोऽपूर्वस्यातिदेशवचनस्य स्वीकारस्तत्रभवतामिति समाशङ्कनीयम्, गौरवात्, स्तोकं तिष्ठतीत्यादौ धात्वर्थतावच्छेदकफलस्यैवासत्त्वेन दोषप्रसराच्च।

ननु स्तोकं तिष्ठतीत्यादौ न कोऽपि दोषः, फलस्यापि धात्वर्थत्वोपगमेन तत्र धात्वर्थतावच्छेदकफलस्य सत्त्वाद् द्वितीयोपपत्तौ बाधाभावात्। न च फलस्यापि धात्वर्थत्वस्वीकारेऽकर्मकाणां तिष्ठतीत्यादीनामपि धातूनां सकर्मकत्वापत्तिः स्वार्थफलजनकव्यापारवाचकत्वस्यैव सकर्मकत्वादिति वाच्यम्, स्वार्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्, स्वार्थफलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वमिति सकर्मकत्वाकर्मकत्वयोः फलवैयधिकरण्यफलसामानाधिकरण्याभ्यां निर्वचनेन कस्याश्चनापि क्षतेरभावादिति चेत्, अत्रोच्यते—स्तोकं पचतीत्यादौ स्तोकादौ तण्डुलं पचतीत्यादौ तण्डुलादाविव मुख्यकर्मत्वस्याङ्गीकारे तत्रापि कर्मणि लकारापत्त्या 'तण्डुलः पच्यते' इत्यादिप्रयोगाणामिव 'स्तोकं पच्यते' इत्यादिप्रयोगाणामपि साधुत्वं समापद्येत, न च तत्कस्यापीष्टम्, तथा च तादृशप्रयोगाणां तत्र साधुत्वनिवारणाय स्तोकं पचतीत्यादौ स्तोकादीनां मुख्यकर्मत्वं न कथञ्चनापि समभ्युपगन्तव्यम्। यद्यपि फलतावच्छेदकसम्बन्धमात्रेण धात्वर्थतावच्छेदकफलाश्रये कर्मणि लकारस्य स्वीकारेण स्तोकादेः फलतावच्छेदकसम्बन्धेन धात्वर्थतावच्छेदकफलशालित्वाभावात् स्तोकः पच्यत इत्यादयो नापद्यन्तेऽनिष्टप्रयोगास्तथापि मन्दं गच्छति द्रुतं गच्छतीत्यादिप्रयोगाणामनुपपत्तिनिरसनाय क्रियाविशेषणानामातिदेशिकमेव कर्मत्वं सम्प्रतिपादनीयं न मुख्यम्। तथा हि मन्दं गच्छतीत्यादौ उत्तरदेशसंयोगात्मकं फलं न सम्भवति मन्दाद्यात्मकम्, अतोऽत्रोक्तसंयोगानुकूलव्यापार एव तादात्म्येन मन्दादेरन्वयः

१. पा.सू. २।३।२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वीकार्यः। एवञ्चात्र मन्दादौ तादात्म्येन धात्वर्थतावच्छेदकफलस्यासत्त्वान्मन्दादिरूपक्रियाविशेषणवाचकपदाद् द्वितीया न कथमपि निष्पद्यते। आतिदेशिककर्मत्वस्य तत्र समाश्रयणे तु नोक्तदोषप्रसक्तेरवकाशोऽपीति सर्वसामञ्जस्येन क्रियाविशेषणानामातिदेशिकमेव कर्मत्वमनुशासनबलेन स्वीकरणीयमिति गदाधरभट्टाचार्यस्तदनुयायिनश्च सम्मन्यन्ते।

एतेषां मतस्य च सूक्ष्मेक्षिकया सम्पाद्यमाने पर्यालोचने सुविस्पष्टमिदं प्रतिभाति यदमीभिः कर्मत्वं गौरवभयेन फलतावच्छेदकसम्बन्धेन धात्वर्थतावच्छेदकफलविशिष्टत्वमेव स्वीक्रियते, न तु तादात्म्यफलतावच्छेदकान्यतरसम्बन्धेन धात्वर्थतावच्छेदकफलविशिष्टत्वम्, तथा च क्रियाविशेषणे न केनापि प्रकारेण मुख्यं कर्मत्वं समाश्रयितुं शक्यते। यदि तु प्रामाणिकं गौरवं न दोषायेति रीत्या गौरवभयं परिहाय मुख्यकर्मत्वस्य तादात्म्यफलतावच्छेदकान्यतरसम्बन्धेन धात्वर्थतावच्छेदकफलशालित्वरूपतैव समादर्तव्या, तथा च तादात्म्यसम्बन्धेन धात्वर्थतावच्छेदकफलशालित्वं क्रियाविशेषणस्यापीति प्रतिपाद्यते, तथापि स्तोकं तिष्ठतीत्यादौ अकर्मकधातुस्थले फलस्यैवाभावेन तादृशमुख्यकर्मत्वाप्रसक्त्या द्वितीयानुपपत्तिः, फलस्यापि धात्वर्थत्वाङ्गीकृतौ तु सकर्मकाकर्मकत्वव्यवहारोच्छेदापत्तिः, व्यापारस्य फलवैयधिकरण्यफलसामानाधिकरण्याभ्यां सकर्मकाकर्मकत्वयोर्निरुक्तौ तु मन्दं गच्छति द्रुतं गच्छतीत्यादावुत्तरदेशसंयोगात्मकफलस्य मन्दाद्यात्मकत्वाभावेन तदनुकूलव्यापार एव मन्दाद्यर्थानामन्वयस्यावश्याभ्युपेयतया तादात्म्यसम्बन्धेनापि मन्दादेर्धात्वर्थतावच्छेदकफलविशिष्टत्वाभावान्मुख्यकर्मत्वस्य कथमप्यप्राप्त्या द्वितीयानुपपत्तिरिति दोषबाहुल्यनिवारणाय आतिदेशिकमेव कर्मत्वं सर्वत्र क्रियाविशेषणस्थले 'क्रियाविशेषणानां कर्मत्व'मिति वचनबलेन स्वीकार्यम्। तच्च वचनं न कुत्रापि व्याकरणे समासाद्यत इति तस्य सिद्धये तादृशवचनस्यापूर्वस्यापि कल्पनं विधातव्यञ्चेति।

तच्चेदं गदाधरभट्टाचार्यादीनां मतं शब्दशक्तिप्रकाशिकाकारजगदीशतर्कालङ्कारप्रभृतयोऽपरे नैय्यायिकप्रवरा भाट्टदीपिकाभाट्टरहस्यादिनिर्मातृखण्डदेवादयो मीमांसकाश्च न सहन्ते। तैरुच्यते यत् क्रियाविशेषणानां मुख्यं कर्मत्वन्तु सुदूरपराहतमेव; किन्त्वातिदेशिकमपि कर्मत्वं तत्र नास्ति। ननु तथा सति कथं तद्वाचकपदानां द्वितीयान्ततेति चेदवहितेन मनसा श्रूयताम्—न केवलं कर्मण्येव द्वितीया भवति; किन्तु कर्मभिन्नस्थलेऽपि सा दृश्यत एव, तथा चात्र 'उभसर्वतसोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।।' इति महाभाष्यश्लोकवार्त्तिकघटकस्य 'ततोऽन्यत्रापि दृश्यते' इत्यंशस्यान्यत्र क्रियाविशेषणस्थले द्वितीया दृश्यत इत्यभिप्रायकस्य बलेन द्वितीया सम्पद्यते।

अत एव पदवाक्यरत्नाकरे गोकुलनाथोपाध्यायाः प्रत्यपीपदन्नुक्त-श्लोकवार्त्तिकघटकस्य 'ततोऽन्यत्रापि दृश्यते' इत्यंशस्य विवरणे—'अन्यत्र स्तोकं पचतीत्यादौ क्रिया-विशेषणस्थले' इति। भाट्टरहस्ये खण्डदेवेनाप्येष एवार्थः समभाणि द्वितीया-विभक्त्यर्थविचारप्रकरणे कथं तर्हि तत्र द्वितीयानियमः? उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।। इत्यनुशासनादिति गृहाण। अत्र ततोऽन्यत्रापि प्रतिपदोक्तादन्यत्र क्रियाविशेषणेऽपीत्यर्थः। अत एव अन्यत्रापि दृश्यत इत्युक्तम्। तदेतदाह "अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि' इत्यग्रिमप्रतिपदोक्तपरतया भाष्यानारूढं व्याख्यानमप्यसङ्गतम्, वैयर्थ्यापत्तेः। तस्मात् सिद्धं क्रियाविशेषणेषु द्वितीयामात्रानुशासनम्'' इति। एवञ्चात्र समुद्धृताभ्यां पदवाक्यरत्नाकर-भाट्टरहस्य-ग्रन्थयोः प्रघट्टकाभ्यां सुस्फुटमिदं समवबुध्यते यत्तद्ग्रन्थप्रणेतारः क्रियाविशेषणवाचकपदे या द्वितीया-विभक्तिर्न तां कारकविभक्तित्वेन स्वीकुर्वते; किन्तूपपदविभक्तित्वेनैव तामुररीकुर्वन्ति।

अत एव शब्दशक्तिप्रकाशिकायां जगदीशतर्कालङ्कारैः कारकविभक्तेर्लक्षणं व्याचक्षाणैः क्रियाविशेषणवाचकपदद्वितीयाव्यावर्तनाय 'धात्वर्थांशे प्रकारो यः सुबर्थः सोऽत्र कारकम्' इति कारकविभक्तिलक्षणे सुबर्थ इति निवेशः संविहितः। तथा हि शब्दशक्तिप्रकाशिकायां कारकप्रकरणे 'कारकार्थेतरार्था च सुब् द्विधा च विभज्यते। धात्वर्थांशे प्रकारो यः सुबर्थः सोऽत्र कारकम्।।' इति कारिकाया व्याख्यानावसरे तर्कालङ्कारैः प्रतिपादयाम्बभूवे—'यादृशेन नामार्थेनावच्छिन्नस्य सुबर्थस्य यादृशधात्वर्थेऽन्वयः स एव तादृशधात्वर्थे कारकतया व्यपदिश्यते, तेन वृक्षात् पततीत्यादौ वृक्षादेरपि पतनादिक्रियायामपादानादिकारकव्यवहारः। स्तोकं पचतीत्यादौ क्रियायां प्रकारीभूतोऽपि स्तोकादिर्न कारकम्, सुपानुपस्थापनात्। द्वितीया तु तत्र क्लीबलिङ्गत्ववदानुशासनिक्येव। स्तोकपाक इत्यादिस्तु तत्पुरुषो गिरिकाण इत्यादिवद् विशेषविधेरेव' इति। एतेन जगदीशमतेऽपि स्तोकं पचतीत्यादौ क्रियाविशेषणवाचकपदाद् द्वितीयायाः कारकविभक्तित्वं नास्ति; किन्तूपपदविभक्तित्वमेवेति नाप्रत्यक्षम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा च तन्मते क्रियाविशेषणानां कर्मत्वं न कयापि रीत्या सम्भवदुक्तिकमिति विस्पष्टं प्रतीयते। कर्मत्वाभावेऽपि च प्रतीयमाना तत्र द्वितीया क्लीबलिङ्गत्ववदानुशासनिक्येव स्वीकर्तव्या। अनुशासनञ्च 'उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।।' इति महाभाष्योद्धृतश्लोकवार्त्तिकप्रमाणबलेन द्वितीयाविषयकमेव कल्पयितव्यं न तु कर्मत्वविषयकं लाघवात्। एवञ्च व्युत्पत्तिवादस्य प्रथमाविभक्तिविचारप्रकरणे गदाधरभट्टाचार्यैरुक्तं 'क्रियाविशेषणानां कर्मत्वम्' इत्यनुशासनं नातीव समञ्जसम्, गौरवात् प्रमाणशून्यत्वाच्च। अथवा गदाधरभट्टाचार्योक्तस्य 'क्रियाविशेषणानां कर्मत्वम्' इत्यनुशासनस्याप्युक्तप्रमाणबलेन क्रियाविशेषणानां द्वितीयान्तत्वमित्यत्रैवार्थे तात्पर्यं स्वीकरणीयं सकलप्रामाणिकग्रन्थसंवादान्न त्वातिदेशिके कर्मत्वे।

यद्वा 'क्रियाविशेषणानां कर्मत्व'मित्यस्य 'उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।।' इत्यंशीभूतेन 'ततोऽन्यत्रापि दृश्यते' इत्यनेन क्रियाविशेषणं कर्मवद्भवतीत्यर्थः कल्प्यते, तथा च तत्रातिदिष्टं कर्मत्वमङ्गीक्रियते। अतिदेशफलञ्च कर्मप्रवचनीयादिसंज्ञावत् केवलं द्वितीयैव तेन न कर्मणि लकारप्रसक्तिरिति बोध्यम्। एतेन च सकलनैय्यायिकसम्प्रदायविरुद्धार्थभाषिता गदाधरभट्टाचार्यस्येत्यपि प्रत्युक्तं समवगन्तव्यम्। इत्थं च निखिलानां नैय्यायिकानां मतस्य सुसूक्ष्मं पर्यालोचनया सुदृढमिदमभिधातुं पार्यते यत् क्रियाविशेषणवाचकपदाद् द्वितीयायास्तेषां मते उपपदविभक्तित्वमेव न कारकविभक्तित्वमिति।

ननु क्रियाविशेषणद्वितीयायाः कारकविभक्तित्वाभावे 'स्तोकपक्ता' इत्यादौ समासो नोपपद्यते, असति विशेषानुशासने कारकविभक्तिभिन्नविभक्त्यन्तेन समासस्यासाधुत्वादिति चेत्, न, स्तोकं पक्ता इति विग्रहे कर्मधारयसमासे प्रतिबन्धकाभावात्। न च पदद्वयार्थयोर्यत्राभेदो यत्र च पदद्वयस्य समानविभक्तिकत्वं तत्रैव कर्मधारयसमासः, न चैतदस्ति प्रकृत इति कथं कर्मधारय इति वाच्यम्, महाकविर्महाविज्ञ इत्यादाविव स्तोकादेः पाकादावेकदेशेऽन्वयेऽपि समासस्य साधुत्वस्वीकारात्। समानविभक्तिकत्वन्तु कर्मधारयसमासे न प्रयोजकम्, 'तत्पुरुषः समानाधिकरणः कर्मधारयः'[1] इत्यनुशासनेन पदयोर्द्वयोः सामानाधिकरण्यमात्रस्य समपेक्षणात्। सामानाधिकरण्यञ्च तदर्थयोरभेद एव, स च वर्ततेऽत्रापीति न स्तोकपक्ता इत्यादौ क्रियाविशेषणद्वितीयाया उपपदविभक्तित्वे समासानुपपत्तिः। तथा

१. पा.सू. १।२।४२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चोक्तं शब्दशक्तिप्रकाशिकायां जगदीशतर्कालङ्कारैस्तत्पुरुषसमासप्रकरणे तत्पुरुषलक्षणकारिकाविवृतौ—'स्तोकपक्का इत्यादौ क्रियाविशेषणैः कर्मधारय एव महाकविर्महाविज्ञ इत्यादौ कवित्वादाविव प्रकृतेऽप्येकनामार्थैकदेशे पचनादावपरनामार्थस्याभेदान्वयबोधकतया तथात्वसम्भवात्। क्रियाविशेषणैः समास एवाव्युत्पन्न इति तु न देश्यम्, 'स्तोकनम्रा स्तनाभ्याम्' इत्यादेः कालिदासाद्यैः प्रयुक्तत्वात्' इति।

यथा च नैय्यायिकाः क्रियाविशेषणानां कर्मत्वं नातिष्ठन्ते तथा मीमांसका अपि तेषां तन्नाङ्गीकुर्वते। नैय्यायिकैर्यं पन्थानमाश्रित्य क्रियाविशेषणानां कर्मत्वं व्याखण्डि स पन्थाः पूर्वं व्युत्पत्तिवादकृन्मतव्याख्यानप्रसङ्गेन समभ्यधीयतास्माभिः साम्प्रतं मीमांसकानामपि क्रियाविशेषणकर्मत्वखण्डनप्रक्रिया खलु मनाक् समुपवर्ण्यते—ननु साध्यत्वविशिष्टधात्वर्थ एव क्रिया, धात्वर्थत्वञ्च पच्यादिस्थले यथा फूत्कारादिव्यापारस्य तथा विक्लित्त्यादेः फलस्यापीति तस्यापि क्रियात्वमभ्युपेयमेव। विक्लित्त्यादिफलस्य च क्रियाजन्योत्पत्त्याश्रयत्वेन मुख्यकर्मत्वात् प्रातिपदिकत्वाभावेन ततोऽसम्भवन्ती द्वितीया तद्विशेषणे स्तोकादौ सञ्जायते। विक्लित्तेरिव तदुत्पत्तेरपि पचन्तीत्यस्य विक्लित्तिमुत्पादयन्तीति विवरणानुरोधेन धातुवाच्यत्वस्वीकरणेन विक्लित्तेरिव तदुत्पत्तेरपि फलत्वात् क्रियाजन्योत्पत्तिरूपफलशालित्वेन विक्लित्तेर्मुख्यकर्मत्वस्वीकारे न दोषः।

न च विक्लित्तेर्मुख्यकर्मत्वे तण्डुलं पचतीतिवत् विक्लित्तिं पचतीति प्रयोगापत्तिः, तस्या धातुनैवोक्तत्वेन 'उक्तार्थानामप्रयोगः' इति न्यायेनाप्रयोगात्। अकर्मकधातुस्थलेऽपि सुखं स्वपितीत्यादौ धातुवाच्यफलस्य शरीरलाघवादेः सुखसाधनत्वात् सुखपदेन सुखसाधनं लक्षयित्वा शरीरलाघवाद्युत्पत्तिरूपफलाश्रयत्वेन शरीरलाघवादेः फलस्य कर्मत्वात् तद्विशेषणे सुखसाधनाद्यर्थकसुखादौ द्वितीयान्ततासिद्धिः।

न चैवं स्वप्यादिधातूनां शरीरलाघवादिरूपफलस्यापि उत्पत्त्याश्रयत्वेन कर्मतास्वीकारे तेषामकर्मकत्वानापत्तिः सकर्मकत्वापत्तिश्च दूषणे स्यातामिति वाच्यम्, स्वव्यधिकरणफलाश्रयकव्यापारवाचित्वाभावेन तेषामकर्मकतायाः सकर्मकत्वाभावस्य च निष्पत्तेः। एवञ्च उत्पत्त्याश्रयरूपकर्मणः सकर्मकाकर्मकसाधारणतया अकर्मकाणां स्वप्यादिधातूनां तादृशकर्मसत्त्वेऽपि न क्षतिः। तादृशकर्मकारकमादाय कर्मणि लकारः कृद्योगनिमित्तिका वा षष्ठी तु नापादनीया व्यापारव्यधिकरण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धातुवाच्यमुख्यफलाश्रयरूपकर्मण्येव तयोः प्रवृत्तिस्वीकाराद् उत्पत्तेरमुख्यफलत्वेन तदाश्रये तयोरप्रवृत्तेः।

अतश्च स्तोकमोदनः पच्यते, स्तोकमोदनस्य पक्ता इत्यादौ स्तोकादिपदे न प्रथमाषष्ठ्योरापत्तिः, द्वितीयान्तताया अनापत्तिश्चेति क्रियाविशेषणानां मुख्यकर्मत्वस्वीकारे दोषलेशस्याप्यभावेन तत्र मुख्यकर्मण्येव द्वितीया स्वीकार्या इति चेत्, मैवम्, व्यापारव्यधिकरणधातुवाच्यमुख्यफलाश्रयरूपकर्मण्येव लकारषष्ठ्योः प्रवृत्तौ चैत्रेणास्यते मासः सुप्यते रात्रिरित्यादौ कर्मलकाराप्रसङ्गः, मासादिरूपकर्मणो व्यापारव्यधिकरणधातुवाच्यमुख्यफलाश्रयत्वाभावात्। तादृशफलस्य तत्र स्वीकारे तु आसि-स्वप्यादिधातूनामपि धातूपात्तफलसमानाधिकरणव्यापारवाचित्वाभावेन स्वाभाविकाकर्मकत्वभङ्गप्रसङ्गः स्यात्। तस्मात् कर्मत्वं तादृशं निर्वचनीयं येन निखिलदोषराशिनिरासः सम्भवेत्। परसमवेतक्रियाजन्यधात्वर्थतावच्छेदकीभूतफलशालित्वं तत्समनियताखण्डोपाधिरूपं वा कर्मत्वन्तु न निर्वक्तव्यम्, तदभावेऽपि चैत्रो मासमास्ते, आस्यते मासश्चैत्रेण इत्यादौ कर्मत्वावश्यकत्वेन व्यभिचारात्; किन्तु किमित्याद्याकाङ्क्षापूरकत्वसमनियतमेवाखण्डोपाधिरूपं कर्मत्वं स्वीकरणीयम्, तच्च कर्मत्वं पचतीत्यादौ तण्डुलस्येव आस्यत इत्यादौ मासादेरपि समानमिति युज्यन्ते तत्र द्वितीयाकर्मलकारादयः। क्रियाविशेषणानान्तु किमित्याकाराकाङ्क्षापूरकत्वं नास्ति; किन्तु कथमित्याकाराकाङ्क्षापूरकत्वमेव। अत एव तत्र कथं पचति? सुखं पचति, कथं स्वपिति? सुखं स्वपिति, कीदृशं पचति? मृदु स्तोकं वा पचतीत्यादिरूपः प्रश्नोत्तरभावः सङ्गच्छते। तस्मात् क्रियाविशेषणस्थले किमित्याकाराकाङ्क्षापूरकत्वाभावान्न कथमपि कर्मत्वं सम्भवति, तथा च तदनुरोधेन उत्पत्तेः फलस्य धातुवाच्यत्वकल्पना तयोरन्यलभ्यत्वाद् विफलैव।

कर्मत्वाभावेऽपि क्रियाविशेषणेषु द्वितीयानियमस्तु पूर्वोक्तरीत्या 'उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।।' इत्यनुशासनेन स्वीकर्तव्य इति मीमांसकानां सिद्धान्तः। एवञ्च तत्तन्मतपर्यालोचनया मीमांसकनैय्यायिकानामुभयेषामपि मतेन क्रियाविशेषणानां कर्मत्वाभावः, कर्मत्वाभावे च तद्वाचकपदद्वितीयायाः कारकविभक्तित्वाभाव उपपदविभक्तित्वञ्च साधु सङ्गच्छन्त इति नात्र संशीतिलेशोऽपि।

वैय्याकरणास्तु तमिमं नैय्यायिकमीमांसकादीनां क्रियाविशेषणविषयकं सिद्धान्तं न रमणीयं परिगणयन्ति, ते च तत्र सर्वत्र क्रियाविशेषणे 'कर्तुरीप्सिततमं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्म'[1] इति सूत्रेण कर्मसंज्ञां विधाय 'कर्मणि द्वितीया'[2] इति सूत्रेण द्वितीयामेव साधीयसीं सम्मन्वते। वैय्याकरणेषु केवलं नागेशभट्ट एव एतादृक्षः सञ्चकास्ति येन क्रियाविशेषणे द्वितीयामनङ्गीकृत्य तत्र प्रथमैव युक्तेति समभिदधे। यद्यपि नागेशभट्टेनापि शब्देन्दुशेखरे बहुत्र कारकप्रकरणे क्रियाविशेषणे द्वितीयाया एव समुपपादनं संव्यधायि, तथापि तत् तेन भट्टोजिदीक्षितव्याख्यानप्रसङ्गेन तन्मतानुरोधमास्थाय समाचरितं स्यान्न तु स्वीयमतत्वेनेत्यनुमातव्यम्, इतरथा तु तेन लघुशब्देन्दुशेखरे तद्धितप्रकरणे 'तत्प्रत्यनुपूर्वमीपलोमकूलम्'[3] इति सूत्रस्थ-'क्रियाविशेषणत्वाद् द्वितीये'ति सिद्धान्तकौमुदीग्रन्थस्य यथाग्रन्थं व्याख्यां विधाय अन्ते 'प्रथमान्तत्वञ्च युक्तम्' इति कथं प्रोच्येत? तस्मान्नागेशभट्टाय क्रियाविशेषणानां प्रथमान्तत्वमेव बहुलं रोचत इति मतस्य निर्धारणे विदुषां न विप्रतिपत्तिलेशोऽपि समभ्युदियादिति मन्तव्यम्।

तच्च नागेशमतं क्रियाविशेषणविषय इत्थमुपपादयन्ति तन्मतमर्मविदो विपश्चितः—तादात्म्यफलतावच्छेदकसम्बन्धान्यतरसम्बन्धेन धात्वर्थतावच्छेदक-फलविशिष्टस्य कर्मसंज्ञकत्वं क्रियाविशेषणानां तादात्म्येन फलेऽन्वयञ्चाभ्युपेत्य 'कर्मणि द्वितीया'[4] इति सूत्रेण तत्र द्वितीयास्वीकारे फलावच्छिन्नव्यापारस्यैव सर्वत्र धात्वर्थत्वेन फलव्यापारयोः सामानाधिकरण्यासामानाधिकरण्याभ्यां सकर्मका-कर्मकत्वव्यवस्थायाः सूपपादत्वेऽपि क्रियाविशेषणस्य मुख्यकर्मत्वस्वीकारे 'लः कर्मणि च भावे चाकर्मकेभ्यः'[5] इति सूत्रेण तत्रापि लकारापत्तौ स्तोकः पच्यते, सुखमास्यते इत्यादिप्रयोगाः समापद्येरन्। तादात्म्यसम्बन्धानवच्छिन्नधात्वर्थता-वच्छेदकफलाश्रयत्वशालिनि कर्मण्येव लकार इति समभ्युपगम्य तादृशदोषदूरीकरणे तु 'कर्मणि द्वितीया' इत्यत्र कर्मशब्देन तादात्म्यफलतावच्छेदकान्यतरसम्बन्धेन धात्वर्थतावच्छेदकफलशालिनः कर्मणो ग्रहणम्, 'लः कर्मणि च भावे चाकर्मकेभ्यः' इत्यत्र तु कर्मशब्देन तादात्म्यसम्बन्धानवच्छिन्नधात्वर्थतावच्छेदकफलान्वयस्य कर्मणो ग्रहणमिति शक्तिभेदे गौरवं शाब्दबोधस्य तादात्म्यसम्बन्धानवच्छिन्नत्वादि-घटितकर्मत्वविषयकत्वेनातिरिक्तविषयकत्वापत्त्या प्रतिबध्यप्रतिबन्धकभावगुरुत्व-प्रसक्तिश्च स्याताम्। यद्यपि तत्रापि यथा व्रैहेयमोदनं पचतीत्यत्र विशेषणान्वयाकाङ्क्षाभिव्यक्त्यर्था द्वितीया कर्मीभूतौदनान्वयप्रयोजकाकाङ्क्षा च

१. पा.सू. १।४।४९;
२. तदेव-२।३।२।
३. तदेव-४।४।२८;
४. तदेव-२।३।२।
५. तदेव-३।४।६९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषणपदस्य द्वितीयान्तत्वे सत्येवाभिव्यज्यते तथा धात्वर्थतावच्छेदकीभूतोत्पत्तिरूपफलाश्रयत्वेन कर्मीभूतविक्लित्त्यन्वयप्रयोजिकाकाङ्क्षाऽपि स्तोकादिविशेषणपदस्य द्वितीयान्तत्वे सत्येव व्यज्येत इति व्रैहेयपदादिव स्तोकादिपदादपि आकाङ्क्षानिर्वाहायैव द्वितीया स्वीकार्या। अत एव भावनाकर्महोमविशेषणाग्निहोत्रादिपदाद् द्वितीया, भावनाकरणयागविशेषणवाजपेयादिपदात् तृतीयेति मीमांसकानां वचनं सङ्गच्छते। 'कर्तुरीप्सिततमं कर्म'[१] इत्यनेन कर्मसंज्ञा कर्मणि लकारश्च व्यापारव्यधिकरणफलाश्रयीभूते धात्ववाच्ये कर्मण्येव, तेन सुखोत्पत्त्यनुकूलव्यापारवाचकस्य रमतेः 'आत्मानं रमते, आत्मा रम्यते' इत्यादिप्रयोगाणां नापत्तिः, फलस्य व्यापारसमानाधिकरणत्वात्।

न च शय्याङ्गविलक्षणसंयोगानुकूलव्यापारवाचिनः स्वपतेः 'अङ्गं स्वपिति', 'अङ्गं सुप्यते' इत्यादिप्रयोगातिप्रसङ्गः, अङ्गस्य धातुवाच्यकर्मत्वात्। तथा च विक्लित्तेरपि धातुवाच्यकर्मत्वेन तत्र लकारासम्भवात् 'स्तोकः पच्यते' इत्यादिप्रयोगाणां नापत्तिरिति वक्तुं शक्यते, तथापि विशेषणसुपामव्यभिचारेण विशेष्याकाङ्क्षाभिव्यक्त्यर्थत्वेन द्वितीयान्तविशेष्यवाचकपदार्थविशेषणपदस्य व्रैहेयमोदनं पचतीत्यादौ द्वितीयान्ततायाः सम्भवेऽपि क्रियाविशेषणस्थले वाजपेयेन यजेतेत्यत्र व्यभिचाराद् विशेषणस्य द्वितीयान्तताया न सम्भवः। तस्मान्नाकाङ्क्षानिर्वाहायापि क्रियाविशेषणस्थले द्वितीयास्वीकरणं रमणीयतामावहेत्।

एवञ्च क्रियाविशेषणानां कर्मतास्वीकारपक्षस्य गौरवशक्तिद्वयकल्पनादिविविधदोषसंघातग्रस्ततया साधुत्वार्थं तत्र कस्याश्चन विभक्तेरवश्याभ्युपेयत्वेन प्रथमं प्राप्तायाः प्रथमाया अतिक्रमणे हेतुविरहात् 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'[२] इति सूत्रेण प्रातिपदिकार्थत्वात् प्रथमैवाङ्गीकरणीया न द्वितीयेति नागेशभट्टानामाशयः। तन्मतरीत्या क्रियाविशेषणस्थले सर्वत्र प्रथमैव समुचिता। क्लीबतायास्तत्र सर्वत्र औत्सर्गिकत्वेन क्लीबलिङ्गे प्रथमाद्वितीयाविभक्त्यो रूपभेदाभावात् तत्र प्रथमायाः स्वीकारेऽपि न किञ्चिदसामञ्जस्यमिति शक्तिभेदगौरवादिनिखिलदोषशून्यतया लाघवाच्च क्रियाविशेषणस्थले द्वितीयास्वीकरणापेक्षया प्रथमास्वीकरणमेव ज्याय इति तन्मतपक्षपातिनः सम्मन्यन्ते।

तदिदं क्रियाविशेषणानां प्रथमान्ततायाः परिपोषकं मतं सूक्ष्मदृष्ट्या सुविवेचनेनाविचारितरमणीयमिवाभाति। कामं सन्त्यस्मिन् मते आपेक्षिकं किमपि

---

१. पा.सू. १।४।४९; २. तदेव-२।३।४६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लाघवं कर्मशब्दस्य शक्तिद्वयकल्पनाप्रसूतगौरवविरहो व्यपदेशिवद्भावादिसमाश्रयणापेक्षाराहित्यञ्च। तथापि तदिदं सर्वमापातत एव वस्तुतस्तु मतेऽस्मिन् महदसामञ्जस्यं जागर्तितराम्। तथा हि क्रियाविशेषणानां प्रथमान्ततायाः स्वीकारे 'निपुणस्त्वं पचसि, मृदु त्वा राजा द्रविणेन योजयति' इत्यादौ मृदु इति क्रिया-विशेषणस्य प्रथमान्तत्वेन 'सपूर्वायाः प्रथमाया विभाषा'[1] इति सूत्रस्य प्रवृत्त्या त्वादेशस्य वैकल्पिकत्वेन 'निपुणस्त्वं पचसि, मृदु त्वां राजा द्रविणेन योजयति' इत्याद्यपि प्रसज्येत। इष्टञ्च तत्र 'त्वामौ द्वितीयायाः'[2] इति नित्यस्य त्वादेशस्य विधानेन केवलं निपुणस्त्वं पचसि मृदु त्वा राजा द्रविणेन योजयतीत्याद्येव। क्रियाविशेषणस्य द्वितीयान्तत्वे तु नायं दोषः, प्रथमान्तत्वाभावेन तत्र 'सपूर्वायाः प्रथमाया विभाषा'[3] इति सूत्रस्याप्रवृत्तेः, 'त्वामौ द्वितीयायाः'[4] इत्यस्यैव प्रवृत्तेश्च। अन्वादेशे हि नित्यं भवन्ति वानावादय आदेशाः 'अन्वादेशे तु नित्यं स्युरि'ति नियमात्, तथा चात्रान्वादेशत्वेन 'निपुणत्वं पचसि, मृदु त्वा राजा द्रविणेन योजयति' इत्येव समुचितम्, न तु मृदु त्वां राजा द्रविणेन योजयतीत्यपि। क्रियाविशेषणस्य प्रथमान्ततायान्तु तदपि समापद्येतेति क्रियाविशेषणस्य प्रथमान्तत्वे महद् दूषणमिति भावः।

किञ्च क्रियाविशेषणानां प्रथमान्तत्वे 'सकृल्ल्वौ' इत्यत्र यण् न स्यात्, 'गतिकारकेतरपूर्वपदस्य यण् नेष्यते' इति नियमेन गतिकारकपूर्वपदस्यैव यणः समभ्युपगमात्। 'सकृल्ल्वौ' इत्यत्र सकृदिति क्रियाविशेषणवाचकं पदन्तु न गतिसंज्ञकम्, नापि च कर्मत्वाभावेन कारकसंज्ञकं भवतां मते। तथा चात्र 'ओः सुपि'[5] इति सूत्रेण विधीयमानस्य यणो न कथमपि प्रवृत्तिः सम्भवति। क्रियाविशेषणानां द्वितीयान्तत्वे तु कर्मणः कारकत्वेन कारकपूर्वकत्वाद् यणः सुसाधत्वमेवेति विद्वद्भिर्विभावनीयम्। अपि च क्रियाविशेषणानां नपुंसकत्वमपि अनियतलिङ्गस्थल एव, नियतलिङ्गस्थले तु न नपुंसकता; किन्तु तत्तल्लिङ्गतैवेति भाट्टरहस्ये पदवाक्यरत्नाकरे व्युत्पत्तिवादगूढार्थतत्त्वालोके च स्फुटम्। तथा च तादृशस्थले आदि पचतीत्यादौ क्रियाविशेषणानां प्रथमान्तत्वस्वीकारे आदिः पचतीति प्रयोगापत्तिः, आदिं पचतीति प्रयोगानापत्तिश्च प्रसज्येयाताम्। तस्मात् क्रियाविशेषणानां प्रथमान्ततापक्षो न सुविचारपेशल इति वैयाकरणमूर्धाभिषिक्ता भाष्यकार-कैयट-दीक्षितादयः पक्षमेनं नोररीकुर्वन्ति।

---

१. पा.सू. ८।१।२६;
२. तदेव-८।१।२३।
३. तदेव-८।१।२६;
४. तदेव-८।१।२३।
५. तदेव-६।४।८३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ते तु तत्र दृढतरप्रमाणयुक्तिबलेन कर्मत्वं संसाध्य 'कर्मणि द्वितीया'[१] इति सूत्रेण कर्मणि द्वितीयैवेति सङ्गिरन्ते। 'कर्तुरीप्सिततमं कर्म'[२] इति सूत्रेण क्रियाविशेषणानां कर्मसंज्ञा, कर्मसंज्ञकत्वाच्च 'कर्मणि द्वितीया' इति सूत्रेण तत्र द्वितीयाविभक्तिरिति हि तेषां सिद्धान्तः। अमुमेव सिद्धान्तं सर्वे प्राचीना नवीनाश्च व्याकृतिविदः समनुमोदन्ते। सूत्रवार्तिकभाष्यकारादिसकलप्रामाणिकजनपरिगृहीतत्वान्निर्दुष्टत्वाच्चायमेव पक्षः पूर्वेभ्यस्त्रिभ्योऽपि पक्षेभ्यश्चारुतरतां बिभर्तीति मतमेतत् सप्रमाणं विस्तरेण निपुणतरमुपपादयिष्यामः।

महामुनिना पाणिनिना प्रणीतेऽष्टके व्याकरणे सूत्रमस्त्येकम् 'तत्प्रत्यनुपूर्वमीपलोमकूलम्'[३] इति। तत्र हि 'ओजःसहोऽम्भसा वर्तते'[४] इति सूत्राद् 'वर्तते' इत्यस्यानुवृत्तिं विधाय प्रति अनु इत्येवंपूर्वेभ्य ईपलोमकूलशब्देभ्यो द्वितीयासमर्थेभ्यो वर्तते इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवतीति सूत्रस्यार्थः सम्पद्यते। स चायमर्थो वृतेरकर्मकत्वात्तस्य कर्मणा सम्बन्धाभावे कथं सम्भवतीति जायमानायामाशङ्कायां क्रियाविशेषणमकर्मकाणामपि कर्म भवतीति समाधिर्विहितः। तदुक्तं काशिकायां 'ननु च वृतिरकर्मकः, तस्य कथं कर्मणा सम्बन्धः। क्रियाविशेषणमकर्मकाणामपि कर्म भवति' इति। एतेन सुस्पष्टमवबुध्यते यत् क्रियाविशेषणं कर्म भवति, तच्च न केवलं सकर्मकाणामेव धातूनां किन्त्वकर्मकाणामपि तज्जायत इति।

न केवलं 'तत्प्रत्यनुपूर्वमीपलोमकूलम्' इति सूत्र एव काशिकाकारेण क्रियाविशेषणस्य कर्मता प्रण्यगादि; किन्तु 'करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य'[५] इति सूत्रेऽपि क्रियाविशेषणानां कर्मत्वं सुविस्पष्टं निगदितं तेन, यथा—'करणे इति किम्, क्रियाविशेषणे कर्मणि मा भूत् स्तोकं मुञ्चति' इति। भट्टोजिदीक्षितेनापि सिद्धान्तकौमुद्यां तद्धितेषु ठगधिकारप्रकरणे 'तत्प्रत्यनुपूर्वमीपलोमकूलम्' इति सूत्रस्य व्याख्याप्रसङ्गेन, प्रौढमनोरमायाञ्च कारकप्रकरणे 'करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य' इति सूत्रे अयमेवार्थः साधु समर्थितः। यथा, 'द्वितीयान्तादस्माद् वर्तते इत्यस्मिन्नर्थे ठक् स्यात्। क्रियाविशेषणत्वाद् द्वितीया' इति (सिद्धान्तकौमुदी)। ''एतेन 'करणे च स्तोक' इति सूत्रे 'करणे किम्? क्रियाविशेषणे कर्मणि मा भूत् स्तोकं पचति, क्रिया न द्रव्यम्' इति प्राचां ग्रन्थो व्याख्यातः'' इति (प्रौढमनोरमा)।

---

१. पा.सू. २।३।२;
२. तदेव-१।४।४९।
३. तदेव-४।४।२८;
४. तदेव-४।४।२७।
५. तदेव-२।३।३३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कैयटेनापि 'पूजनात् पूजितमनुदात्तम्'[१] इति सूत्रस्थमहाभाष्यप्रदीपे 'दारुणाध्यापक' इति भाष्यीयव्याख्यायां 'क्रियाविशेषणं दारुणशब्दो द्वितीयान्त:' इति संव्याहृत्य क्रियाविशेषणस्य कर्मत्वाद् द्वितीयान्तत्वमेव समनुमोदितम्। हरदत्तेनापि काशिकाव्याख्यायां पदमञ्जर्याम् 'अनुग्वलंगामी'[२] इति सूत्रे 'अनुगु इत्यस्य क्रियाविशेषणत्वाद् द्वितीयान्तादिह प्रत्यय:' इति समाभाष्य क्रियाविशेषणानां कर्मत्वाद् द्वितीयान्तता इति मतस्यैव पृष्ठपोषणमाचरितम्। एवञ्चैतै: वामन-जयादित्य-कैयट-भट्टोजिदीक्षित-हरदत्त-ग्रन्थानामुद्धरणै: सुविशदमिदमुपजायते यत् क्रियाविशेषणानां कर्मतायां द्वितीयान्ततायाञ्च न किमपि विद्यते वैमत्यं मिथो वैय्याकरणानाम्। पाणिनिमारभ्य भट्टोजिदीक्षितपर्यन्तं सर्वेऽपि शाब्दिकप्रवरा: क्रियाविशेषणानां कर्मत्वं तस्माद् द्वितीयान्तत्वञ्च नि:सङ्कोचं समभ्युपयन्ति।

नागेशभट्टगुरुणा हरिदीक्षितेनापि स्वीयायां शब्दरत्ननामिकायां प्रौढमनोरमा-व्याख्यायां कारकप्रकरणे 'कर्तुरीप्सिततमं कर्म'[३] इति सूत्रे 'फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात् कर्मत्वम्। अत एव तत्समानाधिकरणे शोभनं पचतीत्यादौ कर्मत्वसिद्धि:' इति सन्दर्भेण क्रियाविशेषणानां कर्मत्वं द्वितीयान्तत्वञ्च स्फुटं प्रत्यपादिषाताम्। यद्यपि नागेशभट्टेन 'तत्प्रत्यनुपूर्वमीपलोमकूलम्'[४] इति सूत्रे शब्देन्दुशेखरे क्रियाविशेषणानां प्रथमान्ततैव युक्तेति समभाणि, तथापि तत्कथनं तस्य प्रौढिवादमात्रमेवेति सम्प्रकल्पनीयम्। अन्यथा स तस्मिन्नेव ग्रन्थे बहुत्र कारकप्रकरणे 'कारके'[५], 'कर्तुरीप्सिततमं कर्म'[६], 'करणे च स्तोकाल्पकृच्छ्र-कतिपयस्यासत्त्ववचनस्य'[७], 'कर्तृकर्मणो: कृति'[८] इत्यादिसूत्रेषु महाभाष्य-प्रदीपोद्द्योते 'समर्थ: पदविधि:'[९], 'पूजनात् पूजितमनुदात्तम्'[१०] इति सूत्रयोश्च क्रियाविशेषणस्य कर्मताया द्वितीयान्ततायाश्च सोपपत्तिकं प्रतिपादनं न व्यधास्यत्। तत्र हि तेन 'एवं स्तोकं पचतीत्यादौ फलस्यापि (जनकत्वम्)....फलस्यापि व्यपदेशिवद्भावेन फलसम्बन्धित्वात् कर्मत्वम्। अत एव तत्समानाधिकरणे स्तोकं पचतीत्यादौ कर्मत्वसिद्धि:' इत्यादिभि: प्रघट्टकै: क्रियाविशेषणानां कारकत्वं कर्मत्वं

१. पा.सू. ८।१।६७;
२. तदेव-५।२।१५।
३. तदेव-१।४।४९;
४. तदेव-४।४।२८।
५. तदेव-१।४।२३;
६. तदेव-१।४।४९।
७. तदेव-२।३।३३;
८. तदेव-२।३।६५।
९. तदेव-२।१।१;
१०. तदेव-८।१।६७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयान्तत्वञ्च साधु समुपापाद्यन्त। तस्मान्नागेशभट्टोऽपि क्रियाविशेषणानां कर्मत्वे न प्रतिकूल इति सम्प्रतिपत्तव्यम्।

श्रीमता कौण्डभट्टेनापि वैयाकरणभूषणसारे धात्वर्थनिर्णये 'आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता' इत्यादिकारिकाया व्याख्यानप्रसङ्गे क्रियाविशेषणानां कर्मत्वस्यैव समाख्यानं कृतम्। तट्टीकयोर्दर्पणकाशिकयोश्च प्रणेतृभ्यां हरिवल्लभहरिदीक्षिताभ्यां तत्साधु समर्थितञ्च। यथोक्तं वैयाकरणभूषणसारे 'एवं फलांशोऽपि धातुनासत्त्वावस्थापन्न एवोच्यते, अत एव स्तोकं पचतीतिवत् स्तोकं पाक इत्युपपद्यते' इति। तट्टीकायां दर्पणे च 'अन्यथा तादृशप्रयोगानुपपत्तिः, तादृशफलस्य वाच्यत्वे तु तस्य व्यपदेशिवद्भावेन स्वसम्बन्धितया कर्मत्वात् तत्समानाधिकरणस्तोकादिशब्देभ्यो द्वितीयोपपत्तिः' इति। एवञ्च नव्यैर्वैय्याकरणैरपि क्रियाविशेषणस्य कर्मताया विषये प्राचामेव वैय्याकरणानां सरणिः शरणीकृतेति निःसंशयं समभ्यूहनीयम्। तदिदमखिलैर्वैय्याकरणैरैकमत्येन समभ्युपगम्यमानं क्रियाविशेषणानां कर्मत्वं कया रीत्या निष्पद्यत इति सम्प्रसृतायां विचारणायां चतुर्भिः प्रकारैस्तत् साधयन्ति वैय्याकरणसिद्धान्तरहस्यवेदिनो विपश्चितः।

ननु कर्मत्वस्य कारकत्वव्याप्यतया कारकत्वाभावे कर्मत्वस्याप्यनुपपद्यमानत्वेन क्रियाविशेषणे पूर्वं कारकत्वमेवोपपादनीयम्। कारकत्वञ्च क्रियाजनकत्वरूपं फलस्य व्यापारजनकत्वाभावेन तस्मिन् दुःसाधं दूरे तद्विशेषणरूपे क्रियाविशेषणे तस्य साधनप्रत्याशा इति चेत्, श्रूयताम्—यथा हि सम्प्रदानस्यासन्निधाने 'मनसा पात्रमुद्दिश्य जलमध्ये जलं क्षिपेत्। दाता तत्फलमाप्नोति प्रतिग्राही न दोषभाक्॥' इत्युक्तप्रकारकसम्प्रदानस्थले च सम्प्रदाने व्यापाराभावेऽपि स्वज्ञानपूर्वकालत्वेन क्रियाजनकत्वं स्वीक्रियते, तथा फलस्यापि स्वज्ञानपूर्वकालत्वेनैव क्रियाजनकत्वमाश्रयणीयम्।

अयमभिप्रायः—यथा हि यागस्य स्वर्गाव्यवहितपूर्वकालवृत्तित्वाभावेऽपि परमापूर्वद्वारा स्वर्गजनकत्वं मीमांसकैरङ्गीक्रियते तथासन्निहितसम्प्रदानस्थलेऽपि विषयविधया असन्निहितसम्प्रदानज्ञानजन्यं यदसन्निहितसम्प्रदानविषयकं ज्ञानं तज्ज्ञानक्रियाव्यवहितपूर्वकालवृत्तित्वादसन्निहितसम्प्रदानस्यापि क्रियाजनकत्वमभ्युपगमनीयमेव। न हि सम्प्रदानज्ञानं विना दानक्रिया सम्पद्यते, न च ऋते सम्प्रदानरूपाद् विषयात् सम्प्रदानज्ञानं जायते, ज्ञानस्य विषयतानियतत्वात्। तत्र च यथा स्वज्ञानद्वारा सम्प्रदानस्य दानक्रियानिष्पादकत्वं तथा फलस्यापि स्वज्ञानद्वारा व्यापारजनकत्वमुपकल्पनीयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमं फलज्ञानम्, ततः फलेच्छा, ततस्तदुपायान्वेषणम्, ततस्तदुपाये फलसाधनताज्ञानम्, तत उपायेच्छा, तत उपायनिष्ठसाध्यत्वाख्यविषयताका प्रवृत्तिरित्येवं क्रमेण फलस्य क्रियाजनकत्वमस्त्येवेति असन्निहितसम्प्रदानादेरिव फलस्य कारकत्वं निर्बाधम्। इदमेव व्याहारि लघुशब्देन्दुशेखरे कारकप्रकरणे 'कारके'[1] इति सूत्रे नागेशभट्टेन 'असन्निहितसम्प्रदानस्यापि दातृबुद्धिस्थत्वावश्यकत्वेन स्वज्ञानपूर्वकालत्वेनैव जनकत्वम्। एवं स्तोकं पचतीत्यादौ फलस्यापि' इति। इत्थञ्च फलस्य कारकत्वे निष्पन्ने तद्विशेषणरूपे क्रियाविशेषणेऽपि तन्निष्पद्यत एवेति न क्रियाविशेषणानां कारकत्वे बहु विवदनीयम्।

सम्प्रति क्रियाविशेषणानां कर्मत्वोपपादनमवशिष्यते विधातुम्। तच्च चतसृभिः प्रणालीभिर्वैय्याकरणाः समाचरन्तीति समभिहितमधस्तादनुपदमेवास्माभिः। ताश्च प्रणाल्यो यथा—फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात्तस्य कर्मत्वमित्येका। पच्यादेर्विक्लित्त्युत्पत्त्यनुकूलव्यापारादिरर्थ इति विक्लित्त्यादेः फलस्यापि उत्पत्तिरूपफलाश्रयत्वेन कर्मत्वमिति द्वितीया। विधेयतावच्छेदके अपूर्वबोध्यत्वाविशेषाद् विधेयत्वस्वीकारवद् इच्छोद्देश्यतास्वरूपफलतावच्छेदकस्य विक्लित्तित्वादेरपि इच्छोद्देश्यत्वेन फलत्वस्वीकरणात् तन्निष्ठेच्छीयोद्देश्यतावच्छेदकतावच्छेदकसमवायादेरपि फलतावच्छेदकत्वात् तेन सम्बन्धेन विक्लित्तित्वादिरूपफलाश्रयत्वाद् विक्लित्त्यादेः फलस्य कर्मत्वनिष्पत्तिरिति तृतीया। फलस्य साध्यत्वसम्बन्धेन व्यापारेऽन्वयाङ्गीकारात् साध्यत्वनिष्ठसांसर्गिकविषयताया धात्वर्थव्यापारनिष्ठविशेष्यतानिरूपितत्वाद् धात्वर्थप्रयोज्यत्वे सति धात्वर्थनिष्ठविशेष्यतानिरूपितविषयताश्रयत्वरूपफलत्वस्य साध्यत्वे सत्त्वात्तदाश्रयत्वाद् विक्लित्त्यादेः फलस्य कर्मत्वमिति चतुर्थी।

तत्रादिमायाः प्रणाल्या अयमभिप्रायः—नूनं नास्ति फले फलशालित्वं तथापि व्यपदेशिवद्भावेन तु तत् समायात्येव। यथा हि अस्यापत्यमिरित्यादौ अशब्दस्य केवलस्य स्वतोऽदन्तत्वाभावेऽपि व्यपदेशिवद्भावेनादन्तत्वमाश्रित्य तत्र 'अत इञ्'[2] इति सूत्रेण इञ्प्रत्ययो विधीयते, तथात्रापि फलस्य स्वतः फलाश्रयत्वविरहेऽपि व्यपदेशिवद्भावेन फलाश्रयत्वस्वीकरणे न कोऽपि प्रसरति दोषः। न च घटितत्वघटकत्वयोरेव 'व्यपदेशिवदेकस्मिन्' इति परिभाषयातिदेशनात् फले फलाश्रयत्वातिदेशो दुःशकः कर्तुमिति वाच्यम्, स्वस्मिन् स्वघटितत्वेऽतिदिष्टे

---

१. पा.सू. १।४।२३।

२. पा.सू. ४।१।९५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घटितत्वसम्बन्धावच्छिन्नाधिकरणताया आर्थसमाजग्रस्तत्वात् तथा च घटितत्वसम्बन्धेन फले फलाश्रयत्वं निर्बाधम्।

ननु फलतावच्छेदकसम्बन्धेन फलशालिन एव कर्मत्वमूरीक्रियते, घटितत्वसम्बन्धश्च न फलतावच्छेदक इति घटितत्वसम्बन्धेन फलस्य फलाश्रयत्वस्वीकारेऽपि नेष्टसिद्धिरिति तु नाशङ्कितव्यम्, 'तुल्यास्यप्रयत्नं सवर्णम्'[१] इति सूत्रस्थभाष्यप्रामाण्येन घटितत्वघटकत्वयोरिव आश्रयत्वस्यापि व्यपदेशिवत्परिभाषयातिदेशाङ्गीकारात्। 'तुल्यास्यप्रयत्नं सवर्णम्' इति सूत्रे हि भाष्ये भाष्यकृता पूर्वपक्षिणः 'एवमपि अवर्णस्य सवर्णसंज्ञा न प्राप्नोति, बाह्यं ह्यास्यात् स्थानमवर्णस्ये'ति शङ्कायाः 'सर्वमुखस्थानमवर्णमेक इच्छन्ति' इति समाधौ विहिते एवमपि व्यपदेशो न प्रकल्पते 'आस्ये येषां तुल्यो देश' इति पूर्वपक्षिण आक्षेपस्य 'व्यपदेशिवद्भावेन व्यपदेशो भविष्यती'ति समाधानं कृतम्। एवञ्च स्वस्यापि स्वाश्रयत्वं व्यपदेशिवद्भावेन भाष्यकारस्य भगवतः समभिमतमिति स्पष्टमेव। तथा चात्रापि फलस्य फलाश्रयत्वं व्यपदेशिवद्भावेन तद्भाष्यप्रामाण्यादभ्युपगत्य फलस्य फलशालित्वेन कर्मतायाः स्वीकारे न किमपि प्रतिबन्धकमिति सुधीप्रवरैर्बोद्धव्यम्।

द्वितीयायाः सरणेस्त्वयं सारः—सर्वत्रैव पच्यादीनां धातूनां विक्लित्त्याद्युत्पत्त्यनुकूलव्यापारोऽर्थः स्वीक्रियते। यथा च पच्यादिधातूनां विक्लित्त्यादिः फलं तथा तदुत्पत्तिरपि फलमेवेति विक्लित्त्यादिरूपफलाश्रयत्वेन तण्डुलं पचतीत्यादौ यथा तण्डुलादेः कर्मत्वं तथा उत्पत्तिरूपफलाश्रयत्वेन विक्लित्तिरूपफलस्यापि कर्मत्वं समभ्युपगन्तव्यम्। एवञ्च सर्वत्रैव फलस्य उत्पत्तिरूपफलाश्रयत्वेन कर्मत्वात् फलस्य प्रातिपदिकत्वाभावेन तद्विशेषणीभूते स्तोकादिरूपक्रियाविशेषणे 'कर्मणि द्वितीया'[२] इति सूत्रेण द्वितीयान्ततायां न किमपि बाधकमिति बोद्धव्यम्।

तृतीयरीतेस्त्विदं तत्त्वम्—यथा हि विधेयतावच्छेदके अपूर्वबोध्यत्वाविशेषेण मीमांसकैर्विधेयत्वमङ्गीक्रियते, तथा इच्छोद्देश्यतास्वरूपफलतावच्छेदकस्य विक्लित्तित्वादेरपि इच्छोद्देश्यत्वाविशेषात् फलत्वमूरीकरणीयम्। तथा च तन्निष्ठेच्छीयोद्देश्यतावच्छेदकतावच्छेदकसमवायादेरपि सम्बन्धस्य फलतावच्छेदकत्वात् तेन सम्बन्धेन विक्लित्त्यादीनां विक्लित्तित्वादिरूपफलाश्रयत्वेन कर्मत्वाङ्गीकारे न किमपि प्रसरति दूषणमिति मन्तव्यम्।

---

१. तदेव–१।१।९। २. तदेव–२।३।२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुरीयशैल्यास्त्वयं भावः—साध्यत्वसम्बन्धेन फलस्य व्यापारेऽन्वयः स्वीकरणीयः, तथा च साध्यत्वनिष्ठसांसर्गिकविषयता धात्वर्थव्यापारनिष्ठविशेष्यता-निरूपिता सम्पद्यते। फललक्षणञ्च धात्वर्थप्रयोज्यत्वे सति धात्वर्थनिष्ठविशेष्यता-निरूपितविषयताश्रयत्वरूपं मन्तव्यम्। एवञ्च तादृशफललक्षणस्य साध्यत्वेऽपि सत्त्वात् साध्यत्वसम्बन्धस्यापि फलत्वात् तदाश्रयविक्लित्त्यादीनां फलाश्रयत्वेन कर्मता निर्बाधेति विचक्षणैर्वेदितव्यम्।

इत्थं चामीभिश्चतुर्भिः प्रकारैः फलस्य फलाश्रयतां प्रसाध्य 'कर्तुरीप्सिततमं कर्म'[1] इत्यनेन कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण मुख्य एव कर्मणि क्रियाविशेषणस्थले द्वितीया समुपजायत इति सम्यक्प्रकारेण समवबोद्धुं शक्यते। इदञ्च क्रियाविशेषणानां कर्मत्वं न केवलं सकर्मकधातुस्थल एव; किन्तु आस्ते शेते इत्यादावकर्मकधातुस्थलेऽपि भवत्येव। अत एव 'स्तोकमास्ते, सुखं स्वपिति' इत्यादयः प्रयोगाः सम्पद्यन्ते। अकर्मकधातूपस्थाप्यफलाश्रयत्वस्यापि व्यपदेशिवद्भावादिभिः फले सुसाधत्वादिदमुचितम्। कर्तुस्तु तत्र फलाश्रयत्वेऽपि कर्तृसंज्ञया कर्मसंज्ञाया बाधान्न कर्मत्वम्। क्रियाविशेषणस्थले तु बाधिकायाः कस्याश्चन संज्ञाया अप्राप्तेर्व्यपदेशिवद्भावादिभिः फले फलाश्रयत्वमुपकल्प्य तस्य कर्मसंज्ञायां न किमपि बाधकम्। तादृशकर्मणा अकर्मकधातूनां सकर्मकत्व-व्यवहारस्तु नापादनीयः, तस्य सर्वत्रैव सम्भवेन अकर्मकत्वव्यवहारस्यैव समुच्छेदापत्तेः। 'लः कर्मणि च भावे चाकर्मकेभ्यः'[2] इति सूत्रे कर्तृसाहचर्येण धात्वर्थे भेदान्वयि कर्मैव कर्मशब्देन गृह्यते, तेन क्रियाविशेषणरूपकर्मणि न कर्मणि लकारापत्तिः, क्रियाविशेषणरूपकर्मणो धात्वर्थे फले अभेदेनैव सम्बन्धात्। 'कर्तृकर्मणोः कृति'[3] इति सूत्रेऽपि कर्तृसाहचर्येण तादृशमेव कर्म ग्रहीतव्यं तेन क्रियाविशेषणरूपकर्मणि कृद्योगे न षष्ठ्या अप्यापत्तिः। एतेन 'सुखमोदनं पचती'त्यादौ द्विकर्मकतापत्तिः, 'सुखं स्वपिति, सुखमास्ते' इत्यादावकर्मकाणां स्वप्यादीनां कर्मत्वस्यानुक्तिसहत्वम्, सुखादेः कर्मतास्वीकारे 'सुखमोदनः पच्यते, स्तोकमोदनः पच्यते' इत्यादौ सुखमिति द्वितीयानापत्तिः, 'सुखमोदनस्य पक्ता' इत्यादौ कृद्योगे ओदनस्येव सुखस्येति षष्ठ्यापत्तिः, सुखमिति द्वितीयानापत्तिश्चेत्यादयः क्रियाविशेषणस्य कर्मत्वस्वीकारे प्रतिपादिता दोषाः पूतिकूष्माण्डीकृता वेदितव्याः।

---

१. पा.सू. १।४।४९; २. तदेव-३।४।६९।

३. तदेव-२।३।६५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न चैवं कर्मशब्दस्य व्युत्पत्तिद्वयकल्पनरूपं दूषणमत्र समापतति भवतामिति वाच्यम्, 'तत्प्रत्यनुपूर्वमीपलोमकूलम्'[१] इति सूत्रप्रामाण्येन तस्य दोषस्यात्राकिञ्चित्करत्वात्। प्रमाणानुरोधेन गौरवस्यापि 'प्रामाणिकं गौरवं न दोषाये'ति न्यायेनादूषकत्वाच्च। तस्मात् सकलदोषराहित्येन सूत्रवार्त्तिकभाष्यकारादिनिखिलप्रामाणिकजनपरिगृहीतत्वेन लाघवाच्च क्रियाविशेषणविभक्तिविषये वैय्याकरणानामेव सिद्धान्तः सर्वतो गरिष्ठः श्रेष्ठश्चेति सिद्धम्।

१. पा.सू. ४।४।२८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिकबौद्धयोः समानः पन्था:

डॉ. हरिप्रसाद-अधिकारी
उपाचार्यः, तुलनात्मकधर्मदर्शनविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

* * *

वैदिका बौद्धाश्चैकस्या एव भारतीयसनातनार्यपरम्पराया द्वे प्रधाने अङ्गे स्तः। एते द्वे ज्ञानधारे अनादिकालादेव सर्वलोककल्याणं कुर्वत्यौ प्रवहमाने स्तः। उभयोरेव समुद्गमस्थलं गन्तव्यञ्चैकमेवास्ति। दर्शनानां समुत्पत्तिर्मनुष्याणां स्वाभाविकजिज्ञासायास्तृप्त्यर्थं जाताऽस्ति। संसारदुःखसन्तप्तो मानव आदिकालादेव सृष्टिजीवेश्वरप्रभृतिरहस्यपूर्णविषयाणां रहस्यं जिज्ञासमानः सततं चिन्तनकर्मनिरतो बभूव। एतच्चेत्थं स्पष्टीकृतं केनापि विदुषा—

सम्पूर्णाया दृश्यसृष्टेर्यद्भवेन्मूलकारणम्।
तज्जिज्ञासा तदर्थञ्च प्रयत्नो दर्शनं स्मृतम्[१]॥

यद्यनया दृष्ट्या वैदिकबौद्धयोः पर्यालोचना क्रियेत तदा तयोरेकैव पृष्ठभूमिः समासादयितुं शक्यते। यतो हि द्वयोरेव चिन्तनधारयोः प्रवृत्तिर्दुःख-सन्तप्तजीवलोकसमुद्धारार्थं जाताऽस्ति। भगवतो बुद्धस्य करुणा—'इदं खो पन भिक्खवे दुःखं अरियसच्चं जन्मापि दुःखं, जरापि दुःखा, मरणमपि दुःखमथ च दुःख-दुःखसमुदय-दुःखनिरोध-दुःखनिरोधगामिनी प्रतिपत्' साक्षात्कारपुरःसरं सर्वजीवलोकसमुद्धाराय प्रवाहितेति विषयो न तिरोहितं विदुषाम्। एवमेव वैदिकर्षिकपिलस्य सांख्यदर्शनमाध्यात्मिकाधिदैविकाधिभौतिकदुःखानामात्यन्तिका-पघाताय प्रवृत्तमस्ति। अथ चेदं सांख्यदर्शनं बुद्धाविर्भावात् पूर्वमासीदिति शास्त्रपर्यालोचनेन सुतरां सिद्ध्यति।

द्वयोः समानाधारान्वेषणात् पूर्वमिदमवगन्तव्यं यदेतयोर्मध्ये बहवो मतभेदा अपि वर्तन्ते। मुख्यत आत्मेश्वरसृष्टिकर्तृत्वस्वतःप्रामाण्यनित्यताक्षणिकतादिविषयेषु

---

१. पाश्चात्त्यदर्शनम्, श्लोकमयम्, पं. त्र्यम्बक-आत्मारामभण्डारकरप्रणीतम्—प्रथमपद्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गभीरा परम्परागतमतभेदाः सन्ति। परमेते विभेदा चिन्तनक्षेत्रे वर्तन्ते, न तु व्यवहारदशायाम्। एतत्तुल्यविभेदा वैदिकदर्शनेषु न्यायवेदान्त-सांख्यादिदर्शनेष्वपि राजन्त एव। एवमेव बौद्धसम्प्रदायेषु हीनयान-महायान-सौत्रान्तिक-वैभाषिक-योगाचारमाध्यमिकेष्वपि दरीदृश्यन्त एव। अतः सैद्धान्तिकविरोधेनोभयोर्मूलधारयोः शाश्वतसम्बन्धस्यापाकरणं कर्तुं न शक्यते।

इदं तावत् प्रसिद्धं यद् बुद्धसमये वैदिककर्मकाण्डप्रपञ्चेन लोका उद्विग्नाः समभवन्। तस्मादेव ते जातिवादादिभेदविरहितं बुद्धमार्गमङ्गीकृतवन्तः।

गौतमबुद्धस्याविर्भावो वैदिकसंस्कृतिसम्पन्ने शुद्धोदनप्रासादे समजायत। शुद्धोदनसभायां वेदादिशास्त्रनिष्णाताः सुधियः शास्त्रचिन्तननिरता भवन्ति स्म। एतच्च तथ्यं प्रायः प्रथमशताब्द्यां समुत्पन्नेन बौद्धविदुषा स्वकीयबुद्धचरितमिति ग्रन्थे विस्तरेण विवेचितम्। ते च पण्डिताः सर्वगुणसम्पन्ना आसन्निति प्रमाणयत्यश्वघोषकविः। यथा हि—

विप्राश्च ख्याताः श्रुतशीलवाग्भिः
श्रुत्वा निमित्तानि विचार्य सम्यक्।
मुखैः प्रफुल्लैः चकितैश्च दीप्तै-
र्भीतप्रसन्नं नृपमेत्य प्रोचुः।।

एतेन कथनेन तदानीन्तना वैदिकाः सर्वे स्वार्थपरायणा आसन्निति समारोपः स्वतो निरस्तो जायते। तेषां वैदिकविदुषां वैशिष्ट्यं वर्णयँल्लिखति कविरश्वघोषः[1] —

एवं नृपः प्रत्ययितैर्द्विजैस्तैराश्वासितश्चाप्यभिनन्दितश्च।
शङ्कामनिष्टां विजहौ मनस्तः प्रहर्षमेवाधिकमारुरोह।।
प्रीतश्च तेभ्यो द्विजसत्तमेभ्यः सत्कारपूर्वं प्रददौ धनानि।
भूयादयं भूमिपतिर्यथोक्तो यायाज्जरामेत्य वनानि चेति।।

अस्मिन् प्रसङ्ग इदमप्यवधेयं यत् शुद्धोदनपुत्रः सिद्धार्थो यः परवर्तिकाले गौतमबुद्धनाम्ना ख्यातो बभूव, जननमरणरहस्यं जिज्ञासमानः सर्ववैभवपरिपूर्णं राजप्रासादं पत्नीं पुत्रञ्च विहाय तदानीन्तनतत्त्वचिन्तनपरायणानां मुनीनां

१. त्रय एव श्लोका बुद्धचरितस्य प्रथमसर्गे द्रष्टव्याः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहून् आश्रमान् जगाम। एतस्मिन्नेव क्रमे सांख्यदर्शनाचार्यस्याराडकलामस्याश्रमं प्राप्य तत्त्वविषयकान् बहून् प्रश्नान् समुपस्थापयामास। यथोल्लिखितमार्यशिव-घोषेण[१] —

तत: शमविहारस्य मुनेरिक्ष्वाकुचन्द्रमाः।
अराडस्याश्रमं भेजे वपुषा पूरयन्निव॥

स चाराडो मुनिस्तत्त्वजिज्ञासवे सिद्धार्थाय सांख्यदर्शनाभिमतं रहस्यं समुपदिदेश[२]। तद्यथा—

इत्यराडो यथाशास्त्रं विस्पष्टार्थं समासतः।
तमेवान्येन कल्पेन धर्ममस्मै व्यभाषत॥

यद्यप्याश्रमाणां भ्रमणेन मुनीनां सङ्गत्या च सिद्धार्थस्य सन्देहनिवृत्तिर्न जाता, तथाप्येतत्सङ्गत्या तत्तत्त्वजिज्ञासा बलवत्तरा जाता। षड्वार्षिकं कठोरं तपस्तप्त्वा सञ्जाते तत्त्वसाक्षात्कारे मुनिनाऽराडकलामेन समुपदिष्टसांख्यदर्शनस्य स्पष्टः प्रभावः परिलक्षितः। विविधदुःखनिवृत्त्यर्थं सांख्यदर्शनं प्रवृत्तमिति लेखारम्भ एव सूचितम्। सांख्यदर्शनस्येदमादिमं सूत्रमस्ति—अथ त्रिविधदुःखात्यन्त-निवृत्तिरत्यन्तपुरुषार्थः। दुःखत्रयनिवृत्त्यर्थमेव सांख्याः पञ्चविंशतितत्त्वानां विवेचनं कुर्वन्ति। एवमेव बुद्धोपदेशा अपि चतुर्ष्वार्यसत्येषु दुःख-दुःखकारण-दुःखनिरोध-दुःखनिरोधमार्गात्मकेषु समवलम्बिताः सन्ति। अतः सत्स्वप्यनेकासु बाधासु वैदिक-बौद्धानां चिन्तनसरणिरेकैवास्ति। गन्तव्यञ्चास्ति मोक्षाख्यमनिर्वचनीयतत्त्वं यत्र सर्वदुःखोपशमनं जायते। वैदिकमार्गविषये ब्राह्मणविषये च बुद्धस्य कीदृशं मतमासीदित्यवबोधाय धम्मपदस्य पद्यमिदमवगन्तव्यं समन्वयकाङ्क्षिभिः[३] —

वाहितपापोति ब्राह्मणो समचरियासमणोति वुच्चति।
पव्वाजप मत्तनो मलं तस्मा पव्वजितोति वुच्चति॥

येन स्वपापानि वाहितानि स ब्राह्मणोऽस्ति। यश्च सममाचरति सः श्रमणोऽस्ति। येन च चित्तमलमपवारितं सः प्रव्रजित इति कथ्यते। न केवलमेतदेवापि तु ब्राह्मणप्रशंसापि कृता भगवता बुद्धेन। यथा हि[४] —

१. बुद्धचरितम्, सर्गः १२, श्लोकः १।
२. तत्रैव ४५ तमं पद्यम्।
३. धम्मपद, ब्राह्मणवग्गो, श्लोक-६।
४. तत्रैव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न ब्राह्मणस्स पहरेय्य नास्स मुञ्चेत ब्राह्मणो।
धी ब्राह्मणस्य हन्तारं ततो धी यस्य मुञ्चति।।

ब्राह्मणं कोऽपि न प्रहरेत्। ब्राह्मणोऽपि प्रहर्तारं न प्रहरेत्। ब्राह्मणप्रहर्तारं धिक्, तं प्रतिप्रहर्तारमपि धिक्।

यथा भगवता बुद्धेन ब्राह्मणानां सम्मानः कृतः, ब्राह्मणत्वञ्च गुणाधारितमिति स्वीकृतम्। एवमेव वैदिकपरम्परायामपि बुद्धो विष्णोश्चतुर्विंशत्यवतारेषु स्वीकृतः। कर्मकाण्डावसरे क्रियमाणसङ्कल्पारम्भेऽपि बुद्धावतारे इति पदं योजितम्। एतेनापि द्वयोः परस्पराश्रयत्वमन्योन्याश्रयत्वं वा सुतरां सिद्ध्यति।

अनया रीत्या वैदिकबौद्धयोरन्योन्याश्रयत्वमतिप्राचीनकालादेवाविच्छिन्नरूपेण प्रवहमानमस्ति। भविष्यत्कालेऽप्ययं सम्बन्धोऽनयैव रीत्या देदीप्यमानं स्थास्यति, नास्त्यत्र शङ्काया लेशमात्रमपि। सामान्यतो वैदिका बौद्धाश्चैतेषु विषयेषु समानं मतं धारयन्ति—(१) कर्मफलम्, (२) पुनर्जन्म, (३) मोक्षः/निर्वाणम्, (४) निर्वाणस्य मोक्षस्य वानिर्वचनीयता, (५) संसारस्य दुःखरूपत्वम्, (६) दानस्य/परोपकारस्य महत्त्वम्, (७) त्यागमहत्त्वम्, (८) अहिंसासत्यास्तेयादिसद्गुणानां पालनम्, (९) भोगनिन्दा, (१०) संसारस्य क्षणभङ्गुरत्वम्। भक्तेः स्वरूपमपि वैदिकबौद्धयोः प्रायः समानमस्ति। आचार्यशान्तिदेवानुसारमुपासनास्वरूपमित्थमस्ति—(१) वन्दनम्, (२) पूजनम्, (३) शरणगमनम्, (४) पापदेशना, (५) पुण्यानुमोदना, (६) बुद्धाध्येषणा, (७) याचना, (८) बोधिचित्तोत्पादः, (९) बोधिपरिणामना चेति। वैदिकपरम्परापोषकपुराणेषु च नवधा भक्तिरुपवर्णिता। यथा हि—(१) स्मरणम्, (२) कीर्तनम्, (३) पूजनम्, (४) पादसेवनम्, (५) अर्चनम्, (६) वन्दनम्, (७) दास्यम्, (८) सख्यम्, (९) आत्मनिवेदनमिति। एतेन साम्येनोभयोः पारस्परिकः सम्बन्धः प्राचीनतमो घनिष्ठतमश्चेति विज्ञातं भवति।

यद्यपि सिद्धान्ततो बौद्धाः कर्मकाण्डविरोधिनोऽनीश्वरवादिनश्चेति कथ्यन्ते, परं सम्प्रति सर्वत्रैव बौद्धमन्दिरेषु गोम्पा-स्तूपविहारादिषु च कर्मकाण्डप्रयोगाः प्राचुर्येणावलोकयितुं शक्यन्ते। एवमेव केचन विवेचका वैदिकानां प्रवृत्तिवादित्वं बौद्धानाञ्च निवृत्तिवादित्वं साधयितुमीहन्ते। तत्कृते बहूनि प्रमाणानि तर्कांश्च समुपस्थापयन्ति[१]। त इदमपि प्रमाणयितुं यतन्ते यद् वैदिकेषु यन्निवृत्तिवादित्वमवलोक्यते तद् बौद्धप्रभावादेवेति।

१. बौद्ध धर्म के विकास का इतिहास—प्रो. जी.सी. पाण्डेय, भूमिकायाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं सप्तमशताब्द्यां समुत्पन्नेन वैदिकधर्मध्वजवाहकेनाचार्यशङ्करेण स्पष्टतो वैदिकमार्गस्यैव प्रवृत्तिनिवृत्तिलक्षणे प्रतिपादिते। यथा हि—'द्विविधो हि वैदिको धर्मः—प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च'[१]। एतेन वैदिकाः केवलं प्रवृत्तिवादिन इति कथनं न तावत्सत्यसंवलितं प्रतीयते। एतत्तावद् वक्तुं शक्यते यत् प्रारम्भिककाले बौद्धाः केवलं निवृत्तिपरायणा बभूवुः। गार्हस्थ्यविषये न तावच्चिन्तितं बुद्धेन यावद्धि संन्यासविषये विवेचितम्। परं परवर्तिकाले बौद्धैरपि गार्हस्थ्यमहत्त्वमुररीकृतम्। भिक्षुणीनां सङ्घोऽपि निर्मितः। मध्यकाले भारतवर्षे बौद्धसिद्धान्तह्रासे तत्र गृहस्थाश्रमोपेक्षापि महत्त्वपूर्णं कारणमिति वक्तुं शक्यते। एवमेव वैदिकानामियं मान्यतापि शनैः शनैः क्षीणतरा जाता यत् पुत्रोत्पत्तिं विना नरकान्मुक्तिर्न जायत इति। अतो निष्कर्षरूपेणेदं वक्तुं शक्यते यद् वर्तमानसमये द्वयोरेव (वैदिकबौद्धयोः) प्रवृत्तिनिवृत्तिलक्षणं दृश्यते। अयमपि वैदिक-बौद्धयोः समन्वयहेतुर्भवितुमर्हति।

यद्यपि वर्तमानकाले कतिपये जनाः कलुषितमानसाः परस्परं विभेदमुत्पादयितुं कृतप्रयत्ना दृश्यन्ते, तथापि नाद्य ते सफलीभूताः। यतो हि पन्थानावेतौ कामक्रोधमोहादिविरहितैर्बुद्धबोधिसत्त्वमुनिभिः समाविष्कृतौ। एतयोः समुद्गमस्थलं गन्तव्यस्थलञ्चैकमेव। यथोक्तं केनापि विदुषा[२]—

अद्वैतवादस्य हि पूर्वभूमिं मन्येऽहमेतं ननु बौद्धवादम्।
अयुक्तमेवास्त्यनयोर्विरोधो यतः श्रुतिः सा जननी द्वयोर्हि॥

अत्रार्यसनातनशब्दविषयेऽपि चिन्तनीयम्। यतो हि शब्दावेतौ वैदिकबौद्धयोः शास्त्रेषु प्राचुर्येण प्रयुज्येते। वैदिकाः प्रायेण सनातनशब्देन वैदिकी परम्परा गृह्यत इति विश्वसन्ति। परं बौद्धशास्त्राणामनुशीलनेन तत्रापि सनातनशब्दस्य भूयान् प्रयोगो लब्धः। एतद्विषये बुद्धेनैवमभिहितम्—

नहि वेरेन वेराणि सम्मन्तीध कुदाचनम्।
अवेरेण च सम्मन्ति एस धम्मो सनन्तनो॥

अतो निष्कर्षरूपेणेदं वक्तुं शक्यते यद् वैदिका बौद्धाश्चैकस्यामेव भूमौ समुत्पन्नाः, एतयोर्विकासः, समुन्नतिः, अवनतिश्च सहैव जाताः, जायन्ते च। एकमृतेऽपरं रिक्तमिव प्रतीयते। अतो हेतोर्दार्शनिकैः सामान्यजनैश्चैतद्विज्ञाय प्रवर्तितव्यमिति शम्।

१. श्रीमद्भगवद्गीताभाष्यस्योपोद्घातेऽवलोकनीयम्।
२. 'बौद्ध दर्शन और वेदान्त' प्रस्तावनायाम्।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्ते च—

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्॥
भवतु सब्ब मंगलं रक्खन्तु सब्ब देवता।
सब्ब बुद्धानुभावेन सदा सोत्थी भवन्तु ते॥

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्णुबलिसंस्कारः

डॉ. वेदान्तं श्रीविष्णुभट्टाचार्यः

वरिष्ठव्याख्याता

आलयसंस्कृतिः, राष्ट्रियसंस्कृतविद्यापीठम्

तिरुपतिः (आन्ध्र-प्रदेशः)

* * *

अस्यां भारतीयसंस्कृतिसम्प्रदायपरम्परायां मानवान् सुसंस्कर्तुमनेके संस्काराः स्मृतिधर्मसूत्रप्रयोगग्रन्थेषु उपदिष्टास्सन्ति। ते तावद् गर्भाधानादारभ्य अन्त्येष्टिपर्यन्तं वर्तन्ते। संस्कारेष्वेतेषु केचन गर्भसंस्काराः केचन शारीरकाः केचन अपरसंस्काराश्च। संस्कारस्तावद् द्विविधो वर्तते—ब्राह्मो दैव इति। तयो-र्ब्राह्मास्तावद् गर्भाधानादयः। पाकयज्ञ-हविर्यज्ञ-सोमयज्ञादयो दैवा भवन्ति। ऋषीणां सलोकतां समानतां सायुज्यं पदं गन्तुं मार्गभूता ब्राह्मसंस्काराः। देवानां सलोकतां समानतां सायुज्यं पदं गन्तुं मार्गभूता दैवसंस्कारा भवन्ति।

ब्राह्मसंस्कारेषु वैष्णवत्वसम्पादनाय उत्तमप्रपत्तेरङ्गभूततया गर्भाधानादिषु विद्यतेऽन्यः कश्चन विष्णुबलिसंस्कारः। अयं संस्कारस्तावद् वैखानसगृह्यसूत्रे बोधायनगृह्यसूत्रे अग्निवेश्यगृह्यसूत्रे च उपदिष्टो वर्तते।

विष्णुबलिसंस्कारस्यास्य स्वरूपं कीदृशमिति? इदानीं यथामति पत्रेऽस्मिन् मयाऽत्र परिशील्यते।

संस्कारस्य आवश्यकता

ऋतुसङ्गमन-गर्भाधान-पुंसवन-सीमन्त-विष्णुबलीति पञ्चसंस्कारा गर्भ-संस्कारा भवन्ति। गर्भसंस्कारस्यान्तिमो विष्णुबलिसंस्कारः। वैखानसा अभिप्रयन्ति, गर्भरक्षणार्थम् आगर्भवैष्णवत्वसिद्ध्यर्थं गर्भचक्राङ्कणदीक्षासम्पादनार्थमष्टमे मासे अयं च संस्कारोऽवश्यमनुष्ठेय[१] इति।

गर्भोपनिषदि 'अष्टमे सर्वसम्पूर्णो भवतीति' उक्तरीत्या अष्टमे मासे मातृगर्भे विद्यमानः शिशुः सर्वाङ्गैः सर्वलक्षणसम्पन्नो भवतीति धिया तस्मिन्नेव मासे भगवतः

---

१. श्रीवैखानसमहिममञ्जरी।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थितिकारकस्य श्रीमहाविष्णोरनुग्रहसम्पादनार्थं प्रथमगर्भे विद्यमानाय शिशवे भगवच्छक्तिं प्रेषयन्ति अनेन संस्कारेण।

अष्टमे मासे पूर्वपक्षे पुण्ये नक्षत्रे सप्तम्यां द्वादश्यां वा तिथौ रोहिण्यां श्रावण्यां वा नक्षत्रे अयं संस्कारः करणीय इति अग्निवेश्य[१]-बोधायनगृह्यसूत्रयोः[२] अस्य संस्कारस्य कालः प्रतिपादितो वर्तते।

संस्कारप्रयोगः

विष्वक्सेनं सम्पूज्य पुण्याहजलैः सर्वं सम्प्रोक्ष्य होमं हुत्वा गृहस्थः केशवादिद्वादशमूर्तीन् विष्णुना सह आवाह्य भगवद्विग्रहाणां स्नपनविधानेन स्नपनं कृत्वा अभ्यर्च्य विशेषविष्णुदैवत्यैर्मन्त्रैर्द्वादशाहुतिभिराज्यहोमं हुत्वा आज्यसंयुक्तं पायसं विष्णवे विनिवेद्य तेन होमः कार्यः। ततः ऋग्यजुस्सामाथर्वणैर्मन्त्रै-वैष्णवैर्मन्त्रैश्च विष्णुं संस्तुत्य प्रणामैः पायसशेषं पत्नीं प्राशयेत्[३]।

विशेषेण सुदर्शन-पाञ्चजन्यमन्त्राभ्यामायुधौ द्वौ शङ्खचक्रौ अग्नौ तप्त्वा पायसे निक्षिप्य पायसं पत्नीं प्राशयेद् यजमान इति आनन्दसंहितायामुपदिष्टम्[४]। अनेन कर्मणा धन्यो भाग्यवान् गर्भवैष्णवो गर्भचक्राङ्कितः सुतो जनिष्यतीति[५], अयञ्च जनो मन्त्रसंस्कृतोऽपि भवेदिति स्पष्टमवगम्यते।

पाञ्चरात्रदीक्षोक्तवज्जननानन्तरं भुजाभ्यां तप्तचक्राङ्कणं निषिध्यते वैखानसग्रन्थे।

अनेन विष्णुबलिना वीर्यवत्तरः पुरुषो जन्यत इति बोधायन[६]-अग्निवेश्य[७]-गृह्यसूत्रयोर्विव्रियते।

संस्कारफलम्

सर्वकारणभूताय श्रियःपतये शेषभूतस्यास्य दासस्यानुसन्धानविधानमिति या वैदिकी उत्तमप्रपत्तिरस्ति तस्याः प्रतीकभूतः, नारायणायैव सर्वकालसर्वावस्थोचित-सर्वविधकैङ्कर्याणि स्युरिति भावनया सर्वकारणभूताय

---

१. अग्नि.गृ.सू. २.५.७; २. बो.गृ.सू. १.११.२।

३. श्रीवैखानसकल्पसूत्रम् (स्मार्तम् ३.१३); ४. दशमोऽध्यायः।

५. तत्सुतो भाग्यवान् धन्यो गर्भवैष्णवसंज्ञिकः।
अप्राकृतो महात्माऽसौ गर्भचक्रेण लाञ्छितः॥ (आनन्दसंहिता १० अध्यायः)

६. बो.गृ.सू. १.११.१४; ७. अग्नि.गृ.सू. २.५.७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्णवे तुभ्यमिति भरन्यासप्रकारो यो भवेत् तस्य प्रमेयभूतः, महाविश्वासपूर्वक-मनन्यसाध्ये स्वाभीष्टे या शरणागतिर्वर्तते तस्या निदानभूतः, दिव्यायुध-दिव्यभूषण-दिव्यपरिजन-अप्राकृत-अमेय-सत्यकाम-सत्यसङ्कल्पत्वादिगुण-रूप-सौन्दर्यादिभिर्विराजमानस्य श्रीमहाविष्णोरर्चनाविधौ गुरुशिष्यपरम्परानुगतेन वैदिकविधानेन योग्यतासम्पादनार्थञ्च अयं विष्णुबलिसंस्कार उद्दिष्टो भवेदिति वैखानसग्रन्था[१] विस्तृततया प्रतिपादयन्ति।

संस्कारमन्त्राः

ॐ भूः पुरुष-
ॐ भुवः पुरुष-
ॐ सुवः पुरुष-
ॐ भूर्भुवस्सुवः पुरुष-
केशव-
नारायण-
माधव-
गोविन्द-
विष्णु-
मधुसूदन-
त्रिविक्रम-
वामन-
श्रीधर-
हृषीकेश-
पद्मनाभ-
दामोदर-
'आपोहिष्ठा'
'हिरण्यवर्णाः'
'पवमानस्सुवर्जनः'
'अतो देवा'
'विष्णोर्नुकं'

१. दशविधहेतुनिरूपणम्, वैखानसमहिममञ्जरी, आनन्दसंहिता।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

'तदस्य प्रिय'

'प्रतद्विष्णुः'

'परो मात्रया'

'विचक्रमे'

'त्रिर्देवः पृथिवी'..............

वैखानस-अग्निवेश्य-बोधायनगृह्यसूत्रेषु त्रिषु इमे विष्णुबलिसंस्कारमन्त्रा एकरूपतया प्रतिपादिता इति वक्तुं नास्ति विप्रतिपत्तिः।

विष्णोरर्चनाविधौ अधिकारसिद्ध्यर्थमागर्भवैष्णवत्वसम्पादनार्थमुत्तमप्रपत्तेर्निरूपणार्थं शरणागत्या भगवतः प्राप्त्यर्थञ्च विष्णुबलिसंस्कारो वैदिकमार्गेण वैखानसकल्पसूत्रादिग्रन्थेषूपदिष्टो वर्तत इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमद्भागवतदर्शने कार्यकारणभावविमर्शः

डॉ. विन्ध्येश्वरीप्रसादमिश्रो 'विनयः'
उज्जयिनीस्थविक्रमविश्वविद्यालयीयसंस्कृतप्राध्ययनकेन्द्रे
(स्नातकोत्तरसंस्कृतविभागे) उपाचार्यः

***

यः सृष्ट्वा जगदञ्जसाऽञ्जितदृशा तत्राविशल्लीलया
नानात्वं बिभराञ्चकार च पुनर्बिम्बात्मना भानुवत्।
यस्मिन् प्रोतमिदं प्रपञ्चपटलं सूत्रे यथा विद्रुमा-
स्तं श्रुत्यन्तसुरद्रुमं द्रुतिमतां चित्तेषु भान्तं नुमः॥१॥

यत्पादपङ्कजमरन्दमधुव्रतानां
नान्या रतिर्न च गतिर्भवतीह भूयः।
तं सृष्टिसर्जनविसर्जनपोषणानां
सत्कारणं धृतगुणं हरिमानमामः॥२॥

वेदान्तस्य तुरीयं प्रस्थानं यत्समन्वयेत्याख्यम्।
'रसभाष्यं' स्वोपज्ञं वेदव्यासस्य नैजसूत्राणाम्॥३॥

श्रीमद्भागवतं तत् पुराणरम्यं तथापि सच्छास्त्रम्।
परमरसं मधुकाव्यं भगवद्रूपञ्च नूयते नित्यम्॥४॥

करणं कारणं यच्चाकरणं कारणात्परम्।
सत्कार्यञ्चाप्यसत्कार्यमकार्यं तदुपास्महे॥५॥

अथाष्टादशपुराणेष्वन्यतमत्वेऽपि श्रीमद्भागवतं वेदान्तदर्शनस्य तुरीयं सर्वसमन्वयाख्यं प्रस्थानं, वेदान्तसूत्राणाञ्च स्वयं सूत्रकृद्भगवद्वेदव्यासेन बादरायणापरनामधेयेन सन्दृब्धं 'रसभाष्य'मित्यस्माभिः प्रमाणपुरस्सरं स्वीयेष्वितरेषु

CC-0. In Public Domain. Gurukul K...

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रबन्धजातेषु[१] सविस्तरं प्रत्यपादि, सम्प्रति सम्प्रतिपाद्यतेऽत्र श्रीमद्भागवतदर्शनदृशा कार्यकारणभावस्य स्वरूपमिति विद्वद्भिः सानुग्रहं परामृष्टव्यम्।

तत्रास्तिकनास्तिकभेदेन द्विधा विभक्तेषु भारतीयदर्शननयेषु समासतश्चत्वारो वादा असत्कार्यवादसत्कार्यवादारम्भवादविवर्त्तवादाख्याः सुगतमतावलम्बिनां शून्यवादिनां, कपिलसिद्धान्तानुयायिनां सांख्यानामक्षपादपक्षपातिनां नैयायिकानां, केवलाद्वैतराद्धान्तमङ्गीकुर्वतां वेदान्तिनाञ्च पर्यायेण प्रथन्त इति सर्वसम्प्रतिपन्नोऽयं विषयो दर्शनारण्यसञ्चरणचणेषु विचक्षणेष्विति सूत्ररूपेणात्र दिङ्निर्देशस्तद्यथा माध्यमिकसम्प्रदायिनो बौद्धाः—

न सन्नासन्न सदसन्न चाप्यनुभयात्मकम्।
चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः[२]॥

यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे।
सा प्रज्ञप्तिरुपादाय प्रतिपत् सैव मध्यमा[३]॥

इत्युक्तदिशा शून्यमेव परमतत्त्वमङ्गीकुर्वन्तस्तत एव प्रतीत्यसमुत्पादत्वेन वस्तुजातस्य सांवृत्तिकीं[४] सत्तां सङ्गिरन्ते। सांख्यास्तु—

असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात्कारणाभावाच्च सत्कार्यम्[५]॥

इति पञ्चभिर्हेतुभिः कारणे पूर्वत एव सद्रूपत्वं कार्यस्य समाम्नासिषुः। अपि च, तार्किकाः कार्यकारणयोरत्यन्तं भेदमभ्युपगच्छन्त उत्पत्तेः प्राक्कार्यस्य कारणे प्रागभावं, तन्नाशे च तत्र ध्वंसाभावं मन्वाना आरम्भवादमभिप्रयन्ति। वस्तुतोऽयमप्यसत्कार्यवाद एव, परमाणव एव भावकार्यसमवायिकारणत्वमावहन्तः

---

१. (क) 'श्रीमद्भागवतप्रस्थाने प्रस्थानरत्नाकरे च शब्दप्रमाणस्वरूपविमर्शः' इत्यस्मिन् 'प्रस्थानरत्नाकरीयविद्वत्परिचर्चा'ख्यग्रन्थे प्रकाशिते निबन्धे (पृ.४५८-४८९, प्रकाशिका- श्रीवल्लभाचार्यट्रस्ट, कंसाराबाजार माण्डवीकच्छ, गुजरात)।

(ख) 'श्रीमद्भागवतदर्शनम्' इति सद्यः प्राकाश्यमानस्य बृहत्सन्दर्भस्य प्रथमेऽध्याये।

२. माध्यमिककारिका-१.७।

३. तत्रैव—२४.१८।

४. व्यावहारिकीं, तद्यथाऽऽहुः—व्यवहारमनाश्रित्य परमार्थो न देश्यत इति। (माध्यमिककारिका-२४.१८)

५. सांख्यकारिका, ९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सृष्टिमारभन्त इत्यन्वर्थकत्वं पृथगभिधानस्यास्य। अथ शङ्करभगवत्पादपादानुयायिनः केवलाद्वैतवेदान्तिनः—

अभेदिनो निर्विकृतेरनेकमृषास्वरूपान्तरदर्शकत्वम्।
विवर्तशब्दार्थ इह प्रसिद्धस्तरङ्गभेदादिव चन्द्रभेदः[1]॥

इत्युक्तरीत्या रज्जोरविकृताया भुजङ्गाकारेणेव ब्रह्मणो जगदात्मना भानमात्रत्वात् 'एकमेवाद्वितीयं'[2] 'नेह नानास्ति किञ्चन'[3] इत्यादिश्रुत्यन्तवचनप्रामाण्यं पुरस्कुर्वन्तः, कारणस्य तत्त्वादप्रच्युतस्य कार्यात्मना विवर्तमानत्वमेव प्रथयाञ्चक्रुः। सौत्रान्तिकवैभाषिकयोः सुगतसाम्प्रदायिकयोः सङ्घातवादोऽप्यत्रानुसन्धेयो, बाह्यार्थानां क्षणिकत्वात्पञ्चस्कन्धानां सङ्घातस्यैव जगत्कारणत्वाङ्गीकारादिति वादसङ्क्षेपः।

श्रीमद्भागवते कार्यकारणसन्दर्भा विविधेषु प्रसङ्गेषु विप्रकीर्णा बहुधा च समुपलभ्यन्ते, यथा—

कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः।
बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः[4]॥
महत्तत्त्वाद्विकुर्वाणादहं तत्त्वं व्यजायत।
कार्यकारणकर्त्रात्मा भूतेन्द्रियमनोमयः[5]॥
कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः।
भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परम्[6]॥
कर्तृत्वं करणत्वञ्च कार्यत्वं चेति लक्षणम्।
शान्तघोरविमूढत्वमिति वा स्यादहङ्कृतेः[7]॥

इत्यत्र कार्यशब्देन प्रायशोऽधिभूतं कारणशब्देनाध्यात्मं कर्तृशब्देन चाधिदैवतमभिप्रेयते[8]। सृष्टिनिरूपणप्रसङ्गे पौराणिकी पारिभाषिकशब्दपद्धतिरियमन्यत्रापि पुराणेषु न शक्यानुसन्धाना[9]। किन्तु—

१. सङ्क्षेपशारीरके, २।६६;
२. छान्दोग्योपनिषदि, ६।२।१।
३. बृहदारण्यकोपनिषदि, ४।४।१९;
४. श्रीमद्भागवते, २।५।१९।
५. तत्रैव-३।५।२९;
६. तत्रैव-३।२६।८।
७. तत्रैव-३।२६।२६।
८. पद्येष्वेतेषु श्रीधराचार्यादिभिः कृताष्टीका अनुसन्धेयाः।
९. अव्यक्तं कारणं यत् तत्...... (श्रीविष्णुपुराणे-१।१९) इत्यादौ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युक्तं न चित्रं त्वयि कार्यकारणे,
सर्वात्मनि व्यतिरिक्ते च वस्तुतः[१]।
कार्यकारणवस्त्वैकमर्शनं पटतन्तुवत्[२]।
नमो नमस्तेऽखिलकारणाय, निष्कारणायाद्भुतकारणाय[३]।

इत्यादौ दार्शनिकदृष्ट्यैव शब्दयोरनयोर्व्यवहारः कृतो भगवता भागवतकारेण, तथाप्यत्र कार्यस्य कारणयोश्च किं लक्षणं? कति भेदाः? ग्रन्थाभिमतसिद्धान्ते च का सङ्गतिरिति विस्पष्टमेकत्र निरूपितं च नोपलभ्यत एतस्य सर्गादिलक्षणनिबद्ध-पुराणकलेवरत्वाद् विविधकथाभिः साकं मुख्यतया श्रीमद्भगवल्लीलाना-माकरत्वादध्यात्मपारोक्ष्यपद्धतिमयत्वाच्चेति भूषणमेतन्न दूषणम्। टीकाकृद्भिश्च प्रायः स्वस्ववेदान्तप्रस्थानान्यनुसरद्भिः, श्रीमद्भागवतस्य स्वकीयं विवक्षितं, समन्वयपरमधिकारिभेदानुगुणं 'लीलोपात्तद्वैतोपलक्षितं केवलाद्वैतं' पृथक्प्रस्थानत्वेन न दर्शितमिति विनतवचनैरत्र कश्चन प्रयासो विधीयते।

ननु, श्रीमद्भागवतमेव प्रमाणपरमत्वेन स्वीकुर्वद्भिः श्रीवल्लभाचार्य-मतानुयायिभिः शुद्धाद्वैतिभिः, स्वीयेषु ग्रन्थेषु यत्कार्यकारणयोः स्वरूपं प्रत्यपादि तद्भागवतदर्शनस्यैवेति चेन्न, श्रीमद्भागवते नैकान्ततो वाल्लभस्य शुद्धाद्वैतस्यान्यस्य वा केवलाद्वैतविशिष्टाद्वैतद्वैताद्वैतादीनामेकतमस्यैव समर्थनं तत्र तत्र समेषां वेदान्तभेदानामास्तिकषड्दर्शनानामपि च नैकेषां, विशिष्य सांख्ययोगमीमांसादीनां यथाऽवसरमङ्गीकारात्, पुष्टिमार्गव्यतिरिक्तभिन्नभिन्न-सम्प्रदायाचार्यैः श्रीचित्सुखश्रीधरवीरराघवशुकसुधीरूपजीवगोस्वामिप्रभृतिभिः स्वस्वसम्प्रदायानुकूलतया पुराणशिरोमणेरस्य व्याख्यानात्, तत्कृतलक्षणादीना-मस्माभिरुपरिष्टान्निराकरिष्यमाणत्वाच्चेति नास्मदुपक्रमस्य गतार्थत्वम्।

श्रीमद्भागवतं वस्तुतः समेषामपि वेदान्तप्रस्थानानां सारं, ब्रह्मात्मैकलक्षणं कैवल्यैकप्रयोजनं शास्त्रम्; किन्त्वेतन्न नीरसं, परमरसात्मकत्वात्, पारमहंस्यज्ञानपरमपि न सत्कर्मोपास्तिनिरपेक्षं वैधीप्रेमलक्षणेति द्विविधभक्ति-सहचरित्वाच्चेत्यत्राधिकारिभेदाज्ज्ञानवद्भक्तेरपि मोक्षदातृत्वमथायमेवास्य शङ्करभगवत्पादाभिमतात्प्रस्थानाद् व्यतिरेको विशेषश्च, शिष्टमन्यत्सर्वं तदनुसारेणैव। उक्तमप्यत्रैव—

---

१. श्रीमद्भागवते-५।८।५; २. तत्रैव-७।१५।६३।
३. तत्रैव-८।३।१५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्ववेदान्तसारं यद्ब्रह्मात्मैकत्वलक्षणम्।
वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनम्[१]॥

सर्ववेदान्तसारं हि श्रीमद्भागवतमिष्यते।
तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित्[२]॥

श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं
यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते।
तत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं
तच्छृण्वन् विपठन् विचारणपरो भक्त्या विमुच्येन्नरः[३]॥

अतः कार्यकारणभावोऽप्यत्र शाङ्करकेवलाद्वैतवत्पारमार्थिकव्यावहारिक-प्रातिभासिकरूपसत्तात्रयवैशिष्ट्यात्तत्र तत्र वैभिन्न्यं समश्नुते, अत्रापि केवलाद्वैतस्यैव प्रयोजनीयत्वात्, यथा—

एक एवाद्वितीयोऽभूत् (श्रीमद्भागवते, ११।९।१७)।

परावराणां परम आस्ते कैवल्यसञ्ज्ञितः।
केवलानुभवानन्दसन्दोहो निरुपाधिकः॥ (तत्रैव, ११।९।१८)

केवलात्मानुभावेन। (तत्रैव, ११।९।१९)।
कैवल्यं सात्त्विकं ज्ञानम्। (तत्रैव, ११।२५।२४)
कैवल्यैकप्रयोजनम्। (तत्रैव, १२।१३।१२)

सत्ताभेदस्योपलक्षकाः सन्दर्भा अप्यत्रावलोकनीयाः, यथा पारमार्थिकसत्तायाः सङ्केतो—'ब्रह्मैव भाति सदसच्च तयोः परं यत्' (श्रीमद्भागवते, ११।३।३७) इत्येवमादिषु वचनेषु। व्यावहारिकसत्तायाः—'न सूरयो हि व्यवहारमेनं तत्त्वावमर्शेन समामनन्ति'। (श्रीमद्भागवते, ५।११।१)। 'व्यवहृतये विकल्प इषितोऽन्धपरम्परया' (श्रीमद्भागवते, १०।८७।३६) इत्यात्मकेषु, प्रातिभासिकसत्तायाश्च—'अविद्यमानोऽप्यवभाति हि द्वयोर्ध्यातुर्धिया स्वप्नमनोरथौ यथा। (श्रीमद्भागवते, ११।२।३८)

---

१. श्रीमद्भागवते-१२।१३।१२;
२. तत्रैव-१२।१३।१५।
३. तत्रैव-१२।१३।१८।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः।
नश्वरं गृह्यमाणञ्च विद्धि मायामनोमयम्।।
(श्रीमद्भागवते, ११।७।७)

स्वप्नो यथाऽऽत्मनः ख्यातिः संसृतिर्न तु वास्तवी।
(११।११।२)

इत्येतेष्वन्येषु च सन्दर्भेषून्नेतुं शक्यते। श्रीमद्भागवते कार्यकारणभावाभिव्यञ्जकानि कानिचन वचनानि—

स एवेदं ससर्जाग्रे भगवानात्ममायया। (१।२।३०-३१)

एकः सृजसि भूतानि भूतैरेवात्ममायया।।
आत्मन् भावयसे तानि न पराभावयन्स्वयम्।
आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः।। (२।५।४-५)

यथात्ममायायोगेन नानाशक्त्युपबृंहितम्।
विलिम्पन् विसृजन् गृह्णन् बिभ्रदात्मानमात्मना।।
क्रीडस्यमोघसङ्कल्प ऊर्णनाभिर्यथोर्णुते। (२।९।२६-२७)

त्वमेव भगवन्नेतच्छिवशक्त्योः सरूपयोः।
विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा।। (४।६।४३)

अहं ब्रह्मा च शर्वश्च जगतः कारणं परम्।
आत्मेश्वर उपद्रष्टा स्वयं दृगविशेषणः।।
आत्ममायां समाविश्य सोऽहं गुणमयीं द्विजः। (४।७।५१)

एकस्त्वमेव भगवन्निदमात्मशक्त्या
मायाख्ययोरुगुणया महदाद्यशेषम्।
सृष्ट्वाऽनुविश्य पुरुषस्तदसद्गुणेषु
नानेव दारुषु विभावसुवद्विभासि।। (४।९।७)

यो माययेदं पुरुरूपयाऽसृजत् (४।२४।६१)।

सकलजगत्कारणकारणभूतः (५।९।३८)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युवां तु विश्वस्य विभू जगतः कारणं परम्।
इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया।
तस्या अधीश्वरः साक्षात्त्वमेव पुरुषः परः।। (६।१९।१२)

एकस्त्वमेव जगदेतदमुष्य यत्त्व-
माद्यन्तयोः पृथगवस्यसि मध्यतश्च।
सृष्ट्वा गुणव्यतिकरं निजमाययेदं
नानेव तैरवसितस्तदनुप्रविष्टः।। (७।९।३०)

त्वं माययाऽऽत्माश्रयया स्वयेदं निर्माय विश्वं तदनुप्रविष्टः।
(८।६।११)

यो दुर्विमर्शपथया निजमाययेदं सृष्ट्व-(१०।४९।२९)।

यथोर्णनाभिर्हृदयादूर्णां सन्तत्यवक्त्रतः।
तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वरः।। (११।२०।२१)

यस्मिन्निदं प्रोतमशेषमोतं पटो यथा तन्तुवितानसंस्थः।
(११।१२।२१)

सर्गादौ प्रकृतिर्ह्यस्य कार्यकारणरूपिणी।
सत्त्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्त ईक्षते।। (११।२२।१७) इति।

वचनेष्वेषु व्यावहारिकरूपेण जगतः कार्यत्वं, मायाशक्तिद्वारेणाद्वयात्मना भगवत एव कारणत्वमिति बुद्धिपथमारोढुं क्रमते, इममेव पन्थानमनुसरन्तष्टीकाकृतोऽपि व्याख्यानानि व्यधुस्तद्यथा—

'युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्यतिरिक्ते च वस्तुतः'। (५।१८।५) इत्यस्य 'भावार्थदीपिकायां' श्रीधरस्वामिनः—'यतो मायया सर्वात्मनि कार्यस्य कारणे स्त्रष्टरि कर्मयुक्तं वस्तुतः सर्वव्यतिरिक्ते निरुपाधावनावृतत्व-मकर्तृत्वञ्च युक्तम्'। अथ वीरराघवाचार्यो 'भागवतचन्द्रिका'याम्—'कार्यकारणरूपत्वञ्च न तादात्म्यनिबन्धनं किन्त्वात्मा देवो जात इत्यादितदन्तरात्मप्रयुक्तमित्याशयेन सर्वात्मनीत्युक्तम्। एवम्भूतेऽपि वस्तुतः प्रकृतिपुरुषाभ्यां विविक्तस्वरूपतो व्यतिरिक्ते साक्षात्कार्यत्वकारणत्वो-भयावस्थान्वयरहिते'।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

'सिद्धान्तप्रदीप' कृच्छुकदेवस्तु—'कार्याणि महदादीनि तृणान्तानि तेषां कारणे पूर्वपूर्वरूपेण तज्जनके। प्रकृतिमधिष्ठाय महत्तत्त्वमुत्पादयति तदधिष्ठायाहङ्कारमित्येवमुत्तरोत्तरं बोध्यम्'।

विश्वनाथचक्रवर्त्यपि 'सारार्थदर्शिन्याम्', यथा—'मायायास्त्वच्छक्तित्वात् तत्कार्याणां कारणे, अतः सर्वात्मनि सर्वस्वरूपे मायायाः स्वरूपशक्त्याभावात्सर्वतो व्यतिरिक्ते चेति'।

तथाप्यत्र कार्यकारणभावस्य व्यवहारार्थमेव स्वरूपावस्थितिर्न पारमार्थिकीत्यपि सुतरां निरूपितमत्र मूले टीकाग्रन्थेषु च, यथा—'कार्यकारणवस्त्वैकमर्शनं पटतन्तुवत्' (७।१५।६३)। इत्यस्य मूलग्रन्थस्य व्याख्याने—'कार्यकारणयोर्वस्त्वैक्यस्य मर्शनमालोचनं तन्तुरेव न पटः' इति 'श्रीधरस्वामिवर्याः'। 'यत्कार्यकारणयोर्वस्तुनोरैक्यदर्शनं तद् भावाद्वैतं भावयोः कार्यकारणवस्तुनोरद्वैतम्' इति वीरराघवाचार्यः। 'कार्यकारणभेदस्यावस्तुत्वात् मिथ्यात्वादित्यर्थः' इति गोस्वामिगिरिधरलालो 'बालप्रबोधिन्याम्'। 'विकल्पस्य कार्यकारणभेदस्यावस्तुत्वाद् हेतोः पटतन्तुवत् तन्तुरेव पट इतिवत् सर्वत्र कार्यकारणयोर्वस्त्वैक्यस्य दर्शनमालोचनं तद्भावाद्वैतमुच्यते' इति श्रीगङ्गासहायः स्वकीयायाम् 'अन्वितार्थप्रकाशिकायाम्'।

अयमत्राभिसन्धिः—तात्त्विकदृष्ट्या नासतः कार्यस्योत्पत्तिः शक्यसम्भवा, तस्याविद्यमानत्वात्, न वा सतो विद्यमानत्वात्। न च साऽभिव्यक्तिमात्रं, तस्या अपि विद्यमानत्वेऽभिव्यञ्जनवैयर्थ्यापत्तेरसत्त्वेऽभिव्यञ्जनाशक्त्यत्वादिति श्रीमद्भागवते कार्यकारणात्मिकायाः सृष्टेः कल्पिततत्वमेव, यथोक्तं तत्रैव—

तस्मादिदं जगदशेषमसत्स्वरूपं
स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम्।
त्वय्येव नित्यसुखबोधतनावनन्ते
मायात उद्यदपि यत्सदिवावभाति।। (१०।१४।१२)

मायामात्रमिदं राजन् नानात्वं प्रत्यगात्मनि। (१२।२८।१३)

तस्माच्छ्रीमद्भागवतप्रस्थानमनुसृत्य—'व्यवहारे तज्जन्यत्वावभासकत्वे सति तत्तत्त्वानुसन्धानात्स्वाकारबाध्यत्वं कार्यत्वम्' इति कार्यस्य, 'व्यावहारानुगुणं स्वतः स्वेतरजन्यत्वप्रतिभासकत्वं कारणत्वम्'। इति कारणस्य च लक्षणं सञ्जाघटीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयमस्याभिप्रायः—यावत् 'सर्वं खल्विदं ब्रह्म' इति न पारमार्थिकी बुद्धिस्तावदयं घटोऽयञ्च पट इति व्यवहारस्तत्रायं मृत्कुलालजन्योऽयञ्च तन्त्वादिजन्य इति मिथो विविक्तः प्रतिभासस्तत्त्वानुसन्धाने तु, योऽयं घटोऽसौ न घटस्तत्त्वतो मृदेव नायं पटस्तन्तुसङ्घात एवेति विनिश्चयात्तत्तत्प्रतीतेर्बाध इति लक्षणान्वितिः। अथ कारणत्वम्—

स्वता हि ब्रह्मापरपर्यायस्यात्मन एव भावः, 'आत्मावास्यमिदं सर्वम्'[1] 'तस्मान्न ह्यात्मनोऽन्यस्मादन्यो भावो निरूपितः'[2] इत्यसकृत् सिद्धान्तितत्वात्। स एवात्मा मायामाधाय स्वस्मिन् स्वकृतप्रपञ्चरूपकार्यस्योपादानत्वं निमित्तत्वञ्चारोप्य कारणत्वं कर्तृत्वञ्च धारयति—

'आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः'[3]। इत्यपि तत्रैव समाम्नातत्वात्। मायाऽङ्गीकारे तस्य स्वेतरजन्यानां जगदादीनां प्रतिभासकत्वं तदपेक्षयैव च कारणत्वव्यपदेशः, यथोक्तमत्रैव—

त्वय्यग्र आसीत्त्वयि मध्य आसी-
त्वय्यन्त आसीदिदमात्मतन्त्रे।
त्वमादिरन्तो जगतोऽस्य मध्यं
घटस्य मृत्स्नेव परः परस्मात्[4] ॥

एकस्त्वमेव सदसद् द्वयमद्वयञ्च
स्वर्णं कृताकृतमिवेह न वस्तुभेदः।
(श्रीमद्भागवते-८।१२।८)

यथा हिरण्यं बहुधा समीयते
नृभिः क्रियाभिर्व्यवहारवर्त्मसु।
(श्रीमद्भागवते-१२।४।३१) इति।

इत्थं कारणत्वलक्षणसिद्धिः। अथ व्यावहारिकत्वमश्नुवदपि कारणत्वं चेदभिमतं तत् किंस्वरूपकं किम्प्रकारकमिति चेत्, ब्रूमः—

---

१. श्रीमद्भागवते-८।१।१०; २. तत्रैव-११।२८।७।
३. तत्रैव-११।२८।६; ४. तत्रैव-८।६।१०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एक: स्वयं सञ्जगत: सिसृक्षयाऽ-
द्वितीययाऽऽत्मन्नधियोगमायया।
सृजस्यद: पासि पुनर्ग्रसिष्यसे
यथोर्णनाभिर्भगवन् स्वशक्तिभि:।।
(श्रीमद्भागवते-३।२१।१९)

यथोर्णनाभिर्हृदयादूर्णां सन्तत्यवक्त्रत:।
तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वर:।।
(श्रीमद्भागवते-११।९।२१)

सृष्ट्वा पुनर्ग्रससि सर्वमिवोर्णनाभि:। (श्रीमद्भागवते-१२।८।४१)

इति ग्रन्थोक्तवचनप्रामाण्यान्मुण्डकश्रुत्युक्तदिशा[१]ऽत्राप्यभिन्ननिमित्तोपादानत्वमेव वेदितव्यम्। उपादानत्वमत्र—

यदुपादाय पूर्वस्तु भावो विकुरुते परम्।
(श्रीमद्भागवते-११।२४।१७)

इति ग्रन्थोक्तवचनविन्यासेनैव निष्कृष्यावगन्तुं शक्यते। अस्यायमर्थस्तावत्— यद्यन्मूलतत्त्वं, कारणत्वेन तदुपाधिना उपादाय स्वीकृत्य, मनसि समुपकल्प्य इति यावत्। पूर्वस्तु भाव: कारणत्वकल्पनाभाव: परं विकुरुते तज्जन्यकार्यत्वाकारेणावधारयति प्रमाता, तत्तस्य कल्पितकार्यस्योपादानकारणम्। श्रीमद्भागवतेऽस्य परमार्थदृष्ट्या विवर्तत्वं, व्यवहारदृशा तु परिणामित्वमित्युभयथाऽपि सङ्गमयितुं न दु:शकम्, यथा हि—

गुणव्यतिकराकारो निर्विशेषोऽप्रतिष्ठित:।
पुरुषस्तदुपादानमात्मानं लीलयाऽसृजत्।।
(श्रीमद्भागवते-३।१०।११)

इत्यत्र परमात्मन: कालरूपेण निमित्तता, पुरुष(चैतन्य)रूपेण चोपादानता लीलया मायया व्यपदिश्यते। एवमत्र ब्रह्मणो विवर्तोपादनत्वं सिद्धम्। विवर्तोपादानत्वं च स्वासमसत्ताककार्यजनकत्वं, यथा शुक्ते: रजतं प्रति तथा चात्र प्रपञ्चस्य ब्रह्मभिन्नसत्ताकत्वेन मिथ्यात्वाद् उपादानं शुद्धमद्वितीयं ब्रह्मेति निरवद्यम्।

---

१. यथोर्णनाभि: सृजते गृह्णते च यथा पृथिव्यामोषधय: सम्भवन्ति।
यथा सत: पुरुषात्केशलोमानि तथाऽक्षरात्सम्भवतीह विश्वम्।। (मुण्डकोपनिषदि-१।१।७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यावहारिकपरिणाम्युपादानत्वेऽपि प्रमाणमत्रैव—'प्रकृतिर्ह्यस्योपादानम्' इति। (श्रीमद्भागवते-११।२४।१९)

अनयैव दृष्ट्या तत्र तत्र श्रीमद्भागवते तृतीयस्कन्धादौ सृष्टिवर्णनं सांख्योक्तरीत्या नैयायिकाद्युक्तरीत्या वा न विसङ्गतिमुपैति। ततः—'माया मनः सृजति'। (श्रीमद्भागवते-७।९।२१) इति कथञ्चित्प्रधानकारणत्वम्।

चरमः सद्विशेषाणामनेकोऽसंयुतः सदा।
परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः॥

(श्रीमद्भागवते-३।११।१)

इत्यत्र,

'अणुर्द्वौ परमाणू स्यात्त्रसरेणुस्त्रयः स्मृतः।

(श्रीमद्भागवते-३।११।५)

इत्यत्र चारम्भवादो न न सार्थकत्वमावहतः। 'परिणाम'शब्दोऽप्यत्र रूपान्तरापत्यर्थकः—

कालाद्गुणव्यतिकरः परिणामः स्वभावतः।

(श्रीमद्भागवते-२।५।२२)

इत्यादावुपलभ्यमानो व्याख्येयः। वस्तुतस्तु लोकव्यवहारसिद्धविग्रहोऽयं कारणकार्यभावो मृद्घटयोरिव परिणामिपरिणामभावो मायाजगतोरेव, न तु जगद्ब्रह्मणोः। ब्रह्माश्रयानिर्वचनीयाविद्यापरिणामित्वाज्जगदपि मिथ्याऽनिर्वचनीयं वा, परिणामिपरिणामयोः समसत्ताकत्वात्।

अथ ब्रह्मणो निमित्तत्वमप्यौपाधिकं श्रीमद्भागवते तत्र तत्रावलोकयितुं न कठिनम्, यथा—

स एवेदं ससर्जाग्रे भगवानात्ममायया। (श्रीमद्भागवते-१।२।३०)
एकः सृजसि भूतानि भूतैरेवात्ममायया। (श्रीमद्भागवते-२।५।१८)
स वा एतस्य सन्द्रष्टुः शक्तिः सदसदात्मिका।
माया नाम महाभाग ययेदं निर्ममे विभुः॥

(श्रीमद्भागवते-३।५।२५)

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकस्त्वमेव भगवन्निदमात्मशक्त्या
मायाख्ययोरुगुणया महदाद्यशेषम्।
सृष्ट्वाऽनुविश्य पुरुषस्तदसद्गुणेषु
नानेव दारुषु विभावसुवद् विभासि।।
(श्रीमद्भागवते-४।९।७)

सृष्ट्वा गुणव्यतिकरं निजमाययेदं...। (श्रीमद्भागवते-७।९।३०)

त्वं माययाऽऽत्माश्रयया स्वयेदं
निर्माय विश्वं तदनुप्रविष्टः। (श्रीमद्भागवते-८।६।११)

यो दुर्विमर्शपथया निजमाययेदं
सृष्ट्वा गुणान् विभजते तदनुप्रविष्टः। (श्रीमद्भागवते-१०।४९।२९)

इत्यादौ सर्गादिकर्तृत्वं मायिकमथ च न पारमार्थिकमिति प्रतिपन्नम्। वस्तुतोऽत्र ब्रह्मणो मायोपहितरूपेण मायापरिणामात्मकवृत्तिद्वारेक्षितृत्वेनैव जगतो निमित्तकारणत्वम्।

अत्रेदमवधेयम्—ब्रह्मणो जगदाकारेण परिणममानाविद्याविषयत्वेनोपादानता निमित्तत्वं तु तदुपाधिमायावृत्त्याश्रयत्वेन सर्वतादात्म्येन साक्षाद् वेति मायोपहिताभिन्ननिमित्तकारणत्वं नासमञ्जसम्। तथ्यमिदं प्रथम एव ब्रह्मसूत्रगर्भिते मङ्गलपद्ये प्रत्यपीदद्भागवतकृद्भगवान् द्वैपायनर्षिः 'जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराडि'त्यत्र समाधिभाषया, तदेव चेत्थं प्राकाशि टीकाकृद्भिराचार्यैः—

'अनुवृत्तत्वात्सद्रूपं ब्रह्म कारणं मृत्सुवर्णादिवत्....तर्हि किं प्रधानं जगत्कारणत्वाद् ध्येयमभिप्रेतं नेत्याह, अभिज्ञो यस्तम्। 'स ईक्षत लोकान्नु सृजा इति। स इमाँल्लोकानसृजत्' इति श्रुतेः। 'ईक्षते नाशब्दम्' इति न्यायाच्च.....स्वतःसिद्धज्ञानः परमेश्वर एव जगत्कारणम्।' (इति श्रीधरस्वामिनः)

'तत्र भाव्यवस्थाविशेषवतः प्रागवस्थायोगित्वमुपादानं निमित्तत्वं नाम कर्तृत्वम्। एवञ्चात्र जगज्जन्मादिप्रत्युपादानत्वनिमित्तत्वोभयविधकारणत्वं ब्रह्मणो लक्षणं विवक्षितम्। ननु लोके मृत्कुलालयोर्विभिन्नयोरेवोपादानत्वनिमित्तत्वदर्शनात् कथमेकस्योभयविधकारणत्वमित्यत्राह—अन्वयादितरश्चार्थेष्वभिज्ञ इति। अर्थेषु कार्यभूतेषु देवमनुष्यादिष्वन्यादनुवृत्तेरुपादानत्वं व्यतिरेकादनन्वयात्प्रकृतिपुरुषाभ्यां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विलक्षणत्वेन तन्नियन्तृतया पृथगेवावस्थानान्निमित्तत्वं चैकस्य ब्रह्मण उपपन्नमित्यर्थः। कुलालस्यासर्वशक्तेर्घटादिषु मृत्कार्येष्वनन्वयान्नोपादानत्वमचेतनाया मृदस्तु व्यतिरेकाभावान्न न निमित्तत्वं ब्रह्मणस्तु प्रत्यक्षादिप्रमाणान्तरानवगतस्य केवलवेदान्तैकसमधिगम्यस्य.....उभयविधकारणत्वोपपत्तिरिति भावः'। (इति च श्रीवीरराघवाचार्यः)।

इत्थं श्रीमद्भागवतप्रस्थाने मायाविशिष्टस्यैव ब्रह्मणः कारणत्वं न शुद्धस्य। ब्रह्माश्रिता माया परिणामिकारणं, मायाविषयो जीवाश्रिताऽविद्याविषयो वा ब्रह्म, विवर्त्तोपादानं तत्र च ब्रह्मव्यतिरेकेणेतराभाव एव जगत इति कार्यस्य यावल्लक्ष्यकालमनवस्थितस्य तटस्थलक्षणत्वसङ्गतिः, निमित्तकारणताऽप्यत्र मायोपहितस्य तत्परिणामात्मकवृत्तिद्वारेक्षितृत्वेनेति पूर्वमेवोक्तम्। अतोऽत्र कार्यकारणतादिकं न पारमार्थिकमित्यवगन्तव्यम्।

नन्वसतोऽपारमार्थिकस्य कुतो ह्यर्थक्रियाकारित्वमथ च कथं व्यावहारिकत्वमिति चेत्, न, रज्जुकल्पितसर्पेणाप्यज्ञानदशायां भीत्या कम्पादिसद्भावदर्शनादिति न चारोपितस्य मिथ्याभूतस्यार्थक्रियाकारित्वायोगः। व्यावहारिकत्वमपि, यावद् व्यवहरणीयार्थबाधस्तावत्पर्यन्तमबाध्यत्वेनाप्युपपद्यते, न हि सार्वकालिकाबाध्यत्वं व्यवहारायापेक्ष्यते, न च यत्र यत्र व्यावहारिकत्वं तत्र तत्राबाध्यत्वमिति व्याप्तिनियमः। अबाध्यत्वस्य च त्रिधात्वमिति वस्तुगतिः, प्रतीतिकालाबाध्यत्वेन व्यवहारकालाबाध्यत्वेन त्रैकालिकाबाध्यत्वेन च। आद्यं प्रातिभासिकसत्त्वं द्वितीयं व्यावहारिकसत्त्वं तृतीयञ्च पारमार्थिकसत्त्वमिति श्रीमद्भागवतेऽपि सत्तात्रैविध्यस्याभ्युपगमनमुक्तपूर्वमेव। अर्थक्रियाकारिताऽपि, प्रातिभासिके प्रवृत्तिपर्यन्ता, व्यावहारिके हानोपादानाभिव्यापिनी, पारमार्थिके तु वृत्त्यात्मिकाऽभिज्ञामात्रपर्यन्तेति विस्तरभिया नेह प्रतन्यते, श्रीमद्भागवते चास्य प्रमाणं, यथा—

छायाप्रत्याह्वयाभासा ह्यसन्तोऽप्यर्थकारिणः।
एवं देहादयो भावा यच्छन्त्यामृत्युतो भयम्॥

(श्रीमद्भागवते-११।२८।५)

अत्र 'भावार्थदीपिका'कृत्स्वामिपादाः—'नन्वेवं सति देहादिभावानामप्यसत्त्वात्कथं भयहेतुत्वं तत्र सदृष्टान्तमाह—छायाप्रतिबिम्बः, प्रत्याह्वयः प्रतिध्वनिः, आभासः शुक्तिरजतादिः, एते यथाऽसन्तोऽप्यर्थकारिणो भवन्ति। आमृत्युतो

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

मृत्युमभिव्याप्य यद्वा मृत्युर्लयो यावन्नैव लीयन्ते तावत्पर्यन्तमित्यर्थः (भयादिजनकत्वमाबिभ्रत्येवेति शेषः)'। इति सर्वमनवद्यम्।

यत्तु, शुद्धाद्वैतवेन्दान्तविदुषा श्रीपुरुषोत्तमगोस्वामिना श्रीमद्भागवतं पुरस्कुर्वता—''कारणत्वञ्च चाविर्भावशक्त्याधारत्वम्। उपादानस्थं कार्यं या व्यवहारगोचरीकरोति सा शक्तिराविर्भाविका। आविर्भावश्च व्यवहारयोग्यत्वं तिरोभावश्च तदयोगित्वं ते द्वे यद्यपि भगवतः शक्ती.....तथापि भगवता विभज्य तत्र तत्र स्थापित इति तस्य तस्य तत्तदाविर्भावकत्वात्तत्तच्छक्तित्वमुच्यते तथात्वञ्चैकादशस्कन्धे उक्तम्—'अब्जयोनि'मुपक्रम्य 'विश्लिष्टशक्तिर्बहुधेव भाति बीजानि योनिं प्रतिपद्य यद्वत्' इति कथनात्। एवञ्च व्यवहारे यत्र यदाविर्भाविका शक्तिस्तत्तस्य कारणं, यस्य च यतो व्यवहारयोग्यत्वं तत्तस्य कार्यम्''[1] इति लक्षणमुक्तमनयोः कार्यकारणयोस्तच्छ्रीमद्भागवताभिमतदर्शनदृष्ट्या युक्त्याऽपि च न विचारसहं, श्रीमद्भागवते शक्तिपदेन सर्वत्र मायायास्तद्गुणानां तद्बहुविधविच्छित्तीनाञ्चैवाभिप्रेतत्वादाविर्भावतिरोभावाख्यशक्तिद्वयस्य पृथक् सत्तानुपलम्भात्।

वाल्लभा मायां नाङ्गीकुर्वन्ति, कथञ्चिदङ्गीकारेऽपि तस्या मिथ्यात्वमनिर्वचनीयत्वं वा नैवाभ्युपगच्छन्ति। ब्रह्मवादिब्रुवा इमे जगदिदं सत्यं ब्रह्मस्वरूपं मन्वते, तथापि ब्रह्मणोऽद्वयत्वं सजातीयादिभेदराहित्यञ्च न निरासाञ्चक्रिरे। एतेषामस्मिन् राद्धान्ते आविर्भावतिरोभावयोः प्रक्रिया कथं प्रथत इति सोपपत्तिमुदाजहार सिद्धान्तपारदृश्वाऽन्यो विद्वान् श्रीबालकृष्णभट्टनामधेयः स्वकृत'प्रमेयार्णव'नामके ग्रन्थे—'भगवदिच्छायां कारणरूपायां मृदि विद्यमानस्य भगवद्रूपघटस्याविर्भावः, एवं सति यस्मिन् भगवद्रूपे रूपान्तरस्याविर्भावस्तत् कारणं, यथा मृद्, यस्य रूपस्य प्राकट्यं तत्कार्यं घट इति कार्यकारणव्यवस्था बोध्या'[2]। इति श्रीमद्भागवतप्रस्थानदृष्ट्या कक्षीकर्त्तुमशक्यत्वाद् वादोऽयं प्रतिविधीयते—

किं भोः! ब्रह्मसजातीयविजातीयस्वगतभेदरहितमिति भवन्तोऽप्यस्मद्रीत्यैवाभिप्रयन्ति न वा?

---

१. प्रस्थानरत्नाकरस्य प्रमाणपरिच्छेदे।

२. प्रमेयार्णवस्य प्रपञ्चभेदनाम्नि प्रकरणे, पृ.३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'सजातीयविजातीयस्वगतद्वैतवर्जितम्'।

(वल्लभकृततत्त्वार्थदीपनिबन्धे, शास्त्रार्थप्रकरणे)

इति स्वाचार्यमुखेनैव निरूपणात्। अथाविर्भावतिरोभावनामशक्तिद्वयी कथमभ्युपगन्तुं शक्यते, तस्य ब्रह्मातिरिक्तसत्ताकत्वान्मायाऽनङ्गीकारे प्रातिभासिकत्वविरहितत्वात् तथात्वे च द्वैतापत्तेरवश्यम्भावित्वात्?

भागवते या शक्तिः सा मायात्मिकैव, भवदभिमता च सत्तात्मिका, सा च किं ब्रह्मणो विलक्षणा सलक्षणा स्वरूपान्तर्गता वेति? आद्यं न, विजातीयभेदस्वीकार्यत्वात्; द्वितीयमपि न, सजातीयत्वसम्पातात्; तृतीयमपि मतं च न, क्षोदक्षमं स्वगतभेदावहत्वादिति। अपि च, बृहत्त्वाद् बृंहणत्वाद्वेति 'ब्रह्म'-पदसङ्गतिः। भवन्मतेऽपि 'ब्रह्म व्यापकमव्ययम्'[१] इत्युच्यते। आविर्भावतिरोभावौ च सापेक्षिकत्वं, प्राकट्यनिलीनत्वधर्मसङ्गत्यर्थं स्वाश्रयाद् भिन्नत्वमपेक्षेते, तौ यदि ब्रह्माश्रितौ, कुतस्तदतिरिक्ताधारत्वं श्रयेताम्? सत्याधारे द्वैतदुर्ग्रहस्तदनङ्गीकारे च स्वरूपासिद्धिरित्युभयतःपाशा रज्जुः। किञ्च, यस्य कार्यस्य यत्र यस्मिन् क्षणे आविर्भावस्तस्मिन्नेव न तिरोभाव इत्यन्योन्याभावोऽवश्यमभ्युपेयस्तत्सर्वविधाभावं निराचिकीर्षुभिर्भवद्भिर्न शक्यमेतयोः सङ्गमनमिति भवदभिमतशक्तिद्वयी न मायातो व्यतिरिक्ता भ्रमरूपायास्तस्याः स्वीकार एव सर्वाक्षेपजालोच्छेदशक्यत्वादिति नः प्रतिपत्तिः। तस्मात्, 'कारणत्वमाविर्भावकशक्त्याधारकत्वमित्यादि भवदुक्तमलक्षणमिति प्रतीमः[२]। अस्मन्मते तु ब्रह्मण एकस्यैव पारमार्थिकी सत्ता, सृष्ट्यादिकं मायिकमवस्तुभूतं, माया चौपचारिकदृष्ट्या शक्तिपदवाच्याऽपि न ब्रह्मणोऽतिरिक्तेति तद्द्वारेण कार्यकारणभावस्याप्यपारमार्थिकत्वमिति सुवचम्। पर्यन्ते समापनमङ्गलपद्यैरेभिः सम्पूर्यते श्रीहरिगुरुकृपोद्भावितो लघीयानयं सन्दर्भस्तद्यथा—

अब्धौ वारिपृषत्कवद् व्यधुरमी जीवाः पृथक्कल्पनां
यन्मायावशगाश्च संसृतिमये चक्रे क्रमन्तः पुनः।
कादाचित्कमथ प्रपत्तिपरमं लब्ध्वा महत्तत्क्षणं
यद् दृष्ट्वैव विदन्ति तत्त्वमखिलं तं ज्ञानमूर्तिं नुमः॥

१. तत्त्वार्थदीपस्य शास्त्रार्थप्रकरणे।

२. द्रष्टव्योऽत्र—''प्रस्थानरत्नाकरनिरूपितकरणकारणसामान्यस्वरूपस्य 'श्रीमद्भागवतप्रस्थान'-दृष्ट्या परीक्षणम्'' इत्यस्माभिर्वाल्लभविद्वद्गोष्ठ्यां पठितः, तत्सङ्ग्रहे प्रकाशनार्थं स्वीकृतश्च निबन्धः।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्राब्धिमन्थाचलविग्रहाणां तत्त्वामृतोल्लाससुधाधराणाम्।
श्रीनिश्चलानन्दमहेश्वराणां[१] जयन्ति पादाब्जमरन्दरेणवः।।
वृन्दाविपिनविहारं व्रजजीवनमिन्द्रनीलमणिहारम्।
ध्यायेन्नन्दकुमारं सुखसारं वल्लवीनयनतारम्।। इति।

१. पूर्वाम्नायगोवर्द्धनमठपुरीपीठाधीश्वरशङ्कराचार्यवर्याणामस्मत् पूज्यपादगुरुवर्याणामित्याशयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं तावत् काव्यतत्त्वम्

प्रो. रेवाप्रसादो द्विवेदी
निदेशकः
कालिदाससंस्थानस्य
२८ महामनापुरी, वाराणसी

***

यस्य हि विश्वजनीनो व्याहारः 'काव्यं काव्य'मिति, 'पोएट्री पोएट्री'ति, 'शायरी शायरी'ति तस्यास्य किं नु स्वालक्षण्यमिति प्रश्ने भारतीयानामाचार्याणां यान्युत्तराणि तेषामेतावन्मात्रमेव गात्रं यद् वाक्यात्मा शब्दविशेष एव काव्यमिति। वाक्यं शब्दबन्धविशेषस्य संज्ञेति शब्दस्य गुणपदार्थत्वेन काव्यस्यापि सप्तसु पदार्थेषु गुणपदार्थत्वमापद्यते। यच्चास्य वैशिष्ट्यं तत् स्वगतं स्वप्रतिपादितार्थगतञ्चेति द्विविधं साकल्येन। तत्र—

स्वगतम्

स्वगतं वैशिष्ट्यं वर्णस्वालक्षण्यगतं वर्णविन्यासगतञ्च। तत्राद्यं वृत्तिरिति परिभाष्यते। कोमला परुषा चेत्यादिस्तस्याः संज्ञा। कोमलत्वं परुषत्वं च वर्णगतौ विशेषौ। तौ हि गुणपदव्यपदेश्यौ।

यच्च विन्यासगतं वर्णवैशिष्ट्यं तस्यानुप्रास इति, यमकमिति, श्लेष इति च संज्ञा। तस्यास्य वैशिष्ट्यस्यान्वयव्यतिरेकौ वर्णमात्रविन्याससद्भाविति शब्दपरिवृत्तिमसहमानत्वेनानयोः शब्दैकाश्रितत्वं प्रतीमः।

स्वप्रतिपादितार्थगतम्

शब्दो हि ध्वनिरूपः। तस्य यश्चिद्गत आत्मा स स्फोटः। तत्रार्थेन सह सङ्केतग्रहः। अर्थस्याप्यर्थान्तरैः सम्बन्धः, तेषामप्यर्थान्तरैरिति तदिदं भगवत्याः प्रतिभास्वयम्प्रभाया गुहाभुवनम्। तदिदं गुहाभुवनं तादृशं यत्र प्रविष्टस्य न भवति प्रतीतिः कालस्य, न च स्फुरति मतिर्बहिरागमनस्य। समाधिमिव प्रविष्ट एषोऽनुभविता विश्वमपि विश्वोत्तीर्णत्वेन स्वदते, भुङ्क्ते, रसयति,

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

विगलितवेद्यान्तरश्च रमते, जायते चात्मारामोऽद्वयी। संवदत्यस्य चेतोधातुः कविवागुपस्थितेनाऽनुभवेन।

ये चाप्यर्थाः, एषामपि विशेषाश्चित्तवृत्तिरूपाः, ततश्चैषां सर्वेषां महासंज्ञा 'भाव' इति। अर्था अपि मधुरत्वेनोजस्वित्वेन च द्वैविध्यमाप्ता अनुभूयन्ते। एषां प्रतीतौ या स्फुटता तां 'प्रसाद' इति सङ्गिरन्ते प्राज्ञा आचार्याः। प्रसादत्वव्याप्यजातित्वमेव मधुरत्वौजस्वित्वयोः। त इमे त्रयो गुणाः—१. माधुर्यम्, २. ओज इति वैशेषिकौ द्वौ, सामान्यश्चैकः, ३. प्रसादः। अन्ये च सप्त गुणाः 'श्लेषः, सुकुमारता, अर्थव्यक्तिः, उदारत्वम्, कान्तिः, समाधिश्चेति'। त इम आ भरतमुनेरा च दण्डिनं प्रसिद्धाः। लावण्यमाभिजात्यमौचित्यं चापरे गुणा यान् वक्रोक्तिविद उदाजहुः। अत्र मम्मटादयो विप्रतिपद्यमानाः पण्डितराजादिभिरेव प्रतिक्षिप्ताः। काव्यगुणानां पृथगस्तित्वे किं मानमिति विप्रतिपत्तौ न ह्येव किमपीति केचिदातिष्ठन्ते, अनुभव एवेति तान् निराकृत्य प्रतिष्ठन्ते वामनाः, 'सन्ति केचिन्न च भवन्ति केचिदिति सन्दिहानास्तिष्ठन्ति भामहादयः'। समासगता पदसंख्या, वर्णप्रकृतिश्चोपादानकारणत्वेनामनन्ति सम्मर्शिनो विज्ञा अत्र। सेयं काव्यार्थगताया गुणव्रज्याया गाथा। शब्दगता माधुर्यादयोऽर्थमाधुर्यादीनपेक्ष्यैव आत्मानं लभन्ते।

अत्रार्थयोजनागता विशेषाः। ते च सादृश्यादयः। विविक्ताः सङ्कीर्णाः, संसृष्टाश्च भवन्ति ते। ते चामी अलङ्कारपदस्य रूढ्या समाक्रान्ता वन्यपशुमात्रवाचको मृगशब्द इव हरिणमात्ररूढ्या। वस्तुतस्तु काव्यस्य सर्वेषामेव धर्माणां महासंज्ञैषा यदुतालङ्कारः। तत्र कारपदं स्वार्थकमेव ओङ्कारपद इव। अलमिति च यदवशिष्टं पदं तद्धि परब्रह्मवाचकतया प्रसिद्धमाग्नेये महापुराणे 'अक्षरं परमं ब्रह्म सनातनमलं विदुः' इत्येवम्। तच्च प्रकृते प्रेक्षकस्यात्मतत्त्वमेव। तदिदं तत्त्वं सर्वेषामेव काव्यधर्माणां जीवातुभूतम्। एवञ्च अलङ्कार इत्येषा महासंज्ञैवैका काव्यक्षेत्रे। पर्याप्तिरस्याः पर्यायः। अत एव च काव्यशास्त्रमिदमलङ्कारशास्त्रमिति व्यपदिश्यते। क्रियाकल्पादयः पुनरस्य दूरं विप्रकृष्टाः।

रूढ्या पुनरलङ्कारशब्द एष उपमादिविच्छित्तिपरः।

एतेषामेवास्पष्टो विन्यासो लक्षणनामा धर्मः।

एतेषामेव चयनं मार्गपदेन रीतिपदेन वा व्यपदिश्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदं चात्रावधेयं यद् अलङ्कारा इमे वाक्यधर्माः। नैते तथैव स्वप्नेऽपि भवन्ति वाच्या यथा रसा भावा वा। वाक्यार्थनामाकाङ्क्षामात्रभास्यतायाः सिद्धान्तितत्वात्। यथा चैतत् तद् व्युत्पत्तिवादादिभ्यः सुखेनावसातुं शक्यम्। सेयमुक्तिव्रज्या काव्यस्य।

अथ ये तावदुच्यमाना अर्थास्तत्समवायजन्यप्रभावरूपाश्च येऽर्थास्ते रत्यादयोऽपि काव्यार्था एव, तेषामपि काव्यमात्रादेवोपलब्धेः। एषा चार्थजातिरन्तरङ्गा। अस्याः प्रतीतौ प्रमाणं भावनानामकः काव्यव्यापारः सहृदयतासतत्त्वः। रहस्यव्रज्येयं काव्यमात्रस्य। इमां प्रविष्टा भावकाः क्वचिदश्रूणि पातयन्ति, क्वचिद् दशनानि दर्शयन्ति, क्वचित् स्निग्धचेतस्कन्ति, क्वापि द्रुह्यन्ति, विस्मयन्ते, जुगुप्सन्ते च कुत्रचित्। इयमेव हि भुक्तिः। लोकोत्तरा ह्येव काव्ये सैषा, सामग्र्या अभावेऽपि पाकस्य सम्पत्तेः। सोऽयं विभावनाख्यो व्यापारो यत्र विश्वविधातापि विस्मयते। उत्पाद्यन्ते कमलानि जलमात्रगात्रे धात्रा। प्रतिपाद्यन्ते किन्तु तानि कविकर्मणा कान्तानां मुखपाणिपादादिरूपेणापि स्वैरम्। न च कुप्यति तत्र विश्वस्यास्य विधाता। विश्वमिदं भगवत्याः सूक्तिदेव्याः। अत्र प्रभवः स्फोटात्मा भगवान् शब्द एव।

अथापरं क्षेत्रं यत्र सर्वेऽप्युपर्युक्ता विशेषा अभिनयद्वारा प्राप्यन्ते, लभ्यते च रसः।

आम्। अस्ति तत्, किन्तु तत्र प्रभवत्वं भजति क्रिया, अनुक्रियात्मा। अनुक्रियया विभाविता ये भावाः सामाजिकसंवित्तिमारोहन्ति तेषामग्रिमा यात्रा काव्यवदेव सम्पद्यते, अयं तु विशेषो यदभिनये मञ्चादीनां द्रव्याणामपि भवति अभ्यर्हितत्वेनोपयोगः, काव्ये पुनः केवला भगवती वाग्देव्येव सर्वसहचमत्कारायते विश्वविवर्त्तनासु दिव्यातिदिव्यासु। उक्तमिदमस्माभिरेव—

वन्दामहे पद्मदलाभिरूपां पञ्चप्रशाखीं कविनायकानाम्।
विवर्त्ततेऽर्थात्मतया स्वयं हि यामाश्रिता काचन सूक्तिदेवी।।
(स्वातन्त्र्यसम्भवस्य-२.१)

नाट्ये ह्याङ्गिकादयोऽपि भवन्त्यभिनयाः, काव्ये पुनरेक एव वाग्रूपः सः। एवं हि नाटकं व्यापकम्, काव्यं तस्यैकदेशः। सा च भिन्ना कथा यत् काव्यार्थोऽपि नाट्यायते।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तुतस्तु आभ्यन्तर एव कश्चन व्यापारो यो हि नाट्यमिति च व्यपदिश्यते काव्यमिति च। अत एव महामुनेर्भरतस्यानुशासनं शाकुन्तलादिग्रन्थात्मना परिणतिमाप्तं यत् तस्य संज्ञा काव्यवेद इति यश्चास्य प्रयोगस्तस्य नाट्यमिति। परिणतिरियं चित्रमूर्त्यादिष्वप्यनुभूयते। अस्ति च तत्रापि परिणामो रसात्मक एव, किन्तु न भवति तत्र सृष्टिः शब्दमयी। ततश्च कलामात्रत्वमेव तेषाम्, न तु काव्यत्वम्।

अयमत्र निष्कर्षो यत् शब्दविशेष एव काव्यमिति व्यपदिश्यते। तस्य विशेषश्च बहुविधोऽपि ब्रह्मापरपर्य्यायभूतया केवलया अलङ्कार इति महासंज्ञयाऽभिधीयते। एवं चोच्यते—

आनन्दकोशस्योल्लासे लोकोत्तरविभावना।
अलङ्कृतार्थसंवित्तिः शाब्दी काव्यमितीष्यते।।[१] इति।

(काव्यालङ्कारकारिका-१)

चमत्कारजनकार्थप्रतिपादकशब्दत्वं काव्यत्वमिति च।

(रसगङ्गाधरे)

●

१. काव्यालङ्कारकारिकायां तु पाठः—'अलङ्कृतार्थसंवित्तिः कविता सर्वमङ्गले'ति। प्रकाशकः- कालिदाससंस्थानम्, २८, महामनापुरी, वाराणसी-५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिराजस्याभिराजता
(मधुपर्णीमत्ता-मत्तवारणी-सन्दर्भे)

डॉ० मनुलताशर्मा
उपाचार्या, संस्कृतविभागस्य
काशीहिन्दूविश्वविद्यालये
वाराणसी

* * *

वाग्वधूट्या उत्सवकरा मृद्वीकारसमाधुरीझराः, श्रुतिसारगायननिर्भराः, मधुपर्णीमधुकराः, इक्षुगन्धागन्धवाहाः, चित्रविचित्रकथापर्णानां विकासकराः, मत्तवारणीबन्धनकराः, वैदेहीव्यथावर्णनकरा राङ्गडाख्याननिबन्धनतत्पराः प्रो. अभिराजराजेन्द्रमिश्रा अधुनातनकवनविधाविधानकुशलेष्वभिनवकविराजोडुगणेष्वनुपमप्रातिभप्रभाप्रभासितस्वान्ततयोडुराज इव राजमाना विद्योतन्तेतराम्। न केवलं त्रिवेणीतटवासित्वेनाऽपि तु मुक्तकखण्डमहाकाव्यनिर्माणात्, श्रव्यपठ्यदृश्यकाव्यविधानात्, गद्य-पद्य-गीतिगुम्फनात्, अष्टकशतकसहस्रकनिबन्धनात्, स्तुति-चरित-संस्कृतिसर्जनात्, नाटक-नाटिकैकाङ्किप्रणयनात्, सम्पादन-सङ्कलन-समीक्षणसमीक्षणात्, संस्कृतापभ्रंशदेशीभाषासु रचनाविधानात्, विविधानां त्रिवेणीनां कवनात् 'त्रिवेणीकवि'रिति विख्याताः **प्रो. अभिराजराजेन्द्रमिश्राः** कमनीयकवनीयकलाकौशलेन तथा कवन्ते यथा सुमनसां मनांसि रसत्रिवेण्यां सुतरां निमज्जन्ति।

प्रसन्नानां कान्तगुणेन मनोहारिणीनां नानाविधश्लेषनिपुणानां रमणीनामिव वाचां विलाससौभाग्यशालिनां हृदयस्पृशां सूक्तिरत्नानां रोहणशृङ्गमालिनां, सरसकाव्यकथाकथानकस्फीतगीतिनिर्मितिचणानां, वर्णनपठनगायनपटिष्ठानां, नूतनकवनीयविधाविधानविचक्षणानां सततसयत्नसमाराधितसुरभारतीनां, शास्त्राधीतिपरिपूतमतीनां मिश्राणां किं किं वर्णये येषामुच्चारणे स्पष्टता, स्वरे मधुरता, व्यवहारे कुशलता, कर्तव्यकर्मणि दक्षता, सज्जनेऽनुरक्तता, भव्येषु पक्षपातता, अनुशासने शिष्टता सर्वान् शिष्टान् प्रभावयति। एषां कण्ठे सरस्वती,

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

मतौ गणपतिः, मुखे गीष्पतिः, नये भृगुपतिः, बुद्धौ बुधः, शिष्टे सुधाकरः, दुष्टेऽङ्गारकः, सुधीसमागमे मित्रः, शत्रौ शनिः, अत एषां निसर्गसुन्दरो व्यवहारः कं जनं न रञ्जयति।

उत्तरप्रदेशस्य जौनपुरमण्डलवास्तव्यस्य श्रीमतो दुर्गाप्रसादादभिराजीदेव्यां जाताः, प्रयागविश्वविद्यालयतो लब्धशिक्षोपाधय हिमाचलविश्वविद्यालयस्य पूर्वसंस्कृतविभागाध्यक्षाः, निर्देशने पटवः, लेखने कुशलाः, भाषणे पेशलाः, प्राशासनिके चतुराः प्रो. मिश्रा अध्यापनेन विनेयानां चेतांस्यावर्जयन्त इदानीं **सम्पूर्णानन्दसंस्कृतविश्वविद्यालये** कुलपतित्वं विभूषयन्ति।

एतद्विनिर्मितं साहित्यं विशालं गम्भीरञ्च वर्तते। द्वे महाकाव्ये, त्रयोदश-खण्डकाव्यानि, षड्नवगीतानां सङ्कलनानि, अष्टौ एकाङ्किसङ्ग्रहाः, द्वे नाटिके, पञ्च कथासङ्ग्रहाः, एकं नाटकं प्रकाशितं जनमनांसि रञ्जयन्ति साहित्याम्बुधिं वर्धयन्ति च। एतदतिरिक्तं कतिपये शोधग्रन्थाः, पाठ्यग्रन्थाः, अनूदिताः सम्पादिताश्च ग्रन्था एतेषां कृतिगौरवं गम्भीरं कुर्वन्ति। एषामेवाभिनवां कृतिं मत्तवारणीं मत्तवारिणीव गतिशीलां स्वच्छन्दां (छन्दोनिर्मुक्तां) गलज्जलिकागीतिकासमन्वितामाश्रित्य मधुपर्णीञ्च समाश्रित्याहं स्वकं शोधपत्रं प्रस्तौमि। शोधपत्रेऽस्मिन् मयाऽभिराजस्याभिराजता 'मधुपर्णीमत्ता-मत्तवारणी'-सन्दर्भे सन्दृष्टा।

मत्तवारण्यां चतुष्षष्टिमिता गलज्जलिकागीतयो निबद्धास्सन्ति तथा शाखात्रिभिः मधुपर्णी द्वाविंशतिगलज्जलिकाभिः, अष्टाविंशतिगीतिभिः, अष्टादश-मुक्तच्छन्दोभिर्भूतैः पर्णैः पर्णायिताऽस्ति। उभयोरनयोर्निबद्धा रचना विषयभेदाद् इन्द्रधनुरिव विविधवर्णालङ्कृता मयूरपिच्छवच्चित्रविचित्राः, सप्तस्वरसम्भिन्न-सङ्गीतवत् कर्णरसायनाः, प्रपाणकरसवत् सुमनोमनोहरा विलसन्ति। आसु क्वचिद् दुर्नीतिकदर्थनम्, क्वचिद् नृपनयाऽऽलोचनम्, क्वचिद् विसङ्गतिनिरूपणम्, क्वचिद् जीवनवृत्तस्य सटीकं चित्रणम्, क्वचिन्नेतृणां नग्ननिरूपणम्, क्वचित् सामयिकघटनानां सङ्घटनम्, क्वचित् कटाक्षः, क्वचित् प्रहारः, क्वचित् कशाघातः, क्वचित् शृङ्गारः, क्वचिद् विहारो गीतिषु मुखरिता अध्येतृणां हृदयं स्पृशन्ति। शोधपत्रेऽस्मिन्नेतत् सर्वं सोदाहरणं प्रपञ्चितमस्ति। जीवनवीथिकासु विचरन्तः, प्रगतिसोपानपरम्परामुल्लङ्घयन्तः, नानाविधतिक्तकटुमधुराणामास्वादान् अनुभवन्तः, मत्तवारणीं मधुपर्णीञ्च गुम्फन्तः कवयः सङ्कलितासु आसु गजलगीतिषु विविधा भावधाराः प्रवाहितवन्तः। बहुविधा एतादृश्योऽनुभूतयः शब्दबद्धा अभूवन्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

या हृदयाघातजनितव्रणान् रेखाङ्कितान् कुर्वन्ति। ईर्ष्यालूनामसूयया, द्वेषिणां दाहेन, दुरभिमानिनां कटाक्षैः, विरोधिनां व्यङ्ग्यबाणैः, मत्सरिणां मात्सर्यैर्दंशिताः स्वरा अपि यत्र तत्र विकीर्णास्सन्ति। एते सर्वे सार्वजनीनवत् प्रतीयन्ते। प्रायेण दृश्यते लोके येषामुपकृतिं वयमाचरामः, त एव न जाने कथं वैरिणो भूत्वा प्रत्यपकुर्वन्ति, येऽस्माकं साहाय्येनाग्रेसरा भवन्ति, वृद्धिञ्चाप्नुवन्ति, त एव मार्गावरोधका भूत्वाऽभिमुखं पतन्ति, सप्रयासं यान् उत्थापयामः, त एव पृष्ठतः पादकर्षणं कुर्वन्ति, येषां हितचिन्तका भूत्वा सदा समर्थनं कुर्मः, त एव तक्षकीभूय दंशनं कुर्वन्ति। एतादृशान् अनुभवान् चित्रयन्ती 'तुदन्ति मामलम्' इत्याख्या रचनाऽसंशयं श्लाघनीयाऽस्ति।

ह्यो यदीयपादकण्टकाः समुद्धृता मया।
कण्टकीभवन्त एव ते तुदन्ति मामलम्।।

यद् गृहं निवारितं प्रदीप्तवह्नितो मया।
पावकीभवन्त एव ते दहन्ति मामलम्।।

स्वाशिषा प्रवर्धिताः प्रसह्य ये मया सदा।
तापसीभवन्त एव ते शपन्ति मामलम्।।

—तुदन्ति मामलम्। (मत्तवारणी, पृ. १२४)

अद्यत्वे स्पर्धामये युगे सरलजीवनपद्धत्याः स्वीकरणमसिधारायां चङ्क्रमणमिवातीव कठिनं वर्तते। अत्र विरुद्धासु धारास्वत्यवधानेन नौसञ्चालनं करणीयं भवति, विरुद्धाः पक्षा यथाकथञ्चित् साधनीया भवन्ति—

आर्जवं निष्फलं दृश्यतेऽस्मिन् कलौ
तच्छठे शाठ्यमेवैकमाश्रीयताम्।
गौरियं गर्भिणी सोऽपि गर्भी वृषः
चित्तमेवं विवादे द्वयोश्चीयताम्।। (मत्तवारणी, पृ. ११०)

जीवनमार्गस्तेषां कृते सरलो न भवति, येषां भाग्यपङ्क्तयः प्रबला न भवन्ति, न वा ये धनाढ्यकुलावतंसा न च प्रौढहितचिन्तकसहिता भवन्ति। वस्तुतः सत्यं त्विदमेव यद् जीवनं उषसः शारदीनशृङ्गार एव न, अपि तु अमातमिस्राया गहनवितानमप्यस्ति। इदं न केवलं मृगशावकानां सविस्रम्भं क्रीडास्थानं न वा शुकशावकानां कौतुकोद्यानमपि तु शृगालवृकव्याघ्राणां सम्पातस्थानमप्यस्ति। अत्र

CC-0. In Public Domain. Gurukul Kangri C...

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथार्थतायाः कठोरभूमौ दार्शनिकानां मान्यताश्चूर्णिता भवन्ति, आदर्शानां प्रासादाः पतिता भवन्ति। एतादृशानां वर्ण्यानामङ्कनं कुर्वन्ती 'सम्प्रतीक्षन्ते समुद्घाताः' इति शीर्षकेण रचिता कविता दर्शनीयाऽस्ति—

न जातश्श्रीमतां गेहे न ते घण्टापथः पन्थाः।
शनैर्गच्छाऽध्वनि त्वां सम्प्रतीक्षन्ते समुद्घाताः॥
निजं लीलातपत्रं संवृणु भ्रातस्त्वरय पादौ।
तवैव स्वागतार्थं भो समुत्था दारुणा वाताः॥
न चेदं जीवनं क्रीडाशुकानां कौतुकारण्यम्।
वसन्त्यस्मिन्निभृतनिभृतं तरक्षुव्याघ्रसङ्घाताः॥
यमाह्वयसे स्वरक्षार्थं सुभग कान्तारकोणेऽस्मिन्।
तदीयाः खड्गधारा एव पथिकालम्भने शाताः॥

—समुद्घाताः। (मत्तवारणी, पृ. १२०)

न केवलमिदमेव, जगदिदं मरुभूमौ वात्या इव, ध्रुवप्रदेशे सीत्कारकारिशीतमिव, अफ्रीकायां निदाघदाहवद् भीषणझञ्झावातानां विपद्वात्याचक्राणां दारुणशराघातानां तीक्ष्णताया अनुभवं तान् एव कारयति, ये स्वभावतः सरलाः सन्मार्गगामिनः, छलप्रपञ्चादिरहिताश्च भवन्ति। महाकालिकां समाराधयितुं सिंहानां बलिर्न दीयते, दीयते तु तृणभक्षकानामजापुत्राणामेव—

समाजो बण्डभण्डानां निकामं चर्चरीं तनुते।
कलौ सकलाऽपि दुरवस्था कृपापथगामिनामेव॥
निहन्यन्ते न केसरिणो महाकालीं प्रसादयितुम्।
विपत्तिः केवलं छागीभुवां तृणजीविनामेव॥

—कृपापथगामिनामेव। (मत्तवारणी, पृ. १२२)

'पशुर्मया दृष्टः' नाम्नी रचना जीवनस्य विभिन्नेषु क्षेत्रेषु व्याप्तदुरवस्थासु दृष्टिपातं कुर्वाणा पशुताया बहुविधां कुरूपतां चित्रयति, यया देशः, समाजः, परिवारो व्यक्तयश्च कलङ्किता भवन्तः त्राहि त्राहीति निगदन्ति। बुभुक्षा-निद्रा-काम-क्रोध-लोभ-मोहादिभिरुद्विग्नोऽयं पशुर्भवेन्नाम मन्त्री विधायको वा, न्यायाधीशोऽपराधी वा, स्वजनसम्बन्धी नितान्तमपरिचितो वा, रेलयाने शायिकाविक्रेता भाटकसङ्ग्राहको भृतिग्रहीता शिक्षको वा, सर्वे पशव एव—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानवीयाऽऽकृतिं दृढं पुष्णन्, अद्भुतोऽसौ पशुर्मया दृष्टः।
विश्वविद्यालयेषु सोत्कोचम्, शब्दमानः पशुर्मया दृष्टः।।
दुर्विपत्तिं विधाय सर्वेषाम्, साऽट्टहासः पशुर्मया दृष्टः।।
स्वार्थसिद्ध्यै स्वराष्ट्रसम्मानम्, हन्त पणयन् पशुर्मया दृष्टः।।
न्यायपीठं कलङ्कयन्ननयैः, सत्यभक्षी पशुर्मया दृष्टः।।
—पशुर्मया दृष्टः। (मत्तवारणी, पृ. १३८)

'रहस्यं साधु जानेऽहम्' इत्याख्यायां रचनायां सतामिवाऽऽचरतां शठानाम्, अवहित्थामाचरतां खलानाम्, सुहृदमिवाऽऽचरतां कलुषितचरित्राणां दुर्हृदाम्, आर्जवमाचरतां कुटिलानां, वञ्चकानां, राजनेतॄणां रहस्योद्घाटनं कृतमस्ति—

कदाचित्सौधशृङ्गस्थोऽपि काको नैति तार्क्ष्यत्वम्।
न दोषो मृष्यते यत्नैः रहस्यं साधु जानेऽहम्।।
हृदिस्थं कालकूटं यन्निगूह्योद्गिरसि पीयूषम्।
प्रयतसे छलयितुं युक्त्याऽभिराजं तच्च जानेऽहम्।।
क्वचिद्रक्तः क्वचित्पीतः क्वचिद् वा कर्बुरः कृष्णः।
कथं कृकलासतामेषि व्रतन्ते तात जानेऽहम्।।
जितं त्वयका जगत्सर्वं यया कलया महामायिन्।
रहस्यं कृष्णवस्त्राणां त्वदीयं हन्त जानेऽहम्।।
—रहस्यं साधु जानेऽहम्। (मधुपर्णी, पृ. ३९)

'यशस्ते मयाऽवेक्षितं राष्ट्रबन्धो' इत्यभिधाना गजलगीतिरपि एतादृश्येव वर्तते, यत्र कलुषितचरित्राणां तेषां राजनेतॄणां वर्णनं कृतमस्ति, येषां स्वरूपं प्रच्छन्नमपि स्फुटायमानं वर्तते। यथा समाचारपत्रे, दूरदर्शने, आकाशवाण्यां, पत्रपत्रिकासु, जनसभासु नेतृमहोदयानां तान्येव कृत्यानि—अतिशयोक्ति-विधयाऽतीवप्रशस्तानि विधाय प्रकाशितानि भवन्ति, परं तत्रैव तेषां कलुषितमपि किं किं कृत्यं कुत्र कुत्र कथं कथं भवतीत्यस्य सुस्पष्टं चित्रणं कुर्वन्ती गीतिरियं कर्णगोचरीकर्तव्या—

समाचारपत्रेषु क्लृप्तप्रकाशं यशस्ते मयाऽवेक्षितं राष्ट्रबन्धो!
समारोहसत्रेषु पूर्णावकाशं यशस्ते मयाऽवेक्षितं राष्ट्रबन्धो!

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वया निर्मितो यः सरित्सेतुरासीत्
क्षतं विक्षतं तद्वपुर्जीर्णशीर्णम्।
तदीयेषु रन्ध्रेषु सर्पावभासं यशस्ते मयाऽवेक्षितं राष्ट्रबन्धो!
त्वयाऽऽरोपिता कर्गदे याऽऽम्रवाटी
गृहीत्वाऽर्थसाहाय्यमाप्तप्रभूणाम्।
चिरं कर्गदेष्वेव तस्यां फलन्त्यां यशस्ते मयाऽवेक्षितं राष्ट्रबन्धो!
त्वया कल्पिता राजमार्गा विचित्रा
न तेष्विष्टका नापि पाषाणखण्डाः।
तथाऽप्युत्थिते धूलिबिम्बे तदीये यशस्ते मयाऽवेक्षितं राष्ट्रबन्धो!

(मत्तवारणी, पृ. ९४)

सुरासुरनरनागदनुजदितिजादिभिर्निवासार्थं सततमभिलषणीयस्य विश्वम्भराभोगललामलीलायमानस्य भारतवर्षस्य कदाचिदासीद् धर्मराजादि-पृथ्वीराजान्तसत्यनिष्ठानां परिपूतचरितानां प्रजापालनपरायणानां नृपतीनां कृताधिष्ठाना इन्द्रप्रस्थाभिधाना नगरी राजधानी, या साम्प्रतं देहलीपदेनाभिधीयते। तत्राऽस्याः सर्वजनसम्मोहनकारिणी चञ्चच्चमत्कारिणी इदानीन्तनी काचिदभि-नवाऽद्भुता प्रभुता। तत्रत्यानां स्थितीनामतिरुचिरशैल्याऽङ्कनमकारि कविना 'राष्ट्रस्य राजधानी' इति नाम्ना गजलगीतेन यत् सद्यो हृदयं स्पृशति प्रत्यक्षञ्चानुभावयति यस्याऽनुभूतिः समाचारपत्रपत्रिकामाध्यमेनापि प्रतिदिनं क्रियते जनैः।

वयं जानीम आप्रपदादाचूडं जघन्यापराधेषु निमग्नाः, उद्दण्डाः, भयादोहकाः, साम्प्रदायिकोन्मत्ताः, विनिमयांशग्राहिणः, अवैधादानप्रदानादि-बहुविधेष्वनौचित्यकृत्येषु संलग्ना जना अस्यामेव राजधान्यां विभिन्न-राजनीतिकदलानां सदस्यभूताः सर्वोच्चसंसदः शोभां वर्धयन्तः स्वकीयकृष्णकृत्यान् धवलवस्त्रान्तरितां विधाय जनानां नेतृत्वमाचरन्ति, अत्यन्तमशिक्षिता ग्राम्या जना अपि जिह्वाचापल्याद् वाचाटा विभिन्नानां संस्थानानामध्यक्षतामपि निर्वहन्ति। आसां स्थितीनां सरसमङ्कनं विदधानाः काश्चन गीतिपङ्क्तयः श्रवणातिथित्वमानेयाः—

तनुते न विस्मयं किं राष्ट्रस्य राजधानी।
कुरुते न दुर्नयं किं राष्ट्रस्य राजधानी।।
का वा कथा तिलानां सिकताचयादपीयम्।
चुच्यति निकामतैलं राष्ट्रस्य राजधानी।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रथ्याचरानलर्कान् संसदि विचित्य युक्त्या।
कण्ठीरवान् विधत्ते राष्ट्रस्य राजधानी॥
सुगमोष्ट्रसैरिभाणां वैशाखनन्दनानाम्।
कठिना परं गजानां राष्ट्रस्य राजधानी॥
ननु भोगिनां समृद्धा भोगावतीयमिद्धा।
धर्मस्य संयमनिका राष्ट्रस्य राजधानी॥ (मत्तवारणी, पृ. ३६)

बहुविधैर्दंशनैः, प्रहरणैः, कशाघातैश्छलनैर्वञ्चनैर्विश्वासघातैश्च सततं पीडितस्यापि कवेर्मनोबलं स्वल्पमपि न क्षीणं, विश्वासज्योतिरपि न घूर्णिता, सङ्कल्पसूर्योदयोऽपि नास्तङ्गतः, कण्ठस्वरोऽपि नावरुद्धः, आस्थाबन्धोऽपि न शिथिलीभूतः। अत एव कविता सहसा मुखरीभवति—

यात्रापथे प्रत्यूहनिचया हन्त के न समागताः?
गगनं तथापि चुचुम्ब मे बहुशो न किं वर्धिष्णुता॥

अन्यत्र,

नाहमस्मि सूर्यो दीपोऽहम्।
मनोराज्यनवधरणीपोऽहम्॥
सिन्धोरिव न च मे विस्तारः।
सर्वसुलभमृदुजलकूपोऽहम्॥
नन्दनवनसुरतरुरपि नाऽहम्।
घनच्छायजनपथनीपोऽहम्॥
अलमस्मि मम निष्ठापरीक्षया।
तनुमपि दास्यामि दिलीपोऽहम्॥
—दीपोऽहम्। (मत्तवारणी, पृ. १४०)

मत्तवारण्या गजलगीतय एतादृशमनेकविधं सन्देशमनायासतः प्रकाशयन्ति, यत्र कर्तव्याकर्तव्यविषये प्रौढा अनुभवसिद्धा च कविभावना सुस्पष्टत अभिव्यज्यते। यथा अज्ञाऽल्पज्ञगुणहीनानां जनानां प्रभुत्वे सति बुद्धिमता जनेन कीदृग् आचरणं करणीयमित्यस्मिन् विषये सुस्पष्टं कथितमस्ति कविवाण्या—

रुचिश्चेन्मानसावासे मनागपि मल्लिकाक्षाणाम्।
द्रुतं कारण्डवेभ्यस्तैर्निदेशाः सम्यगाप्येरन्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रशस्ते मरुवणे शाखोटकानामेव साम्राज्यम्।
क्षपैरन्यैस्ततस्तेषां प्रभावाः सीम्नि सह्येरन्।।

कुलायेष्वेषु मौकुलयस्सुखं तन्वन्ति सङ्गीतम्।
पिहितकण्ठैर्नु कलकण्ठैस्तदुद्देशाः प्रगृह्येरन्।।

कुविन्दानामयं ग्रामो दधत्तानो लसद्वानः।
बुधैरत्रागतैस्तच्छास्त्रचर्चाः स्वा निरुध्येरन्।।

—कस्मै खलु निवेद्येरन्। (मत्तवारणी, पृ. १०२)

'शनैः शनैः' नाम्न्यां गजलगीतिकायां मित्राणामनुरञ्जनविषये प्रीतिपादपानां संवर्द्धनविषये, वार्तारसानन्दविषये, गन्तव्यप्राप्तिविषये, अवधानेन व्यवहारविषये, स्वार्थपूर्तिविषये, हर्षोल्लासेऽपि संयमविषये, प्रीतिपल्लवनविषये, शत्रुशृङ्खला-कर्तनविषये, सत्यभाषणविषये बहुविधा उपदेशा सरसतयोपदिष्टाः—

प्रीतिक्षुपं विवर्धय बन्धो शनैः शनैः।
सुहृदां मनोऽनुरञ्जय बन्धो शनैः शनैः।।

मा त्वत्कृतेऽपि झञ्झाकौलीनमुद्भवेत्।
वाचस्समीरमीरय बन्धो शनैः शनैः।।

परितोऽपि पामराणां तृणशालिका इमाः।
होलानलं समिन्धय बन्धो शनैः शनैः।।

अभितो गभीरनद्यौ गिरिशृङ्खला पुरः।
यात्रामिमां समापय बन्धो शनैः शनैः।।

अज्ञातहृत्सु वैरीभवति स्मरोत्सवः।
हृदयं ततस्समर्पय बन्धो शनैः शनैः।।

परुषाऽऽयसी च नूनं सापत्न्यशृङ्खला।
प्रीत्यैव तां निकर्तय बन्धो शनैः शनैः।।

(मत्तवारणी, पृ. ३८)

एवं 'कथं भोः' इत्यत्रापि व्यतिरेकविधया सज्जनास्सन्दिष्टाः—

परेषां सृतिः कीर्णशूला कृता चेत्।
स्वमार्गे सुमं मार्ग्यते तत्कथं भोः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्नुहीबर्बुरा रोपिताश्चेत्प्रयत्नैः।
रसालासवे गृध्यते तत्कथं भोः॥ (मत्तवारणी, पृ. ७४)

'तदेव दिनं दिनम्' इति नाम्नी गजलगीतिस्तेषां क्षणानामवसराणां कार्याणाञ्चातिमनोरमं चित्रणं विदधाति यदा वयं 'जीवनस्य वास्तविकी सार्थकता केषु पलेषु वर्तते' इति चिन्तने व्यापृता भवामः। किं स्वजनपरिजनानां, पुत्रकलत्राणां, सम्बन्धिनां सुखसौविध्यसम्पादने व्यग्रतायामथवा बुभुक्षूणां भोज्यप्रदाने दुःखिनां साहाय्यं विधायाऽश्रुनिवारणे, परोपकारकरणे तत्परतायां वा। विषयेऽस्मिन् कवेश्चिन्तनं समवलोकनीयम्—

स्वसुखे न किं परिनर्तितं दुःखे न किं परिदेवितम्?
मुषितं परन्तु यदाऽश्रु ते नूनं तदेव दिनं दिनम्॥
प्रघुणोचितैः सम्माननैः कतिधा न चाऽहं सत्कृतः।
भिक्षुर्यदा पथि भोजितो नूनं तदेव दिनं दिनम्॥
स्वसुते मनस्सज्जितमिदं ननु निर्गुणेऽपि परं यदा।
प्रतिवेशितनयो लालितो नूनं तदेव दिनं दिनम्॥
प्रीत्या प्रसह्य छलेन वा सततं गृहीतं केवलम्।
दत्तं परन्तु यदा स्वकं नूनं तदेव दिनं दिनम्॥
—तदेव दिनं दिनम्। (मत्तवारणी, पृ. १३४)

'कार्गिलम्' इति शीर्षकेण रचिता गजलगीतिर्भारतीयेतिहासस्य तानि कृष्णपत्राणि उद्घाटयति यद्वशात् कश्मीरप्रदेशस्य प्रभूते भूमिभागे आतङ्कपरिपोषकस्य पाकिस्तानस्यावैधोऽधिकारः समवृत्तो यस्य कुत्सितं परिणाममास्वातन्त्र्यमद्यावधि समग्रं राष्ट्रं भुङ्क्ते। इमामेव सत्यतां प्रकाशयन्ती 'कार्गिलम्' इति शीर्षकेण रचिता गजलगीतिः कं भारतीयं न दुःखाकरोति—

राष्ट्रशासनस्य शाश्वतीमदूरदर्शिताम्।
डिण्डिमेन भूरि भूतले तनोति कार्गिलम्॥
जम्बुकोऽपि सिंहकन्दरे सुखं समाविशेत्।
सत्यमेतदुज्ज्वलीकरोति क़िन्न कार्गिलम्॥
यन्न कल्पितं शठत्वमेव भारतैः शठे।
दुष्फलं तदीयमेव संव्यनक्ति कार्गिलम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वीरयोधिनां विलोक्य साहसं हुतात्मनाम्।
कस्य नोऽन्तरालकं चिरं दुनोति कार्गिलम्।।
कस्य पापकर्मणा हुता नवाङ्कुराः शतम्।
प्रश्नमद्य पृच्छतीति शोणिताक्तकार्गिलम्।।
हन्त यद्‌गृहं निमज्जितं घने तमश्चये।
तत्कथं प्रकाशयिष्यतेऽथ कौति कार्गिलम्।।

—कार्गिलम्। (मत्तवारणी, पृ. २४)

व्याकरणदर्शनसाहित्यादिविविधानां शास्त्राणां पाण्डित्यमर्जयित्वा लब्धोपाधयः, यथाकथञ्चित् पदे नियुक्ताः, स्वकीयं नेमज्ञानमध्यापने प्रकाशयन्तः, अध्यापनञ्च दूषयन्तो, विनेयान् छलन्तो, भृतिमात्रग्रहणे दक्षतां प्राप्नुवन्तः, स्वलक्षणैर्विशिष्टतामाप्नुवन्तः संस्कृतोपाध्याया अपि कवेर्वर्ण्यविषयतामुपगताः। एतद्‌दृशा 'भवतामुपाध्यायाः' इत्याख्या रचना समवलोकनीया—

अधीतं साम्प्रतं यावन्न शास्त्रं यत्तदिह सर्वम्।
इतोऽग्रे पाठयिष्यन्ति ध्रुवं भवतामुपाध्यायाः।।
अवर्तन्तेत्यशुद्धं मुद्रितं ग्रन्थे विशोध्येदम्।
अवर्तन्निति तिङन्तं शुद्धमुपदेक्ष्यन्त्युपाध्यायाः।।
स्वजिह्वाऽऽलोडनैरुच्चार्य सम्यगिमे पुनर्रमते।
ढ्रलोपेत्यस्य नव्यार्थञ्च वितरिष्यन्त्युपाध्यायाः।।
न यद् भूतं भवति वा साम्प्रतं भविता न चाऽप्यग्रे।
तदध्यापनविलक्षणवर्त्म निर्मास्यन्त्युपाध्यायाः।।

—भवतामुपाध्यायाः। (मत्तवारणी, पृ. १२६)

साम्यवादिनां चिन्तनेन प्रभाविताः कतिपये वामपथसिद्धान्तानुयायिनो विचारकाः, आङ्ग्लसमाचारपत्राणां विशिष्टस्तम्भलेखकाः, एतादृशा एव नेतारः स्वकीयाल्पज्ञानजनितान् दुस्तर्कान् आश्रित्य स्वदेशस्य गौरवपूर्णेतिहासम्, सांस्कृतिकीं निधिम्, उदात्तपरम्परामेतेषां विधीनां निधिरूपाणि वेद-पुराण-रामायण-महाभारतादीनि शाश्वतसाहित्यानि व्यर्थपुराप्रलपितानि मत्वा एतेषामुपयोगितायां प्रश्नचिह्नं स्थापयन्ति, ऐतिहासिकघटनानां नूतनव्याख्यानं कुर्वन्ति, आर्यान् वैदेशिकान् मन्वाना रामस्य भारतीयतायामपि सन्दिहते। एतादृशविचारान् नमस्यन्ती 'ज्ञानाय ते नमः' नाम्नी रचना उच्छृङ्खलानां चरित्रं सम्यक् चित्रयति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामो बभूव भारते किं तत्र प्रमाणम्?
संसदि यदेवमुच्यते ज्ञानाय ते नमः॥
आर्याः समागता बहिस्त एव भारते।
यद्येवमादि बुध्यते ज्ञानाय ते नमः॥
जाता न जातु भारते वैमानिकी कला।
इत्थं यदीह घुष्यते ज्ञानाय ते नमः॥
ब्रह्मास्त्रविषयिवस्तु महाभारतोदितम्।
यदि कल्पनैव पुष्यते ज्ञानाय ते नमः॥
—ज्ञानाय ते नमः। (मत्तवारणी, पृ. ११२)

अभिराजस्याभिराजता न केवलं सामयिकदुरवस्थानां चित्रणे, विसङ्गतीनां निरूपणे, व्यङ्ग्यशरसन्धाने, स्वानुभूतानां दंशानां, सोढानां प्रहाराणाञ्च चित्रणे वर्तते, अपि तु सुरम्यपरिधानसुसज्जितप्रकृतिचित्रणेऽपि दृग्गोचरीभवति। एतस्य सबलाः परिचायिकाः, 'सपादिका मधुमासस्य', 'वारिदाः', 'रविभास्वरं प्रभातम्', 'वत्सला गङ्गा', 'चन्द्रिका'प्रभृतयो रचनाः। प्रतिशाखं मञ्जरिता रसालवनी, गुञ्जरितमधुलम्पटमधुपावलिः, सुखोच्छ्वसितानां चातकानां पिहु पिहु इति ध्वनिः, कदम्बमधूकपलाशपलाशचयैर्विलसिता पृथिवीरमणी, मण्डलितशिखिकुलम्, रतिरागेण विसंष्ठुलं मनः, एतैः सुरम्यस्य मधुमासस्य वर्णनपरा 'सपादिका मधुमासस्य' कस्य मनो न हरति—

मधुगन्धवशीकृतपानकलम्पटभृङ्गनिकायसमाकलिता
पुरुहूतदिगागतगन्धवहेरितपल्लवसञ्चयसञ्चलिता।
ददृशे यदरालरसालवनी प्रतिशाखमनारतमञ्जरिता
बुबुधे सहसैव तदा धरणी मधुमासकथा पुनरापतिता॥
विविधैस्सुमनोभिरशेषवनी कमनीयतमां द्युतिमातनुते
नवपल्लविनी गिरिजाव्रतती गिरिजश्च तरुच्छविमुच्चिनुते।
द्रुमपर्णनिरन्तरताऽन्तरितार्कमयूखवटश्श्रियमाश्रयते
निखिलं भुवनं परिवर्तयते मधुमाधवमास इहाक्रमते॥
सपादिका मधुमासस्य। (मधुपर्णी, पृ. ६९)

न केवलं बाह्योद्यानलतातरुकुसुमादिविलसिते प्रकृत्यङ्कनेऽपि तु मानवानामन्तश्चित्रणेऽपि एतस्य विशिष्टाऽभिराजता राजते। यथा भ्रातृजायादेवरयोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिहासः स्थविराणामपि मनश्चाञ्चल्यं, श्रुतिपेशलरागरञ्जितफाल्गुनिकगायनं, पुष्पधन्वनः शरसन्धाने चराचरस्य वशंवदतां चित्रयन्ती सपादिका सचेतसामाह्लादं सपादं वर्धयति—

रुचिरैव विभाति गृहे नगरे तरसा मधुमाधवमासकथा
स्थविरोऽपि समञ्चति देवरतां चटुवाचनिकः प्रमदासु यथा।
अवलोक्य विलासकुतूहलकेलिरतान् युवकान् हतचित्तरथा
ननु वर्षवरा कलयन्ति रुजं समजायत जन्म चिराय वृथा॥
ऋजुकं स्वछविल्लकदेवरमाशु विलोक्य निमीलितलोचनकं
मसिकाञ्जनकज्जलधातुचयैः कृतभण्डविदूषकरुद्रमुखम्।
प्रहसन्ति सहेलमहो प्रमदाः स न वेत्ति रहस्यमिदं तनुकं
मुकुरे नहि यावदसौ स्वमुखं प्रविलोकयते कृतवञ्चतिकम्॥

एवं 'वारिदाः' इति शीर्षकेण रचिता रचना सुदूरे नीलाभगगने घटाटोपमाचरतां, विभिन्नाकारं धारयतां, शुष्कसरित्प्रवाहं कीलालैः पूरयतां, सस्यसम्पदां हर्षयतां, निदाघदाहं शमयतां, सर्वान् सुखिनो विधाय तत्कालं लुम्पतां, जीवनमिदं परार्थमेव रम्यमिति मानवान् सन्दिशतां, वियोगिनीनां हृदयं दहतां घनानामतिरमणीयं चित्रणं विदधाति—

वृष्टेरनन्तरं क्व विलुम्पन्ति वारिदाः
स्वीयां प्रशस्तिमपि नहि शृण्वन्ति वारिदाः॥
आपूर्य निम्नगोदरं कीलालसञ्चयैः
अस्तित्वमेव हन्त निजं घ्नन्ति वारिदाः॥
शस्यं निदाघदाहशुष्कमाशु वारिभिः।
उज्जीव्य दधीचेर्व्रतं वहन्ति वारिदाः॥
सम्प्रोषितेऽथ वल्लभे कस्मादमी परम्।
हृदयानि योषितामहो दहन्ति वारिदाः॥

—वारिदाः। (मत्तवारणी, पृ. ११८)

चन्द्रिकाभिधायां गीतिरचनायां कुं मोदयन्ती कौमुदी मोदावहशैल्यां वर्णिताऽस्ति। क्वचित् सा मातृवात्सल्यकल्पा समग्रां धरामेव स्वाञ्चले सङ्गूहमाना प्रतीयते, क्वचिच्च सुधाकुम्भात् स्रवन्ती सुधेव सकलां वसुन्धरामेवाऽऽप्याययमाना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाति। क्वचित् शीतश्यानां धरित्रीं तूलतल्पैरवन्ती शोभते, क्वचिच्च ध्वान्तध्वंसे प्रभाकररश्मिभिः सह स्पर्धमाना दृश्यते। क्वचित् प्रीतितरङ्गोच्छलन्ती रागवशात् प्रियतमं चन्द्रमालिङ्गन्ती स्रस्तनीव्यम्बरा नायिकेव राजते, क्वचिच्च चित्रशैलूषिकेवाऽभ्रगङ्गाश्रियं शम्भुहासच्छविञ्च दधाना प्रकाशते—

मातृवात्सल्यकल्पाऽवदाताऽखिलां
रोदसीमेव सङ्गूहते चन्द्रिका।
चन्द्रकुम्भच्युतक्षीरभारोच्चय-
प्राप्तसाम्या धरामूर्णुते चन्द्रिका॥
वीक्ष्य शीतार्दितां भूतधात्रीमहो
तूलतल्पैरिव त्रायते चन्द्रिका।
ध्वान्तवृन्दव्यपोहे प्रभाभी रवेः
स्पर्धमाना न किं युद्ध्यते चन्द्रिका॥
कान्तमिन्दुं समालिङ्ग्य रागोन्मदा
स्रस्तनीव्यम्बरं मुञ्चते चन्द्रिका।
चित्रशैलूषिकेवाऽभ्रगङ्गाश्रियं
शम्भुहासच्छविं नह्यते चन्द्रिका॥

—चन्द्रिका। (मत्तवारणी, पृ. ७८)

मत्तवारण्या मधुपर्ण्याश्च काश्चन गजलगीतयो रसराजशृङ्गारस्य सरसां मधुराञ्च रसधारामुच्छालयन्त्यः सहृदयान् रससिक्तान् विदधानास्तस्यै कविप्रेयस्यै समर्पितास्सन्ति यस्या मनोमुग्धकारिरूपं, कमनीयः शृङ्गारः, चित्ताकर्षका हावभावा अनुभूता विविधेषु प्राकृतदृश्येष्वपि दृष्टिगोचरा भवन्ति। मेघाच्छन्नार्धदृष्टः पूर्णचन्द्र इवार्धावगुण्ठितं वदनं नलिनीपत्रस्थितनीहारबिन्दव इव नेत्राश्रुबिन्दवः वसन्तकालोन्मत्तानां पिकानां कुहूध्वनिरिव प्रियतमदर्शनाद् अधरोच्छलत्स्मित-मर्धवृत्तबलाकेव ग्रैवेयकं, कदलीलतामण्डपे उद्यद्रक्ताभसूर्यप्रकाश इव विशेषकं, विद्युच्चमत्कृतिं चञ्चद्घनघटेव मल्लिकामालागुम्फितः केशपाशः, हुङ्कृतिं कुर्वाणा वत्सं पाययन्ती गृष्टिरिव गर्भदोहदः, सरोवरे विहरन्ती राजहंसीव गृहाङ्गणे भ्रमन्ती प्रिया, कुलायलीनवयसामस्फुटा चुंकृती रतिकाले आवयोर्मिथो भाषणमेतत् सर्वमविस्मरणीयं वर्तते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साऽम्भोधरी जवनिका स च पार्वणो मृगाङ्कः।
तत्तेऽर्धगुण्ठवदनं कथमद्य विस्मरेयम्॥
नीहारबिन्दवस्ते कतिचित्सरोजपत्रे।
त्वन्नयनजललवास्ते कथमद्य विस्मरेयम्॥
स रविश्च शोणिताभः कदलीगृहे समुद्यन्।
तदहो विशेषकं ते कथमद्य विस्मरेयम्॥
सा घनघटाऽतिकृष्णा विद्युल्लता प्रदीप्ता।
कबरी प्रमल्लिका ते कथमद्य विस्मरेयम्॥
पल्वलविहारलीलानिरता नु सा विहङ्गी।
सा त्वं गृहाङ्गणे मे कथमद्य विस्मरेयम्॥
—कथमद्य विस्मरेयम्। (मत्तवारणी, पृ. १४२)

'मे मनो लग्नम्' शीर्षकेण रचिता रचना यत्रैकतः प्रियां प्रति प्रणयभावभरितस्य प्रियतमस्य रससिक्तभावभङ्गिमानं वर्णयति, तत्रैवाऽपरतस्तस्य काव्यकौशलस्यापि निदर्शनं प्रस्तौति। मेनकेव प्रियतमां प्रति कौशिकवत्, पार्वणेन्दुवदनां प्रति सागरवत्, प्रीतिपत्राणि प्रति वाचकवत्, नाट्यं प्रति मारिषवत्, विलासान् प्रति याचकवत् संलग्नं मनोऽत्र चारुचित्रितं वर्तते—

रोदरीभूय मे मनो लग्नम्।
सोदरीभूय मे मनो लग्नम्॥
मेनकां त्वां निजाश्रमे लब्ध्वा
कौशिकीभूय मे मनो लग्नम्।
वातलोलं तवाञ्चलं दृष्ट्वा
कण्टकीभूय मे मनो लग्नम्।
पार्वणं प्रेक्ष्य हन्त वक्त्रेन्दुं
सागरीभूय मे मनो लग्नम्।
चञ्चलं प्रेक्ष्य भाग्यपाठीनं
धीवरीभूय मे मनो लग्नम्।
अस्ति नास्तीति ते कटीवादे
मेखलीभूय मे मनो लग्नम्॥
—मे मनो लग्नम्। (मधुपर्णी, पृ. १८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रमणीरागरञ्जितं कविहृदयं पानस्य सार्थक्यं प्रियालोचनैः पाने, क्रयणसाफल्यं हृद्याहृदयक्रये, गीतिसार्थक्यं कान्ताकण्ठस्वरेण गायने, वयसः सार्थक्यं कम्राकुञ्चितकेशे, दिवसयापनसाफल्यं प्रेयस्याः पथोऽवलोकने, अध्ययनस्य साफल्यं रमण्या हृदयाध्ययने मनुते—

पात्रेण साधु पीतं चुलुकेन चापि पीतम्।
ताम्यति मनस्तथापि त्वल्लोचनैर्न पीतम्।।
क्रीतं सुवर्णजातं क्रीतञ्च भूरि रत्नम्।
किं तेन सुभ्रु यदि ते हार्दं मया न क्रीतम्।।
धैवतनिषादषड्जैर्ननु पञ्चमेन गीतम्।
स्पृह्ये तथापि यत्ते कण्ठस्वरैर्न गीतम्।।
नीतं वयः स्वदेशे नीतं वयो विदेशे।
किं तेन यदि तवाञ्चत्केशे वयो न नीतम्।। (मत्तवारणी, पृ. ४)

मधुपर्ण्यां छन्दोविनिर्मुक्ताः, अर्थगाम्भीर्यसमन्विताः प्रतीकात्मिकाः काश्चन रचना निबद्धास्सन्ति, यासु काव्यनाट्येतिहासेषु ख्यातचरितान् पात्रान् कल्पितांश्च समाश्रित्य सामयिकस्थितीनां, व्यवहृतीनां, चरितानां, घटनानां सङ्घटनं कृतमस्ति। काव्यदृशा इमा छन्दोनिर्मुक्ता अप्रस्तुतप्रशंसाविषया नवशिल्पदृशा प्रतीकात्मिका अभिव्यक्तयः। अनया रीत्या मृच्छकटकीयां कथामाश्रित्य 'वसन्तसेना', 'उपालम्भो रोहसेनस्य' विशेषतः श्लाघनीये वर्तेते। यथा वसन्तसेनाभिधायां रचनायां वसन्तसेना रूपगुणयौवनविद्याकलाविभूषितानां, स्वविषयकोचितनिर्णये क्षमाणां स्वाभिमानिनीनां नारीणां प्रतीकभूताऽस्ति, या रूपयौवनशीलसम्पन्नं नियतिवशाद् दुर्दैवमनुभवन्तं कमपि चारुदत्तं कामयते; परं तां लम्पटो, मद्यपो, व्यसनी कोऽपि राजश्यालको राजसम्बन्धी वा कामयते। स्थितिमिमां कवमानः कविः स्वकीयं चिन्तनमभिव्यनक्ति—

इदमेव विडम्बनं रमणीजीवनस्य
कोऽप्यनभीष्टस्तां कामयते।
सा च कमप्यभीष्टमपरम्
अस्मिन्नेव
अभीष्टाऽनभीष्टसङ्गरे
वराकी नारी दुर्व्यवतिष्ठते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामं रघुनन्दनमियेष वैदेही
ताञ्च रतिलम्पटो रावणः।
द्वारकाधीशमियेष रुक्मिणी
ताञ्च निर्गुणशिशशुपालः।
हन्त सनातनीयं परिपाटी
दुर्नियतेः पुरन्ध्रीणाम्।।

प्रायो दृश्यते वीथिकासु, राजमार्गेष्वापणेषु, विपणीषु, शिक्षासंस्थानेषु, कार्यालयेषु, सार्वजनिकस्थानेषु यद् रूपयौवनसम्पन्नाः सुन्दर्यो लम्पटैः कदर्थिता भवन्ति। शकारवज्जनानां व्यङ्ग्यबाणैर्विद्धा भवन्ति—

शकारसेवको मां ब्रूते
पश्य वसन्तसेने।
लतां गाहते काकोऽपि
नद्यां स्नाति सारमेयोऽपि।
नौकायां तिष्ठति ब्रह्मक्षत्रेतरोऽपि।।
वसन्तसेने!
लतेव त्वमसि
नदीव त्वमसि
नौकेव त्वमसि
सर्वभोग्याऽसि त्वं भद्रे
वेश्यासि, भज सर्वं
स्वीकुरु, राजश्यालं शकारम्।।

परं शिक्षिता स्वाभिमानिनी वसन्तसेना तदोत्तरयति चिन्तयति च—

क्व चायं राजश्यालश्शकारः
निर्गुणो लम्पटः
क्षुद्रो दुर्मदः
वशीकृतशासनतन्त्रः
मूषिकीकृतनरपतिः
दुर्दान्त उद्धतः
यो न परिचिनोति नारीगौरवं
न जानाति प्रणयं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाद्रियतेऽसौ जाल्मः
उभयनिष्ठतां भोगाऽऽकाङ्क्षायाः
तत्कृते भक्ष्यभूतैवास्मि
तत्कृते शरीरमात्रमहमस्मि
प्रतिसन्दिष्टम्मया-
चेट! भण राजश्यालं यद्
व्यंसकमयूर
कलापिकलापधारणमात्रेण
न त्वं भवसि मयूरः
मूढ! यत्तिष्ठति तवाधिकारे
वसन्तसेना
तत्सर्वं धूलिकल्पं मन्यते
तव प्रवहणं
तव पुष्पकरण्डकोद्यानं
धनवैभवञ्चातुलम्
परप्रत्ययनेयबुद्धे
आलाने गृह्यते हस्ती
वल्गासु गृह्यते वाजी
हृदये चापि गृह्यते नारी
केवलं हृदये॥

—वसन्तसेना। (मधुपर्णी, पृ. १०६-११३)

एवं 'उपालम्भो रोहसेनस्य' इति नाम्न्यां रचनायां रोहसेनो धैर्यसंयमशालिनः समुचिताचारशीलस्य निर्धनस्य पितुः पुत्रो वर्तते, यः पूर्वं मृच्छकटिके शूद्रकेण प्रतिवेशिनो बालकस्य सुवर्णशकटिकायै स्पृहमाणो गृहसेविकया वत्सलया रदनिकया आश्वासितः शकटिकां मृण्मयीं सुवर्णशकटिकारूपेण प्राप्य प्रसीदन् मुग्धबालकरूपेण चित्रित आसीत्। तदेव मृच्छकटकीयकथासूत्रमवलम्ब्याऽत्र रोहसेनो निर्धनपितुः पुत्रस्य प्रतीको वर्तते, यस्य दैन्यं, निःसत्त्वं व्यतीतायामपि शताब्द्यां यथावद् वर्तते, येन समृद्धेः स्वप्नः सञ्चितः परं साकारं कर्तुं न शशाक। यस्य मातुः जर्जरशाटिकाऽद्यापि सैव, यस्य पितुः जीर्णं शीर्णं गृहमपि तदेव, तद्वदेव शीलवन्तौ आचारवन्तौ पितरौ, परं यत्रास्ति तत् स्नेहशीला वसन्तसेना, मातृकल्पा रदनिका च। अतिरोहिता सुवर्णशकटिकाभिलाषा न वावलोक्यते प्रतीक्षायाः समाप्तिघटिका—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रदनिके!
साम्प्रतं हताशोऽस्मि सञ्जात:
त्वत्सान्त्वनावैयर्थ्यमवगच्छामि
सुष्ठ्वनुभवामि राष्ट्रेऽस्मिन्
रोहसेनानां भविष्यम्।
एषु व्यतीतप्रायेषु
अष्टादशशतहायनेषु
श्रीविशाला विशालेयं कालिदासस्य
उज्जयिनी विक्रमार्कस्य
अवन्तिका राजशेखरभोजराजयो:
पुष्पकरण्डिनी चार्हतानां
कतिधैव न समुत्पन्ना
कतिधैव न पुनर्निर्मिता
महाकालमेकं विहाय
किं किं न विपरिवर्तितं जातम्?
ध्वस्ता: खलु प्राचीनसौधा:
समुत्थिता: शिलीन्ध्रकल्पा नवा:
कालगल्ले विलीना: परार्घ्यसम्पद:
निर्मिता नूतनराजपथा:
समागता अभिनवशासका:
ह्यस्तना दरिद्रा:
सञ्जाता अद्य लक्षपतय:
परन्तु रदनिके!
रोहसेनोऽहमद्यापि
नित्यनिर्मितमृच्छकटिकयैव
आत्मानं विनोदयामि।।

—उपालम्भो रोहसेनस्य। (मधुपर्णी, पृ. ९८-१०५)

कविताया इमा पङ्क्तय: कियतीं गभीराममभिव्यक्तिमात्मसात्कुर्वाणा दृश्यन्ते, यदा स कथयति यत् शकारसदृक्षा दुश्चरित्रा:, पदे प्रतिष्ठिता जना रक्तबीजतामुपगता:, ते प्रतिवीथीं, प्रतिग्रामं, प्रतिनगरं निर्दोषान् चारुदत्तान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पीडयन्ति, वसन्तसेनाञ्च कण्ठं निष्पीड्य मारयन्ति, अकृतापराधानपि चारुदत्ततनयान् पादप्रहारैरवमन्यन्ते—

रदनिके!
रक्तबीजतामुपगतः किन्तु
त्वद्युगीनश्शकारः
सोऽधुनाऽपि स्वपरिजनैस्सह निर्भयं ढौकते
प्रतिपथं प्रतिवीथिकं
प्रतिग्रामं प्रतिनगरम्
सर्वान् निर्दोषांश्चारुदत्तान्
पूर्ववदेव शातयत्यसौ सपत्नधिया
भोगलम्पटोऽसौ नरपशुः
हन्ति निर्दयं गलमाकुञ्च्य वसन्तसेनाम्।।

(मधुपर्णी, पृ. ९८-१०५)

अन्ते कवेरियं भणितिर्भारतेऽस्मिन् लक्षाधिकाः चारुदत्तशिशवो दुष्टैः शकारैः कृतविकलाङ्गा अन्धीकृतास्तस्करभिक्षाटनकार्येषु नियोजिता भवन्ति। तेषां किम्? रदनिके! शरीरं तपति, मनो ज्वलति, बुद्धिर्विकला भवति। अयं रोहसेनः सत्यं म्रियते, अस्मिन् शकारतन्त्रीये भारतेऽपुनरागमनाय—

रदनिके!
तातप्यते वपुः
दन्दह्यते मनः
बम्भ्रम्यते कनीनिका
तद् विश्वसिहि मातः
एष ते रोहसेनः
परमार्थतः पञ्चत्वमुपयियासति
इह शकारतन्त्रे भारते
अपुनरागमनाय।।

(मधुपर्णी, पृ. १०५)

विभिन्नानामैतिहासिकघटनानां सामाजिकानाञ्च प्रथानां सन्दर्भविशेषे कवेर्गभीरं चिन्तनमनेकत्राऽभिव्यक्तमस्ति। प्रतीकात्मिकानां रचनानां प्रणयने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रवृत्तिरियं विशेषतयोपलक्ष्यते। आसां रचनानां प्रणयनस्योद्देश्यमिदमेवेत्युक्तिरत्युक्तिं न बिभर्ति। 'पत्रं श्रीबाणभट्टस्य', 'मृतघट्टोऽहम्', 'शम्भो', 'वक्तव्यं शुष्कवृक्षस्य' इत्याद्या रचना निदर्शनीभूतास्सन्ति। सर्वप्रथमं 'पत्रं श्रीबाणभट्टस्य' इत्याख्या रचना दृग्गोचरीकरणीया। इदमैतिहासिकं वृत्तमतिविश्रुतं वर्तते यद् विलक्षणप्रतिभाशालिनो बाणभट्टस्य प्रारम्भिकं जीवनं बण्डायमानमासीत्। कान्यकुब्जेश्वरेणाऽऽहूतोऽप्ययं 'महानयं भुजङ्गः' इत्युपाधिनैव विभूषितः। कटाक्षेणानेन उद्दीप्तस्वाभिमानगौरवेण बाणेन विद्वज्जनसम्मर्दबहुलायां सभायां नतेनोत्तरितम्। तमेव प्रसङ्गविशेषमभिलक्ष्य कवेः सुचिन्तितं मतं रचनायामस्यां तथाऽभिव्यक्तं यत् सहृदयान् बलादाकृष्य तथाचिन्तनाय बाध्यं करोति। कवेः प्रश्नोऽयं वर्तते यत् तथागतः शयानं स्तनन्धयं बालं, यौवनभारभङ्गुरां भार्यां तथा पुत्रवियोगकातरं जराजीर्णकलेवरं जनकं परित्यज्य सांसारिककर्तव्यविमुखः परिवव्राज, किमुचितमेतत्?

गर्वितोऽसि त्वं तेन तथागतेन
यो गृहदायित्वमपि नो सम्पादयामास
तत्याज प्रसुप्तं दुग्धमुखं दारकं
यौवनभारभङ्गुराञ्च भार्यां
तनयवियोगकातर-
मशक्तं वृद्धजनकं
क्लीब इवोद्विज्य संसाराद्
यः प्राद्रवत् संसाररक्षार्थम्?
—पत्रं श्रीबाणभट्टस्य। (मधुपर्णी, पृ. ११४-१५)

कवेरुक्तिरियं निश्चप्रचं गभीरप्रश्नपृच्छिका यद् रक्षणीय एव परिहर्तव्यश्चेद् यदि वा संसारं परित्यज्य संसाररक्षाभावना, समरं विहाय समरविजयेच्छा, तर्हि खपुष्पमिव किं न मिथ्यायितं स्यात्? वेदेषु उपनिषत्सु पुराणेषु चत्वारि आर्यसत्यानि न प्रतिपादितानि सन्ति? विभिन्नेषु दर्शनेष्वज्ञानावरणभङ्गाय नास्ति मार्गदर्शनं किम्? तर्हि कुत्रास्ति सिद्धार्थस्य सिद्धार्थता—

हन्त कियदुपहासकरमिदं
यस्य रक्षा काम्यते
तत एव पलायनं क्रियते?
संसारं परित्यज्य संसारस्य रक्षा?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समरं विहाय समरविजयः?
किमुपलब्धं तव सिद्धार्थेन?
किमुपकृतं तव सिद्धार्थेन?
चत्वारि आर्यसत्यानि प्रागपि को न ज्ञातवान्?
किमेतानि पूर्वं नोपदिष्टानि
वेदेषु पुराणेषु काव्येषु
तापत्रयनिवारणं
किं नोपदिश्यते सांख्यदर्शनेन
अज्ञाननिवृत्तिः किं नोपदिश्यते वेदान्तेन
तत्किमभिनवं प्रोक्तं सिद्धार्थेन?
राजन्! क्व तिष्ठति सिद्धार्थता तव सिद्धार्थस्य?

—पत्रं श्रीबाणभट्टस्य। (मधुपर्णी, पृ. ११५)

बाणमुखेन कविः बौद्धान् तद्धर्मफल्गुतां प्रकटयन् कथयति—राजन्! स्वकर्तव्यवैमुख्येन निर्वाणं नाप्नोति कोऽपि, प्राप्नोति च स्वोचितकर्मसम्पादनेन। इयं सृष्टिः कर्माधीना वर्तते, प्रकृतिः पञ्चभूतान्यपि सदैव कर्मनिरतानि सन्ति। सूर्यस्तपति, वायुः प्रचलति, अग्निर्ज्वलति, नदी प्रवहति जनान् आप्लावयति तृषार्तान् तर्पयति, वृक्षा फलन्ति छायेन्धनानि च ददति, वसुन्धराऽन्नौषधीश्चोत्पाद्य सर्वान् तर्पयति। स्वयं परमात्माऽपि जगदुत्पत्तिसंहतिततत्परः, जनाः कर्मतत्परा भवेयुरिति शिक्षयति? किं गौतमस्याऽपरः संसारो यं निन्दति सः—

हर्ष!
किं तव गौतमस्य काप्यन्या सृष्टिः?
कश्चिदन्यः संसारः?
यत्र सर्वेऽपि श्रमणा एव वसन्ति
सर्वेऽपि परिव्राजका एव सन्ति
न कृषकाः शिल्पकाराः श्रमजीविनो वा?
त्वन्निर्मितेषु
बहुभूमिकविहारेषु
सर्वसुखानन्दनिचितेषु
एते मुण्डितशिरस्का मल्लाः
एवैरं विहरन्ति निश्चिन्तम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृच्छति बाणभट्टोऽयं
प्रजाप्रतिनिधिः
कस्यान्नं त्वमेतान् भोजयसि?
कस्य वस्त्राणि त्वमेतान् परिधापयसि?
एतत्सर्वं न तवाऽपि हर्ष!
सर्वमेतल्लोकस्य॥

—पत्रं श्रीबाणभट्टस्य। (मधुपर्णी, पृ. ११७)

युवानोऽपि मुक्तये परित्यज्य कर्ममार्गं श्रमणा भवेयुरित्येव सौगतं जीवनदर्शनम्? स्वेदपरिप्लुताङ्गा जराजीर्णकलेवरा अपि कृषका श्रमातुरा अपि कृषिकार्यं कुर्वन्ति, अन्नौषधीश्चोत्पादयन्ति, इमे मस्तमुण्डा भिक्षाचर्यां चरन्तो निगिलन्ति—

युवानोऽपि निर्वाणधिया
कर्तव्यपथं विहाय
श्रमणाः स्युः
किमयमेवोपकारस्सुगतस्य?
वृद्धाः स्वेदाञ्चितवपुषः सश्रमं कृषिकर्म कुर्वन्तु
निर्वाणकामा पुनरेते बलीवर्दा
अकृत्वैव किञ्चित्
सायं प्रातः
उदरम्भरि भक्षयन्तु
कुतस्त्योऽयं न्यायः? (मधुपर्णी, पृ. ११६)

इत्थं सनातनधर्मविमुखानां बौद्धश्रमणानां सिद्धान्ते व्यवहारे च कवेस्तीक्ष्णप्रहाराः पाठकान् श्रोतॄंश्च चिन्तनाय बाध्यान् कुर्वन्ति। अपरः प्रश्नोऽयं यत् कर्मप्रधाने यस्मिन् भारते उपनिषद् घोषयति—'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' इति, तत्रैव कर्मणां ईदृशस्तिरस्कारः, पौरुषस्य ईदृशी निराकृतिः?

हन्त, यस्मिन् कर्मयोगपक्षधरे राष्ट्रे
उपनिषदः समुद्घोषयन्ति
कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा इति
तस्मिन्नेव भारतराष्ट्रे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मणोऽयमवमान:?
पौरुषस्येदृशी गर्हणा?
हर्ष! धिक् तं धर्मं
धिक् धिक् तं सम्प्रदायं
यो लोकं क्लीबं विदधाति
यो लोकं कर्मपराङ्मुखं कुरुते
यो लोकं पराश्रयिणं परोपजीविनं साधयति।

(मधुपर्णी, पृ. ११६)

एवं 'मृतघट्टोऽहम्' इत्याख्या रचना समदर्शनीया। घटोऽस्माकं जीवने दैनन्दिननानाविधकार्यसम्पादनायोपयोगी महत्त्वपूर्णं पात्रं वर्तते। अयमेवाऽघटित-घटनासम्पादने पटीयसोऽगस्त्यस्य, इक्ष्वाकुकुलगुरोर्वसिष्ठस्य, जगज्जनन्या: सीतायाश्च प्रभवस्थानम्। अयमेवाऽङ्गनानां जलवहनश्रमस्य साक्षी, गोपाङ्गनानां दधिहैयङ्गवीनपात्रं नन्दनन्दनस्य च बालचापल्यस्फोटनसाधनञ्च वर्तते। एकतोऽयं यागादिषु कलशस्थापने प्रयुक्तो भवति, अपरतश्च मृतात्मनां तृषाशान्तिसाधनमपि भवति। परमभिराजस्य मन: पूर्वोक्तनानाप्रकारकघटकौशलेन नानुरज्यते। तस्य कवनकलाकेन्द्रमस्ति श्मशाने चैत्यवृक्षे मृतात्मनां तृप्त्यर्थं लम्बमानो घट:। 'मृतघट्ट'माध्यमेन कवेर्भावो मुखरितोऽभूद् यत् संसारे कियन्तो जना गगनचुम्बि प्रासादान्, वनान्युपवनानि, देवालय-सेतु-कीर्तिस्तम्भ-जयस्तम्भान् निर्मापयन्ति परं ते विस्मरन्ति यद् महाकालकलनावसरे केवलमहमेव तस्यान्तिमं सार्थं निर्वहामि। अहं कमपि प्रति दृष्टिभेदं न कृतवान्, न वा प्रलोभनैराकर्षितोऽहम्। राज-राजदारा-योगि-भिक्षु-खञ्जान्ध-बधिर-पापि-पुण्यात्मनां सर्वेषां समभावेन समादरं कृतवान्। यो येनापि भावेन यस्यां वा मनोदशायां मत्सविधं समागतस्तस्याहं समुचितं प्रतिष्ठामकरवम्, भवेत् कश्चन कर्पूरागुरुचन्दनाभिलिप्तो धूलिधूसरितो कन्थावेष्टितो वा। सर्वान् प्रति स्वकीयं विषमोत्तरदायित्वं निर्वहामि। सर्वेषां समभावेनैवाऽहं स्वागतं ब्रवीमि। यद् वस्तु यत उपलब्धं तद् तस्मा एव समर्पये। मृदं मृत्स्नायां, वारि वारिणि, मरुतं मरुति, पावकं पावके, गगनं गगने सम्मेल्य सर्वा वेदना: सर्वांश्च तिक्तानुभवान् अनुभवन्नहं महाकालद्वारस्य कपाटरूपेण स्थितोऽस्मि—

मृतघट्टोऽहं मृतघट्टोऽहं
जीवतां जनानां घृणास्पदं
प्रेतानां वंशीवाटोऽहम्
मृतघट्टोऽहम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सङ्गं जह्यान्नु जगदखिलं
प्रियजनाः समस्ता विमुखाः स्युः
स्वागतं भणति बाहू प्रसार्य
यस्तदपि स एव सुभट्टोऽहम्
मृतघट्टोऽहम्।।

ये केऽपि समागच्छन् नु यथा
विलपन्तोऽथवा हसन्तो वा
वसुधामाकाशं दिगन्तरं
क्रन्दनैर्निजैर्द्रढयन्तो वा
कर्पूरचन्दनाऽगुरुलिप्ताः
कन्थावेष्टितवपुषः केचित्
केचित्सम्मर्दवाद्यसहिताः
केचित्कृत्ताङ्गाः सङ्कुचिताः।
कस्यापि कृते नाऽहसं किन्तु
नाथवा स्फुटितहृदयो व्यलुठम्
अचलोऽविचलो निश्चलोऽभवं
सच्चिदानन्दकल्पोऽविकलः
निष्पक्षतयाऽचञ्चलो दृढो
न मनाग् भीतो न च करम्बितः।

मादृशः किन्तु निःस्वार्थबन्धु-
रथ मादृश एव साम्यवादी
कुत्रापि न कश्चिन्मिलिष्यति
वादी भवताद् वा प्रतिवादी
लभ्यो यः प्रतिपदमनावृतोऽ-
सौ कालगृहस्य कपट्टोऽहम्।
मृतघट्टोऽहम्।।

—मृतघट्टोऽहम्। (मधुपर्णी, पृ. ९२-९७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्यपि ममावासभूमौ कदापि मञ्जीरध्वनिर्नाऽभूत्। अवगुण्ठनावगुण्ठितार्ध-चन्द्रोदयोऽपि न जातः, शिशूनां कलरवोऽपि न श्रुतः, यद्यपि महामङ्गलशून्योऽहं नितान्तनिष्ठुरः क्रूरोऽस्मि परं मत्समः कोऽपि सौभाग्यभागपि नास्ति; यतो हि अनन्तब्रह्माण्डनायकः शम्भुः समग्रं विश्ववैभवं परित्यज्य प्राणप्रियां रुद्राणीं गणपतिमपि विस्मृत्य निरन्तरं ममाङ्गणे रमते। अतोऽहं शिवत्वाधारः परिपूतश्चामृतकलशो जातः—

ननु महामङ्गलश्शून्योऽहं
ननु महाऽकिञ्चनः क्रूरोऽहं
निष्ठुरो निर्ममः पापकटु-
र्मरणैकभटो ननु घृणास्पदम्
जीवितशेषो नु निमिषमात्रं
प्रणयास्पदमहं न कस्यापि
जर्जरं कुष्ठगात्रं तदहं
यत्संस्पर्शोऽपि न वरणीयः
ननु धन्योऽसौ स्रष्टा परन्तु
येनात्र टङ्किता भाग्यलिपिः
मादृशः किन्तु सौभाग्यसिद्ध
इह भूमण्डले क्वचिद् दृष्टः?
ब्रह्माण्डवैभवं तिरस्कृत्य
उपविष्टश्शम्भुर्ममाङ्गणे
रोदितु गायतु वा रुद्राणी
गणपतिरपि कामं प्रगल्भतां
तमन्तवदान्यं देवपतिं
पशुपतिमवाप्य धन्यो जातः
आसं महाऽशिवश्शिवः किन्तु
सञ्जातः कृपणाद् दानपरः
विश्वसिहि शिवत्वाऽऽधारोऽहं
परिपूतश्चामृतकलशोऽहम् ॥
मृतघट्टोऽहम्।

—मृतघट्टोऽहम्। (मधुपर्णी, पृ. ९२-९७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाग्वैभवेनाऽभिराजतं गतस्याभिराजस्य भाषा सरला, सरसा, मधुराऽन्त्यानुप्राससंवलिता, क्वचित् श्लिष्टा, क्वचिदन्योक्तिपरा, क्वचिद् यमकसंयमिता, क्वचिच्चोपमानोपमिता वर्तते। कवेरिमा अभिव्यक्तयो गभीरास्सन्ति। तत्प्रयुक्तासूपमासु, शास्त्रीयतायास्स्फुटं प्रकाशनं दृश्यते। 'वृथा जल्पन्ति' इति शीर्षकेण रचिता गलज्जलिका, एतादृशमेव दृष्टान्तं प्रस्तौति येन कविप्रतिभासमक्षं सहृदयश्रोतृणां शिरांसि स्वयमेव घूर्णितानि भवन्ति—

वृथा जल्पन्ति पण्डितमानिनो जगतां नियन्तार:
अहं पुनरात्ममन्थनयैव वचसां सङ्गतिं जाने।
भवेद् वेदान्तिनां भ्रान्ति: क्वचिद्रज्जौ भुजङ्गानां
त्वदीये बाहुपाशे भ्रान्तिकोटिनिराकृतिं जाने॥
न मे व्यङ्ग्ये न लक्ष्ये नापि वाच्यार्थे मनागास्था
प्रिये तव वल्गुबिब्बोकै: पदानामन्वितिं जाने।
अहं ते त्वञ्च मे सुन्दरि! न खलु सम्बन्धमात्रमिदं
क्रियान्वयिकारके प्रथमां विभक्तिं दम्पतीं जाने॥
प्रमाकरणं प्रमाणं मन्वते यदि तार्किकप्रवरा:
प्रिये सर्वप्रमाणानां ध्रुवामाविष्कृतिं जाने।
अभिव्यक्तिर्न भुक्तिर्नानुमितिरथवा न वोत्पत्ति:
रसानां केवलं त्वदपाङ्गभङ्गपुरस्कृतिं जाने॥

—वृथा जल्पन्ति। (मधुपर्णी, पृ. २०)

वर्ण्यवस्तूनामङ्कने कविप्रतिभोल्लास: सन्दर्शनीय:। यथा सर्वाङ्गसुन्दर्या वसन्तसेनावर्णने सर्वा अप्सरस: सर्वाश्च ऋतव उपमानतया आरोपिता:—

अहमस्मि वसन्तसेना
रम्भोज्जयिनी वेशवाटस्य
मेनका विश्वामित्राणां
घृताची प्रमतीनां
प्रम्लोचा चापि कण्डूनां
मम भ्रूभङ्गे विलसत्यकुण्ठ: कन्दर्प:
विब्बोके वर्षा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुट्टमिते शरत्
किलकिञ्चिते निदाघः
सर्वर्तुमयी विलासवनिकाऽस्मि
वसन्तसेनाऽहमस्मि॥

—वसन्तसेना। (मधुपर्णी, पृ. १०६)

मधुपर्ण्यां मत्तवारण्याञ्च कविना बहुत्र नामधातवः, सन्प्रत्ययान्ताः, यङन्ताः, यङ्लुगन्ताः, क्विबन्ताश्च शब्दाः प्रयुक्तास्सन्ति। उपमासु व्याकरणशास्त्रीयाः प्रयोगा अनेकत्र दृश्यन्ते। यथा—

अदृष्टोऽसौ, चिरात्पृष्टो मया स्मितकैः श्रुतावूचे।
मनुष्यं नूनमित्संज्ञं गणय बन्धो नियतलोपम्॥

तदीयां शिष्टतामथ सभ्यतां मध्येसभं दृष्ट्वा।
सचिन्तं भावये क्व न भागुरिस्स युयोज अल्लोपम्॥

—साटोपम्। (मत्तवारणी, पृ. ५०)

क्विबिव संयोजने दक्षं क्रियायां सर्वथा लुप्तम्।
मुखं कण्ठीरवं मन्ये हृदयमथ तावकं मेषम्॥

—उभयतोऽप्याहतं हृदयम्। (मत्तवारणी, पृ. ३०)

वर्ण्यवस्तूनां चित्रणे यत्रैकतो शास्त्रीयोपमानानां बहुविधाः प्रयोगा विलसन्ति, तत्रैवाऽपरतोऽन्त्यानुप्राससंवलिता, सौन्दर्यभूषिता, यङन्तयङ्लुगन्तच्विप्रत्ययान्विता भाषा प्रयुक्ता वर्ण्यवस्तुनोऽभिरामतां वर्धयति। उत्प्रेक्षाऽप्रस्तुतप्रशंसाद्यलङ्काराणां किङ्किणीभिः सुशोभना एषां कवितावनिता पदविन्यासमात्रेणैव सहृदयपाठकानां मनांस्यावर्जयति। निदर्शनार्थं सिसोदियावंशावतंसस्य, प्रगुरुपौरुषस्य, पराक्रमनिधेः मेवाडनरेशस्य महाराणाप्रतापस्य यशोगाथागाननिपुणा 'महाराणाप्रतापसिंहं प्रति' इत्याख्या कविताऽवलोकनीयाऽस्ति, या वर्ण्यभावानामङ्कने कवेः वर्णनधाराधुरां वहति—

हे हिन्दूकुलकमलसूर्य
हे स्वाभिमानचरमप्रमाण
चित्तौडभूपते
महाप्राण!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हे नीतिविशारद महामते
हे परमविलक्षण विशाम्पते
तत्कथं त्वया जानताऽप्यहो
कण्टकाकीर्णसङ्घर्षपथः
कान्तारदवानलकल्पोऽसौ
स्वीकृतः सर्वसुखतरुदाही!
स्वीययाऽऽलोकयष्ट्यैव विभो
सन्दीप्तं कस्मादात्मगृहम्?
मुगलाऽधिपत्यमाश्रित्य सुखं
कस्मान्न जीवनाऽमृतं वृतम्?

हे प्रजापते साहसनिधान!
हे भारतभूमङ्गलविधान!
निर्मितवानसि बहलं सैन्यं
सङ्गृह्य समेषां साहाय्यं
कुलवृद्धानामाशीर्वचनं
प्रकृतीनामपि जयजीववच-
स्त्वं प्रलयमरुत्वानिव गर्ज-
न्नरिपृतनोपरि समपतः द्राक्
चेतकपृष्ठारूढस्समरे
करवालभल्लमण्डितहस्तो
दृष्टस्समराङ्गणसूत्रधार!
बाप्पारावलवंशाभिमान!
त्वं शिशोदिया पौरुषप्राण!

(मधुपर्णी, पृ. १२६-१३०)

अभिराजस्य पदशय्या विशिष्टा लयात्मिका च वर्तते। भवेद् रचना छन्दोबद्धा छन्दोनिर्मुक्ता वा। सर्वत्र गतिमयते। आसां पठने, श्रवणे, रसास्वादे च सचेतसो निर्वृतिमाप्नुवन्ति, गाने लयमनुभवन्ति च। भावधारायां प्रवहमानाः पाठका आद्यन्तं पठन्तोऽरुचिमायासं वा नानुविन्दन्ति। उदाहरणार्थं संसारस्य विशालता,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकृतेः रमणीयता, मानवीयभावभङ्गिमानां मधुरता, दुर्वचसां कठोरतेत्यादीनामाकलने कुशलानां प्रत्नेतरतरणिं निर्माणविचक्षणानां संसारं सत्यं, शिवं, सुन्दरञ्च विदधानानां मानसविहारे प्रवीणानां कवीनां चित्रणं 'कविरस्मि' इति शीर्षकेण रचितायां रचनायां दृग्गोचरीभवति—

तरुमूलं वसुन्धरागर्भे
ननु कियद् गभीरं कियद् दृढम्?
कियदुत्तुङ्गं नीलाकाशे
गिरिशिखरं कियत्पुनस्तीक्ष्णम्?
शैतल्यं कियत्कीदृशं वा
निर्झरसरिदम्बुदबिन्दूनाम्?
दाहश्च कीदृशः
सूर्यवह्निवाडवसन्तापज्वालानाम्?
द्राक्षापेक्षयाऽपि हन्त कियन्
माधुर्यं जननीचुम्बानाम्
कुलिशाऽपेक्षया कियच्चण्डं
दुस्सहप्रहरणं दुर्वचसाम्?
इत्येवमादिशत शतनिगूढपृच्छामर्माऽहं
परिचिनोमि
प्रस्तूय समाधानं शनकैः
स्तिमितं कोविदवृन्दं करोमि
जातोऽस्मि जगति केवलमेको जीवोऽहं
बन्धो!
स्वलक्षणः
कविरस्मि संसृतौ विलक्षणः॥

—अहमस्मि कविः। (मधुपर्णी, पृ. १३३)

गजलगीतेः उर्दूपरम्परया समीक्षणं क्रियते चेद् द्वयोश्चरणयो रदीफ-काफिया इत्यभिधानयोः प्रयोगः प्राय उपलभ्यते।

निदर्शनार्थं 'सम्प्रार्थये' इति शीर्षकेण रचिता रचनाऽवलोकनीया। अत्र रदीफपदेन चरणान्तेऽन्तिममावृत्तं पदम्, काफियापदेन तत्पूर्वमावृत्तं पदमुच्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्रैकतो गलज्जलिकैषा परोपकारसार्थक्यनिरभिमानितानिरीहतादानशीलतादिगुणैः संवलिता, तत्रैव गजलनिर्मितिकलायां कविकौशलं सूचयन्ती तदन्तर्भावान् अभिव्यनक्ति—

देहि यस्मै धनं दीनबन्धोऽमितं
तं वदान्यं. विधेहीति सम्प्रार्थये।
देहि यस्मै यशो दिग्दिगन्ताश्रितं
तं निरीहं विधेहीति सम्प्रार्थये।।
वैदुषीं देहि यस्मायकुण्ठां प्रभो
वाग्मिनं तं विधेहीति सम्प्रार्थये।
देहि यस्मै खगत्वं प्रभो निर्भरं
तं जटायुं विधेहीति सम्प्रार्थये।।
देहि यस्मै द्रुमत्वं प्रभो मञ्जुलम्।
चन्दनं तं विधेहीति सम्प्रार्थये।।

—सम्प्रार्थये। (मत्तवारणी, पृ. ६०)

इत्थमेषां छन्दोबद्धछन्दोनिर्मुक्ताऽऽधुनिकरीतिनिर्मितगीतिसपादिकादीनां परिशीलनेन ज्ञायते यद् इमे रचनाकलाकलाधराः, आधुनिककविराजराजिमुकुटेषु जटितोज्ज्वलरत्नप्रभाप्रभाकराः, कृतभूरिपरिश्रमाः, गजलघनलास्यशीला मयूराः, काव्योदधेर्वर्धितपयःपूराः, तुषारकरा हिमकराः, अभिनवकवनीयविद्याविधाननिपुणाः, वाग्विकल्पेषु दर्शितमाधुर्यगुणाः, आधुनिकशिक्षाशिक्षिता अपि प्राचीनशिक्षासु दर्शितपक्षपाताः, वर्णितनिपाता निपाताः, प्रतिभाप्रतिभासप्रखरप्रकाशध्वंसिततमिस्राः **प्रो. राजेन्द्रमिश्राः** लेखनवर्णनकवनगीतविधावनुपमां कीर्तिमश्नुते।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतभाषाशिक्षणम्

डॉ. श्रीमती लतापन्ततैलङ्ग
प्राध्यापिका
शिक्षाशास्त्रविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

***

भारतं नाम भारती, भारती नाम संस्कृतं, संस्कृतं हि संस्कृतिः। सुविदितमिदं सर्वेषां निखिलज्ञानमूलं वेद इति। तस्यैव वेदस्य प्राणभूतेयं संस्कृतभाषा। यतो वेदोऽपौरुषेयस्तत एवेदं स्पष्टं संस्कृतभाषाऽपि अपौरुषेया, अतः खलु न युज्यते मृतेयमिति वार्ता। मृतत्वञ्च तदैवाभ्युपगम्यते, यदा मृता मृतप्राया वा भवति। परमियं संस्कृतभाषा संविधानद्वारा सम्मानिता, जनैरवलम्ब्यमाना बहुत्र विद्यालय-महाविद्यालय-विश्वविद्यालयेषु विविध-जातिवर्णमतानुयायिभिर्विद्वद्भिरध्यापकैश्छात्रैः पाठ्यमाना पठ्यमाना च विराजते, येन चास्या व्यावहारिकता प्रसिद्ध्यति। अस्तु, व्यवहारेऽपि संस्कृतभाषाया विशिष्टता विद्वज्जनैः स्वीकृता।

भाषाशिक्षणं प्रायो व्यवहाराधीनं भवति। भाष्यत इति भाषा। परस्परविचाराणां बौद्धिकाभिव्यक्तेरेकं साधनं भवति भाषा। वस्तुतः शिशुः स्वीयवातावरणे अनुकरणादिद्वारा सावधानं किमपि श्रुत्वा भाषामभिगच्छति। प्रथमं तदीयावश्यकतानुसारेणैव तदीयं भाषाज्ञानमपि वर्धते। तदनु इतरेषामावश्यकता, सामाजिकी राष्ट्रियावश्यकतेति विभिन्नावश्यकतामनुसृत्य तदीयं भाषाज्ञानं व्यवहारकौशलञ्च वर्धते। ध्वनिस्तु पूर्णतोऽनुकरणजन्य एव। प्रारम्भे शिशु-र्मात्रानुकरणेन किमपि पदं स्वीये मनसि स्थापयति, तस्य प्रयोगञ्च करोति। एवंविधिना गच्छता कालेन तस्यार्थमवगच्छति, विचारपूर्वकं प्रयुङ्क्ते च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिशुः प्रथमं व्याकरणं नाधीते, व्यवहारेणैव भाषामवगच्छति, मनसि निधाय व्यवहरति च।

अतोऽध्यापको भाषाशिक्षणावसरे पदानि परिचाययेद् बालकेभ्यः प्रयुक्तान् शब्दान् श्रोतुं प्रयोक्तुञ्चावकाशं कल्पयेत्। एतेन तेषां मनःसु शब्दा ध्वनियुक्ताः सुस्थापिता भवेयुः। छात्राः स्वयमेवानुभवेयुर्व्यवहारेण प्रक्रियया चावश्यकतानुसारं भाषाम्। भाषाशिक्षणे वातावरणं स्वतन्त्रं प्राकृतिकञ्च स्यात्। अतः शिक्षकः छात्रेषु तथा व्यवहरेत्, तादृशान् प्रश्नांश्च पृच्छेत्, यैश्च छात्राः प्रभाविताः प्रेरिताश्च सन्तो भाषामवबुध्येरन्। इयं सामान्यकुशलता उत्तरोत्तरं छात्रान् प्रेरयति व्यवहारकौशलञ्च जनयति। यथा पैनफील्डमहोदयेन उक्तम्—'या काऽपि वा भाषा भवतु क्रियाद्वारा शिक्षणीया, किमवगम्यते नेति अविचिन्त्य मातृभाषावत् प्रयोक्तव्या तथैव भाषायां गतिर्वर्धेत, इति।

यद्यपि भाषाशिक्षणं व्यवहाराधीनं तथाऽपि भाषायां विशेषाधिकारप्राप्तये, प्रयोगवैशिष्ट्याय च व्याकरणं महदावश्यकम्। यतो मौखिकप्रवृत्तीनां शाब्दिकं विवरणमेव व्याकरणम्, व्याक्रियन्ते शब्दा अनेनेति व्युत्पत्तिः। मौखिकप्रवृत्तयः शब्दाः समुचितशाब्दिकविवरणपूर्वकं व्याक्रियन्ते अस्मिन् शास्त्रे इत्यर्थः। अतो भाषाशिक्षणे प्रौढतायै व्याकरणाय महत्त्वमविचार्यमेव।

संस्कृतभाषा राष्ट्रस्य सांस्कृतिकी भाषा, इतरासां भाषाणां जननी च मन्यते; किन्तु इतरा भाषाः कुत्रचित्प्रान्तेषु व्यवहारे परिलक्ष्यन्ते संस्कृतं न तथा, अतस्तस्य अनौपचारिकशिक्षणं न सम्भवति। व्याकरणेन विना संस्कृतं सुबोध्यं न भवति। संस्कृतव्याकरणस्य बहुविशेषतास्सन्ति। यथा, विभक्तय इतरासु भाषासु प्रत्यययोजनेन समानरूपेण सिद्ध्यन्ति। संस्कृते तावद् विभिन्नरूपेण अकारेकारादिशब्दानामाधारेण पुंलिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गभेदेन च विभक्तयः परिणता भवन्ति। एवं क्रियापदान्यपि आत्मनेपदपरस्मैपदादिभेदेन वैशिष्ट्यं भजन्ते। कर्मणि प्रयोगश्च बहुलतया संस्कृत एव दृश्यते। समासास्तद्धिताः कृदन्ताश्च संस्कृतव्याकरणस्यावधेयांशाः। लिङ्गवचनवैविध्यमपि वर्तते। एतादृश-विशिष्टव्याकरणस्य सुबोधाय भगवान् 'पाणिनिः' अष्टाध्यायीं व्यरचयत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकेऽपि जना व्याकरणस्य प्राधान्यं बहु मन्यन्ते, प्राचीनकाले व्याकरणज्ञानहीन उपहास्यतामेति स्म—

यस्य षष्ठी चतुर्थी च विहस्य च विहाय च।
यस्याहं च द्वितीया स्याद् द्वितीया स्यामहं कथम्।।

व्याकरणज्ञानं महत्पौरुष्यममन्यन्त जनाः, मन्यन्ते चेदानीमपि। भाषायाः पौरुष्यं तु व्याकरणमेव। अत एव—

यद्यपि बहुनाधीषे तथाऽपि पठ पुत्र व्याकरणम्।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्।।

इत्युपदिश्यते अभिभावकैः। अन्ततोगत्वा व्याकरणमवश्यमेव अध्येयमिति तात्पर्यम्। निस्सन्देहं भाषा व्याकरणेनैव परिमार्जिता भवति। एवं संस्कृतभाषा बहुविशेषैः संश्लिष्टा। व्याकरणेन विना अस्यां भाषायामधिकारो न सम्भवतीति। अतः पाठशालासु पाठनावसरे संस्कृतशिक्षकैर्व्याकरणस्योपेक्षा न कर्तव्या।

संस्कृतभाषाशिक्षणे शुद्धोच्चारणस्य विशिष्टं महत्त्वम्। व्याकरणशास्त्रे ध्वनिविचारो महान् विस्तृतः परिलक्ष्यते। शिक्षका अध्यापनावसरे तथा प्रयतेरन्, यथा छात्रा ध्वनितत्त्वमवगत्य वर्णान् सम्यगुच्चरेयुः। उच्चारणशिक्षणे व्यक्तिगतमवधानमत्यावश्यकम्। कक्षायामाधुनिकदृश्यश्रव्यसाधनान्युपयुज्य स्वयञ्च वर्णान् सम्यगुच्चार्य प्रतिच्छात्रमुच्चारयितुं निर्दिश्याप्युच्चारणं सुस्पष्टं कारयेत्, यत उच्चारणकौशलं तावद् बाल्यमवलम्ब्यैव सौष्ठवं प्राप्नोति। शिक्षकः स्वयं मुखं व्यादाय जिह्वामूलकप्रयत्नान् प्रदर्श्योच्चारणं बोधयेत्। यतः संस्कृतं सर्वासां भारतीयभाषाणां मूलमतस्तत्रत्या वर्णविशेषाः प्रायेण इतरासु भाषासु तथैव दृश्यन्ते। यदि बाला मौलिकं वर्णोच्चारणं शुद्धमवगच्छेयुः, तदा संस्कृतेतर-भारतीयभाषाणां ध्वनितत्त्वावगमने च क्षमा भवेयुः।

संस्कृतमित्यस्य प्रकृतिप्रत्ययात्मकविचार इत्यर्थः। संस्कृत्य पदानि अन्वाख्यायन्त इति भाषाव्याख्यानावसरे प्रकृतिप्रत्ययान् विवेचयतीति संस्कृतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत इयं भाषा नाम्नैव व्याकरणप्रधाना वर्तते। व्याकरणं पुनः सूक्ष्मविज्ञानं वर्तते। योऽध्यापक एतत्सर्वमवगत्य सावधानेन व्यवहरति, स एव कुशलभाषाशिक्षको भवतीति निश्चप्रचम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघु-ग्रन्थमाला
[६५]

श्रीरघुदेवभट्टाचार्यविरचितः

ईश्वरवादः

सम्पादकः
डॉ. हरेरामत्रिपाठी
उपाचार्यः, सर्वदर्शनविभागे
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य
नवदेहली

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
वि.सं. २०६०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूमिका

दुःखपङ्कनिमग्नानुद्दिधीर्षुः अष्टादशविद्यास्थानेषु अभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको गौतममुनिः प्रणिनाय। तत्र षोडशपदार्थानां तत्त्वज्ञानाद् दुःखात्यन्तिकनिवृत्तिरूपमोक्षस्य प्राप्तिर्भवति। तत्र द्वितीयपदार्थः प्रमेयम्। आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु द्वादशप्रमेयम्। तत्र प्रथमः प्रमेय आत्माऽस्ति। स च जीवात्मपरमात्मभेदेन द्विविधः। परमात्मा कार्यमात्रस्य निमित्तकारणमिति नैयायिकाः स्वीकुर्वन्ति। न चेश्वरे प्रमाणाभावात् तत्र जगत्कारणत्वकल्पनं खपुष्पवदलीकम्, न हि तत्र बाह्यप्रत्यक्षं प्रमाणम्, अरूपिद्रव्यत्वात्। बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे चोद्भूतरूपस्य कारणत्वात्, ईश्वरे च रूपाभावात्। नापि मानसं प्रत्यक्षं स्वात्मभिन्नद्रव्यत्वात्, ज्ञानादिभिन्नत्वाच्च। परात्मनः परेण मनसाऽग्राह्यत्वात्, स्वमनसा स्वप्रत्यक्षं प्रति परात्मव्यावृत्त-विजातीयमनःसंयोगस्यैव कारणत्वात्। नाऽप्यनुमानं प्रमाणम्, ईश्वरस्याप्रत्यक्षतया तस्य केनचिल्लिङ्गेन सहचारदर्शनाभावेन व्याप्तिग्रहो न भवितुमर्हति। न वोपमानं प्रमाणम्, ईश्वरतुल्यस्य कस्यचिदभावेन सादृश्यज्ञानाऽसम्भवात्। नापि शब्दः प्रमाणम्। 'द्यावाभूमी जनयन् देव एकः' इत्यादिश्रुतीनामीश्वरोच्चरितत्वेन प्रामाण्याद् ईश्वरस्यैव संशयितत्वेन ईश्वरोक्ततया श्रुतीनां प्रामाण्ये संशयात्। तथा च प्रत्यक्षानुमानोपमानशब्दप्रमाणानामगोचरत्वाद् ईश्वरस्य वस्तुन एवासत्त्वात् कथं स कार्यमात्रस्य निमित्तकारणमिति वाच्यम्, अनुमानस्य तत्र मानत्वात्, तथा हि न्यायवैशेषिकमतावलम्बिन ईश्वरसिद्ध्यर्थमनुमानप्रमाणप्रदर्शनं कृतवन्तः। वाचस्पतिमिश्रेणोच्यते[1] वेदस्यानुमानस्य चेश्वरसाधकत्वेऽपि एतत्प्रमाणद्वयमीश्वरस्य जगत्कर्तृत्वं सर्वज्ञत्वञ्च परित्यज्य तत्स्वरूपं साधयितुं न कदापि शक्नोति। तेषां मते ईश्वरः अशरीरी[2] विद्यते।

---

१. न्यायवार्तिकतात्पर्यटीका, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, १९९०। पृ. सं. ६०३। न यच्चेश्वरो नाधिष्ठाता परमाण्वादीनामशरीरित्वाद् मुक्तात्मवद् ऐश्वरं ज्ञानं सर्वविषयमनित्यञ्च ज्ञानत्वाद् अस्मदादिज्ञानवत् ....।

२. 'एतस्य वाऽक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठतः' 'द्यावापृथिवी जनयन् देव एकः' 'तदैक्षत बहु स्यां प्रजायेये'त्यादिः। स्मृतिश्च भवति। '........स वेत्ति विश्वं न हि तस्य वेत्ता तमाहुरग्र्यं पुरुषं पुराणम्' इत्यादिका। एतयैवाशरीरित्वं दर्शितं भवति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यायसूत्रकारेण महर्षिगौतमेन 'तत्कारितत्वाद् हेतुः'[१] एतेन सूत्रेण ईश्वरास्तित्वं स्वीकृतम्। सांख्याः शब्दस्य प्रामाण्यं स्वीकुर्वन्ति, तथापि तेन विचारस्थले अप्रत्यक्षवस्तुनोऽसन्दिग्धं ज्ञानं न जायते। अप्रत्यक्षवस्तुनः संशये सति यद्यनुमानप्रमाणेन तन्निश्चयः क्रियते, तर्हि अनुमानस्थले व्याप्तिपक्ष-धर्मताविशिष्टहेतुरावश्यकः। ईश्वरानुमाने व्याप्तिपक्षधर्मताविशिष्टहेतुरेव नास्तीति सांख्यानुयायिनः कथयन्ति। अत एवोदयनाचार्येण न्यायकुसुमाञ्जल्यामुच्यते—

कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।
वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः॥

कार्यायोजनादिशब्दोऽत्र भावप्रधानोऽभिमतः। कार्यं शब्दस्य कार्यत्वमर्थः, आयोजनशब्दस्य आयोजनत्वं कर्मत्वं वार्थः। धृत्यादिशब्दस्य सम्बन्धेऽपि इयमेव कथा। कार्यत्वादिसद्धेतुनैव ईश्वरविषयकमननमनुमितिर्भवति। कार्यत्वहेतुना ईश्वरानुमानाकाराः।

क्षित्यङ्कुरं सकर्तृकं, कार्यत्वाद् यथा घटः। अत्र क्षित्यङ्कुरं पक्षः, सकर्तृकत्वं साध्यम्, कार्यत्वं हेतुः, दृष्टान्तः घटः। यद्यत् कार्यं तत्तत्कर्तृकमिति कार्यत्वं हेतुः सकर्तृकत्वस्य नियतसहचारी। नियतसाहचर्यमेव व्याप्तिरिति कार्यत्वं सकर्तृकत्वस्य व्याप्तिविशिष्टं व्याप्यं वा। क्षित्यङ्कुरादिकमित्यत्र क्षितिः स्थूला पृथिवी, अङ्कुरो द्व्यणुकमादिना तद्घटो मेघो वा ग्राह्यः। अत्र क्षितित्वमङ्कुरत्वं तद्घटत्वमेघत्वादिति चेति न पक्षतावच्छेदकं किन्तु त्रितयसाधारणस्वरूपसम्बन्धात्मकं कार्यत्वं पक्षतावच्छेदकम्, तदवच्छिन्नः पक्षः क्षित्यङ्कुरादिकम्। प्रागभावप्रतियोगित्वात्मकं कार्यत्वं हेतुः। साध्यं सकर्तृकं कर्तृजन्यत्वम्, कर्तृत्वञ्चोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वरूपम्।

न च पक्षतावच्छेदकं यदि क्षितित्वं तर्हि क्षितित्वेन अङ्कुरादेर्ग्रहणसम्भवे अङ्कुरादेः पृथगुपादानमनर्थकमिति वाच्यम्। किञ्च क्षितितत्सामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे दृष्टान्ते घटादौ अंशतः सिद्धसाधनम्। यदि पक्षतावच्छेदकं

१. न्यायसूत्रम्, सभाष्यम्—तत्कारितत्वादहेतुः (सू.२१, अ.४, आ.१)। चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, संवत् २०२६, पृ. ४७९। भाष्य—पुरुषकारमीश्वरोऽनुगृह्णाति, फलाय पुरुषस्य यतमानस्येश्वरफलं सम्पादयतीति। यदा न सम्पादयति तदा पुरुषकर्माफलं भवतीति। तस्मादीश्वरकारितत्वादहेतुः पुरुषकर्माभावे फलानिष्पत्तेरिति। गुणविशिष्टमात्मान्तरमीश्वरः। तस्यात्मकल्पात् कल्पान्तरानुपपत्तिः। अधर्ममिथ्याज्ञान-प्रमादहान्या धर्मज्ञानसमाधिसम्पदा च विशिष्टमात्मान्तरमीश्वरः तस्य, च धर्मसमाधिफलमणि-माद्यष्टविधमैश्वर्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सकर्तृकत्वप्रकारकसन्देहे विशेष्यतावच्छेदकवत्त्वमेव तदा घटस्यापि कदाचित् सकर्तृकत्वप्रकारकसन्देहविशेष्यतावच्छेदकीभूतघटत्वे सिद्धसाधनस्य दुर्वारत्वाद् इत्यस्मिन् ग्रन्थे पूर्वपक्षः।

पक्षतावच्छेदकक्षितित्वावच्छेदेन सकर्तृकत्वसिद्धेरुद्देश्यत्वे तु परमाणौ बाधापत्तेः। जन्यक्षितित्वपक्षतावच्छेदकत्वे प्रत्यक्षप्रमाणमात्रवादिनः चार्वाकमते जन्येतरक्षित्यभावाज्जन्यत्वमात्रस्य पक्षतावच्छेदकत्वौचित्येन पक्षतावच्छेदकादौ क्षितित्वस्य व्यर्थत्वाच्च। अपि च यदि जन्यत्वं पक्षतावच्छेदकं तर्हि पक्षतावच्छेदकजन्यत्वस्य साध्यस्यापि जन्यत्वरूपत्वाद् उद्देश्यतावच्छेदकविधेययोरैक्येनोपनयवाक्याच्छाब्दबोधानुपपत्तेरेव दोषत्वात्। अपि च पक्षतावच्छेदकहेत्वोरैक्यप्रसङ्गाच्चेति वाच्यम्। पक्षतावच्छेदकरूपकार्यत्व(जन्यत्व)-स्वरूपसम्बन्धविशेषः। हेतुस्वरूपकार्यत्वं (जन्यत्वं) प्रागभावप्रतियोगित्वरूपम्, तथा च पक्षतावच्छेदककार्यत्वस्य हेतोरैक्याभावात्।

तथा च जन्यं सकर्तृकं प्रागभावप्रतियोगित्वादित्यनुमानाकारः। ननु एवमनुमानाकारेऽपि स्वोपादानगोचरापरोक्षज्ञानचिकीर्षासमानाधिकरणकृति-जन्यत्वरूपस्य सकर्तृकरूपसाध्यस्य ध्वंसेऽभावेन बाधो व्यभिचारश्च, तत्र स्वोपादानगोचरत्वाविवक्षाया जनकमस्मदादिकृतिजन्यत्वमादाय सिद्धसाधनापत्तेः, इति चेत्, न, सत्त्वविशिष्टजन्यत्वस्य पक्षतावच्छेदकत्वे हेतुतावच्छेदकत्वे च दोषाभावात्।

यत्तु-मते कर्तृकत्वं स्वजननस्वरूपयोग्यादृष्टजनकं यद्यत् तद्भेदकूटविशिष्ट-तथाविधकृतिजन्यत्वं, तथा चोक्तसिद्धसाधनस्य वारणं सम्भवति। अत एव कार्यसामान्यं प्रति ईश्वरकृतिः कारणमिति लोके प्रवादः सङ्गच्छते। न च क्षित्यङ्कुरादिकमकर्तृकं शरीराजन्यत्वात्, आकाशवद् इत्यनुमानेन सत्प्रतिपक्ष इति वाच्यम्। शरीराजन्यत्वं पक्षे क्षित्यङ्कुरादिके भवतु अकर्तृकत्वं मास्तु इति व्यभिचारशङ्कायां तन्निवर्तकतर्काभावाद् उक्तानुमानस्य दुष्टत्वात्, अस्माकन्तु कार्यत्वं यदि सकर्तृकत्वव्यभिचारि स्यात्, तदा कृतिजन्यतावच्छेदकं न स्यादित्यनुकूलतर्कसत्त्वाद् व्यभिचारशङ्कानिरासात्।

उपदर्शितकार्यकारणभावरूपानुकूलतर्केण व्याप्तिसिद्धौ कार्यतावच्छेदेन कृतिजन्यत्वसिद्धौ, अल्पज्ञा जीवाः प्रत्यक्षं कर्तुं न शक्नुवन्ति यत् क्षित्यङ्कुरं किं, केनोपादानेनोत्पन्नञ्च। अल्पज्ञो जीवः क्षित्यङ्कुरविषयकचिकीर्षामर्थात् क्षित्यङ्कुरविषयककार्यकरणे इच्छां यत्नं कृत्वाऽपि क्षित्यङ्कुरादिकमुत्पादयितुं न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शक्नोतीति प्रत्यक्षसिद्धम्। क्षित्यङ्कुरस्वरूपकार्यस्य निमित्तं बहवः कर्तारः सन्तीति स्वीकारोऽनावश्यकः, गौरवात्। अत एव एक एव कर्त्ता लाघवात्। तथा च क्षित्यङ्कुरस्यैकः कर्त्ता अस्ति। स चेश्वरः।

आयोजनम्, आयुज्यते अनेनेति व्युत्पत्त्या आयोजनशब्दस्यार्थः कर्म, क्रिया वा। क्रिययैव वस्तुसकलं युज्यते। अनुमानाकारः सृष्टेः सर्वप्रथमं द्व्यणुकस्यारम्भको यः संयोगः, येन संयोगेन अवयवी उत्पन्नो भवति, स एव आरम्भकः संयोगः। द्व्यणुकारम्भकसंयोगानुकूलक्रिया चेतनप्रयत्नपूर्विका क्रियात्वात्। घटारम्भककपालसंयोगक्रियावत्। एतादृशी क्रिया चाल्पज्ञजीवस्य प्रयत्नेन साध्या नास्ति। अत एवाल्पज्ञजीवातिरिक्त एकः स्वतन्त्रः कर्त्ता अनुमितो भवति। स चेश्वरः।

धृतिः पदार्थो धारणं, सकलस्य पतनाभावो धृतिरिति केचित्। अत्रानुमानाकारः—अखिलं ब्रह्माण्डसकलं, प्रयत्नवदधिष्ठितम्, प्रयत्नवत्कर्तृकधृतिमत्त्वात्, पतनाभावाद् वा। यथा उड्डीयमानविहङ्गमधृतकाष्ठदण्डः। गुरुत्वादेव द्रव्यस्य पतनं जायते। ब्रह्माण्डस्य गुरुत्वेऽपि न पतनं भवति, अपि तु तद् यथास्थानमेव तिष्ठति। तथा च ब्रह्माण्डसकलं प्रयत्नवत्कर्तृकाश्रितमिति सिद्धम्। ब्रह्माण्डसकलस्य धारणरूपप्रयत्नवन्तो जीवा न सन्ति। ब्रह्माण्डसकलस्य गुरुत्वेऽपि पतनाभावरूपधारणरूपप्रयत्नाश्रय एकः स्वतन्त्रचेतनः। स च ईश्वरः।

पद्यतेऽनेनेति व्युत्पत्त्या पदशब्दार्थो व्यवहारः। सृष्ट्यारम्भे ईश्वरो जीवेषु अनुग्रहं कृत्वा जीवान् प्रति वस्तुपरिचयं कारयति। अत्रानुमानाकारः—घटादिसम्प्रदायस्य प्राथमिकव्यवहारः स्वतन्त्रपुरुषाधीनः, व्यवहारत्वात्। आधुनिकपाणिनीयनदीवृद्ध्यादिसंज्ञाव्यवहारवत्। घटादिप्रथमव्यवहारस्य कारका अल्पज्ञजीवा न सन्ति। यो घटादिप्रथमव्यवहारं कारयति स चेश्वरपदवाच्यः। प्रत्यय इत्यस्यार्थः प्रामाण्यं प्रमात्वं वा। अनुमानाकारः—वेदवाक्यजन्यं ज्ञानम्, कारणगुणजन्यं, प्रमात्वात्, यथा प्रत्यक्षप्रमाज्ञानम्। गुणेन ज्ञाने जाते तज्ज्ञानं प्रमा यथार्थं वा भवति। अथवा वेदजन्या प्रमा वक्तृयथार्थवाक्यार्थज्ञानजन्या शाब्दप्रमात्वात् चैत्रवाक्यजन्यप्रमावत्। अनया दिशा सकलवेदार्थस्य यथार्थज्ञानवानेकोऽनुमितो भवति। स एवेश्वरः। अथवा प्रत्ययशब्दार्थो विधिप्रत्ययः। तथा चानुमानाकारः—वैदिकविधिप्रत्यय आप्ताभिप्रायबोधकः, विधिप्रत्ययत्वात्। श्रुतिरित्यस्यार्थो वेदः (अत्र वेदत्वमर्थः)। अत्रानुमानाकारः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदवाक्यं सकलं, पौरुषेयं, वेदत्वात्, आयुर्वेदवत्। वेदे पौरुषेयत्वव्याप्यवेदत्वस्य निश्चये जाते अनुमितिर्भवति, वेदः पौरुषेयः सृष्ट्यारम्भे ईश्वर एव मन्वादिरूपेण अवततार। अत एव वेदस्य आदिवक्ता ईश्वर एव।

वाक्यम् इत्यस्यार्थः वाक्यत्वम्। अत्रानुमानाकारः—वेदः पौरुषेयः, वाक्यत्वात्, महाभारतवत्। अत्र परामर्शे जाते वेदवाक्यं पौरुषेयमिति अनुमितिः प्रमा जायते। यः पुरुषोऽस्य कर्त्ता स एवेश्वरः।

संख्याविशेष इत्यस्यार्थो द्वित्वादिसंख्यात्वम्। तथा चानुमानाकारः— सृष्टिप्रथमद्व्यणुकपरिमाणजनकपरमाणुगतद्वित्वसंख्या अपेक्षाबुद्धिजन्या, द्वित्वसंख्यात्वात्। यथा घटस्य पटस्य च द्वित्वसंख्या। परिमाणमात्रं स्वसजातीयोत्कृष्टपरिमाणजनकं भवति। उक्तानुमानेनेदं सिद्धं भवति यत् परमाणुपरिमाणं न द्व्यणुकपरिमाणस्य कारणं परमाणोर्द्वित्वसंख्यैव द्व्यणुकपरिमाणस्य कारणम्। सृष्टेः प्रथमद्व्यणुकपरिमाणे परमाणोर्द्वित्वसंख्यैव कारणम्। सृष्टिप्रथमे शरीराद्यभाववशाज्जीवो ज्ञानशून्यः, तत्समये यस्य चेतनस्य अपेक्षाबुद्ध्या परमाणोर्द्वित्वसंख्या जायते, स चेश्वरपदवाच्यः। इत्येवं रीत्या उदयनाचार्येण साक्षात्परम्परया ईश्वरसाधकानि अनुमानानि उक्तानि। एवमीश्वरस्य सिद्ध्यनन्तरमीश्वरोच्चरितत्वाद् वेदस्य प्रामाण्यसिद्धौ सत्यां 'यः सर्वज्ञः सर्ववित्' 'यस्य ज्ञानमयं तपः' 'सोऽकामयत बहु स्यां प्रजायेय' 'द्यावाभूमी जनयन् देव एकः' 'ईश्वरमुपासीत' इत्यादिश्रुतिवाक्यान्यपि ईश्वरसिद्धौ प्रमाणानि।

केचित्तु सामान्यतः कार्यत्वेन कृतित्वेन कार्यकारणभावाभावेऽपि विशेषतो घटत्वावच्छिन्नं प्रति कुलालकृतित्वेन कारणतायाः क्लृप्ततया सर्गाद्यकालीनघटव्यक्तिं खण्डघटव्यक्तिं वा पक्षीकृत्य घटत्वहेतुना सकर्तृकत्वसाधने सर्गाद्यसमये कुलालाद्यभावाद् एतत्कुलालस्य च खण्डघटानुकूलप्रयत्नाभावात् तदाश्रयत्वेनेश्वरस्य सिद्धिरिति वदन्ति।

दीधितिकारास्तु सामान्यतः कार्यत्वावच्छिन्नं प्रति कृतेः कारणत्वविरहेऽपि घटत्वावच्छिन्नं प्रति कृतेः कारणतया खण्डघटोत्पत्तेः प्राक्कृतेरावश्यकत्वेन तादृशकृत्याश्रयतया ईश्वरस्य सिद्धिरिति वदन्ति।

आपामरसाधारणजना ईश्वरास्तित्वं स्वीकुर्वन्ति; परन्तु चार्वाकादि-मतानुयायिनो जगत्कर्तृत्वेनेश्वरस्यास्तित्वं न स्वीकुर्वन्ति। तेषां मतनिराकरणाय नव्यनैयायिकमतप्रदर्शनाय रघुदेवेन ईश्वरवादो रचितः। ग्रन्थेऽस्मिन् ईश्वरसाधकानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमाणानि उद्धृतानि। तत्र दीधितिकारमतम्, उदयनाचार्यमतमन्येषां नैयायिकानां च मतं पर्यालोचितमिति दृश्यते। अस्य ईश्वरवादग्रन्थस्य प्रणेता रघुदेवो रघुदेवतर्कालङ्कारभट्टाचार्य एव। अस्य ग्रन्थस्यादौ रघुदेवेनोक्तम्—

यस्याभेदस्फुटपरिचयोत्पादनायार्द्धदेहं
गौरी प्राप्ता हरिरपि यदीयार्द्धदेहं जहार।
प्रत्युद्वामा परिमितगुणग्राममीशं तमाद्यं
वन्दे यस्मादमलमतिभि: प्रार्थ्यते मोक्षलक्ष्मी:।।

रघुदेवभट्टाचार्यकृतद्रव्यसारसङ्ग्रहस्यादौ मङ्गलाचरणरूपेणायं श्लोक एवोपलभ्यते। अत एव रघुदेवभट्टाचार्यस्येयं कृति:। द्रव्यसारसङ्ग्रहस्यान्ते इत्थमुक्तं रघुदेवभट्टाचार्येण।

'इति श्रीयुतमहामहोपाध्यायहरिरामतर्कवागीशभट्टाचार्यशिष्यश्रीयुतरघुदेवभट्टाचार्यविरचितो द्रव्यसारसङ्ग्रह: समाप्त:'। इत्यनेन प्रतिभाति रघुदेव: महामहोपाध्यायहरिरामतर्कवागीशभट्टाचार्यस्य शिष्य आसीत्। रघुदेवभट्टाचार्यकृतस्य द्रव्यसारसङ्ग्रहस्यान्ते 'संवत् १८१८ मिति कुवारवदी ९।। कै पोथीशु पुरानै भ इति' लिखितमस्ति।

अनेन ज्ञायते १८१८ संवत्सरात् पूर्वमेव रघुदेवभट्टाचार्यस्य स्थितिकाल आसीत्। रघुदेवनाम्ना निम्नलिखिता ग्रन्था: समुपलभ्यन्ते—

१. अनुमितिपरामर्शविचार:[१]। २. अवयवग्रन्थ:। ३. आकाङ्क्षावाद:[२]। ४. आख्यातवादटिप्पणी[३] / आख्यातवादविवरणम्[४] / आख्यातवादव्याख्या[५] / आख्यातशक्तिवाद:। ५. इच्छावाद:। ६. ईश्वरवाद:। ७. उपसर्गद्योतकताविचार:। ८. कारकवाद:[६]। ९. कारणतावादार्थ:[७]। १०. कार्यकारणभावविचार:।

---

१. सरस्वतीभवनपुस्तकालये, (वाराणसी) सूचीपत्र-संख्या ३०५१५, ३१७४२, ९५००२, ९५४३२। रघुनाथपुस्तकालये, जम्मू ,, ,, १३२२।
२. सरस्वतीभवनपुस्तकालये, (वाराणसी) ,, ,, ९४४५६।
३. तदेव ,, ,, ३१३०४।
४. तदेव ,, ,, ९४११०।
५. तदेव ,, ,, ९५१३९।
६. तदेव ,, ,, ३१३७७।
७. तदेव ,, ,, ३१३७७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

११. कणादसूत्रव्याख्यानम्। १२. चित्ररूपवादः। १३. ज्ञानद्वयवादः। १४. ज्ञानलक्षणाविचारः। १५. तत्त्वचिन्तामणिव्याख्या[1] गूढार्थदीपिका। १६. तत्त्वचिन्तामण्यालोकटीका। १७. तत्त्वचिन्तामणिदीधितिटीका। १८. तर्कविचारः। १९. दण्डकारणताविचारः। २०. द्रव्यसारसङ्ग्रहः[2]। २१. दशलकारवादः[3]। २२. धर्मितावच्छेदकप्रत्यासत्तिनिरूपणम्। २३. धर्मितावादः। २४. नञर्थवादः/नञर्थटिप्पणी[4]/नञर्थवादटिप्पणी[5]/नञवादव्याख्या[6]/नञवादरहस्यम्[7]/नञवादार्थविवेचनम्[8]। २५. नवीननिर्माणम्[9]/नव्यमतविचारः[10]। २६. न्यायकुसुमाञ्जलिव्याख्या[11]। २७. निरुक्तिप्रकाशः। २८. निश्चयवादः। २९. निश्चयत्वनिरुक्तिः[12]। ३०. पक्षता[13]। ३१. प्रतियोगिज्ञानकारणताविचारः। ३२. प्रतियोगिज्ञानस्य हेतुत्वखण्डनम्। ३३. पदार्थखण्डनविवरणम्[14] / पदार्थखण्डनटिप्पणम् /पदार्थतत्त्वनिरूपणव्याख्या। ३४. मनोवादः। ३५. लक्षणावादः[15]। ३६. लौकिकविषयतावादः। ३७. वादार्थसारसङ्ग्रहः[16]। ३८. विशिष्ट-

---

१. सरस्वतीभवनपुस्तकालये, सूचीपत्र-संख्या ३२९३४,३०४८०, ९७८४८,३४१५८।

२. (क) सरस्वतीभवनपुस्तकालये, सूचीपत्र-संख्या ३०६७९।
(ख) रघुनाथपुस्तकालये, (जम्मू) ,, ,, ३३००।

३. सरस्वतीभवनपुस्तकालये, (वाराणसी) ,, ,, ३१३७९।

४. तदेव ,, ,, ३०९५९,३०६२१।

५. तदेव ,, ,, ३३५१८।

६. तदेव ,, ,, ९७७४०।

७. तदेव ,, ,, ३३५१९।

८. तदेव ,, ,, ९४०१०,९४८१२।

९. तदेव ,, ,, ९७२६७ दीधितिनिरुक्तिः।

१०. तदेव ,, ,, ९५४०१।

११. तदेव ,, ,, ३२६८३,३११९८।

१२. तदेव ,, ,, ९५३००,३०४६४।

१३. तदेव ,, ,, ३१७६१।

१४. तदेव ,, ,, ३०५०६।

१५. तदेव ,, ,, ९५३०१।

१६. तदेव ,, ,, ३०४२४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैशिष्ट्यबोधविचारः[1]। ३९. विशिष्टवैशिष्ट्यवादः[2]। ४०. विशिष्टवैशिष्ट्यावगाहिवादार्थः[3]। ४१. विशेषणतावच्छेदकत्व[4]निर्णयहेतुवादो वा/विशिष्टवैशिष्ट्यबोधः। ४२. विषयतावादार्थः[5]/विषयतावादः[6]। ४३. स्मृतिसंस्कारवादः। ४४. सामग्रीवादः[7]/सामग्रीवादार्थः[8]/सामग्रीविवेचनम्/सामग्रीविचारः[9]। ४५. मुक्तिवादः[10]। ४६. गूढार्थतत्त्वप्रतिपत्तिः।

ईश्वरवादग्रन्थस्य हस्तलेखा विविधेषु पुस्तकालयेषु समुपलब्धाः सन्ति। अस्माकं सम्पादनकर्मणि आधारीभूतास्त्रयो हस्तलेखाः सन्ति। तत्र प्रथमतृतीयौ हस्तलेखौ सरस्वतीभवनपुस्तकालये वाराणस्यां विद्येते। द्वितीयहस्तलेखो रघुनाथपुस्तकालये (जम्मूस्थस्य) (स्टेनसूचीपत्रसंख्या १३२२) विद्यते। अस्य ग्रन्थस्य सम्पादने मूलाधारीभूते सरस्वतीभवनपुस्तकालयस्थपाण्डुलिपी एव विद्येते। पाठभेदोपादानाय प्रथमद्वितीयौ हस्तलेखावेव प्रामुख्येनात्र सम्प्रयुक्तौ विद्येते। द्वितीयहस्तलेखे मङ्गलाचरणं न विद्यते, मध्ये मध्ये अनेकास्त्रुटयस्तत्र सन्ति। परन्तु प्रथमहस्तलेखे द्रव्यसारसङ्ग्रहस्यादौ रघुदेवेन यन्मङ्गलाचरणं विहितं तदेवात्र मङ्गलाचरणं विद्यते। मङ्गलाचरणानन्तरं रघुदेवेन स्वनामोल्लेखः कृतः। यथा—

'यद्यपीह स्वल्पात् किञ्चिदुच्यते' एवं ग्रन्थान्ते 'इति रघुदेवकृत ईश्वरवादः समाप्तः' इत्यनेन प्रतिभाति यदस्य ग्रन्थस्य प्रणेता रघुदेवभट्टाचार्य एव विद्यते। महामहोपाध्यायेन श्रीदिनकरभट्टाचार्येण न्यायसिद्धान्तमुक्तावली-ग्रन्थस्य दिनकरी टीका कृता। तत्रेश्वरसिद्धिः प्रतिपादिता, तेन सह कुत्रचित् साम्यं विद्यते।

---

१. सरस्वतीभवनपुस्तकालये (वाराणसी) सूचीपत्र-संख्या ९४५३५।
२. तदेव ” ” ३१९७२,७३।
३. तदेव ” ” ३०७८९।
४. तदेव ” ” ९४०७९।
५. तदेव ” ” ९४८३७।
६. तदेव ” ” ९७४६०।
७. तदेव ” ” ३१७२७,२८।
८. तदेव ” ” ३०३८९।
९. तदेव ” ” ९४०८०।
१०. तदेव ” ” ३०२९८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्येश्वरवादस्य न्यायसिद्धान्तमुक्तावलीदिनकरीव्याख्यायाश्च कुत्रचिद् व्याख्यानसाम्यम्।

न्यायसिद्धान्तमुक्तावल्या दिनकरी

१. ननु कार्यं विशेष्यतासम्बन्धावच्छिन्नकृतिनिष्ठजनकतानिरूपितसमवायसम्बन्धावच्छिन्नजन्यताशालिप्रागभावप्रतियोगित्वादित्यनुमानं फलितं, तत्र च ध्वंसे पक्षतावच्छेदकजन्यत्वाक्रान्ते विशेष्यतासम्बन्धावच्छिन्नकृतिनिष्ठजनकतानिरूपितसमवायसम्बन्धावच्छिन्नजन्यत्वरूपसाध्यस्याभावाद् बाध इति चेन्न। सत्त्वविशिष्टजन्यत्वस्यैव ध्वंसव्यावृत्तस्य पक्षतावच्छेदकत्वोपगमात्। न च हेत्वधिकरणे ध्वंसे उक्तसाध्याभावेन व्यभिचार इति वाच्यम्। सत्त्ववैशिष्ट्यस्य हेतौ विशेषणात्। अथैवं रीत्या व्यभिचारवारणेऽपि ध्वंसस्य कृतिजन्यत्वे मानाभावेन कार्यमात्रकृतिजन्यत्वप्रवादो व्याहन्येतेति चेन्न। तादृशप्रवादस्य निर्युक्तिकत्वेनाश्रद्धेयत्वात्।

यद्वा जन्यत्वमात्रं ध्वंससाधारणमेव पक्षतावच्छेदकं, कृतिजन्यत्वमात्रसाध्यमेवञ्च हेतावपि सत्त्ववैशिष्ट्यं नोपादेयं प्रयोजनाभावात्। एवञ्च ध्वंसेऽपि ईश्वरीयकृतिजन्यत्वस्य निराबाधतया कार्यमात्रे कृतिजन्यत्वप्रवादोऽप्युपपद्यत इति। न च कृतिजन्यत्वमात्रस्य साध्यत्वेऽदृष्टद्वारा

रघुदेवकृत ईश्वरवादः

१. अथैवं सति जन्यं सकर्तृकं प्रागभावप्रतियोगित्वादित्यनुमानं पर्यवसन्नं तच्च न सम्भवति ध्वंसस्यासमवेततया सकर्तृकत्वस्य स्वोपादानगोचरापरोक्षज्ञानचिकीर्षासमानाधिकरणकृतिजन्यत्वरूपस्य ध्वंसेऽभावेन बाधादिति। न च तत्र स्वोपादानगोचरत्वविवक्षायां प्रयोजनाभावाद् इति वाच्यम्। तथा सत्यदृष्टजनकास्मदादितथाविधकृतिमादाय सिद्धसाधनापत्तेः। न दृष्टान्तपक्षसाधारणस्वत्वस्यैकस्याभावात्, तथा निवेशो न सम्भवतीति वाच्यम्। समवायसम्बन्धेन कार्यत्वावच्छिन्नं प्रति विषयताप्रत्यासत्त्यैव कृत्यादेः हेतुतया विषयताप्रत्यासत्त्यवच्छिन्नतथाविधकृतिकारणतानिरूपितसमवायसम्बन्धावच्छिन्नकार्यत्वस्य तदर्थत्वसम्भवेनानुपपत्त्यभावादिति चेन्न। सत्त्वविशिष्टजन्यत्वस्य प्रतियोगिविशिष्टजन्यत्वस्य वा पक्षतावच्छेदकत्वे दोषाभावात्। यत्तु कर्तृकत्वमिह नोपदर्शितस्वोपादानगोचरत्वगर्भमपि तु स्वजननस्वरूपयोग्यादृष्टजनकं यद्यत्तद्भेदकूटविशिष्टतथाविधकृतिजन्यत्वं तथाप्युपदर्शितासिद्धसाधनवारणसम्भवात्। एवञ्च ध्वंसे तथाविधसाध्याभावा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यायसिद्धान्तमुक्तावली दिनकरी	रघुदेवकृत ईश्वरवादः
हविरादिगोचरास्मदीयकृतिजन्यत्वमादाय सिद्धसाधनमिति वाच्यम्। अदृष्टद्वारकत्वेन कृतिजन्यताया विशेषणीयत्वादिति दिक्।	निर्णयेन बाधासम्भवाज्जन्यत्वस्य शुद्धस्य पक्षतावच्छेदकत्वेऽपि न क्षतिः। अत एव कार्यसामान्यं प्रति ईश्वरकृतिः कारणमिति प्रवादोऽपि सङ्गच्छते। तथाविधभेदकूटस्य दुर्ज्ञेयतया तद्घटितधर्मेण साध्यत्वासम्भवेनोपदर्शितरीतेरावश्यकत्वात् निर्युक्तिकत्वं प्रवादस्य अश्रद्धेयतया उपदर्शितप्रवादव्याघातेऽपि क्षत्यभावादिति।
२. केचित्तु मास्तु कार्यत्वं कृतेः कार्यतावच्छेदकं तथापि घटत्वाद्यवच्छिन्नं प्रति कृतेः कारणतया, सर्गाद्यकालीनघटादिकं पक्षीकृत्य घटत्वादिहेतुना सकर्तृकत्वसाधने जीवानां बाधादीश्वरसिद्धिरित्याहुः।	२. अस्तु वा घटपटत्वाद्यवच्छिन्नं प्रति कृतित्वेन विशिष्यहेतुता, तथापि सर्गाद्यकालीनं घटादिकं पक्षीकृत्य घटत्वादिहेतुना सकर्तृकत्वसाधनेनेश्वरसिद्धिरप्रत्यूहैवेति।
३. कार्यत्वावच्छिन्नं प्रति कृतित्वेनैकहेतुत्वकल्पनस्यैवोचितत्वात्।	३. अन्वयव्यतिरेकाभ्यां कार्यत्वावच्छिन्नं प्रति कृतित्वेनैव हेतुत्वस्य क्लृप्तत्वात्।
४. तदुक्तमाचार्यैः—एकामसिद्धिं परिहरतो द्वितीयापत्तिरिति।	४. अत एवोक्तमाचार्यैरात्मतत्त्वविवेके ईश्वरवादे—'एकामसिद्धिं परिहरतो द्वितीयापत्तेरिति वाच्यम्'।

रघुदेवकृत-ईश्वरवादस्य संशोधनं रघुनाथपुस्तकालयस्य हस्तलिखितपाण्डुलिपितः कृतमस्ति। विदुषां परामर्श एवात्र भविष्यति प्रमाणम्।

कार्तज्ञ्यज्ञापनम्

कस्यापि ग्रन्थस्य सम्पादने काठिन्यमनुभवन्त्येव विद्वांसः। अतस्तत्तद्विद्यासु निष्णातानां गुरूणामेवादौ कार्तज्ञ्यं शिरसा वहामि। परमश्रद्धेयानां **प्रो. विद्यानिवासमिश्र**महोदयानां पादपद्मयोर्भूयो भूयः सश्रद्धं प्रणतिं समर्पयामो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येऽस्मान् नितरां स्निह्यन्ति। सम्पादनकार्यं कुर्वता पाण्डुलिप्यक्षरदोषाच्च पदे पदे महत्काठिन्यमनुभवता मया सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य न्यायवैशेषिक-विभागाध्यक्षाणामाचार्यपदमलङ्कृतानां नव्यन्यायशास्त्रे गङ्गेशसदृशानामाचार्याणां **श्रीवशिष्ठत्रिपाठि**महोदयानां मार्गनिर्देशनेनेदं कार्यं सम्पादितम्। अत एतेषां गुरुवराणां चरणाभ्यां सनतिं कुसुमाञ्जलिं वितरामि। अथ पूज्यमातृपितृचरणाभ्यां सनतिं कुसुमाञ्जलिं वितरामि। **डॉ. ललितकुमारत्रिपाठिनो**ऽपि धन्यवादार्हाः सन्ति, येषां सत्प्रेरणया इदं कार्यं सम्पादितं मया।

अस्य ग्रन्थस्य हस्तलेखच्छायाप्रतिः सरस्वतीभवनपुस्तकालयतः प्राप्ता। एतदर्थं तद्विश्वविद्यालयस्य कुलपतयः, अधिकारिणः, पुस्तकालयाध्यक्षाः, कर्मचारिणश्च धन्यवादार्हाः। जम्बूस्थरघुनाथमन्दिरपुस्तकालयस्य धर्मार्थ-ट्रस्टाधिकारिणो विशेषतस्तत्पुस्तकालयाध्यक्षाः **डॉ. धनिरामशास्त्रिणो** धन्यवादार्हाः। अस्य ग्रन्थस्य प्रकाशने साहाय्यं विहितवान् **श्रीकृष्णमुरारीत्रिपाठी**, सोऽपि धन्यवादार्हः।

अतः परं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्याङ्गभूतस्य अनुसन्धान-संस्थानस्य निदेशकानां **डॉ. राजारामशुक्ल**महोदयानां, प्रकाशनसंस्थानस्य निदेशकानां **डॉ. हरिश्चन्द्रमणित्रिपाठि**महोदयानाञ्च सत्प्रेरणया सम्पादनकार्यं सञ्जातम्। अतस्तेषां हृदयेन कार्तज्ञ्यं शिरसा वहामि। **डॉ. ददन-उपाध्यायैः** अन्यैः संस्थाने कार्यरतैः कर्मचारिभिश्च सततपरामर्शपूर्वकं मुद्रणसौविध्यं सम्पादितमतस्तान् प्रति कृतज्ञतां वितरामि। मुद्रणालयाधिकारिणो मुद्रकाश्च धन्यवादार्हाः, यैः अस्य ग्रन्थस्य मुद्रणं शीघ्रमेव कृतम्।

अस्य ग्रन्थस्य सम्पादने यथामति पाठनिर्धारणार्थं कश्चन प्रयत्नो व्यधायि। तथाप्यत्र यदि क्वचन त्रुटयः स्युः, तर्हि क्षमां याचे। यथा—

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः।। इति।

अन्ते च विश्वनाथस्वरूपं हनुमन्तं प्रणम्य विरमामि।

नवदेहली
वैक्रमसंवत् २०६०

विदुषां वशंवदः
हरेरामत्रिपाठी
उपाचार्यः, सर्वदर्शनविभागस्य
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणिका

विषयाः	पृष्ठ-संख्या
१. भूमिका	१-११
२. मङ्गलाचरणम्	१५
३. जन्यत्वमेव पक्षतावच्छेदकम्	१५
४. यत्तु-मते ईश्वरस्य ज्ञानादिसिद्धिः	१७
५. वेदानां प्रामाण्यम्	१९
६. कार्यकारणभावसिद्धिः	१९
७. आचार्यमतस्योदाहरणम्	१९
८. पुनराचार्यमतस्योदाहरणम्	१९
९. शरीरजन्यत्वस्योपाधित्वनिरासः	२०
१०. ईश्वरस्य भोगावच्छेदकशरीरनिरासः	२०
११. शरीरत्वस्य जातित्वनिरासः	२०
१२. ईश्वरस्य परमाणुरूपाणि शरीराणि	२१
१३. वस्तुतस्तु इति मते ईश्वरानुमानम्	२२
१४. उदयनाचार्यमते परमाणुरूपस्येश्वरशरीरसिद्धिः	२२
१५. नवीनमतम्	२२
१६. ग्रन्थकारमते ईश्वरस्य नित्यज्ञानादिसिद्धिः	२२
१७. परिशिष्टम्—क	२५
१८. परिशिष्टम्—ख	२६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीरघुदेवभट्टाचार्यकृतः

ईश्वरवादः

।। ॐ नमः परमात्मने ।।

यस्याभेदस्फुटपरिचयोत्पादनायार्द्धदेहं
गौरी प्राप्ता हरिरपि यदीयार्द्धदेहं जहार।
प्रत्युद्दामा परिमितगुणग्राममीशं तमाद्यं
वन्दे यस्मादमलमतिभिः प्रार्थ्यते मोक्षलक्ष्मीः।।

यद्यपीह न सन्देहो न वास्ति विकल्पनान्यथा तथापि रघुदेवेन स्वल्पात् किञ्चिदुच्यते। ईश्वरे[१] न तावत् प्रत्यक्षं प्रमाणम्। आत्मप्रत्यक्षानुकूलास्मदीयविजातीयमनःसन्निकर्षस्य तत्राभावात्। अन्यथा परात्मनोऽपि प्रत्यक्षापत्तेः। नापि[२] यः सर्वज्ञः स सर्वविद् यस्य ज्ञानमयं तपस्तस्मादेतद् ब्रह्मनामरूपमन्नं च जायत इत्यादि श्रुतयस्तत्र प्रमाणम्। श्रुतीनामीश्वरोक्तत्वेनैव प्रामाण्येन तत्सन्देहे तासां सन्दिग्धप्रामाण्यकत्वात्। न च नित्यत्वेन यन्निर्दोषत्वे तेनैव तासां प्रामाण्यमिति वाच्यम्। वर्णानित्यतावादे नित्यत्वस्य तत्र दूषितत्वात्। किन्तु विवादाध्यासितकर्तृपक्षककार्यत्वहेतुकसकर्तृकत्वानुमानं[४] तत्र प्रमाणम्। तत्र परार्थानुमाने विचाराङ्गविप्रतिपत्त्यावश्यकताया विप्रतिपत्तयो विवादाध्यासितकर्तृकं[५] सकर्तृकं न वेत्यादयो बोध्याः।

नन्वत्र किं पक्षतावच्छेदकं[६] विवादविषयकर्तृकत्वं तदिति दुर्वचत्वात्। न च सकर्तृकत्वप्रकारकसन्देहे विशेष्यतावच्छेदकत्वमेव[७] तदिति वाच्यम्। घटस्यापि

---

१. ख पुस्तके अथेश्वरसमुद्भावे न प्रत्यक्षं प्रमाणमिति पाठः।

२. ख नापि यः सर्वज्ञ इत्यादि श्रुतयस्तत्र प्रमाणम्।

३. वर्णानामनित्यताया व्यवस्थापितत्वात्।

४. क्षित्यादिपक्षकसकर्तृकत्वानुमानं तत्र प्रमाणम्।

५. कर्तृकत्वं।

६. न च विवादविषयकर्तृकत्वं तदिति वाच्यं तस्य दुर्वचत्वात्।

७. विशेष्यतावच्छेदकत्वमिति पाठः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कदाचित् सकर्तृकत्वप्रकारकसन्देहविशेष्यतावच्छेदकीभूतघटत्ववत्त्वेन सिद्धसाधनस्य दुर्वारत्वात्।

न चावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वादंशतः सिद्धसाधनस्यादोषत्वमिति वाच्यम्। तथापि यत्राङ्कुरविशेषे सकर्तृकत्वस्य[१] न सन्देहः, तत्र सकर्तृकत्वासिद्धेः[२]। न च जन्यत्वमेव[३] पक्षतावच्छेदकमवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यतायामंशतः सिद्धसाधनस्यादोषतया[४] न कोऽपि दोष इति वाच्यम्। प्रकृते कार्यत्वस्य हेतुतया[५] पक्षतावच्छेदकस्य हेतुत्वप्रसङ्गादिति चेन्न। जन्यत्वस्यैवात्र पक्षतावच्छेदकत्वात्। न चोक्तदोषः, तस्य स्वरूपसम्बन्धविशेषहेतुस्वरूपकार्यत्वस्य[६] तु प्रागभावप्रतियोगित्वरूपतयानुक्तानुपपत्त्यभावात्[७]। अथैवं[८] सति जन्यं सकर्तृकं प्रागभावप्रतियोगित्वादित्यनुमानं पर्यवसन्नं तच्च न सम्भवति। ध्वंसस्यासमवेततया सकर्तृकत्वस्य स्वोपादानगोचरापरोक्षज्ञानचिकीर्षासमानाधिकरणकृतिजन्यत्वरूपस्य[९] ध्वंसे[१०]ऽभावेन बाधादिति।

न च तत्र स्वोपादानगोचरत्वविवक्षायां प्रयोजनाभावादिति[११] वाच्यम्। तथा सत्यदृष्टजनकास्मदादितथाविधकृतिमादाय[१२][१३] सिद्धसाधनापत्तेः। न दृष्टान्तपक्षसाधारणस्वत्वस्यैकस्याभावात्[१४] तथा निवेशो न सम्भवतीति वाच्यम्। समवायसम्बन्धेन कार्यत्वावच्छिन्नं प्रति विषयताप्रत्यासत्त्यैव कृत्यादेर्हेतुतया विषयताप्रत्यासत्त्यवच्छिन्नतथाविधकृतिकारणतानिरूपितसमवायसम्बन्धावच्छिन्नकार्यत्वस्य तदर्थत्वसम्भवेनानुपपत्त्यभावादिति चेन्न। सत्त्वविशिष्टजन्यत्वस्य प्रतियोगि[१५]विशिष्टजन्यत्वस्य वा पक्षतावच्छेदकत्वे दोषाभावात्[१६]।

---

१. ख सकर्तृकस्य इति पाठः। २. ख साध्यासिद्धेः इति पाठः।
३. ख जन्यत्वमेवात्र इति पाठः।
४. ख सिद्धसाधनस्य पूर्ववददोषत्वादिति वाच्यमिति पाठः।
५. ख हेतुपक्षतावच्छेदकयोरैक्यप्रसङ्गादिति चेन्न।
६. ख रूपतया इति पाठः। ७. ख रूपतयोक्तानुपपत्तेरभावादिति पाठः।
८. ख अथैवं तदनुमानं न सम्भवतीति पाठः।
९. ख सकर्तृकत्वस्योपादान इति पाठः। १०. ख ध्वंसे इति पाठो न विद्यते।
११. ख प्रयोजनाभाव इति पाठः। १२. ख जनकास्मदीय इति पाठः।
१३. ख कृतिजन्यत्वमादाय इति पाठः। १४. ख स्वत्वस्यैक्याभावादिति पाठः।
१५. ख प्रतियोगित्वविशिष्ट इति पाठः। १६. ख पक्षतावच्छेदकत्वेनादोषादिति पाठः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्तु कर्तृकत्वमिह नोप[१]दर्शितस्वोपादानगोचरत्वगर्भमपि तु स्वजननस्वरूपयोग्यादृष्टजनकं यद्यत्तद्भेदकूटविशिष्टतथाविधकृतिजन्यत्वं तथा[२]प्युपदर्शितसिद्धसाधनवारणं[३] सम्भवति। एवञ्च ध्वंसे तथाविधसाध्याभावानिर्णयेन बाधासम्भवाज्जन्यत्वस्य शुद्धस्य पक्षतावच्छेदकत्वेऽपि न क्षतिः। अत[४] एव कार्यसामान्यं प्रति ईश्वरकृतिः कारणमिति प्रवादोऽपि सङ्गच्छते। [५]तथाविधभेदकूटस्य दुर्ज्ञेयतया तद्घटितधर्मेण साध्यत्वासम्भवेन उपदर्शितरीतेरावश्यकत्वात्, निर्युक्तिकत्वप्रवादस्याश्रद्धेयतया उपदर्शितप्रवादव्याघातेऽपि क्षत्यभावादिति। यत्तु क्षितित्वमत्र पक्षतावच्छेदकमिति। तन्न। क्षितित्वस्य पृथिवीत्वापरपर्यायस्य सामानाधिकरण्येन पक्षतावच्छेदकत्वे घटादिकमादाय सिद्धसाधनात्।

अवच्छेदकावच्छेदेन तथात्वे पार्थिवपरमाणौ कार्यत्वरूपहेतोर्भागासिद्धेरिति। य[६]त्तु क्षितित्वमात्रं अङ्कुरत्वं द्व्यणुकत्वं नित्यसमवेतत्वं वात्र पक्षतावच्छेदकमिति। ए[७]तदपि मन्दम्। जन्यमात्रे सकर्तृकत्वासिद्धेः। तत्र तत्सिद्ध्यर्थम[८]नुमानान्तरकल्पने गौरवाच्चेति। ननु किमत्र साध्यं न तावत् ज्ञानचिकीर्षासमानाधिकरणकृतिनिष्ठविषयताप्रत्यासत्त्यवच्छिन्नकारणतानिरूपितसमवायसम्बन्धावच्छिन्नकार्यत्वं[९] तत्साध्यतावच्छेदककोटौ सामानाधिकरण्यान्तनिवेशे प्रयोजनाभावाद् व्यर्थविशेषणत्वाच्च व्यापकेन व्यर्थविशेषणत्वमिति प्रवादस्य निर्युक्तिकत्वेना[१०]ऽश्रद्धेयत्वात्।

न च मास्तु तन्निवेश इति वाच्यम्। तथा सतीश्वरस्य ज्ञानेच्छयोरसिद्ध्यापत्तेः। न च कृते साक्षाद्विषयतानिरूपकत्वाभावेनेश्वरकृतौ

१. ख उपदर्शित इति न पाठः।

२. ख तथाप्युक्त इति पाठः।

३. ख वारणात् इति पाठः।

४. ख कुत इति पाठः।

५. ख अन्यथा समवेतकार्यं प्रत्येव तस्याहेतुतया उपदर्शितप्रवादो व्याहन्येतेति। तन्न। इति पाठः।

६. ख यत्तु अङ्कुरत्वं द्व्यणुकत्वं नित्यसमवेतत्वमात्रं वा पक्षतावच्छेदकमिति इति पाठः।

७. ख तदपि मन्दमिति पाठः।

८. ख अनुमानान्तरमिति पाठः।

९. ख समानाधिकरणकृतिनिष्ठविषयताप्रत्यासत्त्यवच्छिन्नकारणतानिरूपितसमवायसम्बन्धावच्छिन्नकार्यत्वे सामानाधिकरण्यांशनिवेशः, प्रयोजनाभावादिति पाठः।

१०. ख निर्युक्तिकतयाऽश्रद्धेयत्वात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सविषयकज्ञानसमानाधिकरणेच्छासामानाधिकरण्यरूपपरतन्त्रविषयत्वसम्पत्त्यर्थमीश्वरे ज्ञानेच्छयोरङ्गीकार आवश्यक इति वाच्यम्, जीवनयोनियत्नवत्तादृशकृतेर्निर्विषयकत्वे क्षतिविरहात्। यदि चादृष्टवदात्मसंयोगस्यैव प्राणपञ्चकसञ्चारजनकत्वसम्भवेन जीवनयोनियत्ने मानाभावेन कृतेः सविषयकत्वनियमस्याप्यक्षततया ईश्वरप्रयत्नस्यापि सविषयकतेति[1] विभाव्यते, तथापि न क्षतिः। कृतौ साक्षादतिरिक्तविषयताभ्युपगमेनैवोपपत्तौ[2] तत्र ज्ञानेच्छयोरङ्गीकारस्य निष्प्रयोजनकत्वात्। न च कृते साक्षाद्विषयित्वस्वीकारे ज्ञानत्वापत्तिः। साक्षाद्विषयितावत्त्वस्य ज्ञानत्वव्याप्यत्वादिति वाच्यम्। तादृशनियमे मानाभावादिति। यत्तु ज्ञानादित्रितयजन्यत्वस्य प्रकृतेः साध्यत्वादीश्वरस्य ज्ञानादिसिद्धिरिति। तन्न, अप्रयोजकत्वात्। अन्वयव्यतिरेकाभ्यां[3] कार्यत्वावच्छिन्नप्रतिकृतित्वेनैव हेतुत्वस्य क्लृप्तत्वात्। न च विनिगमनाविरहात् ज्ञानत्वादिनापि हेतुत्वमायास्यतीति वाच्यम्। तादृशकार्यकारणभावग्राहकान्वयव्यतिरेकाभावात्।[4] अत एव ज्ञानेच्छाकृतिविषयत्वमत्र[5] साध्यत्वमित्यपि परास्तमप्रयोजकत्वात्। इति चेन्मैवम्, उपदर्शितकार्यकारणभावरूपानुकूलतर्कबलेन[6] कृतौ अशरीरिसमवेतत्वातिरिक्तसमवेतत्वबाधसहकृतात् सकर्तृकत्वसाध्यकानुमानात् कार्यत्वावच्छेदेन कृतिजन्यत्वसिद्धौ कृतौ अन्वयव्यतिरेकाभ्यामशरीरिसमवेतत्वातिरिक्तसमवेतत्वबाधसहकृतादियं कृतिः समवेता गुणत्वादित्यनुमानादीश्वरसिद्धौ वेदः[7] सकर्तृकः, उच्चरितवाक्यत्वादित्यनुमानादितरबाधबलात्तत्रेश्वरकर्तृकत्वसिद्धौ तेन वेदस्य प्रामाण्यसिद्धे यः सर्वज्ञः[8] सर्वविद्यस्य ज्ञानमयं तम इत्यादि, सोऽकामयत बहु स्यां प्रजायेयेत्यादिवाक्येभ्य एव इत्यादिश्रुतिवाक्येभ्य एव तस्य[9] ज्ञानेच्छासिद्धेरप्रत्यूहत्वात्। ननु[10] सर्वमिदं सम्भवति कार्यत्वावच्छिन्नं प्रतिकृतित्वेन हेतुत्वे तदेव तु कुत इति चेत्,

---

१. ख सविषयकत्वमिति पाठः।

२. ख विषयतानिरूपकत्वादुपगमेनैवोपपत्ताविति पाठः।

३. ख अन्वयव्यतिरेकानुविधानाभ्यामिति पाठः।

४. ख तथाविध इति अधिकः पाठः।

५. ख मात्रसाध्यमिति पाठः।

६. ख तर्कवत्त्वेन सकर्तृकत्वसाध्यकानुमानादिति पाठः।

७. ख वेद उच्चरितः, वाक्यत्वाद् इति पाठः।

८. ख यः सर्वज्ञ इत्यादिश्रुतिभ्य एव इति पाठः।

९. ख तस्य सर्वविषयकज्ञानेच्छासिद्धेरप्रत्यूहत्वादिति पाठः।

१०. ख ननु सर्वमिदं सम्भवतीति खपुस्तके नास्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदेव हि घट[1]पटादिस्थले कुलालादिकृतीनाम[2]न्वयव्यतिरेकानुविधानबलाद् घट[3]पटादिकं प्रति कृतित्वेन हेतुत्वे कल्पनीये लाघवात् कार्यत्वावच्छिन्नं प्रत्येव तत्कल्प्यते। न तु घट[4]त्वपटत्वाद्यवच्छिन्नं प्रति, तथा सत्यनन्तकार्य-कारणभावकल्पने गौरवात्।

न च भवन्मतेऽपि कालिकसम्बन्धेन घटत्वादिक[5]मादाय विनिगमनाविरहे घटत्वादिभेदेन कार्यकारणभावभेदस्यावश्यकतया मन्मतेन क्व[6] गौरवावकाश इति वाच्यम्। समवायसम्बन्धेन घटत्वादिविशिष्टं प्रति कृतित्वेन हेतुत्ववादिनामपि विनिगमनाविरहेण तादृशकार्यकारणभावस्य दुरुद्धरतया गौरवस्य दुर्वारत्वादिति विशेषतो अन्वय[7]व्यतिरेकानुविधानबलादपि तादृशकार्यकारणभावसिद्धिः। अन्यथा कार्यत्वावच्छिन्नं प्रति उपादानत्वेनापि हेतुत्वासिद्ध्या निरुपादानककार्योत्पत्ति-प्रसङ्गात्। अत एवात्मतत्त्वविवेके ईश्वरानुमानविवेचन[8]प्रस्तावे निरुपादानक-कार्योत्[9]पत्तिप्रसङ्गादित्याद्युक्तमाचार्यैः। अस्तु वा घटपटत्वाद्यवच्छिन्नं प्रति कृतित्वेन विशिष्य हेतुता, तथापि सर्गाद्यकालीनं घटादिकं पक्षीकृत्य घटत्वादिहेतुना सकर्तृकत्वसाधनेश्वरसिद्धिरप्रत्यूहैवेति। यत्तु जन्यमकर्तृकं शरीराजन्यत्वादि-त्यादिनासत्प्रतिपक्षसम्भवात्, नोप[10]दर्शितानुमानाज्जन्यमात्रे सकर्तृकत्वसिद्धिः। न चात्र शरीरविशेषणस्य व्यभिचारावारकत्वेन व्यर्थत्वान्न तुल्यबलतेति वाच्यम्। तस्य व्यभिचारावारकत्वेऽपि स्वरूपासिद्धिवारकत्वेनैव सार्थकत्वात्। न च व्यभिचारावारकत्वरूपव्यर्थत्वविशिष्टविशेषणज्ञानवत्त्वज्ञानस्य व्याप्तिग्रहविघटकतया स्वरूपासिद्धिः स्वरूपस्य।

अत एवोक्तमाचार्यैरात्मतत्त्वविवेके ईश्वरवादे—एकामसिद्धिं परिहरतो द्वितीयापत्तेरिति वाच्यम्। अधिकोक्त्या व्यर्थविशेषणत्वस्य निग्रहस्थलमात्र-सम्पादकतया तथावि[11]धव्यर्थविशेषणवत्त्वज्ञानस्य व्याप्तिग्रहप्रतिबन्धकत्वे

---

१. ख घटादिस्थले इति पाठः; २. ख अन्वयव्यतिरेकाभ्यामिति पाठः।
३. ख घटादिकमिति पाठः; ४. ख घटत्वाद्यवच्छिन्नमिति पाठः।
५. ख घटत्वादिमत्वमादायेति पाठः; ६. ख क्व इत्यस्य न पाठः।
७. ख अन्वयव्यतिरेकाभ्यामपि सामान्यकार्यकारणभावसिद्धिः।
८. खपुस्तके विवेचन इत्यस्य पाठो नास्ति।
९. ख कार्योत्पत्तिरित्युक्तमाचार्यैरिति पाठः।
१०. ख नानुमानाज्जन्यमात्रे इति पाठः।
११. खपुस्तके तथाविध इत्यस्य पाठो नास्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानाभावेन तस्य व्याप्यत्वासिद्धिमत्त्वानाक्रान्ततयाऽनुपपत्तेरभावात्। न च[१] एकामसिद्धिमित्याचार्यलिखनविरोध इति वाच्यम्, आचार्यैरभ्युपेत्य तथोक्तत्वात्। [२]गुरुधर्मस्य व्याप्यतावच्छेदकत्वाभावेन साध्यसम्बन्धितावच्छेदक[३]त्वव्याप्तेस्तस्य प्रतियोगितावच्छेदकत्वाभावत्वस्वरूपत्वे तु यद्धर्मविशिष्टाधिकरणवृत्त्यभाव-प्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकत्वभावघटितव्याप्तेरपि तत्राभावाद-तुल्यबलतया न तेन सत्प्रतिपक्षसम्भव इति वाच्यम्। गुरुधर्मस्य व्याप्यतावच्छेदकत्वाभावे अभाव[४]प्रतियोगितावच्छेदकत्वाभावे वा प्रमाणाभावेन तत्रापि व्याप्तिसत्त्वादिति, तदपि न मनोरमम्,[५] प्रतिस्थापनानुमानप्रयुक्त-हेतोरनु[६]कूलतर्काभावेनाप्रयोजकतया स्थापनानुमानप्रयु[७]क्तहेतोस्तूपदर्शित-कार्यकारणभावरूपानुकूलतर्कसत्त्वेन बलवत्तया सत्प्रतिपक्षासम्भवात्। अत एवात्र स्थापनानुमाने शरीरकर्तृकत्वं शरीरजन्यत्वं वोपाधिरित्यपि प्रत्युक्तम्। उपदर्शित-कार्यकारणभावरूपानुकूलतर्केण कार्यत्वे सकर्तृकत्वव्याप्यत्वनिर्णये तद्वा व्यापकत्वेन शरीरकर्तृकत्वादौ साध्याव्यापकतानुमानसम्भवे साध्यव्यापकतानिर्णया-भावेनोपदर्शितानुपपत्त्यभावादिति। न चो[८]पदर्शितानुमानादीश्वरस्य कृतिसिद्धावपि तस्य नित्यत्वे प्रमा[९]णाभावो[१०] वा इति वाच्यम्। [११]सहकृतोपदर्शितानुमानस्यैव तस्य नित्यत्वे प्रमाणत्वाद् एवमीश्वरज्ञानेच्छयोरपि नित्यत्वं लाघवादेव सिद्धं तयोर्जन्यत्वे ध्वंसप्रागभावादिकल्[१२]पने गौरवात्। एवं तत्र प्रत्येकमेकत्वमपि लाघवात् सिद्धमिति वाच्यम्। अत एवेश्वरस्य शरीरे बाधकाभावात् तदीयज्ञानादित्रयमपि जन्यमि[१३]त्यपि परास्तम्। ईश्वरस्य भोगाभावेन सुखदुःखादिसाक्षात्काररूपभोगावच्छेदकस्य शरीरस्य तत्र कल्पनाया असम्भवाच्च। न च शरीरत्वं जातिरिति वाच्यम्। तैजसशरीरादिवृत्तिशरीरत्वस्य घटपटादिवृत्तिपृथिवीत्वादिना साङ्कर्येण जातित्वाभावात्। (तथाविधपृथिवीत्वादिसाङ्कर्येण तदसम्भवात्) न च

---

१. ख न चाचार्यवचनविरोध इति वाच्यम्; २. ख न च इत्यधिकः पाठः।
३. ख अवच्छेदकलक्षणाव्याप्तिः इतिं पाठः; ४. खपुस्तके अभावपदस्य पाठो नास्ति।
५. खपुस्तके मनोरममिति न पाठः।
६. खपुस्तके अनुकूलतर्काभावेन इत्यस्य न पाठः।
७. ख प्रयुक्त इत्यस्य न पाठः; ८. ख ननूक्तानुमानादीश्वरस्येति पाठः।
९. ख मानाभाव इति पाठः; १०. ख इति भाव इति अधिकः पाठः।
११. ख कृतेर्नित्यत्वे लाघवमिति लाघवतर्कसहकृतानुमानेनैव तत्सिद्धेः, एवं ज्ञानेच्छयोरपि नित्यसिद्धिरूहनीया इति पाठः।
१२. ख कल्पनागौरवादिति पाठः; १३. ख जन्यमिति निरस्तमिति पाठः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृथिवीत्वादिव्याप्यविरुद्धभेदेन शरीरत्वनानात्वाङ्गीकारान्नानुपपत्तिरिति वाच्यम्। तथा सति चेष्टां प्रति शरीरहेतुताया अननुगमेन व्यभिचारात्। तथा[१]विधनानाजातिकल्पने गौरवाच्च। अत एव शरीरैकत्वनिष्ठजातिविशेषं कल्पयित्वा चेष्टात्वावच्छिन्नं प्रति विजातीयैकत्ववत्त्वेन हेतुत्वकल्पनान्नानुपपत्तिरित्यपि परास्तम्। तथाविध[२]जातेः परिमाणादिनिष्ठतामादाय विनिगमनाविरहेणानन्तजातिकल्पनापत्तेश्च। न च भोगावच्छेदकत्वं शरीरत्वमिति मतेऽपि सुखाद्यवच्छेदकत्वमादाय विनिगमना[३]विरह इति वाच्यम्। विजातीयैकत्ववत्त्वं शरीरत्वमिति मतेऽपि अवच्छेदकतासम्बन्धेन भोगसुखादिमत्त्वमादाय विनिगमना[४]विरहस्य दुर्वारतया तथाविधातिरिक्तजातिकल्पना-प्रयुक्तगौरवस्य पुनः[५] दुरुद्धरत्वादिति। अनया दिशा[६] अथेश्वरस्य शरीराभावे अङ्कुरादि[७]कार्योत्पत्तिभिः पूर्वं चेष्टात्वेन हेतुतानुपपत्तौ व्यभिचारादिति चेन्न, तथाविध-हेतुहेतुमद्भावे क्षतिविरहात्। विशिष्य घटत्वाद्यवच्छिन्नं प्रत्येव तस्याहेतुत्वात्। अत एवेश्वरस्य परमाणुरूपाणि नानाशरीराणि, न तु स्थूलसूक्ष्मशरीर[८]मेकम्। ईश्वरे[९] पाषाणमध्यवर्तिभेद[१०]कशरीरकर्तृकत्वानुपपत्तेः। तत्राभग्नस्य स्थूलशरीरस्य प्रवेशासम्भवात्। अत एवात्म[११]तत्त्वविवेके ईश्वरवादे अदृश्यस्यापि सावयवतया मूर्त्ततया च व्यवस्थापितत्वेन पाषाणमध्यवर्तितादृशशरीरादौ कार्ये कर्त्तव्येनाभग्नस्य प्रवेश इत्युक्तमाचार्यैः। न चेश्वरस्य परमाणुरूपशरीराङ्गीकारे तस्यान्तरालाभावेन निर्मनस्कतापत्तिरिति वाच्यम्। तस्या बहिर्वर्त्तिमनःसम्बन्धाङ्गीकारेणान्तरालिक-निर्मनस्कतायामिष्टापत्तेः, एवं गोलकाद्यभावेन तत्र बहिर्वर्त्तिचक्षुरादीन्द्रियसम्बन्धोऽपि स्वीक्रियते। एवं चेश्वरस्य ज्ञानादिकं जन्यमेव तत्कारणीभूतशरीरमनोयोगादेः सम्भवादित्यपि निरस्तम्[१२]। प्रयत्नवदात्मसंयोगासमवायिकारणक-क्रियाश्रयान्त्यावयवित्वरूपशरीरलक्षणस्य परमाणावसम्भवेन शरीरत्वाभावाच्च। यदि चान्त्यावयवित्वमनिवेश्यैव तल्लक्षणमिति विभाव्यते, तथापि नेश्वरस्य परमाणुरूपनानाशरीरसिद्धिः[१३]। तथाविधानन्तशरीरकल्पने तज्ज्ञानादिजन्यत्वकल्पने च गौरवात्।

---

१. ख तथाविध इत्यस्य न पाठः;

२. ख तादृशजातेरिति पाठः।

३. ख ग विनिगमनाभाव इति पाठः;

४ ख ग विनिगमनाभावस्य इति पाठः।

५. ख ग पुनः इति पाठो नोपलभ्यते;

६. ख ग अनया दिशा इति पाठो नास्ति।

७. ख ग अङ्कुराद्युत्पत्तिभिः;

८. ख ग शरीरात्मकम्।

९. ख ग ईश्वरस्य;

१०. ख ग भेदशरीरकर्तृत्वानुपपत्तेः।

११. ख ग अत एवात्मतत्त्वविवेके;

१२. ख ग परास्तम्।

१३. ख ग अनन्तत्वाभावाच्च। यदि च शरीरकल्पने ज्ञानादेरन्यत्वकल्पने च गौरवात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तुतस्तु जन्यं[१] सकर्तृकं कार्यत्वादित्यनुमानात् ज्ञानादेर्नित्यत्वे लाघवमिति, लाघवादिज्ञानसहकृतादीश्वरस्य नित्यज्ञानादिसिद्धौ तत्र जन्यज्ञान-कल्पनप्रसक्तिर्नास्तीति ईश्वरस्य शरीरकल्पनमनर्थकमेवेत्युक्तम्[२]। एतेनेश्वरस्यैकमेव परमाणुरूपं शरीरं तत्सम्बन्धीश्वरो दूरस्थमपि कार्यं करोतीत्यादिकमपि परास्तम्[३]। शरीरिप्रयत्नवदात्मसंयोगाव्यवहितोत्तरोत्पन्नतत्पदार्थक्रियां प्रति शरीरसंयुक्त-तत्तत्पदार्थवृत्तिप्रयत्न[४]वदात्मसंयोगस्य हेतुताया एवान्वयव्यतिरेकानुविधानबलात् क्लृप्ततया तस्याभावेन दूरवर्तिपदार्थे क्रियाया अनुत्पादासम्भवाच्च। अत एव उदयनाचार्यैः 'न च (दूरस्थ एव) दविष्ठ एव सूर्यादिस्तत्कुर्यादिति साम्प्रतमिति ग्रन्थेनेश्वरस्य परमाणुरूपशरीरं ततो दूरस्थमपि कार्यं करोतीत्याशङ्क्य कारकानधिष्ठानादित्यनेन तथैव समाहितमिति तस्मादुपदर्शितानुमानात् शरीरानवच्छिन्नैव कृतिरसि[५]द्धेदिति तदाश्रयत्वेनेश्वरोऽपीति साम्प्रदायिकाः।

नवीनै[६]स्तु ईश्वर[७]सिद्धौ प्रकारान्तरेण युक्तिरुपन्यस्यते तथा हि पटादौ चक्षुः संयोगादिदशायां घटादिचाक्षुषवारणाय घटादिवृत्तिविषयतासम्बन्धेन प्रत्यक्ष[८]त्वावच्छिन्नं प्रति घटादिवृत्तिविषयतासम्बन्धेन ज्ञान[९]त्वेन हेतुरवश्यमुपेयः। तथा च घटनिर्विकल्पकात् पूर्वतादृशहेतुसम्पत्त्यर्थमीश्वरज्ञानस्वीकार आवश्यकः, तदाश्रयत्वेनेश्वरसिद्धिः। न च घटादि[१०]चाक्षुषत्वादेः कस्यचित् कार्यता[११]नवच्छेदकतया न तदवच्छिन्नापत्तिसम्भवेन तद्वारणायोक्तकार्यकारणभावस्यावश्यकत्वात्। न च तद्वारणार्थं घटादिवृत्तिलौकिकविषयतासम्बन्धेन प्रत्यक्षत्वावच्छिन्नं प्रति घटत्वादिना

---

१. ख ग जन्यं सकर्तृकं कार्यत्वादित्यनुमानात् ज्ञानादेर्नित्यत्वे लाघवमिति लाघवज्ञानसहकृता-दिति पाठो नोपलभ्यते।

२. ख ग मेवेति ध्येयम्; ३. ख ग निरस्तम्।

४. ख ग प्रयत्नवदात्मसंयोगाव्यवहितोत्तरोत्पन्नतत्पदार्थक्रियाया उत्पादासम्भवाच्च, अत एवाचार्यैः। न च दूरस्थ एव सूर्यादिस्तत्कुर्यादिति साम्प्रतमिति ग्रन्थेनेश्वरस्य इति पाठः।

५. ख ग कृतिः सिध्यति।

६. ख ग नवीनाः पुनः पटचक्षुःसंयोगदशायां घटादिचाक्षुषवारणाय।

७. ख ग ईश्वरसिद्धौ प्रकारान्तरेण युक्तिरुपन्यस्यते, तथा हि इति पाठो नोपलभ्यते।

८. ख ग ज्ञानमिति पाठ उपलभ्यते।

९. ख ग ज्ञानमिति पाठः।

१०. ख ग घटचाक्षुषत्वस्य कस्यचित्।

११. ख ग कार्यतावच्छेदकतयेति पाठोऽप्रामाणिकः प्रतिभाति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घटविषयस्यैव हेतुत्वमस्त्विति वाच्यम्। एवमपि घटत्वादौ संयुक्त[१]समवायकाले घटत्वादिस्पार्शनापत्तिवारणाय घटत्वादिवृत्तिविषयतासम्बन्धेन प्रत्यक्षं प्रति घटत्वादिवृत्तिविषयतासम्बन्धेन ज्ञानत्वेन कारणत्वकल्पनस्यावश्यकत्वात्। आश्रयभासकसामग्रीं विनापि तादृशकारणबलाद् वायुस्पर्शस्यास्पार्शनोत्पत्त्या आश्रयभासकसामग्र्याः सहकारित्वकल्पनाया असम्भवात्। न च स्पर्शवृत्तिविषयतासम्बन्धेन स्पार्शनं प्रति स्पर्शत्वेन हेतुतामङ्गीकृत्य स्पर्शस्पर्शाश्रयभासकसामग्र्यन्यतरस्य तत्र सहकारित्वाभ्युपगमेनैव सर्वसामञ्जस्ये उपदर्शितकार्यकारणभावोऽपि [२]युक्तिकर इति वाच्यम्। तथा सति प[३]टत्ववान् प[४]टत्वाभाववानित्यादिशाब्दबोधानुमित्यादिवारणाय प[५]टत्वान्यवृत्तिविषयतासम्बन्धेन ज्ञानं प्रति प[६]टत्वाभावोपहितहेतुताकल्पने गौरवप्रसङ्गाच्च[७]। प[८]टत्वादिवृत्तिविषयतासम्बन्धेन ज्ञानं प्रति प[९]टत्वावृत्तिविषयतासम्बन्धेन हेतुताकल्पनेऽपि तु[१०] नोक्तापत्तिः। धर्मितावच्छेदकतासम्बन्धेन प[११]टत्वा-प्रकारकयोग्यताज्ञानेन प[१२]टत्वव्याप्यवत्ताज्ञानेन च फले जननीये प[१३]टत्वादिवृत्ति-विषयतासम्बन्धेन ज्ञानस्य सहकारित्वाभ्युपगमात्। न च प[१४]टत्वादि-वृत्तिविषयतासम्बन्धेन ज्ञानं प्रति प[१५]टत्वादिना हेतुतयैव सर्वानुपपत्तिवारणसम्भवात्,

---

१. ख ग त्वक्संयुक्तसमवायकाले।

२. ख ग युक्तिक इति पाठः।

३. ख ग घटत्ववान्।

४. ख ग घटत्वाभाववानित्यादि।

५. ख ग घटत्वान्य इति पाठ उपलभ्यते।

६. ख ग घटत्वाभावो।

७. ख ग च इति पाठो नोपलभ्यते।

८. ख ग घटत्वादिवृत्ति।

९. ख ग तु इति पाठो नास्ति।

१०. ख ग घटत्वाप्रकारक।

११. ख ग घटत्वव्याप्यवत्ता।

१२. ख ग घटत्वादिवृत्ति।

१३. ख ग घटत्वादिवृत्ति।

१४. ख ग घटत्वादिना।

१५. ख ग घटत्वादिना।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं पटत्वादिवृत्तिविषयतासम्बन्धे[१] ज्ञानहेतुतयेति वाच्यम्। पटत्वत्वे[२] वृत्तिविषयतया पटत्वादिवृत्तिविषयतासम्बन्धेन[३] ज्ञानं प्रति तेन सम्बन्धेन ज्ञानत्वेन लघुरूपेण हेतुताकल्पनाया एव न्याय्यत्वात्। एवञ्च तादृशकार्यकारणभावसहकृतात् सर्गाद्यकालीनपटत्वादिनिर्विकल्पकं[४] ज्ञानजन्यं निर्विकल्पकत्वादिदानीन्तन-निर्विकल्पकवदित्यनुमानादेकनित्यज्ञानसिद्धौ तदाश्रयत्वेनेश्वरः कल्पनीय इति वदन्ति।

।। इति रघुदेवकृत ईश्वरवादः सम्पूर्णः ।।

१. ख ग घटत्वादि।

२. ख ग घटत्वत्वे।

३. ख ग घटत्वादि इति पाठ उपलभ्यते।

४. ख ग घटत्वादि इति पाठ उपलभ्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरस्वतीभवन-ग्रन्थमाला

[४९]

महामहोपाध्यायश्रीशङ्करमिश्रविरचितं

भेदरत्नम्

सम्पादकः

डॉ. राजारामशुक्लः

निदेशकः, अनुसन्धान-संस्थानस्य

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये

वाराणसी

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

वि.सं. २०६०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैवेद्यम्

द्वैताद्वैतकलहगाथा हि भारतीयदार्शनिकवाङ्मयस्याभिवृद्धौ महत्त्वपूर्णं स्थानमातिष्ठतीति वेवेत्त्येव विद्वल्लोकः। यद्यपि पूर्वं तत्त्वबुभूत्सामात्रेण प्रवर्तन्ते स्माचार्यास्तथापि गच्छता कालेन विजिगीषा परपराभवेच्छा वा विद्वत्समाजे पदं संन्यस्य जल्पवितण्डे अपि प्रादुरभावयत्। तत्त्वनिर्णये हि स्वसिद्धान्तस्थापनमिव तत्सम्बन्धि परमतनिराकरणमपि उपयुज्यत इति मन्वानैराचार्यैर्यथावश्यकं जल्पवितण्डे अप्यादृते। किन्तु श्रद्धा तु स्वसिद्धान्तस्थापने एव। यत्र क्वचन कटूक्तयः समाश्रितास्ता अति मनोविनोदाय न तु दौर्मनस्यप्रचोदिताः। तत्त्वनिर्णयप्रयोजकत्वाविशेषादेव वादस्येव जल्पवितण्डयोरपि महत्त्वमङ्गीक्रियते।

वस्तुतो भारतीयदर्शनसम्बन्धिनः कस्याप्यङ्गस्योपाङ्गस्य वा कमपि बिन्दुविशेषमाश्रित्य तन्मूलान्वेषणार्थं क्रियमाणा मीमांसा पर्यन्ततः श्रुतिं समालम्बते या हि संस्कृतवाङ्मयस्याखिलस्यापि मूलम्। वैदिकदर्शनं, विशिष्य पूर्वोत्तरमीमांसे श्रुतिमेव सर्वापेक्षया प्रबलप्रमाणत्वेन स्वीकुरुतः। ब्रह्मविद्या (उत्तरमीमांसा) तु सर्वात्मना श्रुतिमेव शरणीकरोति। स्वीयां समग्रामपि दार्शनिकगवेषणां प्रमाणयितुं श्रुतिवाक्यानि तत्रोदाहृयन्ते। अत एव तस्या वेदान्तशास्त्रमित्यपि नाम। दर्शनस्य वेदाधारितायामस्यां प्रक्रियायां तत्त्वनिर्धारणार्थं द्वे विधे समाश्रिते श्रुतिमूला विधा तर्कमूला च। यद्यपि तर्कमूलाया अपि विधायाः फलं तत्त्वसाक्षात्कारद्वारा परमपुरुषार्थप्राप्तिरेव, तथापि तत्र तर्कः समाश्रियते। श्रुत्यविरोधी तर्कः श्रुतिसम्मत एव, श्रुत्या साधितेऽप्यर्थे संशयविपरीतभावनादिसत्त्वे तन्निवृत्त्यर्थं तर्कापेक्षायाः 'श्रोतव्यो मन्तव्य' इत्यादिना स्वयं श्रुत्यैवोक्तत्वात्। मननमत्रानुमानमेव, **''मन्तव्यश्चोपपत्तिभिः''** इत्याद्युक्तेः। अत एव **श्रीशङ्करभगवत्पादैः** जन्माद्यधिकरणभाष्ये **'सत्सु तु वेदान्तवाक्येषु जगतो जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्यायानुमानमपि वेदान्तवाक्याविरोधि प्रमाणं भवन्न निवार्यते'** इत्युक्त्वा **'पण्डितो मेधावी गन्धारानेवोपसम्पद्येतैवमेवेहाचार्यवान् पुरुषो वेद** (छान्दो, ६/१४/२) इति श्रुतिमुदाहृत्य तर्कस्य सहायकत्वमभिहितम्।

तर्कसाहाय्येन समीक्षापूर्वकं तत्त्वनिर्धारणस्य अस्याः प्रक्रियायाः प्रयोगः उत्तरवर्तिशास्त्रग्रन्थेषु प्रचुरतया उपलभ्यते। अस्या विधायाश्चरमोत्कर्षः **गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणौ** दृष्टिगोचरो भवति। तत्समकालिकैः तदुत्तरवर्तिभिश्चाप्युक्तविधामाश्रित्य स्वीयचिन्तनधारायाः विकासः कृतः। विशेषतो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैयायिकैः बौद्धैश्च अस्याः पद्धतेर्निपुणं विकासः कृतः, किन्तु यदा वेदान्तशास्त्रे अस्याः प्रवेशो जातः, तदाऽनया युक्त्याधार इव श्रुत्याधारोऽपि सम्प्राप्तः, येनास्या निर्दोषताऽव्यभिचारिता च प्रमाणिताऽभूत्। यतः केवलयुक्त्याश्रिते तर्के क्वचिद् व्यभिचारो मूलशैथिल्यं वा सम्भाव्यते, तदुक्तम्—

यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते। इति (वा.प. १-३४)

किन्तु यस्तर्कः श्रुत्याश्रितः स सर्वथाऽव्यभिचरितमर्थं साधयितुं समर्थो भवति।

यतोऽस्यां प्रक्रियायां श्रुत्यभिमतिरपि अस्ति, अतः परवर्तिभिः सर्वैराचार्यैः स्वीयवैचारिकवर्चस्वस्थापनार्थमस्याः पर्याप्तं प्रयोगः कृतः। इत एव कथासु वादेन सह जल्पवितण्डयोरपि पर्याप्तं विकासोऽभूत्। स्वसिद्धान्तस्थापनापेक्षया परसिद्धान्तनिराकरणेऽस्या अधिकमुपयोगः, यतः 'उपपादनञ्च स्वपक्षसाधनपरपक्षनिराकरणाभ्यां सम्भवति' इति हि शास्त्रकारा मन्यन्ते। परपक्षनिराकरणमपि स्वपक्षसाधनस्योपाय इति प्रसिद्धम्। अत्र मुख्यतः संवादशैली समाश्रियते। आदौ शास्त्रीयसंवादस्य (Polemics) इयं प्रक्रिया नैयायिकबौद्धयोरेव मध्ये सीमिताऽऽसीत् किन्तु कालक्रमेण वेदान्ताद्यौपनिषच्छास्त्रेष्वपीयं प्राविशत्। आचार्यशङ्करभगवत्पादानां कालेऽपि बौद्धैः, सांख्यैः वैशेषिकैरिव भेदवादिभिरपि संवादक्रमस्य चिह्नानि दृश्यन्त एव। भेदवादिनो द्विप्रकारा अद्वैतिनिकाये प्रतिवादित्वेन संप्राप्यन्ते—पारम्परिकतार्किकाः गौतमादयः, आधुनिकतार्किका माध्वाश्च। माध्वा अपि यद्यपि तार्किकानेवानुसरन्तः प्रायेण तद्दर्शिता एव युक्तीः प्रदर्शयन्ति[१] तथापि तैरद्वैतवादं प्रबलप्रतिद्वन्दिनं मन्यमानैरत्यधिकं पराक्रान्तं भेदसाधने, पराक्रान्तञ्च बहु अद्वैतिभिरपि तत्खण्डने। प्रायशः सप्तशतवर्षात्मकः स्वर्णाक्षरैर्लेख्य इतिहासो मतद्वयेन सम्पादितस्य द्वैताद्वैतविमर्शवाङ्मयस्य।

तार्किकग्रन्थेष्वपि बहुत्र, प्रायः सर्वत्रैव विशकलितरूपेण भेदसाधनम्, अभेदनिरासो वा प्रतिपाद्यमानो दृश्यत एव। किन्तु तन्मात्रपरग्रन्थप्रणयने नाधिकमाचार्या आत्मानं व्यापारयन्। इदमिदानीं विदुषां करकमलेषु समर्प्यमाणं **'भेदरत्नम्'** इत्याख्यं ग्रन्थरत्नं विरचय्य **आचार्यशङ्करमिश्र**पादा अस्मिन् पथि दिग्दर्शनमिव व्यधासिषुः। यानि श्रुतिवाक्यानि अद्वैतसमर्थने अद्वैतिभिः उपस्थाप्यन्ते प्रायः सर्वाण्यपि तानि प्रकारान्तरेणार्थवर्णनपुरःसरम् आचार्येणास्मिन् ग्रन्थे भेदसिद्धौ प्रमाणत्वेन उपस्थाप्यन्ते। तथैवानुमानान्यपि भेदस्य सिद्धौ तत्पारमार्थिकत्वे च

---

१. अस्मिन् सन्दर्भे भेदरत्नस्थोऽयं पद्यांशोऽवश्यं ध्यातव्यः—
'भेदरत्नपरित्राणे तार्किका एव यामिकाः'। इति। पृ.सं.-१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिवादनिरासपूर्वकमत्रोपस्थापितानि विद्यन्ते। एतास्तावद् युक्तयः परवर्तिभिर्माध्वाचार्यैरप्याश्रिताः परिष्कृताश्च। एवं रीत्या ग्रन्थोऽयं द्वैतसिद्धिप्रक्रमस्य समग्रस्यापि स्त्रोतोभूत इति वक्तुं शक्यते।

अयं हि ग्रन्थो **भेदप्रकाशः** इत्यप्यभिधानं धारयतीति ग्रन्थकर्तुर्वचनैरेवावगम्यते। तथा हि—**खण्डनखण्डखाद्य**टीकायां **शाङ्करीत्या**ख्यायां तैः स्वयमेवोक्तम्—**'विपञ्चितश्चायमुद्धारो भेदप्रकाशे'**[२] इति।

ग्रन्थममुं पूर्वपक्षीकृत्य अद्वैताचार्यैः **मधुसूदनसरस्वती**पादैस्तत्खण्डनपरः **'अद्वैतरत्नरक्षणम्'** इत्याख्यो ग्रन्थो विरचित इति सोऽप्यवश्यं समालोचनीयो विपश्चिद्भिः। ग्रन्थकार **आचार्यशङ्करमिश्र**स्तावद् दार्शनिकवाङ्मये मनागपि रुचिमावहतः कस्याप्यपरिचितो नास्तीति, बहु च बहुत्रोपलभ्यते तज्जीवनवृत्तकर्तृत्वादिविषय इति नात्रविस्तरभयात् तत्प्रस्तूयते।

यद्यपि ग्रन्थोऽप्यमितः प्रागपि विश्वविद्यालयेन प्राकाश्यमानीत आसीत् तथाप्यनेकदोषग्रस्तोऽपि बहूपयोगित्वात् सम्प्रति सर्वथा दुष्प्राप इति कृत्वा पुनः सुसम्पाद्य तं प्रकाशयितुं निरचैषम्। ग्रन्थेऽस्मिन् प्रदर्शिता युक्तीरधिकृत्य किञ्चिद् विवेचयितुमत्र चिन्तयताऽपि तस्याधिकविवरणसापेक्षतया प्रसङ्गान्तरे तत्प्रस्तोतुकामेनोपेक्षितम्। सम्पादनप्रकाशनप्रमादजन्यदोषभूयिष्ठोऽपि क्वचिदस्पष्टाशयोऽप्ययं ग्रन्थः क्वचिट्टिपणीभिः क्वचिच्च चिह्नविशेषैः यथामति यथासम्भवञ्च समीकृत्य सुसम्पाद्य चात्र प्रस्तूयते। यत्र तु स्वीयमसामर्थ्यमनुभूतं तत्र तेंऽशविशेषा दोषान् पश्यताऽपि मया विदुषां विवेचनाय तथैव त्यक्ताः। आशास्यते यद् विद्वांसस्तत्समीकृत्यास्मान् बोधयिष्यन्तीति। अत्रास्माभिः प्रयुक्ताश्चिह्नविशेषा इत्थं ज्ञातव्याः—१-क(ख), अर्थात् कस्थाने ख इति पठनीयम्। २ कख(ख?), अर्थात् 'कख' इति वाक्यस्थः 'ख' शब्दः नावश्यकः। ३-क[ख], अर्थात् 'ख' मातृकायामविद्यमानमप्यावश्यकत्वादत्र योजनीयम्। इत्यादि।

सोऽयमितरविलक्षणो द्वैतिनामिवाद्वैतिनामपि परमोपयोगार्हो विदुषां करकमलेषूपायनीक्रियमाणो भेदरत्नाख्यो ग्रन्थः सुधियां मुदमुद्वहतु यशश्च निमर्लं समासादयत्विति परमकरुणार्द्रां शारदाम्बां सम्प्रार्थ्य विरमामि।

इत्थं विद्वद्विधेयः

राजारामशुक्लः

---

१. खण्डनटीका, पृ.सं. १२५ (लाजरस, वाराणसी-१८८८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महामहोपाध्यायशङ्करमिश्रविरचितं

भेदरत्नम्

मायाऽविद्याप्रकृतिरिति यद् गीयतेऽदृष्टमेतत्
साहित्येन त्रिभुवनमयीं सृष्टिमेतां वितन्वन्।
आनन्दोऽहं चितिरहमिदं मन्मयं सर्वमित्थं
यः स्वं स्तौति श्रुतिमयगिरा तं नुमो भिन्नमीशम्।।१।।

मोक्षाय स्पृहयालवः श्रुतिगिरां श्रद्धालवोऽर्थे ऋजौ
तर्कोदर्कविभावनासु सुतरां व्याजेन निद्रालवः।
भेदे दृक्पथमागतेऽपि सहसा तन्द्रालवश्छान्दसाः
कैवल्यात् पतयालवः शृणुत सद्युक्तिं दयालोर्मम।।२।।

भेदरत्नपरित्राणे तार्किका एव यामिकाः।
अतो वेदान्तिनः स्तेनान्निरस्यत्येष शङ्करः।।३।।

देहादेस्तात्त्विकाद् भेदं सत्यमात्मन्यजानताम्।
मुमुक्षूणां न मोक्षोऽस्तीत्यतो भेदो निरूप्यते।।४।।

न सा धीः क्वचिदप्यस्ति यत्र भेदो न भासते।
अत एव न तन्मानं यत्र भेदप्रमापकम्।।५।।

तथा हि—'स होवाच एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमस्पर्शमगन्धमरसमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखमनामगोत्रमजरममरमभयममृतमरजोऽशब्दमविवृतमसंवृतमपूर्वमनपरमनन्तरमबाह्यं न तदश्नोति कञ्चन न तदश्नोति कञ्चन'[१] इति श्रुतावन्योन्याभावात्मकभेदस्यैव नञर्थत्वम्। तथा च स्थूलं यच्छरीरादि तद्भिन्नं ब्रह्मेत्यर्थः। एवमणु यन्मनःप्रभृति तद्भिन्नं ब्रह्मेत्यर्थः। ब्रह्मप्रक्रमाद् अस्थूलमिति स्थौल्यात्यन्ताभाववदित्यर्थ इति चेत्? तथापि वैधर्म्यभेदस्य

१. बृहदारण्योकपनिषद्, ३।८।८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नञर्थत्वं, तथा चान्योन्याभाव इत्यर्थः। भेदप्रतिपत्त्यर्थमेव हि वैधर्म्याभिधानम्, अन्यथा वैधर्म्याभिधानानर्थक्यप्रसङ्गात्। **न तदश्नोति कञ्चनेति** तद् ब्रह्म कञ्चन आत्मानं नाश्नोति न व्याप्नोति। न कश्चन तदश्नोति न वा कश्चिदात्मा तद्ब्रह्म व्याप्नोति केनाप्यात्मना क्षेत्रज्ञेन नैतत् सम्बध्यते, विभुनोः संयोगकारणान्यतरकर्मोभयकर्मावयवसंयोगाभावादिति[१] स्वरूपवर्णनम्।

एवं 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती'ति[२] श्रुतिरपि भेदे मानम्। स पुरुषः मृत्योः संसारात् मृत्युं संसारमाप्नोति पुनः पुनः संसरतीति— य इह नानेव पश्यति न तु वस्तुगत्यैव नाना पश्यतीत्यर्थाद्, इवपदसंदानाद्, अन्यथा नाना पश्यतीत्येव स्यात्।

'स किल एको द्रष्टा अद्वैतो भवती'[३]ति श्रुतिरपि भेदपरा। अन्ये तु द्रष्टारः क्षेत्रज्ञा भेदवन्त इत्यर्थस्य स किलेत्यनेन ध्वननात्।

'तत्त्वमसी'[४]ति श्रुतिरपि भेदपरा, युष्मच्छब्दस्य गम्यमानस्य भिन्नसम्बोध्यविषयत्वात्।

'न तु तद्द्वितीयमस्ती'ति श्रुतिरपि भेदतात्पर्यिका, तद्ब्रह्म द्वितीयं नास्तीति धर्म्युपरागेण निषेधात्। अन्यथा हि द्वैतं नास्तीतिधर्मोपरागमात्रेण निषेधः स्यात्।

एवञ्च 'एकमेवाद्वितीयं ब्रह्मे'[५]ति श्रुतेरपि ब्रह्मातिरिक्तपदार्थनानात्वस्वीकार एव, ब्रह्मणि ब्रह्मप्रतियोगिकभेदस्यैव निषेधात् धर्मिविशेषसमभिव्याहारबलेन तथैव व्युत्पत्तेः। यथेह भूमण्डले एक एव नरपतिरिति वाक्याद्राजगतनानात्वव्यतिरेकः प्रतीयते, न तु हस्त्यश्वरथपदातीनामपि, यथा चेह कानने किंशुकतरुरेक एव न नानेत्यभिधाने किंशुकतरुगतमेव नानात्वं प्रतिषिध्यते, न तु शालतमालहिन्तालादिगतमपि।

एवम् 'एक एव तु भूतात्मा भूते भूते व्यवस्थितः' 'एकधा बहुधा चैव दृश्यते जलचन्द्रवत्' इत्याद्यपि भेदाविरोधिजन्ममरणप्रबन्धेन बाल्यकौमारभेदेन वा

---

१. संयोगं प्रति अन्यतरकर्म-उभयकर्म-संयोगाश्च (संयोगजसंयोगस्थले) कारणानि, तदभावात् विभुनोर्न संयोग इति भावः।

२. आनुपूर्वी तु 'सलिल एको द्रष्टा' इत्यादि न तु स किलेति मधुसूदनसरस्वतीपादाः।
—अद्वैतरत्नरक्षणे

३. बृह., ४।४।१९; कठ. ४।११।

४. छान्दोग्य., ६।८।७।

५. छान्दोग्य., ६।२।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भिन्नेषु शरीरेषु एक एव भूतः सत्यः आत्मा क्षेत्रज्ञो व्यवस्थितः, न तु देवदत्तयज्ञदत्तशरीरभेदेनात्मभेदवज्जन्ममरणप्रबन्धेन शरीरभेदेऽप्यात्मभेद इत्यर्थात्। यथा एकधा एकप्रकारोऽपि चन्द्रो बहुधा बहुप्रकारो दृश्यते तरङ्गप्रसङ्गे तथा तरङ्गवदतिचपलजन्ममरणप्रबन्धभिन्नशरीरावच्छिन्न एक एवात्मा बहुप्रकारो दृश्यते। तथा हि क्वापि जन्मनि राजाहं क्वापि स्थूलोऽहत्येकमेवात्मानमविद्याशरीराच्छरीरे समारोप्य बहुप्रकारवैचित्र्येणावेदयति।

एवञ्च 'द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव च' इति श्रुतेर्भेदोऽर्थः स्फुट एव। तथा—

द्वा सुपर्णा सुयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरेकः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति।।

इति श्रुतिः साक्षादेव भेदमाह। किञ्च यत्र श्रुतौ प्रकृत्यर्थः प्रत्ययार्थो वा द्विबहुत्वादिः, तत्र भेदाविनाभूतधर्मप्रतिपत्तौ भेदप्रतिपत्तिरावश्यकी। यथा—'सहस्रशीर्षा पुरुषः' इत्यत्र प्रकृत्यर्थो बहुत्वं 'विश्वेदेवा स आगच्छत' इत्यादौ प्रत्ययार्थः। क्वापि सम्बन्ध एव भेदाविनाभूतः प्रतीयते, यथा 'तद्विष्णोः परमं पदम्, इत्यादौ। यथा वा 'अग्नेरपत्यं प्रथमं हिरण्यम्' इत्यादौ। क्वचित्कार्यकारणभाव एव भेदाविनाभूतः प्रतीयते, यथा 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यादीनां सर्वेषां विधिवाक्यानाम्।

एवं स्तुतिनिन्दापरकृतिपुराकल्पभेदेन भिन्नस्यार्थवादस्यापि भेदो भेदाविनाभूतो वाऽर्थ आवश्यकः। यथा 'तरति मृत्युं तरति ब्रह्महत्यां योऽश्वमेधेन यजते' इति स्तुतौ कार्यकारणभावः। 'एष वाव प्रथमो यज्ञानां ज्योतिष्टोमोऽथानेन हुत्वा योऽन्यो जुहोति सोन्धं तमः प्रविशती'त्यादि निन्दायाम्। एवं परकृतिपुराकल्पयोरपि।

किञ्च 'मैत्रेयि आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च' इति प्रश्नोत्तरमुखेनोपनिषदवतारो भेदमन्तरेणानुपपन्नः, न हि ज्ञाते प्रश्नो नाप्यज्ञाते उत्तरम्। अतः प्रष्टुरपेक्षया उत्तरयितुः प्रसिद्ध एव भेदः। श्रवणादिप्रतिपत्तीः परस्परभिन्ना विदधती श्रुतिरपीयं भेदमन्तरेणानुपपद्यमाना। न ह्यमूषामभेदे विधिचतुष्टयमुपयुज्यते। तथा सति श्रोतव्य इत्येव वा ब्रूयात्।

तथा च न सा श्रुतिर्यत्र शब्दबलादर्थबलाद्वा भेदो न भासत इति।

किञ्च न सा धीः यत्र भेदो न विषयः। तथा हि विशिष्टज्ञानानां वैशिष्ट्यविषयतयैव भेदविषयता। वैशिष्ट्यस्य पदार्थान्तरत्वानुपपत्तौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिगणितभावपदार्थानन्तर्भावेऽतद्व्यावृत्तिरूपान्योन्याभावाख्यभेदरूपतैव वाच्या। तथा च वैशिष्ट्यविषयकज्ञानानां सिद्धा भेदविषयता। तदाहुराचार्या **गुणकिरणावल्याम्**- 'अतद्व्यावृत्तिर्वैशिष्ट्यम्' इति[१]। निर्विकल्पकानन्तरभाविनो घटोऽयमिति सविकल्पकस्य कथमतद्व्यावृत्तिः पूर्वाज्ञाता विषय इति चेत्? न, वैशिष्ट्यविषयत्वान्यथानुपपत्त्या संज्ञास्मरणस्यैव निर्विकल्पकसमनन्तरकालीन-स्यातद्व्यावृत्तिविषयत्वकल्पनात्। सर्वतो ह्यन्यथानुपपत्तिर्बलीयसी। एवं सत्यन्यापोहः पदार्थः स्यात्—तथा च जितं बौद्धैरिति चेत्? न, गोत्वादीनां पदादनुपस्थितौ वैशिष्ट्यमपि कस्य भासेत येनान्यापोहभानन्नैयत्यं स्यात्। तथा च बौद्धपक्षादयमेव भेदः यत् तैरन्यापोह एव पदार्थतावच्छेदको धर्मोऽङ्गीक्रियते, अस्माभिस्तु गोत्वादिरिति। निर्विकल्पकधियां यद्यपि न वैशिष्ट्यं विषय इति अन्योन्याभावो भेदो न भासते, तथापि स्वरूपभेदो घ(प)टादिवैधर्म्यञ्च घटत्वादिर्भासते। तेनैव भेदविषयता। तदपि भेदत्वेन न भासत इति चेत्? यत् किञ्चिदेतत्।

तदेवं सर्वधियां भेदविषयत्वे सिद्धे सर्वप्रमाणानां भेदप्रमापकत्व-मयत्नसिद्धम्।

तदेवं शरीरादिभिन्नत्वेनापि श्रुत्या समधिगतस्यात्मनो ब्रह्मणोऽनु पश्चादीक्षणं मननमन्वीक्षा इति व्युपत्त्या मन्तव्य इति विधेरन्वीक्षाध्ययनमेव विषयः, प्रकारान्तरेण मननानुपपत्तेर्विध्यनिर्वाहात्। वेदान्तशास्त्रन्तु मुमुक्षूणां तत्त्वज्ञान-विरोध्यर्थोपस्थापकतयाऽनादेयमेव। यदि तु तैर्थिकप्रवृत्त्यनुरोधात् कथञ्चिदुपादेयता तदा श्रोतव्य इति विधिविषयतयैव श्रुत्यक्षरार्थव्याख्यानमात्रपरत्वान्न तु मन्तव्य इति विधिविषयतया युक्तिवैधुर्येण मननासंस्पर्शात् मन्तव्यश्चोपपत्तिभिरित्यनेन मननस्योपपत्तिसाध्यत्वावगमात्।

ननु भेदश्चेद् युक्तिं न सहते तदा श्रुतिवाक्यानामपि भेदप्रतिपादकत्वेन त्वयोपदर्शितानां तात्पर्यान्तरमेवोन्नेतुमर्हतीति चेत्? युक्तिं न सहत इति कोऽर्थः? किं भेदानुभव एव नास्ति—सन्नपि वा न यथार्थः। न तावदाद्यः, घटात्पटो भिन्न इत्यादिभेदानुभवस्य लौकिकपरीक्षकसाधारणस्यापलापानर्हत्वात्। नापि द्वितीयः, अयथार्थता हि विषयबाधकगम्या, बाधकश्च विपरीतप्रमा। सा च प्रकृते प्रात्यक्षिकी तावन्नास्ति, घटः एटो न भवतीति प्रत्यक्षानन्तरं घटः पट एवेति

---

१. गुणकिरणावली, संख्यानिरूपणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विपरीतप्रत्यक्षस्याभावात्। ननु नीलन्तम इति प्रत्यक्षानन्तरं नेदं नीलन्तम इति प्रात्यक्षिकबाधाभावेऽपि यथा तव मते तद्बाध्यत्वम्, एवमहं स्थूलो गौरो वेत्याद्यहंप्रत्ययानन्तरं (न हि?) न स्थूलो गौरो वेति प्रात्यक्षिकबाधाभावेऽपि भ्रान्तत्वम्—तथा प्रकृतेऽपि स्यात्, यौक्तिकबाधस्योभयत्रापि तुल्यत्वादिति चेत्? मैवं, भेदबाधकयुक्त्यभावात्।

नन्वस्ति सा, तथा हि भेदवत्तया घटादयो भिन्ना इत्यभिधीयते। तत्र भेदोऽभिन्ने भिन्ने वा वर्तते। न तावदाद्यः, विरोधात्। न ह्यभिन्नं भिन्नं भवति। द्वितीये तु तद्भेदभिन्ने तद्भेदवृत्तौ कथं नात्माश्रयः। स्वविशिष्टे स्ववृत्तावंशतः स्ववृत्तेः। भेदान्तरेण भिन्नेऽधिकरणभेदवृत्त्यभ्युपगमे तत्राप्येवमभ्युपगमेन कथं नानवस्था। एकेन भेदेन भिन्ने द्वितीयस्तेन च भिन्ने प्रथमो भेद इत्यात्माश्रयानवस्थयोः परिहारेऽप्यन्योन्याश्रयः। बहवो भेदा युगपदेव ज्ञायमानं वस्तु परिरभन्त इत्यभ्युपगमेऽपि किं भेदविशिष्टे को भेदो वर्ततामिति तेषामन्योन्यकलहो दुस्समाधिः। प्रथमेनैव भेदेन भिन्ने वस्तुनि द्वितीयादिभेदाभ्युपगमे वैयर्थ्यम्। उत्तरोत्तरभेदाभ्युपगमे च कृतकरत्वेन पूर्वपूर्वभेदविलोप इति चेत्?

मैवं, 'वर्तते' इति संयोगलक्षणां समवायलक्षणां वा वृत्तिमधिकृत्य यदि प्रश्नस्तदान्योन्याभावात्मको भेदो न वर्तत इत्येवोत्तरम्, अभावस्य संयोगसमवाययोरनङ्गीकारात्। अथ स्वरूपलक्षणवृत्तिमधिकृत्य प्रश्नस्तदा घटः स्वभावनियमान्नित्येनान्योन्याभावेनोपरक्तो भासत इत्येवोत्तरम्। उत्पन्नमात्रो घटः कथं भिन्नः स्यात्, भेदेन सम्बन्धाभावादिति चेत्? उत्पन्नमात्रः कथं घटोऽपि? घटत्वेन सम्बन्धाभावादिति तुल्यम्। उत्पत्तिक्षण एव घटत्वेन सह घटः सम्बद्धो जातः सम्बद्धश्चेत्येकः[1] कालः इति चेत्? उत्पत्तिक्षण एव भेदेनापि सम्बद्ध एव जातः सम्बद्धश्चेत्येकः[2] काल इति तुल्यम्। विशेषश्च तत्र समवायः अत्र स्वरूपसम्बन्धः। स च सम्बन्धान्तरमन्तरेणोपरक्तप्रत्ययजननयोग्यत्वमेव। उत्पत्तेः पूर्वं कीदृगासीद् घट इति चेत्? नासीत्। तर्हि तदन्योन्याभावोऽपि कथमासीत्? यथा तत्प्रागभावो यथा वा तस्य जातिः। सा तज्जातीयान्तरनिष्ठासीदिति चेत्? प्रलये कथमासीत्? एवमेवेति चेत्? उत्पत्स्यमानघटान्योन्याभावोऽपि तथैवासीत्। घटत्वादावपि वयं विप्रतिपद्यामहे इति चेत्? तर्हि बौद्धनिरासवत्तवापि निरासो न दुष्करः। परन्त्वस्माकमिह भेदमात्रं सिषाधयिषितमिति।

यद्वा तद्भेदभिन्ने घटे स भेदो वर्तत इत्येवोत्तरम्। आत्माश्रयस्तदेति चेत्? न, तद्भेदे तद्भेदानङ्गीकारात्। तद्विशिष्टे तद्वृत्तावात्माश्रयोंऽशत इति चेत्? न,

१-२. अत्रोभयत्र 'सम्बन्धश्चे'त्यादिपाठः सम्भवतो भवेत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्विशेष्यवृत्ति तद्विशेषणवृत्तीति नियमानङ्गीकारात्। न हि घटे रूपमित्युक्ते घटत्वेऽपि रूपमिति वस्तुगतिः प्रतीतिर्वा, [न वा] दण्डः पुरुषे दण्डिनि इत्युक्ते दण्डेऽपि दण्डसम्बन्धः प्रतीयते। तत्र घटत्वदण्डयोरुपलक्षणत्वं न विशेषणत्वमिति चेत्? अत्राप्यापाततस्तथैवास्तु।

वस्तुतस्तु विशेषणत्वेऽपि न दोषः। प्रत्याय्यव्यावृत्त्यधिकरणतावच्छेदकव्यवच्छेदकत्वं स्वकालनियतव्यावृत्तिबोधजनकत्वं वा विशेषणत्वम्। तच्च विशेष्यवृत्तिधर्मानधिकरणतायामपि सम्भवत्येव। तथा च तद्भेदानाश्रितोऽपि तद्भेदस्तद्भेदवदाश्रितो भविष्यतीति न विरोधः। तद्भेदसम्बन्धात्पूर्वमसम्बद्धः स भेदो विशेषणमपि कथं, न ह्यसम्बद्धं विशेषणं नामेति चेत्? भेदस्यान्योन्याभावस्य नित्यत्वेन नित्यसम्बद्धत्वात्तद्भेदसम्बन्धात्पूर्वमित्येव नाङ्गीकुर्मः। सम्बन्धिनो घटस्यानित्यत्वेन कथं नित्यः सम्बन्धः इति चेत्? अतीतेनानागतेन[१] च प्रतियोगिना विशिष्टप्रतीतिदर्शनात्, विशिष्टप्रतीतेः सम्बन्धसाध्यत्वात्। अन्यथा घटस्य प्रागभावो घटस्य ध्वंस इति प्रत्ययो न स्यात्। तत्किमनुत्पन्नस्यापि घटस्योपरक्तप्रत्ययजननयोग्यत्वमस्तीति चेत्? कः सन्देहः, यावता ज्ञानविषयत्वस्यैव योग्यतावच्छेदकत्वं—तच्चानुत्पन्नस्याप्यस्त्येव। अत्र किं नियामकमिति चेत्? वस्तुस्वभाव एव। वस्तुस्वाभाव्याद्वैपरीत्यमेव किं न स्यादिति चेत्? न, प्रतीतिनियतत्वात्स्वाभाव्यस्य। न ह्युत्पत्स्यते घटो विनष्टो घट इति त्वया न प्रतीयते। यथा चानुत्पन्नयोरपि सम्बन्धिनोः समवायः पूर्वमासीदेव [तथा] अनुत्पन्नस्यापि घटस्य भेदसम्बन्धः सार्वदिकः। परन्तु समवायः सम्बन्धिभिन्नः, अयन्तु सम्बन्धात्मको ज्ञानविशेषात्मको वेति न किञ्चिदनुपपन्नम्। समवायेऽपि समविप्रतिपत्तिरिति चेत्? भवतु नाम। तदर्थमिह न यतिष्याहमे[२]। एवञ्च सति रूपवति रूपं रसवति रसो गवि गोत्वमित्याद्युपलक्षणत्वविशेषणत्वाभ्यामुपपाद्यम्।

यद्वा अभिन्ने भेदो वर्तत इत्येवोत्तरं पूर्वप्रश्नस्य। न हि स्वस्मादपि घटो नाभिन्नः। पटप्रतियोगिको भेदः पटाभिन्ने घटे वर्तते पटभिन्ने वेति विशिष्य प्रश्ने कृते सामान्येन नोत्तरं घटत इति चेत्? न, अनुन्मत्तस्यैतादृशप्रश्नानुपपत्तेः। विरोधितावच्छेदकप्रकारेणोपस्थितस्य धर्मिणो विरुद्धप्रकारावच्छेदत्वे प्रश्नस्यादृष्टचरत्वात्। न हि भवति प्रश्नो मृन्मयोऽयं घटस्तेजोमयो न वा,

१. केचित्तु 'अतीतेन चेति' पाठो युक्त इति मन्यन्ते, तत्र युक्तं भाति, अनुपदं वक्ष्यमाणाया घटस्य प्रागभाव इति प्रतीतेः अनागतेनैव प्रतियोगिना निर्वाहात्।

२. समवायस्यान्यत्र निपुणं प्रसाधितत्वादिति भावः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्राह्मणोऽयं चैत्रः शूद्रो न वेति। अन्यथा विज्ञानात्मकं ब्रह्म जडं न वा, सुखात्मकं ब्रह्म दुःखात्मकं न वेति पृच्छतो युक्तिशतेनापि त्वया साध्यमाने विज्ञानसुखात्मकत्वे पृच्छानिवृत्तिर्न स्यात्। यदि चाहृदयस्य कदाचिदेवंविधप्रश्नसम्भवस्तदोत्तरं दत्तमेवान्वेष्टव्यम्।

भेदः कुत्र वर्तत इति प्रश्ने यत्र प्रतीयत इत्युत्तरम्। कुत्र प्रतीयत इत्यत्र यत्र वर्तत इत्याद्युत्तरवैचित्र्यं वार्तिकानुसारेण द्रष्टव्यम्।

दुर्दुरूढवेदान्तिनस्तु खण्डनयुक्त्यैव निरसनीयाः। सा च—भेदः प्रतीतो न वा यमधिकृत्य प्रश्न इत्यादि सञ्चारात्मिका। न चैवं सति खण्डनयुक्तीनामेव बलवत्त्वं प्रतिपादितं स्यादिति वाच्यं, भवतु नाम तथापि तवैवं प्रतिभाशोषे मया विजयरूपस्य फलस्य तदानीं तावतैव प्रतिलम्भात्। तत्र निर्णयस्त्वनुन्मत्तैरेव वादिभिः सह कर्तव्य इति।

अस्तु वा प्रतिप्रश्नः। तथा हि अभेदो नाम धर्मो भिन्ने ब्रह्मणि वर्तते अभिन्ने वा। आद्ये तद् ब्रह्म पूर्वं भिन्नमासीत्कथं पश्चादभिन्नं स्यादिति विरोधः। द्वितीये तेनैवाभेदेनाभिन्ने अभेदान्तरेण वा? आद्ये अंशतः आत्माश्रयत्वम्। द्वितीये अनवस्था। अथ यद्येकदैव सर्वे अभेदाः ब्रह्म परिरभन्ते तदा किमभेदाभिन्ने कोऽभेदो वर्तत इति तेषामन्योन्यकलहं कः समादध्यात्। अभेदभूयस्त्वे च भेदपर्यवसान-मित्यधिकं दूषणम्।

अथाभेदो ब्रह्मणि वर्तत इति नाङ्गीकुर्मः किन्त्वभेदस्वरूपमेव ब्रह्म, तथा च नामी दोषा इति चेत्? तर्हि ममाप्यन्योन्याभावोऽस्त्रं मनाग्विश्राम्यतु। स्वरूपभेदास्त्रमादायैव योत्स्ये।

तथा च घटस्वरूपस्यैव भेदत्वाङ्गीकारे वृत्तिविकल्पमुखमुद्रणमस्तु। अन्यस्वभावस्य घटस्यैव भेदत्वेऽन्यसाकाङ्क्षस्वाभाव्यं स्यादिति चेत्? ब्रह्मणोऽभेदस्वभावत्वे घटाभिन्नं ब्रह्मेत्यन्यसाकाङ्क्षतापत्तिस्तुल्या। ब्रह्मत्वेन निरूप्यमाणं ब्रह्म अन्यासाकाङ्क्षम्, अभेदत्वेन तु तन्निरूप्यमाणमन्यसाकाङ्क्षमस्तु। को विरोधः। प्रकारभेदमादायाविरोध इति चेत्? तर्हि [भेदोऽपि] घटत्वेन निरूप्यमाणोऽन्यसाकाङ्क्षोऽस्तु, भेदत्वेन तु निरूप्यमाणोऽन्यासाकाङ्क्षोऽस्तु, को विरोधः, प्रकारभेदमादायाविरोधस्य तुल्यत्वात्। केवलं मम घटत्वभेदप्रकारयोर्भेदोऽस्ति तव सोऽपि दुर्लभ इति विशेषः। अभिन्नं ब्रह्म अभेदो वा ब्रह्मेति कथमन्यसाकाङ्क्षतेति चेत्? भिन्नो घटो भेदो वा घट इत्यपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथमन्याकाङ्क्षमिति तुल्यम्। कस्मादयं भेद इति तव पक्षेऽस्याकाङ्क्षेति चेत्? ब्रह्म केनाभिन्नमित्याकाङ्क्षायास्त्वत्पक्षेऽपि सत्त्वात्। भेदस्वरूपञ्चेद् घटः, तदा भिन्नो घट इति भेदविशेषणिका प्रतीतिः कथमिति चेद्? अभिन्नं ब्रह्मेत्यभेदविशेषणिका प्रतीतिस्तवापि कथमिति तुल्यम्।

ननु घटादिस्वरूपञ्चेद्भेदस्तदा तं तमात्मनि निवेशयेत्। न हि निष्प्रतियोगिकं घटादिस्वरूपं भेदः। तथा च सति भेद एवैतन्न स्यात् निष्प्रतियोगिकस्य भेदस्य त्वयानभ्युपगमात्, अभ्युपगमे वा परिभाषापत्तेः। तथा च पटप्रतियोगिकं घटस्वरूपं भेद इत्यर्थपर्यवसानेऽपि पटोऽपि घटस्वरूपं स्यात्। अतो भेदावतारायासोऽभेदसाधनपर्यवसायीति महातार्किकत्वम्। एवञ्च घटरूपस्य भेदस्य (स?) प्रतियोगी (गि) पटस्य स्वरूपमित्यनया दिशा पटोऽपि घटस्वरूपमग्न एवेत्यभेद इति चेत्?

मैवं, पटप्रतियोगिकं घटस्य स्वरूपं भेद इत्युच्यमानेऽपि पटः प्रतियोगी यस्येति बहुव्रीहिसमासाश्रयणादेव समस्यमानपदार्थीभूतात्पटादन्यपदार्थो घटो भिन्नत्वेन त्वयैवोपदर्शित इति त्वयैवाभेदापादनस्यापहस्तितत्वात्, समस्यमानपदार्थादन्यस्यैव बहुव्रीह्यर्थत्वात्। न हि चित्रगुर्देवदत्त इत्युक्ते चित्रया गवापि देवदत्तस्याभेदः प्रतीयते, किन्तर्हि? गोर्विशेषणमात्रम्। प्रकृतेऽपि घटभेदत्वेन घटस्वरूपे निरूप्यमाणे पटस्य विशेषणत्वमात्रमभ्युपेतं नाभेदोऽपीति। एवं घटस्वरूपभेदप्रतियोगी पट इत्युक्ते कथं पटस्य घटात्मत्वं, पूर्वयुक्तेः सत्त्वात्। तथा च यद्यद्वचनमुच्चार्य त्वया पटस्वरूपे घटो घटस्वरूपे पटोऽन्तर्निवेशनीयः तेन तेन त्वद्वचनेनैव [मया] तयोर्भेदो व्यवस्थापनीय इति यथा यथा तव भेदनिरासाय प्रयत्नस्तथा तथा धृष्टबालक इव पुरोवर्ती भेद इति।

अन्यसाकाङ्क्षतापत्तिविभीषिकापि निरस्तैव। केयमन्यसाकाङ्क्षता नाम। घटादयो निष्प्रतियोगिकास्त एव चेद्भेदाः स्युस्तदा सप्रतियोगिकाः स्युः, अभाववत्समवायवदिति चेद्भवतु(न्तु) नाम सप्रतियोगिकाः। न नः किञ्चिद्बाध्यते। न हि स्व[ा]भावाभावत्वेन निरूप्यमाणान् घटादीनपि सप्रतियोगिकान्नाङ्गीकुर्मः। तर्हि अभाववदेवेतरनिरूपणाधीननिरूपणाः स्युः सविकल्पमात्रविषयाश्चेति चेत्? तत्किं सप्रतियोगिकपदार्थस्यायं नियमो यदितरनिरूपणेनैव निरूप्यते? तथा सति प्रमेयत्वाभिधेयत्वादिनापि निरूप्यमाणा अभावसमवायादय इतरनिरूपणमपेक्षेरन्। न वयं सप्रतियोगिकत्वं निष्प्रतियोगिकत्वं वा वस्तुनः स्वाभाविकमेवाङ्गीकुर्मः, किं तर्हि? यत्प्रकारावच्छेदेन यज्ज्ञानं नियमतो यद्विशिष्टज्ञानमपेक्षते तत्प्रकारावच्छेदेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्वस्तु सप्रतियोगिकमिति ब्रूमः। यथा च स एव घटो घटत्वेन ज्ञायमानो नियमतो नान्यविशिष्टज्ञानमपेक्ष्य ज्ञायते। ततो घटत्वावच्छेदेन निष्प्रतियोगिक इत्यभिधीयते। स्वाभावाभावत्वेन ज्ञायमानो घटो नियमतः स्वाभावाभावज्ञानमपेक्ष्यैव ज्ञायत इति तेन सप्रकारेण (प्रकारेण[1]) सप्रतियोगिक इति। यद्यपि वह्नित्वेन वह्निज्ञानमपि कदाचिद् धूमज्ञानपेक्षतेऽनुमितिरूपम्, अतो वह्नित्वेन वह्निः सप्रतियोगिक एव स्याद् इत्युक्तं **नियमत** इति। न हि प्रात्यक्षिकमपि वह्नित्वप्रकारकज्ञानं[तद]पेक्षं येन धूमो वह्नेः प्रतियोगी स्यात्। यद्यपि वह्नित्वनिर्विकल्पकं वह्नित्वविशिष्टज्ञानं नियमतोऽपेक्षते इति वह्नित्वमपि वह्नेः प्रतियोगि स्यात्, तथापि न तद् विशिष्टज्ञानमित्यपेक्षणीयज्ञाने वैशिष्ट्यं विशेषणमुपात्तम्। अन्यत्र गोत्वाश्वत्वादौ सहानवस्थानरूपविरोधकृत एव प्रतियोगित्वव्यवहारः, क्वचिद्वध्यघातकत्वादिकृत इति। यद्येवं तर्हि घटादयो निष्प्रतियोगिकाः, घटाभावादयश्च सप्रतियोगिका इत्यत्र किङ्कृतो व्यवहारभेद इति चेत्? न, यत्पदार्थस्य यदसाधारणं वाचकपदं तत्र यत्प्रवृत्तिनिमित्तं तत्प्रकारकज्ञानस्येतरविशिष्टज्ञानसापेक्षत्वनिरपेक्षत्वप्रयुक्त इति गृहाण। यद्यपि प्रमेयपदं संयोगस्यासाधारणं वाचकं न भवति तथापि गुणादिपदं तथा भवतीत्यदोषः। तत्सिद्धमेतद्घटादय एव स्वरूपभेदास्तत्त्वेन ज्ञायमानाः सप्रतियोगिका इति। ननु स्वरूपं भेद इति स्वरूपभेदस्याननुगतस्यानुगतधर्म-व्यतिरेकेण कथं समयग्रहस्तथा च स्वरूपं भेद इत्युक्ते कस्य स्वरूपस्य प्रतिलम्भः स्यात्सकलाप्रतीतौ च तत्स्वरूपं भेदज्ञेनापि स्वरूपभेद इति पदेन न व्यवह्रियेतेति चेत्? न, स्वरूपभेदपदस्य स्वरूपत्वेन प्रवृत्तिनिमित्तेन उपलक्षणेन वा प्रवर्तमानस्य स्वरूपत्वावच्छिन्नाशेषव्यक्तिपरस्य प्रकरणसमभिव्याहारादिवशात्तत्र घटादिव्यक्त्युपस्थापकत्वात्। स्वरूपत्वञ्च स्वनिष्ठधर्मात्यन्ताभावासमानाधिकरण-धर्मवत्त्वमेव। स्वनिष्ठो यो धर्मः तस्य योऽत्यन्ताभावस्तदसमानाधिकरण-धर्मवत्त्वमिति यावत्। अत एव घटस्वरूपं न पटः तस्य घटनिष्ठ-धर्मात्यन्ताभावसमानाधिकरणधर्मवत्त्वात्, न वा घटान्तरस्वरूपं घटान्तरं, तत्राप्येकतरधर्मस्यापरत्रात्यन्ताभावनैयत्यात्। न च घटनिष्ठसंयोगात्यन्ता-भावसामानाधिकरण्यात्तद्घटत्वस्य तद्घटोऽपि तद्घटस्वरूपं न स्यादिति वाच्यम्, अत्यन्ताभावपदेन प्रतियोग्यसमानाधिकरणात्यन्ताभावस्य विवक्षितत्वात्। अभावस्यापि यया कयाचिद्प्रत्यासत्त्या स्वनिष्ठधर्मात्यन्ताभावसमानाधि-करणधर्मवत्त्वस्य विद्यमानतया स्वरूपशब्दवाच्यत्वम्। अत एव स्वरूपमित्युक्ते सकलस्वरूपोपस्थितौ विशेषप्रतिपादनाय घटस्वरूपं पटस्वरूपमिति तत्तत्समभिव्याहारप्रयत्नः।

---

१. रूपेणेत्यर्थः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयमेव च धर्मो घटस्वरूपस्य भेदत्वम्। एतत्प्रकारावच्छेदेन ज्ञायमानो घट इतरनिरूपणाधीननिरूपणोऽनन्वसंहितोपाधेरुपहितप्रत्यययायोगाद्भिद्यत इति योगं पुरस्कृत्यान्योन्याभावस्वरूपभेदवत्तया घटादिर्भेदः। भेदस्तु भेदनत्वादत्रान्योन्याभावेत्यभिधाने, अन्योन्याभावविरहिणां भेदवत्त्वाभावाद्भिद्यत इति योगविधुराणां भेदो न स्यादित्यस्माकं स्वरूपभेदोपपादनायास इति।

ननु स्वरूपञ्चेद्भेदस्तदा शुक्तिस्वरूपे दृष्टे रजताद्भेदो गृहीत इत्यभेदारोपो न स्यात् न स्याच्च दूरादनभिव्यक्तकरचरणादिपुरुषस्वरूपे दृष्टे स्थाणुर्वा पुरुषो वेति संशय इति चेत्? मैवं, न हि भेदमात्रं संशयविपर्ययविरोधि, किं नाम? आरोप्यारोपविषयगतधर्मयोरन्योन्यस्मिन्नभावदर्शनम्, आरोप्यधर्मस्यारोप्यविषयव्यतिरेकदर्शनं वा, भेदत्वेन दर्शनं वा, आरोप्यधर्माधिकरणारोपविषययोरन्योन्याभावदर्शनं वा, तथैवावधारणात्। तथा च स्वरूपभेदग्रहे संशयविपर्ययौ न स्यातामिति रिक्तं वचः।

ननु यदि प्रतियोगिना निरूप्यमाणो घट एव भेदः स्यात् तदा केनापि प्रकारेण निरूप्यमाणं नीलमपि पीतं भवेदिति चेत्?, न, आपादकाभावात्। अविरुद्धयोर्घटत्वभेदत्वयोः समावेशवन्नीलपीतत्वयोरपि समावेशः स्यादिति जात्युत्तरस्य व्याप्त्यमूलकत्वात्। यथा च नीलपीतयोर्नीलत्वपीतत्वयोर्वा परस्परपरिहारकत्वं नियमेनास्माभिरङ्गीक्रियते तथा घटत्वभेदत्वयोश्चेत्त्वयाङ्गीक्रियते तदा तावतैव सिद्धे भेदविवाद एवावयोः पर्यवस्येत्।

यच्चोक्तं भेदोल्लेखस्याभेदोल्लेखनान्तरीयकतयाऽभेदोल्लेखांश एव ज्ञानस्य प्रामाण्यं न तु भेदोल्लेखांशेऽपीति, तद्विपरीतम्, अभेदप्रत्ययस्य भेदविषयतानैयत्यात्। न हि भेदमनुल्लिख्याभेदपदादभेद इति धीः सम्भवति, प्रतियोगितया भेदभानावश्यकत्वात्। भेदे तु प्रतीयमाने अभेदभानमनावश्यकम्। न हि भेदपदाद् भेदे प्रतीयमानेऽभेदप्रमा, तस्यापदार्थत्वात्। सर्वधियाञ्च भेदविषयत्वं वैशिष्ट्यविषयतया प्रागेव दर्शितम्। तस्मात्—अभेदं नोल्लिखन्ती धीर्न भेदोल्लेखनक्षमेति मनोरथमात्रमिति।

घटपटौ न भिन्नाविति प्रतीतौ पारमार्थिकभेदनिषेधोऽपारमार्थिकभेदनिषेधो वा। उभयथा भेदसिद्धिः। पारमार्थिकस्य निषेधे तादृशस्य प्रतियोगिनो नित्यवदन्वयः। अपारमार्थिकभेदनिषेधे च मदभ्युपगम्यमानपारमार्थिकभेदेन निषेधानन्वयादेव भेदसिद्धिः। अभावज्ञाने प्रतियोगिप्रमा नापेक्षिता, किन्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानमात्रमिति चेत्?, तर्हि अभेद इत्यप्रमितभेदविरह इत्येवार्थः पर्यवसन्नः। तथा च किं नश्छिन्नम्।

नन्वभेद इति भेदं न निषेधामः। किं नाम? धर्मान्तरमेव ब्रूम इति चेत्? न, तद्यदि भेदविरोधि तदा विरोधनिरूपकतयैव भेदसिद्धिः। अथ भेदाविरोधि तदा घटपटयोरभेदनामकं धर्मान्तरं द्रव्यत्वपृथिवीत्वादिवद्यदि प्रतीतिपथमवतरेत् कस्तन्निषेधाय यतेत। प्रतीयत एव श्रुतेरिति चेत्? न, श्रुतीनां भेदविषयतयोपपादनात्।

किञ्च श्रुत्या यदद्वैतं प्रतिपाद्यते तत्किं घटादिनिष्ठमुत ब्रह्मनिष्ठमुतोभयनिष्ठस्वरूपम्। आद्ये भेदविरोधि न वा, उभयथापि भेदसिद्धेः, एकत्र भेदनिरूपकतयाऽन्यत्र श्रुतिप्रतिपन्नाद्वैतविरोधादेव। अथ ब्रह्मनिष्ठमेवाद्वैतं नाम धर्मान्तरं, तदपि न, भेदविरोधित्वतदविरोदित्वाभ्यां भेदसिद्धेः। अथ ब्रह्मप्रपञ्चोभयनिष्ठमद्वैतं धर्मः श्रुतिप्रतिपाद्यस्तथापि भेदविरोधे भेदसिद्धिः, तदविरोधे तत्सिद्धिः। यथा चोभयगतमद्वैतं त्वन्नये तथा सत्त्वमपि उभयगतमस्तु। अथ ब्रह्मस्वरूपमेवाद्वैतं श्रुतिप्रतिपाद्यं तदा न नो विवादः, श्रुत्या भेदस्याप्रतिक्षेपात्। अद्वैतमात्रं न प्रतिपाद्यते किन्तु द्वैतं निषिध्यते इति चेद्? द्वैतनिषेधो ब्रह्मभिन्नो न वा, आद्ये द्वैतसिद्धिः, अन्त्ये कथं द्वैतनिषेधः, श्रुत्या ब्रह्मण एव विधेः।

ननु स्वरूपं भेदस्तदा स्याद् यदि नानास्वरूपं स्यात्। नानात्वञ्चान्योन्याभावाधीनं त्वया वाच्यम्, अन्योन्याभावस्तु भेदः सर्वथाप्यनुपपन्नः। तथा हि अन्योन्याभावस्तादात्म्याभावः। तस्य च तादात्म्यं घटपटयोः प्रतियोगि वाच्यम्। तस्य च सिद्धौ सिद्धमद्वैतम्। तदसिद्धावत्यन्तासतो न विशेषणत्वं, नाप्युपलक्षणत्वं सम्भवतीति तद्विशिष्टस्तदुपलक्षितो वा अभावप्रत्ययो न स्यात्, अभावप्रतीतावुपलक्षणतया विशेषणतया वा प्रतियोगिता(वत्ता)यास्तवाभ्युपगमात्। न च वाच्यं घटे पटत्वं पटे घटत्वं निषिध्यते, तथा च स एवान्योन्याभावात्मा भेद इत्यभिधीयत इति, एवं सति कः संसर्गाभावादस्य भेदः, तथा चाभावचातुर्विध्यस्थापनधन्धनस्य त्वयैव स्फुटीकरणम्। न च घटः पटे पटश्च घटे घटत्वपटत्वाभ्यामवच्छिद्य प्रतिषिध्यत इति वाच्यम्, एवं सति घटत्वपटत्वयोरवच्छेदकधर्माभावात् तयोरन्योन्यस्मिन्निषेधानुपपत्तौ अन्योन्याभावात्मकभेदाभावादन्योन्यधर्मवत्त्वमन्योन्यस्मिन्निति घटपटयोरभेद एव पर्यवसन्न इति चेत्? मैवम्, अभिप्रायानवगमात्। न ह्यन्योन्यतादात्म्यं प्रतियोगि ब्रूमोऽन्योन्याभावे, येन प्रतियोग्यप्रसिद्धिनिबन्धनं तद्विशिष्टतदुपलक्षितप्रतीत्यनुदयप्रसङ्गः। न वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घटत्वपटत्वयोरेव प्रतियोगित्वमाचक्ष्महे, येन संसर्गाभावाविशेषप्रसङ्गः, न वा घटपटयोरन्योन्यस्मिन्निषेधात्तादात्म्याभावं व्यवहरामो, येन घटत्वपटत्वयोः स्वगतावच्छेदकधर्मविरहनिबन्धनस्तयोरन्योन्याभावविरहः स्यात्, किं नाम? घटमेव प्रतियोगिनं ब्रूमः। स च यदि संसर्गावच्छिन्नो निषिध्यते तदा संसर्गाभावप्रतीतिः। तादात्म्यावच्छिन्नश्चेन्निषिध्यते तदाऽन्योन्याभावप्रतीतिरिति विशेषः स्यात्।

ननु तादात्म्यस्य प्रतियोगितावच्छेदकत्वेऽपि अप्रतीतत्वं तदवस्थमेवेति चेद्? [न,] घटस्य प्रतियोगिनो यदवच्छेदकं तादात्म्यं तस्य घट एव प्रमितत्वात्, न हि घटतादात्म्यात्मा न घटः। ननु घटनिष्ठतादात्म्यं चेत्पटे निषिध्यते तदा तादात्म्यप्रतियोगिकः संसर्गाभाव एवायमिति चेत्? न, तादात्म्यस्या-प्रतियोगित्वात्। घटतादात्म्यं पटे नास्तीति प्रतीतौ तादात्म्यमेव प्रतियोगित्वेन परिस्फुरतीति चेत्? न, तत्र पट(घट)तादात्म्यसंसर्गस्यैव प्रतिषेध्यत्वात्। संसर्गाभावाङ्गीकाराद् यत्र घटः पटो न भवतीति नञन्वयो घटेन तत्र तादात्म्यावच्छिन्नो घट एव प्रतियोगीति संसर्गाभाववैलक्षण्यात्, प्रतीतिवैलक्षण्यादेव प्रत्येतव्यवैलक्षण्यसिद्धिः। न हि घटः पटो भवतीति घटः पटो नास्तीति प्रतीत्योर्वैलक्षण्यं त्वया मया वा नाङ्गीक्रियते।

किञ्च भूतलवृत्तेरपि घटस्य घटो भूतलं न भवतीति भूतलेऽभावः प्रतीयते। स च न संसर्गाभावः, भूतले घटसंसर्गस्य प्रत्यक्षसिद्धत्वात्। एवञ्च घटो घटे नास्तीति न तादात्म्याभावः, घटतादात्म्यस्य घटे त्वयाप्यङ्गीकारात्। तस्मादस्त्यनयोरभावयोर्भेदः। स च प्रतियोग्यभेदेऽपि प्रतियोगितावच्छेदकधर्मभेद-प्रयुक्त एवेति युक्तमुत्पश्यामः।

ननु यदि प्रतियोग्यभेदेऽपि प्रतियोगितावच्छेदकधर्मभेदादभावभेदः स्यात्तदा नेह पृथिवी, नेह घटः इत्यत्रापि पृथिवीत्वावच्छिन्नप्रतियोगिकः घटत्वावच्छिन्न-प्रतियोगिकश्चान्यो घटस्यैवाभावः स्यादिति चेत्? अस्त्येवात्राभावद्वयम्। परन्तूभयत्रापि संसर्गस्य प्रतियोगितावच्छेदकतया संसर्गाभावव्यपदेशः। नन्वत्र घटत्वपृथिवीत्वाभ्यामेव प्रतियोगिताऽवच्छिद्यते न तु संसर्गेणापि। एवं घटः पटो नेत्यत्र घटत्वमेव प्रतियोगितावच्छेदकं न तु तत्तादात्म्यम्। तथा च केयं प्रतारणा यत्प्रतियोगित्वेन प्रतियोगितावच्छेदकत्वेनाप्रतीयमानावेव तादात्म्यसंसर्गौ तादात्म्याभावसंसर्गाभावयोः सीमाविवादे नियन्तारावविति चेत्?

मैवं, नेह घट इत्यस्याः प्रतीतेः घटसंसर्गो भूतले नास्ति घटो नेह वर्तत इत्यादिना विवरणात्, घटः पटो नेत्यस्यास्तु घटात्मा न पटो घटस्वरूपं न पट

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यादिना विवरणात्। तथा च विवरणविव्रियमाणार्थयोरविशेषात्कथं न संसर्गाभावतादात्म्याभावयोः प्रतीतिः। असति चास्मिन् भेदे अग्निहोत्रं जुहुयात्स्वर्गकाम इति श्रुतिपक्षपातिना त्वया हेतुफलभावोऽपि कथमुपपादनीयः, तस्य भेदगर्भत्वात्। अन्यथा समासादितदण्डो घटाय न प्रवर्तेत, दण्डात्मनो घटस्यापि तेनासादितत्वात्। दण्डस्य सत्त्वेऽपि घटासत्त्वञ्चेत्तदा तदानीन्तनविरुद्धधर्माध्यासादेव भेदसिद्धिः, सिद्धस्य करणत्वादसिद्धस्य कार्यत्वात्। असति भेदे घटमानयेत्युक्ते पटमप्यानयेत्, घटार्थं प्रवृत्तस्तन्तूनप्युपाददीत तन्तुवद् वा मृदमपि नोपाददीत। वाजपेय[जन्य]स्वर्गार्थं कलञ्जमपि भक्षयेत्, वाजपेयकलञ्जभक्षणयोरभेदाद् वाजपेयजन्यस्वर्गकलञ्जभक्षणजन्यनरकयोरप्यभेदात्। गां दद्यादिति विधेः रासभमपि दद्यात्, गोरासभयोरभेदात्। सुरां न पिबेदिति निषेधात् क्षीरमपि न पिबेत्—इत्यादिश्रौतस्मार्तलौकिकबहुवित्तव्ययायाससाध्य-सकलव्यवहारविप्लवः स्यात्। आगमे चेत्तव श्रद्धा कर्मपरतत्तदागमप्रतिपाद्य-स्वर्गापूर्वादिपारमार्थिकत्वे कः प्रद्वेषः। को वोपनिषत्प्रतिपाद्यत्वाभिमत-ब्रह्माद्वैतेऽनुरागः। कर्मपरश्रुतिभिः भेदो न प्रतिपाद्यते येनाभेदप्रतिपादकश्रुत्या तासां पारिपान्थ्यं स्यादिति चेत्? स्वर्गापूर्वादयश्चेत्प्रतिपाद्यत्वेन पारमार्थिका-स्तावतैवाद्वैतपारिपान्थ्यम्। अथ स्वर्गादयोऽप्यपारमार्थिका एव तदा ब्रह्माद्वैतपारमार्थिकत्वे कस्ते प्रतिभूः। अथ स्वर्गादयः श्रुतिप्रतिपाद्य-त्वात्पारमार्थिकाः। भेदस्त्वमीषां श्रुत्यप्रतिपाद्यत्वादपारमार्थिक इति चेत्? स्वर्गादयः सन्तु नाम पारमार्थिकाः, श्रुतिप्रतिपाद्यत्वात्, हेतुफलभावोऽप्यमीषामस्तु पारमार्थिकः इत्येतावदेवास्माकमपेक्षितमापाततः। क्रमेण तु चेद्धेतुफलभाववादिभिः स्वरूपपारमार्थिकत्वरक्षायै भेदोऽप्यपेक्षिष्यते तदा रुदन्तमपि त्वामनादृत्य भेदः सेत्स्यति। वस्तुतस्तु भेदस्यैव प्रतिपाद्यत्वं, न तु त्वदभिमताभेदस्यापीति दर्शितं प्राक्।

ननु क एवमाह भेदो नास्तीति किन्तु सकललौकिकव्यवहारधुरीणो व्यावहारिकभेदोऽस्त्येव, न हि मिथ्यासत्यभेदोऽपि नास्माभिरङ्गीक्रियत इति चेत्? उच्यते, किमिदं व्यावहारिकत्वं नाम यस्य ब्रह्मणि विरहो भेदे च सत्त्वम्। ज्ञानरूपव्यवहारविषयत्वमिति चेत्? न, इष्टत्वात्, ब्रह्मण्यप्येतस्य विद्यमानत्वाच्च। ब्रह्मणि ज्ञानविषयत्वं नास्तीति वाक्येन यदि ज्ञानं जननीयं तदा ज्ञानविषयत्वमवर्जनीयं, न चेत्तदा सुतरां ज्ञानविषयत्वमवर्जनीयम्। अथ व्यवहारोऽभिलापस्तद्विषयत्वं व्यवहारिकत्वमिति चेत्? न, ज्ञानविषयत्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पक्षोक्तदोषापातात्। नयनानयनादिरूपव्यवहारविषयत्वमेव तत्त्वमिति चेत्? न, अन्योन्याभावरूपे भेदे तदभावात्।

ननु ज्ञानेच्छाप्रयत्नादिविषयत्वं यद्यपि व्यावहारिकत्वं प्रकृते नोपपाद्यते तथापि बाध्यत्वमेव व्यावहारिकत्वं पारिभाषिकमिह विवक्षितमिति चेत्? बाधो विपरीतप्रमा, तद्विषयत्वमेव बाध्यत्वमिति यदि तदा त्वयैव प्रामाणिकत्वमुपपादितम्। अथ भ्रमविषयत्वं बाध्यत्वं तदा भेदः पारमार्थिक इति ज्ञाने त्वया भ्रमत्वेनाङ्गीक्रियमाणे पारमार्थिकत्वांशे बाधेऽपि धर्म्यंशेऽबाधनात्, भेदस्याबाध्यत्वमित्यायातम्। **'धर्मिणि सर्वमभ्रान्तं प्रकारे तु विपर्यय'** इत्यभ्युपगमात्। तथा च भेदत्वेन भेदो न बाध्य इति सिद्धम्। अन्यथा ब्रह्मापारमार्थिकमित्यपारमार्थिकत्वबाधे ब्रह्मणोऽपि बाध्यत्वं स्यात्। अथ घटो भिन्न इति ज्ञानं भ्रान्तं तत्र च प्रकारो भेद एव, अतस्तस्य बाध्यत्वमिति चेत्? न, घटपटौ भिन्नाविति ज्ञाने प्रात्यक्षिकश्रौतौपपत्तिकबाधानां निरासात् निरसिष्यमाणत्वाच्च, क्वचित्काले क्वचिद्विषये भेदस्य बाध्यत्वेऽपि सर्वत्राबाधात्। न हि सार्वत्रिको बाधस्त्वया शक्योपदर्शनः। अबाध्यत्वेनाशक्यव्यवस्थापनत्वमेव व्यावहारिकत्वमिति चेत्? न, तस्य ब्रह्मण्यपि समानत्वात्। तत्र श्रुतिप्रतिपाद्यत्वादेवाबाध्यत्वव्यवस्थितिरिति चेत्? न, भेदस्यापि श्रुतिप्रतिपाद्यत्वोपपादनात्। भेदग्रहे केषामपि कदापि कुत्रापि बाधो नास्तीति कथं त्वया ज्ञायते, येन भेदस्याबाध्यत्वं मन्यस इति चेत्? त्वद्व्यवस्थाप्यमानबाध्यत्वव्यवस्थाविरहादेवाबाध्यत्वसिद्धेः। अस्यां कथायां त्वमेव व्यावहारिकोपपादकतायामारूढोऽसि। यत्र तु बाधविरहोऽस्माभिर्व्यवस्थापनीयस्तत्र येन प्रकारेण ब्रह्मसाक्षात्कारस्य बाधविरहस्त्वयोपपाद्यः स एव चेदस्माभिरुपपादयितुं शक्य एतावतैवास्मान् जयित्वे व्यवहरिष्यसि।

ननु ब्रह्मभिन्नत्वमेव व्यावहारिकत्वमिति चेत्? न, एतादृशव्यावहारिकत्वस्यास्मदपेक्षितत्वाद् भेदभिन्नत्वेन ब्रह्मणोऽपि व्यावहारिकत्वस्य सुवचत्वाद् ब्रह्मभिन्नत्वस्य त्वयाऽभ्युपगम्यमानस्य पारमार्थिकत्वे भेदपारमार्थिकत्वस्य सिद्धत्वाच्च। असत्यत्वं व्यावहारिकत्वमिति चेत्? असत्यत्वमिति बाध्यत्वं चेत्? तदा उक्तोत्तरम्। अप्रामाणिकत्वञ्च प्रमाणगोचरत्वोपपादनेनैव निरस्तम्। अलीकत्वञ्च विधिनिषेधव्यवहारगोचरत्वोपपादनेनैवापास्तम्। असत्त्वं व्यावहारिकत्वमिति चेत्? तत्र सत्त्वं यदि सत्तायोगित्वं तदाऽन(नु)मन्यामहे, अन्योन्याभावस्य सत्तायोगित्वानभ्युपगमात्। अभावत्वमेवासत्त्वमिति चेत्? न, इष्टत्वात्। भावप्रतियोगित्वमिति चेत्? न, इष्टत्वादेव। मिथ्यात्वमेव व्यावहारिकत्वमिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चेत्? मिथ्यात्वमित्यप्रामाणिकत्वं यदि तत्रोक्तम्। मिथ्यापदाभिधेयत्वञ्चेत्? तत् स्वसङ्केतेनेश्वरसङ्केतेन वा? नाद्यः, तस्य ब्रह्मण्यपि सुवचत्वात्। न द्वितीयः, तत्सङ्केतग्राहककोषव्याकरणादौ भेदपदपर्यायत्वेन मिथ्यालीकादिपदानामननुशासनात्। अमोक्षात्मकत्वमेव व्यावहारिकत्वमिति चेत्? न, इष्टत्वात्, आत्यन्तिकदुःखाभावस्य मोक्षतयाऽन्योन्याभावभिन्नत्वात्। मोक्षोपायज्ञानाविषयत्वं व्यावहारिकत्वमिति चेत्? न, श्रवणमनननिदिध्यासनादीनां मोक्षोपायज्ञानानां शरीरात्मभेदविषयत्वात्। भेदज्ञानार्थमेव हि श्रवणदीनामुपयोगः। सप्रतियोगित्वमेव व्यावहारिकत्वमिति चेत्? न, इष्टत्वात्। अद्वैतविरोधित्वमेव व्यावहारिकत्वमिति चेत्? न, इष्टत्वात्, विपरीतस्यापि सुवचत्वात्। प्रपञ्चान्तर्गतत्वं चेद् व्यावहारिकत्वं तदा प्रपञ्चबहिर्गतत्वेन ब्रह्मण एव किं न व्यावहारिकत्वं स्यात् प्रपञ्चत्वस्यापि विकल्प्य कदर्थनीयत्वाच्च। अविद्यादशावेद्यत्वञ्चेद् व्यावहारिकत्वं तदा न किञ्चिदनिष्टं वैपरीत्यञ्च सुवचम्। अविद्याविषयत्वं व्यावहारिकत्वमिति चेत्? न, क्वचित् तथात्वे पारमार्थिकत्वाक्षतेः। जडत्वं व्यावहारिकत्वमिति चेत्? न, तद्यदि ज्ञानभिन्नत्वं तदनुजानीमः। अथात्मभिन्नत्वं? तथाप्यनुजानीमः। अथातद्भिन्नत्वं?, तथापि नानिष्टम्। मुक्तेनावेद्यत्वमेव व्यावहारिकत्वमिति चेत्? न, इष्टत्वात्।

भेदस्य पारमार्थिकत्वे मुक्तिदशायां कथं न वेद्यत्वमिति चेत्? न, वेदनविरहादेव। ब्रह्मणस्तदा कथं वेदनमिति चेत्? इयमपि तव भ्रान्तिः। तस्मात् व्यावहारिको भेद इति तवाङ्गीकारो न किञ्चिदनिष्टमापादयति। केवलं पारमार्थिकत्वं व्यावहारिकत्वमिति ब्रह्मप्रपञ्चयोर्धर्मद्वयं प्राचीनैर्वृद्धवेदान्तिभिः शरमुष्टिन्यायेन बोधितम्। अर्वाचीना अपि वेदान्तिनो व्यामुढा एव वर्तन्ते। वस्तुतः प्रमाणसिद्धतया ब्रह्मप्रपञ्चयोर्विशेषो नास्त्येव।

व्यावहारिकत्वादेव प्रपञ्चस्य पारमार्थिकत्वम्। तथा हि भेदः पारमार्थिकः व्यावहारिकत्वात्, यन्न पारमार्थिकं तन्न व्यावहारिकं यथा ब्रह्माद्वैतं, न चायं न व्यावहारिकः, तस्मात् पारमार्थिक इति व्यतिरेकी। यद्वा पारमार्थिकत्वापारमार्थिकत्वाभ्यां विवादपदं भेदः पारमार्थिकः, व्यावहारिकत्वात्, यद्यद्व्यावहारिकं तत्तत्पारमार्थिकं, यथा ब्रह्म, पारमार्थिकत्वव्याप्यव्यावहारिकत्ववाँश्चायं तस्मात् पारमार्थिकः। साधनविकलो दृष्टान्त इति चेत्? न, ब्रह्मणोऽपि व्यावहारिकत्वस्य प्रमाणसिद्धत्वात्। व्यावहारिकत्वं हि व्यवहारगोचरत्वं, तच्च ब्रह्मण्यस्ति ब्रह्मेत्यभिलापरूपव्यवहारसत्त्वात् ज्ञानरूपव्यवहारसत्त्वाच्च, त्वन्मते घटाद्यात्मनो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मणो नयनानयनादिरूपव्यवहारसत्त्वाच्च। ब्रह्मणि न व्यावहारिकत्वमित्ययत्नतो निषेधरूपव्यवहारस्यापि त्वयाभ्युपगमात्। व्यावहारिकत्वानिषेधे व्यावहारिकत्वमयत्नसिद्धमेव। तस्माद् यथा यथा व्यावहारिकत्वनिषेधो ब्रह्मणि तथा तथा व्यावहारिकत्वमवारणीयमेव। अव्यावहारिकं कथं व्यावहारिकं स्यादिति चेत्? आत्मानमुपालभस्व येन स्फुटतरं व्यवहारं ब्रह्मणि पश्यन्नपि अव्यावहारिकत्वमभ्युपैषि।

एकमेवाद्वितीयं ब्रह्मेति श्रुतिरपि अद्वितीयत्वादिना रूपेण ब्रह्म व्यवहरणीयमित्येतत्परैव। तथा च न दृष्टान्तस्य साधनवैकल्यं प्रथमानुमाने। तर्हि गतं, व्यतिरेकव्याप्त्यभावादिति चेत्? न, त्वन्मतेन तत्र व्यतिरेकसत्त्वात्[1]।

यद्वा भेदः पारमार्थिकः, वेद्यत्वात्, यदेवं तदेवं, यथा ब्रह्म, तथा चायं, तस्मात्तथा। वेद्यत्वञ्च वेदनविषयत्वम्। तच्च त्वन्मते ब्रह्मण्यप्यस्त्येव।

भेदः प्रमाविषयः, ज्ञानविषयत्वात्, यदेवं तदेवं यथा ब्रह्म, तथा चायं, तस्मात्तथा। शुक्तिनिष्ठत्वेन ज्ञाते रजतत्वे व्यभिचार इति चेत्? न, रजतत्वस्य प्रमाविषयत्वात्। रजतत्ववैशिष्ट्यं शुक्तौ भासते, तच्च न पारमार्थिकमिति चेत्? न, रजतत्ववैशिष्ट्यस्य रजते पारमार्थिकत्वात्। न हि तदतिरिक्तं वैशिष्ट्यं भासते शुक्तौ। तर्हि शुक्तौ रजतज्ञानं कथं भ्रम इति चेत्? न, व्यधिकरणप्रकारावच्छिन्नविषयप्रतियोगितया, विशेष्यावृत्तिप्रकारकतया, विशेष्यनिष्ठात्यन्ताभावप्रतियोगिकधर्मप्रकारतया तत्प्रतियोगिज्ञानतया वा। न च सद्विषयतया वणिग्वीथ्याद्यनुभूतरजतत्वस्य स्मरणे सति शुक्ताविन्द्रियसन्निकृष्टायां शुक्तिरजतयोर्भेदग्रहाभावे सामग्रीवशात्तादृशारोपसम्भवात्। तथा च नैयायिकानां ज्ञेयत्वप्रमेयत्वयोरविनाभाव एवेति न व्यभिचारः।

ननु रजततादात्म्यं शुक्तौ नास्ति तथा च कथं सदेव वैशिष्ट्यं शुक्तौ भासत इत्यङ्गीकरिष्यसीति चेत्? तत् किं रजततादात्म्यस्य क्वचिदभावोऽस्तीत्येव तस्यापारमार्थिकत्वं, तदा तादृशमपारमार्थिकत्वं घटपटादीनां सर्वेषामप्यङ्गीकुर्म इति दुर्मते तवालं मर्मपीडया। को हि घटादीनां नाभावाप्रतियोगित्वमङ्गीकरोति।

एतेन स्वप्नदृष्टकामिन्यादीनामपि तरङ्गप्रसङ्गानुभूतचन्द्रभेदादीनामपारमार्थिकत्वमभ्युपगच्छतामस्माकं तद्दृष्टान्तावष्टम्भेन जागरावस्थानुभूयमानानां घटपटतद्भेदानामपारमार्थिकत्वानुमानं न किञ्चिदनिष्टमापादयतीत्यवधातव्यम्।

---

१. अन्वयदृष्टान्तः स्वमतेन, व्यतिरेकदृष्टान्तः परमतेनेति भावः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सदुपरक्तमसदपि भ्रमे भासत इति पक्षोऽस्माभिर्नाङ्गीक्रियत एव येन तदादाय दृष्टान्तावकाशस्तव स्यादिति।

घटः पटप्रतियोगिकान्योन्याभावात्यन्ताभावरहितः पटत्वप्रतियोगिकाभाववत्त्वात्, यन्न घटप्रतियोगिकान्योन्याभावात्यन्ताभावरहितः (तं) न तत्प(प)टत्वप्रतियोगिकात्यन्ताभाववत्, यथा पटः, न च नायं पटत्वप्रतियोगिकात्यन्ताभाववान्, तस्मात्, पट(घट)प्रतियोगिकान्योन्याभावात्यन्ताभावरहितः, घटः पटनिष्ठान्योन्याभावप्रतियोगी पटत्वप्रतियोगिकात्यन्ताभाववत्वात्—यदेवं तदेवं यथालोष्ठं यथा चायं तस्मात्तथेति प्रसाध्यं तद्दृष्टान्तबलेनान्वयी वा घटपटावन्योन्यभेदवन्तौ अन्योन्यधर्मात्यन्ताभाववत्त्वात्, यौ अन्योन्यधर्मात्यन्ताभाववन्तौ तावन्योन्यभेदवन्तौ, यथा विद्याविद्ये, अन्योन्यधर्मात्यन्ताभाववन्तौ चेमौ, तस्मादन्योन्यभेदवन्तौ, घटत्वं पटतादात्म्यावच्छिन्नप्रतियोगिताकाभावसमानाधिकरणं, पटत्व[ा]समानाधिकरणधर्मत्वात्, यन्न पटतादात्म्यावच्छिन्नप्रतियोगिताकाभावसमानाधिकरणं नासौ पटत्वासमानाधिकरणधर्मः यथा पटत्वम्, न चैतन्न पटत्वसमानाधिकरणधर्मः, तस्मात् पटतादात्म्यावच्छिन्नप्रतियोगिताकाभावसमानाधिकरणमिति व्यतिरेकी।

घटवद्भूतलं घटप्रतियोगिकाभावाधिकरणं, घटत्वप्रतियोगिकाभावाधिकरणत्वात्, यद् घटत्वप्रतियोगिकाभावाधिकरणं तद्घटप्रतियोगिकाभावाधिकरणं, यथा पटः, घटत्वप्रतियोगिकाभावाधिकरणञ्चैतत्, तस्माद् घटप्रतियोगिकाभावाधिकरणम्। अत्र पक्षविशेषणमहिम्ना संसर्गाभावबाधेऽन्योन्याभावसिद्धिः।

एवं घटवत्कपालं पक्षीकृत्यैतदेव साध्यम्। एवं रूपं स्वसमानकालीनस्वप्रतियोगिकाभावसमानाधिकरणं, गुणत्वात्, संयोगवत्। रसादीनामपि पक्षसमत्वान्न व्यभिचारः।

एवं संयोगमेव दृष्टान्तीकृत्य वृत्तिमत्पदार्थपक्षकमनुमानं प्रयोक्तव्यम्। व्यभिचारस्तु पक्षसमोक्त्या निरसनीयः।

प्रपञ्च सत्यः, दृश्यत्वात्, यन्न सत्यं तन्न दृश्यं, यथा—ब्रह्माद्वैतं, न चायं न दृश्यः, तस्मात्सत्यः। शुक्तौ रजततादात्म्यं दृश्यमपि न सत्यमिति व्यभिचार इति चेत्? न, तस्यापि सत्यत्वात्। साधितञ्च तत्सत्यत्वम्।

प्रपञ्चः पारमार्थिकः, अभिधेयत्वात्, यद्यदभिधेयं तत्तत्पारमार्थिकम्, यथा ब्रह्म, पारमार्थिकत्वव्याप्याभिधेयत्ववाँश्चायं, तस्मात् पारमार्थिकः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वप्नानुभूतप्रपञ्चोऽपि सत्य एवेत्यवधेयम्।

भेदादिज्ञानं सद्विषयकं, ज्ञानत्वात्, यद्यज्ज्ञानं तत्तत्सद्विषयकं यथा ब्रह्मज्ञानं, सविषयकत्वव्याप्यज्ञानत्ववच्च विवादविषयभेदादिज्ञानं, तस्मात्सद्विषयकम्।

ननु स्वशिरश्छेदक्षित्यादिगिलनाकाशपतनोर्वश्याद्यप्सरस्सम्भोगसमुद्रतरण-महेन्द्रादिविजयसुमेरुशिखरसमारोहणैरावतारोहणादिकमपि निद्राविद्रावितेन्द्रियगणः पुरुषः पश्यति तदपि त्वया पारमार्थिकमेष्टव्यम्। एवञ्चेन्नूनं तर्ककर्कशशेमुषीकोऽसि येन तदानीन्तनजागरानन्तरभाविबोधव्यतिरेके सत्यपि नान्यथा मन्यस इति चेत्? कः सन्देहः। परं तात्कालिकबाधेन स्वशिरश्चेदादीनां तज्जन्मनि परमभावमवधारयामः। न तु जन्मान्तरेऽपि त्वदुदाहृतं सर्वं नासीदित्यङ्गीकुर्मः। तात्कालिकबाधाद् वा पुरुषान्तरस्य वा नास्तीति निष्टङ्कयामः। अत एव पुराणादौ निद्राणस्तथाऽनुभवति। तस्माज्ज्ञेयत्वपारमार्थिकत्वयोः समनियमवादिनो नैयायिकाः स्वप्नविषयान् व्यभिचारस्थलत्वेनोदाह्रियमाणानपि त्वया गजनिमीलिकयाऽवधीरयता न मनागपि बिभ्यतीति।

ननु यथा ब्रह्म तथा प्रपञ्चो रासभादिः। तथा चैवं मन्यमानस्य तव नास्तिकेभ्यो न विशेषमवधारयाम इति चेत्? यो रासभाभिन्नं ब्रह्म मन्यते यश्च सत्त्वाभिधेयत्वप्रमेयत्वादिना रासभतुल्यं ब्रह्म स्वीकरोति, तयोः कतरो नास्तिक इति त्वमेव परिभावय। प्रपञ्चाद्भिन्नत्वेन ब्रह्म जानीहीत्येतदर्थमेव ममायमायासः। तर्हि प्रपञ्चाद् ब्रह्म कथमभ्यर्हितं येनोपनिषदां ब्रह्म ब्रह्मेति घोषणेति चेत्? ब्रह्मसाक्षात्कारः साक्षादेव दुःखोच्छित्तिरूपपरमपुरुषार्थोपयोगी न तु प्रपञ्चसाक्षात्कार इति बोधयितुम्। न तु ब्रह्मैव साक्षात्प्रपञ्च इति ख्यापयितुमित्यलमभिनिवेशेन।

ननु यदि श्रुतेस्तथैव तात्पर्यं तदा व्यासः कथमेवं नाज्ञासीद्यत्तथैवा-सूत्रयदिति चेत्? यदि ब्रह्म पारमार्थिकं तर्हि कथं बृहस्पतिर्नाज्ञासीद्येन सर्वशून्यतामसूत्रयत्। न हि व्यासात्सुरगुरुरप्राज्ञः। पाखण्डव्यामोहार्थमिति चेत्? तत्किं व्याससूत्राणां तत्फलमसम्भावितं, तर्हि तत्र तैर्थिकानां कथं परिग्रह इति चेत्? ब्रह्मस्तुतित्वेन। न हि ब्रह्मस्तुतावपि मम विद्वेषः। प्रपञ्चमिथ्यात्वसाधनं परं न सहामहे।

पूर्वानुमानादि अद्वैतप्रतिपादकागमबाधात् कथं द्वैतप्रमां जनयिष्यतीति चेत्? आगमबाधो हि आगमवाक्यजन्या साध्यविपरीतप्रतीतिः। सा च सत्या न वा? आद्ये कथं बाधः—तयैव सत्यया द्वैतसिद्धावद्वैतप्रमाऽभावात्। न हि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साध्यविपरीतप्रतीतिमात्रं बाधः, किन्तर्हि? साध्याभावप्रमा, सा चेदस्ति द्वितीया, कथं द्वैताभावप्रमारूपो बाधः। अथागमजनिताप्यद्वैतबुद्धिर्न सत्या, तर्हि सुतरां न बाधः, असत्येन ज्ञानेन बाधायोगात्। अथ मन्मते श्रुतिजबुद्धिरसत्या तव तु सत्यत्वादेव बाधात्मिकेति चेत्? न, मम मते सत्याद्वैतबुद्धिर्नास्त्येव। तर्हि एकमेवाद्वितीयं ब्रह्मेति वाक्यं ज्ञानं न जनयत्येव? क एवमाह न जनयति, अपि तु ब्रह्मणि ब्रह्मप्रतियोगिको भेदो नास्त्येतादृशं ज्ञानं जनयति, एतच्च घटपटादिभेदसाधने बाधकं न भवति, भिन्नविषयत्वात्। सर्वाद्वैतज्ञानं यन्ममोत्पन्नं श्रुतेः यच्च तव ब्रह्मणि ब्रह्माभेदविषयकज्ञानमुत्पन्नमनयोः कतरत्प्रमेति सन्देहोऽस्तीति चेत्? तर्हि सुतरां न बाधः, सन्दिग्धप्रमाणमपि ज्ञानं बाधकं परन्तु सन्देह एव नास्ति।

मदभ्युपगम्यमानतादृशश्रौतज्ञानस्य त्वयापि प्रामाण्याङ्गीकारात् त्वत्प्रतीतिस्तु यदि प्रमा तदा नाद्वैतप्रमा, अथाप्रमा तथापि न द्वैतप्रमा इति कूटफक्किकयैव बाधव्युदासः।

नन्वस्तु साध्याविशेषः हेतुसाध्ययोर्भेदाभावात् तत्र यदि साध्यं सिद्धं तदा सिद्धसाधनमेवार्थ(व, अथा)सिद्धं तदा तदात्मनो हेतोरप्यसिद्धतया स्वरूपासिद्धिरिति चेत्?, मैवं, व्यावहारिकभेदेन त्वयाभ्युपगम्यमानेन भिन्नेन हेतुना सकलाभासव्युदस्तेन सिद्ध्यन् भेदः पारमार्थिको भूत्वा सेत्स्यतीत्यदोषात्।

ननु हेतूनामसत्त्वादेव स्वरूपासिद्धिरस्तु, न हि हेतूनपि सतो वयमङ्गीकुर्म इति चेत्? तर्हि असिद्धिरप्यसती कथम् अनुमानमपहस्तयिष्यति। सती चाऽसिद्धिस्त्वया मम पीडयाऽपि नाङ्गीकर्तव्या, असत्याप्यसिद्ध्या असाधकत्वं वास्तवं सेत्स्यतीति न दोषः। मया च यादृशी असिद्धिः दोषत्वेन मन्यते सा च नास्त्येव प्रकृते येन मद्दिशापि दोषाय साऽवकाशमासादयेत्। एतेनाश्रयासिद्धिः परिहृता।

नन्वस्तु व्याप्यत्वासिद्धिः, हेतुसाध्ययोर्भेदे सति व्याप्तिः स्यात्। भेदः व्याप्यस्यैव साधनीय इति दुर्घटत्वमिति चेत्? मैवम्, आपाततस्त्वदभ्युपगम्यमान-व्यावहारिकभेदमादायैव व्याप्तिसिद्धेः। वस्तुगत्या भेदज्ञानं व्याप्तिजनकं व्याप्तिज्ञानजनकं वा? नाद्यः, व्याप्तेर्भेदज्ञानजन्यत्वानभ्युपगमात्। न द्वितीयः, साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्कत्वज्ञानस्य भेदज्ञानानुपजीवकत्वात्। अभ्युपेत्य ब्रूमो यो यो धूमवान् स वह्निमानित्याकारेण गृह्यमाणायां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याप्तावभेदज्ञानस्यैवोपगमात्। अत एव साधनसमानाधिकरणान्योन्याभावाप्रतियोगिसाध्यवत्कत्वमित्येवाभेदगर्भां व्याप्तिं वर्णयन्ति।

नन्वस्तु सिद्धसाधनं व्यावहारिकस्य भेदस्य सिद्धत्वादिति चेत्? न, भेदं पक्षीकृत्य वेद्यत्वेन पारमार्थिकत्वसाधनात्।

ननु वेद्यत्वं न पारमार्थिकत्वव्याप्यं तस्य पारमार्थिकत्वाभावव्याप्यत्वाद् इति चेत्? मैवं, वेद्यत्वस्य ब्रह्मणि पारमार्थिकेऽपि गत्वात्। तत्र वेद्यत्वं नास्ति, किन्तु स्वयमेव तद् वेदनात्मकमिति चेत्? ब्रह्मणि वेद्यत्वं नास्तीत्यत्र ब्रह्मपदेन ब्रह्मोपस्थाप्यते न वा? आद्ये वाक्येनैव वेद्यत्वम्। अन्त्ये ब्रह्मणि वेद्यत्वनिषेधस्त्वया कर्तुं न शक्यः वेद्यत्वनिषेधकेन वाक्येन ब्रह्मणोऽनुपस्थापनात्। ब्रह्म वेदनत्वान्न वेद्यमित्यनुमानपक्षेऽपि पक्षोपस्थितौ वेद्यत्वमवर्जनीयम्। पक्षानुपस्थितौ वेद्यत्वमवर्जनीयं, निषेधाभावात्।

नन्वस्तु सत्प्रतिपक्षः, तथा हि प्रपञ्चो मिथ्या, वेद्यत्वात्, शुक्तिरजततादात्म्यवत्। भेदो न पारमार्थिकः, व्यावहारिकत्वात्, तरङ्गप्रसङ्गानुभूतचन्द्रभेदवत्। पटादयो न पारमार्थिकाः, जडत्वात्, शशशृङ्गवदिति चेत्? मैवं; प्रथमानुमानस्य ब्रह्मणि व्यभिचारित्वात्, दृष्टान्तस्य[च] साध्यविकलत्वात्। साध्यञ्च मिथ्यात्वं यदि अपारमार्थिकत्वं तदा साध्याप्रसिद्धिः। अथ व्यावहारिकत्वमेव, तदा सिद्धसाधनम्। अथ ब्रह्मभिन्नत्वं तथापि सिद्धसाधनम्। अथ सकलविधिनिषेधव्यवहाराभाजनत्वं तदा व्याघातः प्रपञ्चो मिथ्येति व्यवहाराभाजनत्वाङ्गीकारात्। अथ मिथ्यात्वं भ्रमविषयत्वं तथापि सिद्धसाधनं कदाचित् कस्यचिद् भ्रमविषयत्वाङ्गीकारात्। न हि भ्रमविषयत्वं प्रमाविषयत्वविरोधि, एकत्रैव रजतत्वे उभयदर्शनात्। अथ प्रमाभूतज्ञानाविषयत्वमेव मिथ्यात्वं तर्हि साध्याप्रसिद्धिः। अथ सदसद्भ्यामनिर्वचनीयत्वमेव मिथ्यात्वं तर्हि नायं वस्तुदोषः अपि तु तव निर्वचनाशक्तिरिति। यदि निर्वचनं समीहसे तदास्मदाराधनाय यतस्व। त्वयाऽपि निर्वक्तुं न शक्यत इति चेत्? तवोन्मत्तस्य पुरस्तादेवमेव। अथ सत्त्वासत्त्वसदसत्त्वपक्षेषु दूषणदर्शनादनिर्वचनीयत्वमेव प्रपञ्चस्यावधारयाम इति चेत्? अनिर्वचनीयत्वेऽपि दोषं पश्यसि न वा? आद्ये तदपि कथमवधारितवानसि। न चेत्? तदाऽनिर्वचनीयत्वेनैव वास्तवेन धर्मेण व्यवस्थितः प्रपञ्चो ब्रह्मभिन्नतया व्यवस्थाप्यत इत्यद्वैतपक्षाय त्वयैव दत्तो जलाञ्जलिः। अथानिर्वचनीयत्वमप्यपारमार्थिकमेव तदा मदभिमतं निर्वचनीयत्वमेव त्वया प्रपञ्चस्य सम्पादितमिति न विवादः। अथ न निर्वचनीयत्वं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाप्यनिर्वचनीयत्वमित्युभयाभाववत्त्वमेव प्रपञ्चस्याङ्गीकुर्म इति चेत्? तर्हि उभयाभाववत्तयैव व्यवस्थित इति सिद्धो भेदः। अथ विरोधादेवमपि नाङ्गीकरोमि निर्वचनीयत्वानिर्वचनीयत्वयोः परस्परविरहव्याप्यतया परस्परविरहात्मता तत्रैकतरस्यावश्यकत्वादिति चेत्? तर्हि तेनैव प्रकारेण व्यवस्थितः प्रपञ्चः। अथ सर्व एव पक्षा दुष्टा इति न सत्त्वं नाप्यसत्त्वं न सदसत्त्वं न निर्वचनीयत्वं नानिर्वचनीयत्वं नोभयाभाववत्त्वं, नान्यतरवत्त्वम्। अत एव प्रपञ्चोक्तिरिति चेत्? तर्हि दुष्टत्वमेव पारमार्थिकम्। एतावतैव अदुष्टा ब्रह्मणो भेदसिद्धिः। दुष्टत्वमपि न पारमार्थिकमिति चेत्? अदुष्टत्वं तर्हि पारमार्थिकमित्यायातम्। अत एव प्रपञ्चस्य ब्रह्माभेदं मन्यामहे। अदुष्टत्वेनैकत्वादिति चेत्? न केवलमदुष्टत्वेनैक्यम्। किन्तर्हि? सत्त्वेनाभिधेयत्वेन प्रमेयत्वेन ज्ञेयत्वेन धर्मित्वेन धर्मत्वेन च रूपेण प्रपञ्चब्रह्मणोर्भेदो नास्तीति ममाभ्युपगमादिति मुण्डो भव। तर्हि भेदः कथमिति चेत्? अवान्तरधर्मवत्तयेति गृहाण।

अथ मिथ्यात्वं धर्ममेव किञ्चित् प्रमेयत्वादिवत् पारमार्थिकं साधयसि सत्प्रतिपक्षेण तर्हि मत्साध्यभेदाविरुद्धतया सत्प्रतिपक्षस्तावदयं न भवतीत्यलं कलहेन।

ननु विपक्षबाधकतर्कशून्यत्वात् सन्तु व्याप्यत्वासिद्धाः सर्वे हेतव इति चेत्? न, लौकिकवैदिकव्यवहारविप्लवरूपविपक्षबाधकतर्कस्य पूर्वमेव दर्शितत्वात्। भवतु वा व्यवहारविप्लवः किं नश्छिन्नमिति चेत्? एवमिष्टमनिष्ट-कोटौ निवेशयतस्तव पराजयादप्यबिभ्यतो निर्लज्जस्य स्वक्रियास्ववचनादि-व्याघातादयोऽपि दोषाः प्रतिभाशोषाय नालङ्कर्मीणा इति सचेतसामुपेक्षैवेत्यलमनेन।

नन्वस्तूपाधिरेव कश्चिदिहानुपलभ्यमानोऽपि शङ्क्यमानः, एतावताऽपि हेतवः सन्दिग्धव्याप्तिकाः न साध्यसाधनाय न पर्याप्ताः। तथा चोक्तम्—

यावच्चाव्यतिरेकित्वं शतांशेनापि शङ्क्यते।
विपक्षस्य कुतस्तावद्धेतोर्गमनिकाबलम्।।

इति चेत्? मैवं, तवोपाध्युपगमो यद्यसाधकत्वसाधनाय तदा तत्रापि शङ्क्यमानोपाधिरस्तु, तथा च स्वकार्यक्षमत्वेनोपाधिरुपन्यस्यमानोऽपि शतशस्त्वया न मां पर्याकुलयिष्यति। अथेदमसाधकं शङ्कितोपाधिग्रस्तत्वादित्ययं हेतुः शङ्क्यमानोपाधिरप्यसाधकत्वं साधयिष्यत्येवेति मतं तदा स्थापनानुमानमपि तथैव साध्यं साधयिष्यतीति न हि मां प्रत्येव दोषा दोषाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु सुहृद्भावेन पृच्छामि—शङ्कितोपाधिः कथं नानुमानमाकुलयति। क एवमाह नाकुलयतीति, यदि वाद्युपन्यस्तसाध्यव्यापकत्वेन निश्चितः साधनाव्यापकत्वेन सन्दिग्धः साधनव्यापकत्वेन वा निर्णीतः साधनव्यापकत्वेन सन्दिग्धः कश्चिद्धर्मः प्रतीतिपथमवतरति तदा सन्दिग्धोपाधिर्दोषो भवत्येव। तन्निरासाय चानुकूलस्तर्क एव पटीयान्। यत्र तु सहचारदर्शनव्यभिचारा-दर्शनाकूलतर्कैर्व्याप्तिः परिच्छिन्ना तत्रापि शङ्क्यमानोपाधेर्दोषत्वे धूमादिना वह्न्याद्यनुमितिरपि न स्यात्, तथा चेष्टसाधनतानुमितिरपि न स्यादिति निवृत्तिप्रत्ययानुदये निरीहं जगज्जायेतेति कण्टकोद्धारः।

किञ्चाद्वैते श्रुतिः प्रमाणं प्रमाणान्तरमपि वास्ति। यदि श्रुतिः प्रमाणं तदा तस्याः पारमार्थिकत्वमभ्युपेयम्। न ह्यपारमार्थिकात्पारमार्थिकं ज्ञानमुत्पत्तुमर्हति। अपारमार्थिकात्स्वप्नानुभूतकामिनीसंसर्गात् चरमधातुविसर्गः पारमार्थिकोऽस्तीति चेत्? स्वप्नानुभूतकामिनीतत्संसर्गयोस्तदा बाधेऽपि पारमार्थिकस्योपपादितत्वात्। असन्निकृष्टकामिनीतत्संसर्गो वा तदानीं कथं चरमधातुविसर्गाञ्जनयिष्यतीत्यवशिष्यते तत्र कामिनीतत्संसर्गयोरभावेऽपि तज्ज्ञानाददृष्टसंस्कारादिसहकृतादुत्पद्यमानश्चरम-धातुविसर्गः पारमार्थिकहेतुक एवेति। कामिन्यसत्त्वात्तद्विषयकं ज्ञानमपि कथं सदिति चेत्? तद्विषयकज्ञानसत्त्वात् कामिन्या एव कथमसत्त्वमिति तुल्यम्। कामिन्यास्तत्र स्फुट एव बाध इति चेत्? बाधाच्चेदसत्त्वं तदा स्वप्नकामिनी नोपलब्धेत्यपि तव विपरीतज्ञानमुत्पद्येत येनानुभवस्याप्यसत्त्वमवधारितवानसि। यद्यप्यापाततः कामिनीज्ञानस्य[न] बाधस्तथापि विशेषणस्य कामिन्या बाधे तद्विशिष्टानुभवोऽपि बाधित एवेति चेत्? एवं सति भाविपुत्रज्ञानमपि तत्काले पुत्रासत्त्वेनासत् स्यात्। तत्र भावित्वेनैव पुत्र उपलभ्यते। तच्च तथैवेति कथं तदसत् स्यात्। असन्निकृष्टां कामिनीं सन्निकृष्टत्वेन गृह्णन्ननुभवः कथं सन्नित्यङ्गीकर्तुं शक्येतेति चेत्? एतावतैवापराधेनायं भ्रान्त इत्युच्यते यत्किलातद्देशामतत्कालामपि कामिनीं परमार्थसतीं तद्देशत्वेन तत्कालत्वेन गृह्णाति न त्वलीकविषयतया। तथा चासत्या श्रुत्या परमार्थसत् ज्ञानं न जननीयमित्यप्रमाणं श्रुतिरद्वैते। यच्च ज्ञानं श्रुत्या जननीयं तत्सदसद्वा? आद्ये द्वैतमेव। द्वितीये चासत्त्वेन घटादिभेदज्ञानेन समं श्रुतिजज्ञानस्याविशेषाद् द्वैतमपारमार्थिकम् अद्वैतञ्च पारमार्थिकमिति किङ्कृत एव भेदः।

इतस्तु दूषणोपक्रमा कथा। प्रपञ्चस्यापारमार्थिकत्वं यत्त्वयाभ्युपगम्यते तत्र पारमार्थिकत्वापारमार्थिकत्वयोर्द्धर्मयोर्भेदमभ्युपैषि न वा? आद्ये भेदः सिद्ध एव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्त्ये पारमार्थिकत्वापारमार्थिकत्वयोरन्यतरद्ब्रह्मप्रपञ्चयोरन्यतरस्मिन् विधीयमानं कथं नोभयोरुभयधर्मवत्त्वमापादयिष्यति। तथा च प्रपञ्चः पारमार्थिको ब्रह्म चापारमार्थिकम् इत्यनिष्टमुभयत्रापद्येत। पारमार्थिकत्वापारमार्थिकत्वयोरपि व्यावहारिको भेदोऽस्तीति चेत्? अत एव यदा पारमार्थिकाभेदप्रसङ्गनिबन्धनो दोषस्तदा प्रपञ्चस्यापारमार्थिकत्वं यत्तदेवापारमार्थिकत्वं तस्य ब्रह्मणो वा यत्पारमार्थिकत्वं तदेव प्रपञ्चस्यापारमार्थिकत्वमिति वृथा तत्साधनायायासो वेदान्तिनाम्।

किञ्च भेदाभेदयोर्भेदोऽस्ति न वा? आद्ये सिद्धो भेदः। द्वितीये तव दर्शने यद् भेदखण्डनं तदभेदसाधनं[1] यच्चाभेदसाधनं तद्भेदसाधनमिति मदानुकूल्यं त्वयैव सम्पादितम्। ननु द्वैतमपारमार्थिकमद्वैतं पारमार्थिकमित्यमेव द्वैताद्वैतयोर्भेद इति चेद्? द्वैताद्वैतयोः पारमार्थिकतापारमर्थिकत्वे धर्मौ यदि परमार्थसन्तौ मन्यसे तदा सिद्ध एव भेदः। प्रतियोग्यनुयोगिवृत्तिधर्मयोः त्वयैव पारमार्थिकत्वप्रतिपादनात्।

किञ्च विद्याऽविद्ययोयोर्भेदोऽस्ति न वा? आद्ये सिद्धो भेदः। द्वितीये तयोर्न्निवर्त्यनिवर्तकभावानुपपत्तिः। विद्ययाऽविद्यानिवृत्तावपवर्ग इति हि तव मतं, तच्चाभेदेऽनुपपन्नम्। व्यावहारिकस्तु भेदो निरस्त एव।

अपि च क्षेत्रज्ञपरमात्मनोर्भेदोऽस्ति न वा? आद्ये सिद्ध एव भेदः। अन्त्ये चिदानन्दमयस्य परमात्मनो दुःखमयत्वात् सर्वज्ञत्वशरीरित्वादिविरोधः। उपाधिभेदादेवं स्यादिति चेत्? उपाधिभेदस्य पारमार्थिकस्य त्वयानभ्युपगमात्। अभ्युपगमे वा किमपराद्धमुपधेयभेदेन। उपधेयभेदो हि पारमार्थिको नास्ति, किन्तु व्यावहारिक इति चेत्?, किमुपाधिभेदः पारमार्थिकः। सोऽपि व्यावहारिक एवेति चेत्?, तत्किं ब्रह्मणः क्षेत्रज्ञस्य च परमार्थतो भेदे क्षेत्रादिसम्बन्धस्तस्य पारमार्थिक एव क्षेत्रादिसम्बन्ध एव नास्ति। परमार्थसन् किं ब्रह्मणि तदभेद आपाद्यते चेत्? तर्हि मुक्त्यर्थं ब्रह्मचर्यादिखेदमनुभवतस्तव किं निवारणाय यत्नः। अपारमार्थिकक्षेत्रादिसम्बन्धनिरासायेति चेत्? शशशृङ्गादिनिर्विशेषस्य क्षेत्रादिसम्बन्धस्यानुकूल्यप्रातिकूल्ययोरसमर्थस्य निराकरणे यत्नानर्थक्यात्। निवृत्तिरपि क्षेत्रादीनामपारमार्थिक्येवेति यदि तदा सुतरामायासवैफल्यम्। क्षेत्रादिसम्बन्धापारमार्थिकत्वज्ञानमेव तत्त्वज्ञानं तदुत्पादनाय च योगाभ्यास इति

१. 'तदभेदखण्डनम्' इति पाठो युक्तः प्रतिभाति भेदाभेदयोरैक्यात्, अत एवोत्तरत्र 'यच्चाभेदसाधनं तद्भेदसाधनमि'त्युक्तम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नायासवैफल्यमिति चेत्? एवं सति सत्यज्ञानविषयत्वेन क्षेत्रादिसम्बन्धापारमार्थिकत्वं ज्ञानं च तद्विषयं पारमार्थिकमित्यायातं तथा चाद्वैतं पारमार्थिकं न भवतीत्येवं विद्यया निर्व्यूढमिति विद्यैवानर्थकरी। अथ क्षेत्राद्यपारमार्थिकत्वज्ञानमप्यसदेव तदा क्षेत्रादीनां पारमार्थिकत्वमयत्नसिद्धम्।

अथ ब्रह्मसाक्षात्कारो विद्या तया अविद्या निवर्तते इति मतं तदा नित्यस्य ब्रह्मणो योगाभ्यासजन्यत्वमित्यभ्युपगतं स्यात्, तथा च नित्यत्वविरोधः योगाभ्यासवैयर्थ्यञ्च तदात्मिकाया विद्याया नित्यसत्त्वात्।

अथ शरीराहंप्रत्ययादिरेव मिथ्याज्ञानमित्युभयसिद्धम्। परन्तु शरीरादयः पारमार्थिकास्तेभ्यः कश्चिदन्य आत्मा, स च परमात्मभिन्नः, परमात्मा च नित्यज्ञानेच्छासमवायीत्यादि तावज्ज्ञानं नैयायिकैर्मन्यते। वयं तु ब्रह्मैव केवलं परमार्थसदिति श्रुत्या सम्पाद्य तथैव युक्त्याऽपि परिभाव्य निरन्तरयोगाभ्यासवशात् तादृग्विषयकसाक्षात्कारमुत्पाद्य ब्रह्मसाद्भवतीत्यपवृक्त इत्युच्यत इत्यङ्गीकुर्मः। तथा च न किञ्चिदनुपपन्नमिति चेत्? श्रुत्यादिजनितज्ञानानां ब्रह्मणो भिन्नाभिन्नत्वविकल्पकरणापरित्यागात्। तस्माद्वेदान्तिनां मुमुक्षाऽप्यसती प्रवृत्तिरप्यसती मोक्षज्ञानमप्यसद् विद्याऽप्यसती योगाभ्यासोऽप्यसन्नभेदोप्यसन्नेवेति साधु तीर्थिकत्वाभिमानः। स्वर्गापूर्वादीनान्तु सत्त्वसङ्कथाऽपि नास्ति। ब्रह्मभिन्नप्रमाणस्याप्यसत्त्वेन ब्रह्माप्यप्रामाणिकमेवेति भवन्तु वेदान्तिनः स्वस्थाः।

अद्वैते किं प्रमाणमित्यत्राद्वैतं प्रतीतं न वा? आद्ये प्रश्नानुपपत्तिः। न ह्यप्रतीतदेवदत्तो देवदत्तः श्यामो गौरो वेति पृच्छति। द्वितीये सा प्रतीतिः प्रमा न वा आद्ये यत्तां प्रति करणन्तदेवाद्वैते प्रमाणमित्यवेहि। अन्त्ये अद्वैताप्रमां प्रति किं प्रमाणमिति प्रश्नार्थः। तथा च विरोधपराघात एवेत्यादि खण्डनमनुपपन्नम्। अद्वैते प्रमाणं पृच्छतो नैयायिकस्याद्वैतं प्रतीतमेव। न हि घटाद्वैतं घटे नास्ति ब्रह्माद्वैतं ब्रह्मणि वा। किं तर्हि घटाद्वैतं पटवृत्ति न वेति प्रश्नार्थः, ब्रह्माद्वैतं घटादिवृत्ति न वेति वा। घटादिवृत्तित्वञ्च तद्घटादावेव प्रतीतं तदवृत्तित्वं चाकाशादौ, तथा चान्वयव्यतिरेककोट्योः प्रसिद्धिः। अन्वयकोटिश्च तव व्यतिरेककोटिश्च भेदवादिनामिति कथं प्रश्नानुपपत्तिः। अन्यथा प्रश्नानन्तरं यत्त्वया पृच्छ्यते तदपि न घटेत—तथा हि अद्वैते किं प्रमाणमिति प्रश्नानन्तरं प्रतीतं न वेति यत्त्वया अद्वैतविषयप्रतीतिविषयकः प्रश्नः क्रियते तत्राद्वैतप्रतीतिश्चेत् प्रतीता तदा प्रतीतं न वेति कथं प्रश्नः, न चेत्तदा सुतरां न प्रश्नः। एवं सा प्रतीतिः प्रमा न वेति प्रश्नो न सम्भवतीति प्रश्नखण्डने त्वया क्रियमाणे प्रश्नखण्डनमस्माभिः सञ्चारणीयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु भेदो न प्रतीतः प्रतियोगी भेदं निरूपयति[१] भेदेन अभेदेन वा प्रतिपन्नः?, न तावदाद्यः, निरूपणीयभेदाप्र(ती?)तिपत्तौ भेदेन प्रतीत्यसम्भवात्, सम्भवे वा तत्राप्यनुयोगिनिवृत्तेः। न द्वितीयः, प्रथममभेदेन प्रतिपन्नस्य भेदग्रहानुपपत्तेः, प्रथममभेदप्रतीत्या अभिन्नत्वेन व्यवस्थापितस्य वस्तुनो भेदे भिन्नत्वेन व्यवस्थापितस्याप्यभेदः स्यादिति मदिष्टस्यैव त्वया सम्पादितत्वात्। भेदाभेदाभ्याञ्च तृतीयः प्रकारो न सम्भवत्येव। **'परस्परविरोधे हि न प्रकारान्तरस्थितिः। नैकतापि विरुद्धानामुक्तिमात्रविरोधतः'** इति त्वयैव व्यवस्थापनीयत्वात्। तस्माद् भेदो नास्तीति चेत्?

मैवं, न भिन्नत्वेन प्रतियोगिग्रहो नाप्यभिन्नत्वेन, किं तर्हि घटत्वादिना। एवमधिकरणस्यापि परस्परविरोधश्च न प्रतीतौ किन्तर्हि? वस्तुस्वाभाव्ये, वस्तुनो भिन्नत्वमभिन्नत्वं वेत्यतः प्रकारान्तरं न सम्भवतीति ब्रूमः। प्रतीतिस्तु सामग्रीवशात् कदाचिद्भिन्नत्वेन कदाचिदभिन्नत्वेन कदाचिद् घटत्वेन कदाचित्पृथिवीत्वेन द्रव्यत्वेन सत्त्वेन वेति न किञ्चिदनुपपन्नम्।

अथ यदि प्रतियोगिप्रतीतावपि भेदाभेदयोरेकतरः प्रकाशेऽन्तर्भविष्यतीति तवाग्रहस्तदा अभेदेन प्रतीतः प्रतियोगी भेदे निरूपक इति गृहाण, आरोप्य निषिध्यत इत्यस्माकं सिद्धान्तरहस्यात्। इदं रजतमित्यारोपानन्तरं नेदं रजतमिति भेदग्रहात् तत्र स्वरसतो ह्यारोपोऽन्यत्र त्वाहार्य इति विशेषः। घटः पटो न भवतीति हि प्रतीतिस्तथा घटः पट इत्यारोप्य नेति निषेधप्रतीतिः, यद्येवं तदाऽभेदांशस्यारोपत्वं निषेधभागस्य प्रमात्वं कथं यावता वैपरीत्यस्यापि सम्भवादिति चेत्? न, प्रवृत्तिसंवादादिना भेदग्रहस्य प्रामाण्यावधारणात्। पटाद् भिन्नत्वेन गृहीतस्य घटस्य जलाहरणादीनां पटकार्यविलक्षणकार्याणामवधारणात्। रजताभिन्नत्वेन गृहीतायाश्च शुक्ते रजतकार्यकटकमुकुटादीनामदर्शनादभेदग्रहस्या-प्रामाण्यावधारणात्। तस्माद् घटत्वादिना प्रकारेण गृहीते प्रतियोगिनि स्मृते वा पटत्वादिना प्रकारेण गृहीतेऽधिकरणभेदेनान्योन्याभावात्मना संयुक्तविशेषणताया-मिन्द्रियप्रत्यासत्तौ सत्यां भेदप्रमितिरिति युक्तमुत्पश्यामः।

किञ्च भेदप्रतीतौ न तवापि विप्रतिपत्तिर्येन तव सामग्रीवैकल्योद्भावनं घटेत। किन्तु सा प्रतीतिरप्रमेति तवाभ्युपगमः। प्रमेत्यस्माकम्। तथा च भेदग्रहसामग्रीवैकल्योद्भावनस्य स्वोत्पत्तिसामग्रीवैकल्यविभावनस्येव तवोपहास-जनकत्वमिति।

---

१. अत्र पाठः त्रुटित इव भाति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु भेदग्रहणपूर्वकं वा वस्तुग्रहणं, वस्तुग्रहपूर्वकं वा भेदग्रहणं, भेदवस्तुनोर्वा युगपदेव ग्रहणम्? आद्ये प्रतियोगिग्रहाधीनो भेदग्रह इति सिद्धान्तव्याकोपः। भेदस्य निष्प्रतियोगिकस्य ग्रहणाशक्यता च। विशेषणतया प्रत्यासत्त्या ग्राह्यो भेदस्तथा च वस्तुनोऽग्रहे किंविशेषणीभूतो भेदो भासते। द्वितीये तु प्रथममभिन्नतया यद्वस्तु गृहीतं तत् पश्चात् कथमिव भिन्नतया गृह्येत। तृतीये तु वस्तुग्रहणं भेदग्रहणं प्रति कारणमिति तवाभ्युपगमः। स च भेदवस्तुनोर्युगपद्ग्रहे व्याहन्येत, कार्यकारणधियोर्यौगपद्यायोगात्, यौगपद्ये वा सव्येतरविषाणवत् कार्यकारणभावानुपपत्तिः। तस्माद्भेदग्रहो नास्त्येवेति चेत्?

मैवं, घटत्वपटत्वादिना प्रकारेण प्रतियोग्यनुयोगिनोर्ग्रहणानन्तरं भेदप्रमेत्युक्तत्वात्। अथ कुटिलवचनैरेव तव सन्तोषस्तदा त्वत्कृतविकल्प-त्रयाभ्युपगम एव, धारावाहिकस्थले भेदपूर्वकमेव वस्तुग्रहणम्। वस्तुग्रहपूर्वकञ्च भेदग्रहणं पूर्वोत्तरज्ञानयोरुभयविषयत्वादुभयग्रहस्योभयग्रहानन्तर्यात्। अन्यत्रापि यत्र भेदग्रहस्तत्र भेदवस्तुनोर्युगपदेव ग्रहणम्। न हि भेदग्रहः क्वचिदपि वस्तुविषयः, अवच्छेदध्रौव्यात्। किन्तु भेदग्रहस्याग्रहपूर्ववस्तुग्रहः केवलोऽप्यस्तीत्यन्यदेतत्। कारणत्वन्तु तस्यैव पूर्ववर्तित्वादित्यन्योन्याभावग्रहे, स्वरूपभेदे तु विकल्प एव नावतरति तस्य वस्तुस्वरूपत्वात्। वैधर्म्योत्तरसविकल्पकेन ग्रहे युगपदेव ग्रहणम्। निर्विकल्पकेनापि विशकलितयोर्युगपदेव ग्रहणम्। उपाधिरूपवैधर्म्यस्थले तु तत्सामग्रीसमावेशवशाद्यथायोगं त्रयमपीत्यलं भूतविकल्पेषूत्तरोत्तरवैचित्र्येणेति। व्यावहारिकभेदग्रहे यादृशी तव सामग्री सैव पारमार्थिकभेदग्रहेऽप्यस्माकमपीति युक्त्यन्तरं सर्वत्र भेदग्रहसामग्रीवैकल्योद्भावनावसरे एव विधेयमुत्तरोत्तरयुक्ति-प्रतिसन्धानविधुराणां पुरस्तात्।

ननु वैधर्म्यं भेदो न भवति। तथा हि—घटपटयोर्घटत्वपटत्वरूपस्य वैधर्म्यस्यापाततोऽङ्गीकारेऽपि तयोस्तादृशधर्मान्तराभावाद्भेदानुपपत्तावभेदपर्यवसाने तदा लिङ्गितयोर्घटपटयोरप्यभेदपर्यवसानात्। घटत्वपटत्वयोरपि वा तादृशवैधर्म्याङ्गीकारेऽनवस्थापात इति चेत्? न, घटत्वेन पटत्वेन स्वत एव विलक्षणेन घटपटयोर्भेदसिद्धौ घटपटरूपाश्रयात्मकवैधर्म्येण घटत्वपटत्वयोरपि भेदात्। एवं सत्यन्योन्याश्रय इति चेत्? न, घटपटयोर्भेदग्रहावसरे घटत्वपटत्वयोरपि भेदग्रहणस्यानावश्यकत्वात्। न हि पटत्वाद् भेदेन गृह्यमाणं घटत्वं प्रतियोगितावच्छेदकं घटत्वाद्भेदेन गृह्यमाणं पटत्वं वाऽधिकरणतावच्छेदकमित्यभ्युपगम्यतेऽस्माभिः। किन्तर्हि? स्वरूपत एव गृह्यमाणे घटत्वपटत्वे वास्तवभेदवतो प्रतियोगित्वमधिकरणत्वञ्चावच्छिन्त इति ब्रूमः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु यदि घटत्वपटत्वयोस्तदानीं ततो भेदग्रहो नापेक्षितस्तदा घटत्वमेव प्रतियोगिनमधिकरणञ्चावच्छिन्द्यात्। तथा च घटोऽपि घटभिन्नो गृह्यतेति चेत्? कः सन्देहो यदि भिन्नः स्यात्। कथं न भिन्न इति चेत्? न, कदाचिदपि तत्त्वेनाग्रहात्। कथं न ग्रह इति चेत्? न, ग्राह्याभावादिति। वस्तुतस्तु वास्तवभेदवत्त्वेन प्रतियोग्यधिकरणतावच्छेदकधर्मयोर्विशेषितत्वात्। स एव वास्तवो भेदस्तयोः। कथं गृह्यते वैधर्म्याभावादिति चेत्? भिन्नयोराश्रयोरेव वैधर्म्यात्। तथा चान्योन्याश्रय इत्युक्तमिति चेत्? न, अन्योन्यभेदग्रहकालेऽन्योन्यभेदग्रहस्यानुपजीव्यत्वात्। किञ्च घटत्वे समवेतधर्माभावेऽपि घटेतरावृत्तित्वे सति सकलघटवृत्तित्वादे-धर्मस्याङ्गीकारात्। एवं तत्र तत्रापीत्यनवस्था स्यादिति चेत्? न, अस्तु [तथा,] परन्तु घटपटग्रहकाले तेषामपि धर्माणां ग्रहो नापेक्ष्यते येनानवस्थामूलक्षतिः स्यात्। तावतां धर्माणामङ्गीकारे सप्तपदार्थीव्याकोप इति चेत्? न, यदा यदा यस्य धर्मस्य त्वया सप्तपदार्थीबहिर्भावः शङ्कनीयः तद[ा]स्माभिरमीषामेव पदार्थानामन्योन्य-विशेषणविशेष्यभावापादनेन साक्षात्सम्बन्धपरम्परासम्बन्धस्वरूपसम्बन्धैः सप्तपदार्थ्यामेवाभिनिवेशनीयत्वादिति सिद्धो वैधर्म्यभेदः।

ननु सत्यामद्वैतश्रुतौ कथं भेदप्रत्यक्षमभिमतविषयं स्यात्। प्रत्यक्षेणैव बलवता श्रुतिजबुद्धिर्बाधनीयेति चेत्? बाध्यतां समाने विषये, न हि घटपटौ भिन्नाविति प्रत्यक्षं घटपटयोरिव श्रुतिजधिया समं स्वस्याभेदं गृह्णाति। तथा च तत्र लब्धपदा श्रुतिरद्वैतं बोधयतीति प्रत्यक्षश्रुतिजधियोरभेदे त्वबाध्यबाधकभाव इति चेत्?

मैवं, भेदग्राहिप्रत्यक्षस्य श्रुतिजधिया सममद्वैते न केवलं त्वदभीष्टसिद्धिरपि तु ममाप्यभीष्टमेवं सेत्स्यत्येव यावता सकलानुभूयमानभेदप्रत्यक्षस्य श्रुतिजधिया बाध्यत्वस्य त्वयैवोपपादितत्वात्।

ननु घटपटभेदग्राहिण्या धिया घटपटयोरेव भेदः परस्परं ग्राह्यो न तु घटात्पटाच्च स्वस्या अपि। तत्र तस्याः स्वप्रकाशरूपत्वेऽप्यशक्तेः स्वप्रकाशतया हि स्वं स्वविषयश्च भासते न तु स्वविषये स्वप्रतियोगिको भेदोऽपीति, नैयायिकैश्च स्वप्रकाशताया अनभ्युपगमात्। तथा च घटपटयोः स्वभेदग्राहिप्रत्यक्षेण श्रुत्याऽभेदे सिद्धे तदभिन्नाभिन्नतया घटपटयोरप्यभेदोऽवर्जनीय इति चेत्?

मैवं, यावता वैपरीत्यस्यापि सम्भवात्। तथा हि दृढतरप्रत्यक्षेण घटपटयोर्भेदे गृहीते घटभिन्नपट[ा]भिन्नबुद्धेरपि घटभेदसिद्धिरेवं पटभिन्नघटाभिन्न-बुद्धेरपि पटभेदसिद्धिः। भेदप्रत्यक्षं श्रुत्या कलुषीकृतप्रामाण्यं कथमुत्तरोत्तरबुद्धिधारा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भेदसाधकं स्यादिति चेत्? त्वदभिमतपरतायां श्रुतिरपि सन्दिग्धप्रामाण्या कथं प्रत्यक्षं बाधेतेति तुल्यम्।

ननु घटभिन्नत्वं पटे प्रत्यक्षसिद्धं, पटभिन्नत्वं बुद्धौ न त्वयाऽभ्युपगम्यते। तथा च घटभिन्नाभिन्नतया बुद्धेः कथं घटभेद इति चेत्? तर्हि त्वत्स्वीकृतो घटाभिन्नाभिन्नत्वमपि हेतुः पटेऽस्माभिर्नाङ्गीक्रियते, येन घटपटयोरभेदः स्यात्। एवञ्च यथा यथा तदभिन्नाभिन्नत्वेन त्वया भेदः साध्यः तत्र तत्र तद्भिन्नाभिन्नतया मया भेद एव साधनीय इत्यादिभेदस्य प्रत्यक्षसिद्धतया तदुत्तरोत्तरबुद्धिधाराभेदेऽपि वज्रकराल इत्येव—

आद्यधीवेद्यभेदीयाप्यऽन्यथाऽनुपपन्नता।
स्वज्ञानापेक्षणादन्ते बाधते नाद्वयश्रुतिम्[१]।।

इति काकुनकारमात्रेण त्वद्गाथाऽस्माभिरपि पठनीया।

नन्वस्तु प्रतिबन्दिग्रहः। स्वरूपं तावद्विचार्यतां, घटपटभेदग्राहिधिया समं घटपटयोर्भेदः कथं ग्राह्यः, यदि बुध्यन्तरेण तदा तत्राप्यनुयोगस्तदवस्थः, एवमुत्तरोत्तरबुद्धिधारानुसरणे चरमबुद्ध्याऽपि समं भेदाग्रहे तत्र पदमारोप्य श्रुतिः पूर्वपूर्वविषया तद्विषयपर्यन्तमद्वैतमासञ्जयिष्यत्येवेति चेत्?

मैवम्, अनयोर्भेदो न गृहीत इति यदेव त्वयोदाहरणीयं तयोस्तद्वाक्येनैव प्रमाणेन तदानीमेव भेदो ग्राह्यः, न ह्यनयोरिति त्वद्वचसा द्वित्वं न भासते। अनेन समं भेदो न गृहीत इत्यभिधाने च सुतरां भेदग्रहः सममित्यस्य भेदोपस्थापकत्वात्। वादिवाक्यत्वेन मद्वाक्यं प्रमाणमेव न भवतीति चेत्? विषयाबाधादेव प्रामाण्याभ्युपगमात्। तर्ह्यनयोरभेद इति मम वाक्यादभेद एव प्रतीयतामिति चेत्? न, तत्रायोग्यतया परस्परव्याघातात्। अनयोरित्यभिधेयद्वित्वात्मकत्वान्वयस्य बाधितत्वात्। एवञ्च श्रुतिपदारोपणार्थं पूर्वं परित्यज्य यदेवोत्तरं त्वयोदाहर्तव्यं तत्र स्वरूपवैधर्म्यान्योन्याभावभेदानां द्वित्वबहुत्वपृथक्त्वादीनां वा त्वद्वचनादन्यतमोपस्थितेरावश्यकतया साक्षादर्थतो वा भेदसिद्धौ बाधबुद्धिपरम्परया च त्वदभिमतार्थसाधनपरश्रुतेः सुदूरमुत्सारणात् प्रत्यावृत्तिशङ्का दूरनिरस्तेति—

सुदूरधावनश्रान्ता बाधबुद्धिपरम्परा।
निवृत्ताऽद्वयाम्नायैः पार्ष्णिग्राहैर्विजीयते।।

---

१. खण्डनखण्डखाद्ये, पृ. १०२ द्रष्टव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति नञन्वयपूरणेन[१] त्वद्गाथैव नः पक्षेऽपि। किञ्च घटपटयोः प्रत्यक्षेण भेदे गृहीते क्रमेण तयोरप्यभेदपर्यवसानं न तावत् श्रुत्या, त्वयैव श्रुतेस्तद्विषयपरीहारेण प्रवृत्त्यभ्युपगमात्। तद्भिन्नाभिन्नत्वादीनामपि हेतूनां प्रत्यक्षबाधादेव तत्राप्रवृत्तेः। उत्तरोत्तरबुद्धिधारायाः प्रत्यक्षताभेदो न गृह्यत इति घटपटयोरपि भेदो मास्त्विति जात्युत्तरभेदः। न हि उत्तरोत्तरबुद्धिभेदग्राहि-प्रत्यक्षोपजीवकं घटभेदग्राहिप्रत्यक्षं तद्धि सामग्रीनिबन्धनोत्पत्तिनिमित्तविषयाबाधात् प्रमाभूतं, तत्परिहारेण विषयान्तरेण वर्तमानयापि श्रुत्यापि बाधितुं न शक्यते। तथा च घटपटौ विहाय जगदभेदं बोधयतु श्रुतिः घटपटभेदप्रत्यक्षकुहरलीनं भेदं सर्वथापि नास्कन्दयितुमीष्टे। एवमुत्तरोत्तरबुद्धिधारायामपि यत्र भेदो ग्राह्यस्तत्र पुनः श्रुतेः प्रवृत्तिरसम्भाविनी दैक्षादिपशावहिंसाश्रुतेरिव तथा च—

आद्यधीवेद्यभेदीयाप्यन्यथाऽनुपपन्नता।
स्वज्ञानापेक्षणादन्ते बाध्यते नाद्वयागमैः।।

इति त्वद्गाथावैरूप्यमस्तु।

किञ्च यद्यावयोरभेदस्तदा जानीहि मम हृदि किमस्ति। ज्ञायते एव यद्यवच्छेदकभेदो न स्यादिति चेत्? अवच्छेदकभेदमङ्गीकरोषि चेदवच्छेद्यभेदे कस्तव द्वेषः। सोऽप्यस्तु व्यावहारिक इति चेत्? तत्किमवच्छेदकभेदः पारमार्थिकस्तथा च जितमस्माभिः। अवच्छेदकभेदोऽप्यपारमार्थिक इति चेत्? तर्हि कथं मम हृदयं न जानासि ब्रह्माभिन्नसर्वम्। अतस्तव हृदि ब्रह्मास्ति चेत्? नूनमृषरात्मासि यदेवं ब्रह्म जानानोऽपि नापवृज्यसे। अविद्याकवलनात्तथा न जायत इति चेत्? अविद्यां ब्रह्मभिन्नां मन्यमानः कथं वा न लज्जसे। नन्वस्तु भेदोऽस्माभिः परं नाङ्गीक्रियत इति चेत्? नास्ति भेद इत्यङ्गीकारादेव भेदः, अभावाकारेऽपि प्रतियोगिनो भेदस्याङ्गीकरणात्। तस्मात्—

एकं भेदास्त्रमादाय नान्यङ्गणयतः क्वचित्।
आस्ते न धीरवीरस्य भङ्गः सङ्गरकेलिषु[२]।।

किञ्च सर्वाभ्यर्हितं ब्रह्म तदेव परमात्मेत्युदीरयामः। तस्यापकृष्टैरितरैः समं भेदेन ज्ञानेन मुमुक्षूणां श्रवणमनननिदिध्यासनादौ श्रुतिबोधिते प्रवृत्तिरस्तु, अन्यथा

---

१. निवृत्तौ नाद्वयाम्नायैः.........इत्यादिरीत्या योजनेन।

२. अयं श्लोकः खण्डनखण्डखाद्ये इत्थं प्राप्यते—'एकं ब्रह्मास्त्रमादाय...........।' (पृ.सं.-१०९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भिन्नत्वेनाप्रतिपन्ने परमात्मनि वा शरीरादीनां साक्षात्कारे सत्येव ब्रह्मसाक्षात्कारोऽपि सम्पन्न इति वृथा योगाभ्यासादिक्लेशस्तदुपदेशो वेत्यवश्यं भेदज्ञानमनुसरणीयम्। अत एव शरीरादिभिन्नत्वेनात्मज्ञानमेव तत्त्वज्ञानम्। तथा च—

धीधना! बाधनायास्यास्तदा प्रज्ञां प्रयच्छथ।
क्षेप्तुं चिन्तामणिं पाणि-लब्धमब्धौ यदीच्छथ[१] ।।

इति तुल्यैव गाथा।

एवं सिद्धे पारमार्थिके भेदे आत्मनानात्वसिद्धिः—(१) आत्मत्वं नानावृत्ति, जातित्वात्, घटवत्, (२) देवदत्तात्मा चैत्रात्मवृत्त्यन्योन्याभावप्रतियोगी, चैत्र-वृत्त्यत्यन्ताभावप्रतियोगिधर्माधिकरणत्वात्, यच्चैत्रात्मवृत्त्यन्योन्याभावप्रतियोगि न भवति, न तच्चैत्रात्मवृत्त्यन्ताभावप्रतियोगिधर्माधिकरणं तस्मात् चैत्रात्मवृत्त्य-न्योन्याभाप्रतियोगीति व्यतिरेकी, (३) ब्रह्म चैत्रमैत्रादिभिन्नम्, अनित्य-ज्ञानानधिकरणत्वात्, यदेवं तदेवं, यथा घटः, अनित्यज्ञानानधिकरणञ्चैतत्, तस्मात् चैत्रादिभिन्नम्, (४) अहं ब्रह्मप्रतियोगिकपारमार्थिकभेदाधिकरणं, सुखाद्यत्यन्ता-भावविरोधिधर्माधिकरणत्वात्, दुःखात्यन्ताभावविरोधिधर्माधिकरणत्वात्, द्वेषात्यन्ताभावविरोधिधर्माधिकरणत्वात्, धर्मात्यन्ताभावविरोधिधर्माधिकरणत्वात्, अधर्मात्यन्ताभावविरोधिधर्माधिकरणत्वात्, भावनात्यन्ताभावविरोधिधर्माधि-करणत्वात्, नित्यज्ञानानधिकरणत्वात्, अनित्यज्ञानात्यन्ता-भावविरोधिधर्मा(न?)धिकरणत्वात्, नित्येच्छानधिकरणत्वात्, [अ]नित्येच्छात्यन्ताभाव-विरोधिधर्माधिकरणत्वात्, नित्यप्रयत्नानधिकरणत्वात्, अनित्यप्रयत्नात्यन्ता-भावविरोधिधर्माधिकरणत्वाद्वा, न यदेवं तदेवं यथा ब्रह्म तस्मात्तथा। वैचित्र्यापत्तिरेव विपक्षबाधकस्तर्कः सर्वत्रेति।

ननु नित्यज्ञानाद्यधिकरणत्वं न ब्रह्मणः किन्तु तद्रूपत्वमेव, श्रूयते हि 'नित्यं ज्ञानमानन्दं ब्रह्म' इति चेत्? यदि ब्रह्माभिन्नं सर्वं तदाऽनित्यज्ञानेच्छादिरूपत्वं तस्य किं नाभ्युपैषि। 'नित्यं विज्ञानमानन्दं ब्रह्मे'ति श्रुत्या नित्यज्ञानसुखात्मकतामात्रं प्रतिपादयन्त्या दुःखादिरूपताऽप्रतिक्षेपादिति चेत्? तत्किम् 'एकमेवाद्वितीयं ब्रह्मे'ति श्रुतिगवीं हन्तुमुद्यतोऽसि, यया दुःखाद्यात्मकत्वमपि ब्रह्मणः प्रतिपाद्यते।

अस्तूभयरूपत्वं ब्रह्मण इति चेत्? तर्हि सुखलोलुपतया दुःखात्यन्ताभाव-स्वरूपमुक्तिवादिनमुपहससि स्वयञ्च दुःखमयीं मुक्तिमङ्गीकरोषि इति नूनमुन्मत्तोऽपि

२. खण्डनखण्डखाद्ये, पृ. १३४ द्रष्टव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वया जितः। यद्यपि ब्रह्मणः सुखदुःखरूपत्वं तथाऽपि मुक्तिदशायां सुखरूपताभिव्यक्तिमात्रं न तु दुःखरूपताभिव्यक्तिरपि येन दुःखमपि मुक्तिः स्यात्। श्रूयते हि 'आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठित'मिति चेत्? तत्किं मुक्तौ ब्रह्मणः स्वरूपमपि हीयते तर्हि सुखस्वरूपताऽपि कथं स्यात्। एवमनियमे वा न निःशङ्कः प्रवर्तेत। श्रुत्यवष्टम्भादेव प्रवर्तत इति चेत्? श्रूतीनामेव त्वद्दिशा परस्परकलहात्।

तर्हि श्रुतीनां का गतिः? 'नित्यं विज्ञानमानन्दं ब्रह्मेति' श्रुतेस्तावदयमर्थः—विशिष्टं ज्ञानं यस्येति विज्ञानं, ज्ञानस्य च विशेषो नित्यतैव। आनन्दः सुखं, तद्यस्यास्तीत्यानन्दं, मत्वर्थीयाच्प्रत्ययेन नपुंसकलिङ्गताऽपि समासाद्यते। एतच्चापरब्रह्मस्वरूपकथनम्। 'द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव चे'त्यत्र किमपरं ब्रह्मेत्याकाङ्क्षाबलात्। तथा च **आनन्दम्**-आनन्दवत्त्वं, **ब्रह्मणः**-अपरब्रह्मणः, **रूपं**-स्वरूपम्। चो हेतौ। यतो मोक्षे जीवन्मुक्तिदशायां तत् **प्रतिष्ठितं**-व्यवस्थितम्। जीवन्मुक्तिदशायां परमानन्दसाक्षात्कारादित्यर्थः। अन्यथा ब्रह्मणो नित्यत्वे सुखमपि नित्यमितीदानीमपि साक्षात्क्रियेत। ब्रह्मस्वरूपस्य सुखस्यानित्यत्वमसम्भावितमेव। नित्यस्यापि सुखस्याविद्यादशायां नाभिव्यक्तिरिदानीमिति चेत्? तकिमविद्यायां निवृत्तायां निवृत्ते शरीरेन्द्रियादौ नित्यसुखसाक्षात्कारः। सुखमुत्पद्यते पूर्वं, सन्नेव वा साक्षात्कारः स्वाभिन्नं सुखमिदानीं न विषयीकरोति, मोक्षदशायां करोतीति मतम्। आद्ये तस्य साक्षात्कारस्योत्पादचिन्ता तावदास्ताम्। (तस्य?) भावस्य तस्य निवृत्तौ पुनः संसारा(परा?)वृत्तिरावश्यिकी। उत्पन्नोऽपि ध्वंसवदविनाशीति चेत्? तर्हि ब्रह्मभिन्नत्वे(न?)[१] कथं नाद्वैतभङ्गः। ब्रह्माभिन्नत्वे (न?)[२] कथमुत्पादः। द्वितीये तु साक्षात्काराभिन्नस्य नित्यस्य सुखस्य कोऽग्रे विषयीभाव इति त्वमेव परिभावय। अविद्यानिवृत्तिरेव विषयीभाव इति चेत्? तस्या एव किं निवर्तकम्। ब्रह्मसाक्षात्कारश्चेत्? स पूर्वमेव किं तां न न्यवर्तयत्। पूर्वं[स]नासीदिति चेत्? तत्किं तदभिन्नं ब्रह्मापि नासीत्। ब्रह्मभिन्न एव साक्षात्कारो विद्याभावाद्विद्याविरोधिनीमविद्यां निवर्तयतीति चेत्? साक्षात्कारः सत्यश्चेत् तेनैव भेदः, असत्यश्चेत्तदाऽसत्यत्वाविशेषे कथं न विपरीत एव निवर्त्यनिवर्तकभावः। तस्माद् ब्रह्म पमरेश्वर इत्यनर्थान्तरम्।

तच्च क्षेत्रज्ञेभ्यो भिन्नं नित्यज्ञानेच्छाप्रयत्नाधिकरणं दुःखसुखधर्माधर्मभावनाद्वेषरूपक्षेत्रविशेषगुणानधिकरणं जगत्कर्तृसंहतृ च। (क्षेत्रज्ञात्मभिन्नत्वेन?)

१-२ अत्रोभयत्र मातृकायां तृतीयान्तपदप्रयोगो दृश्यते। सप्तम्यन्तत्वे तु स्वारस्याधिक्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

131026

शरीरादिभिन्नत्वेन क्षेत्रज्ञस्य च साक्षात्कारः श्रवणमननिदिध्यासनादेरनन्तरभावी सवासनमिथ्याज्ञानोन्मूलनव्यापारः समानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसरूपं मोक्षं जनयित्वा निवर्तते। अदृष्टनाशात्स्वजयसंस्काराददृष्टनाशा(शका)देव वा तन्निवृत्तिरिति। स च प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानरूपषोडशधाविभक्तसप्तपदार्थीप्रत्याकलनपरिशोधितपरमन्यायमार्गात्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गरूपहेयोपादेयभूतद्वादशविधप्रमेयसमूहालम्बनरूपसाक्षात्कारसमनन्तरभावी केवलात्मनिर्विकल्पकरूपः। तत्र च निर्विकल्पके आत्मभिन्नं न किमपि भासते। निर्गुणनिरञ्जनादिश्रुतयोऽपि तमेवावधीकृत्य प्रवृत्ताः। पारमार्थिकत्वापारमार्थिकत्वविभागोऽप्युपनिषदि साक्षान्मोक्षानुकूलत्वतदनुकूलत्वविरहप्रयुक्त एव। **शङ्कराचार्य**प्रभृतीनामपि तदेव तात्पर्यमिति युक्तमुत्पश्यामः। तस्मात्—

प्रामाणिको निषेधश्चेत् भेदः प्रामाणिकस्तदा।
निषेधश्चेन्न भेदस्य भेदः प्रामाणिकस्तदा।।

अद्वैतसिद्धिश्चेत्सत्या सिद्धं द्वैतं ततस्तया।
अथ नाद्वैतसिद्धिश्चेत् सिद्धं द्वैतं ततस्तया।।

सत्या श्रुत्याऽऽस्थिते द्वैते कथं द्वैतं न सेत्स्यति।
असत्यैरास्थिते द्वैते कथं द्वैतं न सेत्स्यति।।

अद्वैतं कोऽपि धर्मश्चेद् ब्रह्मण्यस्तीति मन्यसे।
तर्हि द्वैतं समायातं न चेद् द्वैतं निरङ्कुशम्।।

ब्रह्मैवाद्वैतमिति चेत्? न विवादस्तदाऽऽवयोः।
ब्रह्मणः श्रुतिवेद्यत्वं केन नाभ्युपगम्यते।।

आत्मन्याजानिकं भेदमजानाना मुमुक्षवः।
माभूवन्निष्फलायासा इति भेदः प्रकाशितः।।

।। इति महामहोपाध्यायश्रीशङ्करमिश्रकृतौ भेदप्रकाशापरनामधेयं भेदरत्नं समाप्तम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri